१. कर्मानुसारेणाम्नाताः मै। २. नास्ति ब[१]। ३. °ज्यन्ते ब[२-५] वा वि। ४. यो विकारः मूको.। ५. नास्ति मूको.। ६. असिद्धः ब[३,५] वा वि। ७–७. अनुत्स्वेतस्र ब[१,३-५] वि; अनुत्स्वेतस्य ब[२]; अनु स्वेतस्य मै; अनुस्वेतस्य वा। ८. आम्नायभावात् ब[२,३,५] मै। ९. °दर्शनः ब[१] मै। १०. °यने ब[१,२,५]। ११. एतत्तस्येति ब[२,३] वा। १२. यो ब[२-५] वा वि। १३–१३. मन्त्रसमाम्नायादेव ब[१]; मन्त्रस्य मन्त्रसमाम्नायस्य आम्नायादेव ब[३-५]; मन्त्रस्य मन्त्रे समाम्नायस्य आम्नायादेव वि; मन्त्रसमाम्नायस्य आम्नायादेव ब[२] मै। १४–१४. स्वाध्याययो° ब[२-५]; योगापत्तिः वा; योगोपत्तिः वि। १५. नास्ति मूको.। १६. सा च मै। १७. तस्माद्यथाशब्दो मै। १८. °मार्थो ब[३-५]। १९–१९. °द्गातारमिति वितानीति ब[३-५] वा वि। २०. °कृत एव मै। २१. वितानेककर्माणि ब[१,२,४] वा; विताने कर्मणि मै। २२–२२. योगापत्तिं मै।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

दर्शपूर्णमास
Digitized by Madhuban Trust

[योगशब्दार्थः]

योगो नाम ऋक्प्रगाथतृचसूक्तानाम् अनुक्रमेण योजनम् । योगः[1] स्वाध्याये अग्निमीळादिषु[2] अन्यथाक्रम आम्नातः । वितानकर्मणि अन्यथा विधीयते—'प्र वो वाजा अभिद्यवः' (ऋ ३, २७, १) 'अग्न आ याहि वीतये गृणानः' (ऋ ६,१६,१०) 'ईळेन्यो नमस्यः' (ऋ ३,२७,१३) इत्येवमादिषु[3] ।

[आपत्तिशब्दार्थः]

आपत्तिर्नाम स्वाध्यायगतं[4] समाम्नायमनुगृह्णाति [5]संज्ञान्तराणि विकारान्तराण्यापन्नम्[5] । यथा [6]पादाऽर्धर्च-ऋक्-प्रगाथ-तृच-सूक्तानुवाकाध्याय-मण्डलादीनि संज्ञान्तराण्यापन्न उदात्तानुदात्तस्वरितप्रचयादिस्वरान्तरापन्नो वितानकर्मणि[7] स एव समाम्नायः संज्ञान्तराण्यापद्यते[8] सामिधेन्यादीनि[9], अनुवचनाभिष्टवनसंस्तवनादि च[10] संज्ञान्तरमापद्यते[11] । [12]तत्राप्युदात्तानुदात्तस्वरिता ऐकश्रुत्यमापद्यन्ते[12] । [13]ऋगन्त्यो वर्णो वर्णान्तरमापद्यते[13] । प्राकृतं छन्दो बृहतीकारादिवद्[14] [15]अन्यच्छन्दोऽनुष्टुबादि चेत्[15] छन्दोऽन्तरमापद्यते[16] । [17]सन्धौ क्रियमाणे प्रत्यासन्नः[17] शब्दान्तरमापद्यते । सा[18] [19]आपत्तिरित्युच्यते । योगं च[19] आपत्तिं च वक्ष्याम इति । एवमाक्षेपः शास्त्रस्याऽस्य विस्तरः सर्व इति । [20]अथ विधि.[20] (इत्यर्थविधिः ?) एष सर्वार्थः ।

[सूत्रारम्भप्रयोजनम्]

इदानीं विशासनम्[21] । अस्मात् सूत्रारम्भात् स्वाध्यायवितानयोरेकार्थत्वं दर्शयति । कथम् । वैतानिकानि कर्माणि[22] स्वर्गार्थानि । स्वाध्यायोऽपि स्वर्गार्थ एव । एवं[23] श्रुतिः—'यं यं क्रतुमधीते तेन तेन हास्य क्रतुनेष्टं भवति' (तैआ २,१५) इति । 'स्तुवञ्छंसन् द्रविणं सद्य आप' (ऋ ४, ५१, ७) 'क ईं नि येमे कतमस्य जग्मतु-र्विप्रस्य वा यजमानस्य वा गृहम्' (ऋ १०,४०,१४) 'समानमु त्यम्' (ऋ १०,४१,१)

---

१. योगः योगः ब^{3} वा वि; योगः स योगः मै । २. °मीळादि मूको. । ३. तु. आश्री १, २, ७ । ४. °यागतः ब^{1,4}; °यगतः ब^{2,3,5} मै । ५–५. °न्तराग्निवि° मूको. । ६. पादोऽर्धर्च°-मूको. । ७. °ताने क° ब^{1}; °तानके क° ब$^{3-5}$ वा वि । ८. संज्ञान्तरां नोपपद्यते ब$^{2-5}$ मै वा वि । ९. °न्यादि ब^{3,4} । १०. नास्ति मूको. । ११. °द्यन्ते ब^{1} मै । १२–१२. °स्वरितैकश्रु° मै । १३–१३. नास्ति ब^{1,4} वि । १४. °कारादि ब$^{2-5}$ मै वा वि । १५–१५. नास्ति ब^{1} । १६. स्वराऽ° मूको. । १७–१७. स हि क्रियमाणे (°णः ब^{1}) प्रकृत्यासन्नः (°न्तः मै) मूको. । १८. ऋगन्त्यो वर्णो वर्णान्तरमापद्यते सा ब^{1,4} । १९–१९. नास्ति ब^{1} । २०. अथावधिः मूको. । २१. विशांसमम् ब$^{3-5}$ वा वि । २२. नास्ति ब$^{3-5}$ । २३. नास्ति ब$^{3-5}$ वा वि ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

इति [१]ऋतुस्वाध्यायायोः सहोपपादात्[१] कर्मभिः स्वाध्यायेन च कृत्स्नवेदोक्तमैहिकमामुष्मिकं च फलमाप्नोति पुरुषः[२]। एतत्सूत्रारम्भाद् यस्यार्थमेव न वर्णयन्ति तथा सूत्रारम्भोऽनर्थकः[३] उत्तरेण सूत्रद्वयेन सिद्धत्वात्। कथम्। तत्र कर्मणि[४] प्रतिज्ञानेन[५] कर्मस्वेव योगापत्तेरन्तर्भावात्।

[एतस्य समाम्नायस्येत्यस्य व्याख्या]

'एतस्य समाम्नायस्य' इति अधीतां[६] शाखामुपदिशति। [७]तस्मादादौ शाखामित्यनुक्तेऽपि एतस्य[७] समाम्नायस्य समाम्नानवचनादन्याः शाखाः सर्वशोऽनधिगता इति। एतस्येति अवयवलक्षणा षष्ठी। 'आग्नेयीभिश्च' (आश्रौ २, ३, २८) इत्युक्ते याः काश्चिदाग्नेय्यो भवन्ति। कृत्स्नस्य वा विनियोगलक्षणः[८] (?णा)। एतस्मात् कृत्स्नस्य समाम्नायस्य प्रयोगो भवति। 'अग्निमीळे' (ऋ १, १, १) इत्यारभ्य सर्वा [९]आग्नेय्यस्त्वहरहः[९] प्रयोक्तव्या आ समाम्नायसमाप्तेः[१०]। समितिवचनात् खिलसमाम्नातस्य ग्रहणम्। [११]येऽन्ये कर्मणि[११] प्रयुज्यन्ते मन्त्राः सर्वे[१२] ते[१३] खैलिका एव नमः प्रवक्त्रादयः[१४]। तस्माच्छाखायां ये वर्णविकारास्ते खैलिकेष्वपीष्यन्ते। दृश्यते[१५] च—'देवाँ आज्यपाँ आवह' (आश्रौ १,३,२२) 'उदीचीनाँ अस्य पदः' (आश्रौ ३, ३, १) इति रो नकारस्योदयः[१६]। स्वाध्याये कर्मणि च [१७]समानं लक्षणशास्त्रम्[१७] एकफलत्वात्[१८]। तस्माद् यथा कर्मणि सांहितो[१९] विधिः यथोक्तलक्षणो भवति। एवम्[२०] मन्त्रे[२१] ब्राह्मणे चेति। एवमादि ऊहेऽपि भवति विकारशास्त्रम्। ऊहोऽपि[२२] प्राकृत एव भवति, [२३]'प्राकृतास्त्वेव मन्त्राणां शब्दाः' (आश्रौ ३,२,१८) इति वचनात्[२३]।

---

१. संज्ञात्वाययथोपपादात् मूको.। २. पुरुषः ब[५]। ३. °रम्भो निरर्थकः मै। ४. कर्माणि ब[१/२]। ५. प्रतिज्ञा येन ब[३/५] वा वि। ६. आधीतां ब[१]; अथाधीतां ब[३/५]। ७–७. तस्मादर्शेपमित्युक्ते ब[१]; तस्मादेशसामित्युक्ते ब[२]; तस्मादादौ शाखामित्युक्तं ब[३/५]; तस्मादादित्यशाखामित्युक्तं ब[४]; तस्मादादौ शाखामित्युक्त वा वि; तस्मादेतेषामित्युक्ते मै। ८. °योगालक्षः ब[१]। ९–९. आग्नेय्यः अह° मै। १०. °यपरिस° ब[१/४]। ११–११. येन कर्माणि ब[३-५] वि; येन कार्याणि ब[१/२] मै वा। १२. नास्ति ब[१/२] मै; सर्वें ब[३-५] वा। १३. नास्ति मूको.। १४. प्रवक्त्रादि मूको.। तु. आश्रौ १,२,१। १५. दृश्यन्ते ब[१-५] वा वि। १६. तु. ऋप्रा ४, ८०। १७–१७. समानलक्षणशास्त्रम् मै; समानं लक्षणं शास्त्रम् ब[३-५]; लक्षणशास्त्र वि। १८. एकपरत्वात् वा। १९. संहितोचितो ब[३-५] वि। २०. नास्ति मै। २१. मच्छा (°च्छ मै) मूको.। २२. ऊहेऽपि ब[३५]। २३–२३. नास्ति वि।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यथा [१]उदीचीनानेषाम् इति। प्रणवो हि स्वाध्याये अवशंगमः[२]। [३]तस्य विकार-प्राप्त्यर्थं पुनर्विकारशास्त्रं[३] [४]विधीयते। याज्यान्ते†[४] च विसर्जनीयस्य सहोपधस्य[५] विकारप्राप्तिः[६]। अनुपधस्य (?) प्राप्नुवतः[७] अनुक्तः[८] तस्मान्नारम्भयदनुक्तः[९] स्यादन्यत्[१०] तस्मात्,[११] तस्मादारम्भः (?) ॥ १ ॥

[यथाश्रुत्यग्न्याधेयादिकर्मकथनप्रतिज्ञा]

अग्न्याधेयप्रभृतीन्याह वैतानिकानि ॥ २ ॥

अग्नय आधीयन्ते यस्मिन् कर्मणि तदग्न्याधेयमित्युच्यते। तदुत्तरं वक्ष्यते[१२]--अग्न्याधेयं कृत्तिकासु (आश्रौ २,१,९-१०) इति। ब्राह्मणे[१३] अग्न्याधेयादीनि [१४]कर्माणि आह। यज्ञकल्पतः ब्राह्मणे† अग्न्याधेयादीनि[१४] कर्माणि कल्पयन्तीत्यर्थः। तानि वैतानिकानीत्युच्यन्ते। वितानेषु अग्निषु यानि क्रियन्ते तानि वैतानिकानीत्युच्यन्ते। एतानि कर्माणि[१५] प्रत्येतव्यानि। कानि पुनरग्न्याधेयादीनि कर्माणि। अग्न्याधेयम् अग्निहोत्रं दर्शपूर्णमासावाग्रयणं[१६] [१७]काम्या इष्टयश्[१७] चातुर्मास्यानि पशुः सौत्रामणी ज्योतिष्टोम एकाहाहीना रात्रिसत्राणि संवत्सर-सत्राणि इत्येतानि। श्रुतावेतेन[१८] क्रमेणाम्नातानि[१९]। तस्मादिहापि शास्त्रे एतेनैव क्रमेण वक्ष्यन्ते।

[पदकृत्यानि]

पूर्वस्मिन् सूत्रे योगाप्तिं वक्ष्याम इत्युक्तम्, कर्माणि वक्ष्याम इति नोक्तम्। अग्न्याधेयप्रभृतीन्याहेति कर्माण्यपि प्रतिज्ञातानि भवन्ति। 'आह'

---

१. तु. आश्रौ ३, ३, १। २. अवशंगतः ब[१,४]। ३-३. नास्ति ब[४]; तस्य प्रा° ब[१,२]। ४-४. विधीयंते योज्यते ब[१]; विधाय या तै ब[२]; विधाय ते अन्ते ब[३,५]; विधीयते या अन्ते वा; विधीयते योज्यन्ते मै; नास्ति ब[६] वि। †. तु. शांश्रौ १, २, ८। ५. तु. ऋप्रा १, ६७; ६, ९ (?)। ६. विज्ञातं प्राणिधेः ब[१]; विज्ञातप्रणिधेः मै; विज्ञात (°न वा वि) प्राप्तिः ब[२-५] वा वि। ७. प्राक्तवत्तं ब[१]; प्राक्तवतं ब[२]; प्राप्नुवन्तं ब[३-५] मै वा वि। ८. अनुभवः ब[२]; अनुतः वा; अतुतः वि। ९. तस्माद्दारम्भया-दनुक्तः ब[१,२] मै। १०. स्यादन्यं, ब[३-५] वा वि। ११. नास्ति मै। १२. वक्ष्यामः ब[१]। १३. तु. शब्रा. २, १, २, १-११। १४-१४. नास्ति ब[३-५] वा वि। †. °णा ब[२]। १५. नास्ति मै। १६. दर्शपौर्ण° ब[२] वा वि; °वग्रयणं मै। १७-१७. काम्येष्टय° वा वि। १८. श्रुतावनेन ब[३-५] वा वि। १९. कर्मणाम्ना° मै।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

इति श्रुतिं दर्शयति। वक्ष्याम इति यत् पूर्वोक्तं [१]वाक्यं, तत्तात्पर्यार्थं[१] श्रुति-दर्शनम्[२] । क्रमादिह शास्त्रे यथा श्रुतौ कर्माणि दृष्टानि तथा वक्ष्यन्ते। श्रुतावशिष्टमाचार्यो[३] न[४] वक्ष्यति ॥ २ ॥

अग्न्याधेयादीनां कर्मणां तदादिव्याख्याने प्राप्ते इदमुच्यते[५]—

दर्शपूर्णमासौ[६] तु पूर्वं व्याख्यास्यामस्तन्त्रस्य तत्राऽऽम्नातत्वात् ॥ ३ ॥

[दर्शपूर्णमासयोः पूर्वं व्याख्येयत्वे हेतुः]

दर्शमिति कर्मनामधेयम्, पूर्णमासमिति[७] च। तौ तु पूर्वं व्याख्यास्यामः[८]। [९]अनन्तरम् अग्न्याधेयमिति। तु-शब्दोऽग्न्याधेयनिवृत्त्यर्थः[९]। [१०]†तत् कस्मात्†। ‡तन्त्रस्य तत्राऽऽम्नातत्वात्[१०]‡। सामिधेन्यादिसंस्थाजपान्तं कर्म तन्त्रमित्युच्यते, तस्य तन्त्रस्य तयोर्दर्शपूर्णमासयोः आम्नातत्वात्। सर्वब्राह्मणेषु[११] ऐष्टिकं तन्त्रं दर्शपूर्णमासयोरेवाम्नातम्[१२], नाग्न्याधेयिकं तन्त्रं क्वचित्[१३] ॥ ३ ॥

[दर्शपूर्णमासयोर्व्याख्यारम्भः]

दर्शपूर्णमासयोर्हविःष्वासन्नेषु[१४] होताऽऽमन्त्रितः प्रागुदगाहवनीयादवस्थाय प्राङ्मुखो यज्ञोपवीत्याचम्य दक्षिणावृद् विहारं प्रपद्यते पूर्वेणोत्करमपरेण प्रणीताः ॥ ४ ॥

इदानीं दर्शपूर्णमासौ वक्ष्येते। यथा 'दर्शपूर्णमासयोः'[१५] पुरोडाशादीनि[१६] हवींषि, तेषु आसन्नेषु[१७] [१८]वेदिमध्ये स्थापितेषु[१८] होता ऋग्वेदेन यः कर्मकरः। स आमन्त्रितोऽध्वर्युणा एहीत्युक्तः। आहवनीयोऽग्निः[१९], तस्य प्रागुदीच्यां दिशि

१-१. वाक्यं तत्परिहारार्थं ब[१-५] वा वि; वाक्यतात्पर्यार्थं मै। २. श्रुतं दर्शनम् ब[१/२] मै वा वि। ३. श्रुत्वाऽवशिष्ट° मै। (श्रुतादृष्ट° इत्युचितः पाठः)। ४. नास्ति ब[४]। ५. °च्यते इति वि। ६. °पौर्ण° वि। ७. पौर्ण° ब[१/२] मै। ८. °स्यामस्तन्त्रस्य तत्राम्नातत्वात् ब[३/५]। ९-९. नास्ति ब[४]। १०-१०. तत्कर्म तत्राम्नातत्वात् ब[३]। †-†. नास्ति ब[४]। ‡-‡. आम्नातत्वात् ब[२] वि; नास्ति मै। ११. सर्वं ब्रा° मूको.। १२. °पौर्ण ब[२]। १३. नास्ति मै। १४. दर्शपौर्ण° ब[२] वा वि। १५. °पौर्ण° ब[२]। १६. पौर्णमासादीनि ब[२] मै। १७. नास्ति वि। १८-१८. °मध्यस्थापि° ब[१-५] वि। १९. °नीयाग्निः ब[३-५] वा।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

दर्शपूर्णमास
Digitized by Madhuban Trust

अवस्थाय स्थित्वा। प्राङ्मुखः[१] यज्ञोपवीतमस्यास्तीति यज्ञोपवीती[२]। आचम्य शास्त्रोक्तेन विधिना। दक्षिणं बाहुमन्वावर्तते दक्षिणावृत्। अग्नयो यत्र विहृताः स विहारः। तं प्रपद्यते[३] प्रविशति। पूर्वेणोत्करम्। उत्करो नाम यत्र[४] वेदिपांसव उत्कीर्णा भवन्ति तं पूर्वेण। प्रणीता आपः। ता अपरेण प्रपद्यते[५]।

[पदकृत्यानि]

तत्र[६] पुनर्दर्शपूर्णमासग्रहणम् अन्यत्र पश्वादिषु अनासन्नेष्वपीति दर्शयति। आमन्त्रित इति सिद्धे हविःष्वासन्नेष्विति सत्यपि आमन्त्रणे हविःष्वासन्नेष्वेव प्रपद्यमानस्य स्थानाचमने भवतः, ऐष्टिकात् कर्मणोऽन्यत्र न[७] भवतः[८] प्रवर्ग्यादिषु। होतृग्रहणं कर्तुरधिकारार्थम्[९]। आमन्त्रित इति वचनाद् आसन्नेष्वपि अनामन्त्रितो न प्रपद्यते[१०]। अवस्थाय। पृच्छतीत्यध्याहर्तव्यम्। अन्यथा [११]तथा स्थितस्यावचनं[११] प्राप्नोति[१२]। कति हवींषि किमुपांशु, किमत्र निर्वाप्यम्[१३], किं तन्त्रमिति [१४]एवमादि यन्न वेद[१४] (?)। [१५]अन्यत्र प्राग्वोदग्वा[१५] सिद्ध इति विकल्पे प्राप्ते प्राङ्मुखग्रहणम् उदङ्मुखनिवृत्त्यर्थम्। यज्ञोपवीतिग्रहणं[१६] पित्र्यायां

१-१. कौशं (?) सौत्रं वा त्रिस् त्रिवृद् यज्ञोपवीतम् आनाभेर्दक्षिणं बाहुमुद्धृत्य सव्यम् अवधाय शिरोऽव दध्यात् (बौध १,५,५) इति। शुचौ देशे दक्षिणं बाहुं जान्वन्तरा कृत्वा त्रिरपो हृदयङ्गमाः पिबेत्। त्रिः परिमृजेद्। द्विरित्येके (बौध १,५,१५-१७)। न (? त) दपि द्वितीयमब्लिङ्गाभिः पिबेद् व्याहृतिभिः त्रिः परिमृजेत्। अपिवा व्याहृतिभिस्त्रिः पिबेदब्लिङ्गाभिः त्रिः परिमृजेदिति 'खान्यद्भिः संस्पृश्य पादौ नाभिं शिरः सव्यं पाणिम्' (बौध १, ५, २१) इति 'आचम्य सुरभिमंज्या (? °मत्या)ब्लिङ्गाभिर्वारुणीभिर्हिरण्यवर्णाभिः पावमानीभिर्व्याहृतिभिरन्यैश्च पवित्रैरात्मानं प्रोक्ष्य प्रयतो भवति' (बौध २,४,७,२) इति 'सर्वकर्मणां चैवारम्भेषु' (बौध २,४,५) इत्यधिकः पाठः केवलं ब[१] मूलकोशे उपलभ्यते। सोऽयं पाठो मातृकायां प्रान्ते टिप्पणीरूपेण लिखितो लेखकमान्द्येन मूलग्रन्थमध्ये निपतितः इति प्रतीयते। २. °पवीतीति मै। ३. प्रतिपद्यते ब[२-५] वा वि। ४. नास्ति मूको.। ५. प्रतिपद्यते मै; सव्याहृतिकां सप्रणवां गायत्रीं शिरसा सदः (सह)। त्रिः पठेदायतप्राणः प्राणायामः स उच्यते (बौध ४,१,२८ ?)। निरोधाज्जायते वायुर्वायोरग्निर्हि जायते। अग्निना(?तापेना)ऽऽपोऽधिजायन्ते ततोऽन्तः शुध्यते त्रिभिः' (बौध ४,१,२६) इति। तदुक्तं वृत्तिकारेण—मनःप्रसादात् सत्योक्त्या तपसा स्नानकर्मणा। आचान्त्या चात्मनः शुद्धिं कृत्वा कर्म समारभेत्॥ इति॥ इत्यधिकः पाठः ब[१]। ६. नास्ति ब[३-५]। ७. नास्ति ब[३] वा वि। ८. भवति ब[१,३-५] वा वि। ९. °र्थे ब[१,२]। १०. प्रतिपद्यते ब[१-५] वा वि। ११-११. तया स्थि° ब[३,५] वि; °स्थितस्य वच° ब[४]; स्थितस्यावच° वा। १२. नाप्नोति वि। १३. निर्वापम् ब[३-५]; निर्वाच्यम् वा। १४. °मादि यत्र वेद ब[१]; °मादयन्न वेद ब[२] वा वि; °मावेद यन्न वेदीत् ब[३-५]। १५-१५. तत् प्रा° ब[३-५]; तु. काश्रौ १, ७, २४। १६. °वीतीग्र° ब[१,४]; °वीतग्र° ब[३,५] मै वा वि।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[1]भवाय शौचाय[1] आचमने सति [2]प्राचीनावीतिना† एवाचमनं स्यात्[2] । तस्मादाचमने यज्ञोपवीतं नियम्यते आचमनमन्तरा[3] प्रपन्नस्यापि विधीयते 'विहारादव्यावृत्तिश्च' (आश्रौ १, १, ११) इति । प्रपन्नस्य कर्म कुर्वतः तस्मात् परिभाषा । तस्माद् दक्षिणावृदित्युच्यते[4] ॥ ४ ॥

[अप्रणीते कर्मणि अपरेणेध्मं प्रपदनम्]

इध्ममपरेणाप्रणीते ॥ ५ ॥

यत्र प्रणीता न सन्ति तदप्रणीतं कर्म उपसत्सु आमिक्षायां च । तस्मिन्नप्रणीते कर्मणि इध्ममपरेण प्रपद्यते । पूर्वेणोत्करमित्यनुवर्तते ।

[पदकृत्यम्]

अपरग्रहणं द्वयोरधिकारात् पूर्वेणापरेणेति[5] वा । अप्रणीत इति वचनात् सप्रणीत [6]इध्मं कारणं[6] न भवति ॥ ५ ॥

[चात्वालवत्सु अपरेण चात्वालं प्रपदनम्]

चात्वालं चात्वालवत्सु ॥ ६ ॥

[7]चात्वालो नाम अवटः । स येषु† विद्यते तानि चात्वालवन्ति कर्माणि वरुणप्रघासः पशुः सोम इति । तेषु चात्वालम् अपरेण प्रपद्यते । ‡पूर्वेणोत्करमित्ये-वानुवर्तते‡ । चात्वालवत्सु[7] इध्माः प्रणीता [8]वा कारणं† न भवन्ति‡[8] ॥ ६ ॥

[तीर्थसंज्ञा]

एतत् तीर्थमित्याचक्षते ॥ ७ ॥

[9]प्रणीतोत्करयोः इध्मोत्करयोश्चात्वालोत्करयोर्वा यदन्तरम्†[9] [11]एतत् तीर्थमित्याचक्षते[10] ब्रुवते[11] ब्रह्मवादिनः । 'तीर्थेन प्रपद्य' (आश्रौ ४, १०, १) 'तीर्थेन निष्क्रम्य' (आश्रौ १,११,१४) इति यत्र वक्ष्यति तत्रैतत् प्रत्येतव्यम्[12] ॥ ७ ॥

१-१. भवायाशौचार्थे ब[1,2]; भवाय शौचार्थे ब[3-5] वा ; भवीयाशौचार्थे मै । २-२. प्राचीनावीती नैवाचमं कुर्यात् मै । †. °वीतिना ब[3-5] वा वि ; °वीति ब[2]; °वीती मै । ३. आचमनेनाचमनमन्तरा ब[1] मै ; आचमनेनान्तरा ब[3-5] वा वि । ४. दक्षिणावृत्तिरित्युच्यते ब[1]; 'दक्षिणावृद्धि' इति पाठादनन्तरं षष्ठसूत्रव्याख्यापर्यन्तो भागो नास्ति ब[2] मूलकोशे । ५. °ण प° मै । ६-६. इध्ममपरेण ब[1] । ७-७. नास्ति ब[1] । †. एषु मै । ‡-‡. पूर्वेणोक्तमित्य° मै । ८-८. च कारणं भवति ब[3,5] वा वि । †. करणं ब[1,2] । ‡. भवति मै । ९-९. नास्ति ब[3] वा वि । †. यदन्तरे मूको. । १०-१०. नास्ति वा वि । ११. नास्ति मै । १२. प्रतिपत्तव्यम् ब[3-5] वा वि ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

दर्शपूर्णमास

Digitized by Madhuban Trust

प्रपन्नस्य च कर्तुः कर्मणि ये नियमास्ते वक्ष्यन्ते—

[होतुः प्राङ्मुखत्वस्य मनोवाक्कायचेष्टानां च नित्यता]

तस्य नित्याः प्राञ्चश्चेष्टाः ॥ ८ ॥

तस्य होतुः । नित्याः प्राकृताः चेष्टाः[1] क्रियाः । प्राञ्चः प्राच्यां दिशि गताः[2] चेष्टाः कर्मणि[3] भवन्ति । होतुरधिकारे[4] पुनस्तस्येति [5]तस्य तस्य[5] हौत्रकर्तुः प्राप्त्यर्थम् । नित्यवचनात् सर्वत्र आ कर्मपरिसमाप्तेः भवति । वचनात्तु अन्यथा 'दक्षिणामुख इति शाट्यायनकम्' (आश्रौ १. ४, १३) इति । दक्षिणामुखः पित्र्यायां[6] करोतीति । हौत्रे[7]ऽन्यत्र प्राङ्मुख एवाऽऽपरिसमाप्तेर्न[8] स्यादिति तस्मान्नित्यत्वं विधीयते । नित्यवचनात् 'सन्नेषु अदिष्ठात् पुरोडाशस्य' (आश्रौ ५, १७, ५) इति वचनाद् दक्षिणामुखः पितृयज्ञे[9] । प्राञ्चः इति चेष्टा अभिधीयन्ते[10] । पुंलिङ्गोऽपि चेष्टाशब्दो भवतीत्युपदिशन्ति[11] । ब्रह्मण उदङ्मुखत्वम् । 'विहारादव्यावृत्तिश्च' (आश्रौ १, १, ११) इति वचनाद् यदि प्राङ्मुखः स्यात्तदाऽनावृत्तिः[12] स्यात् । सव्यावृतौ ब्रह्मयजमानौ (आश्रौ ३, ३, ६) इति च[13] ज्ञापनम् ॥ ८ ॥

[दक्षिणोरूत्तरिणोऽङ्कस्य धारणाया नित्यत्वम्]

अङ्कधारणा च ॥ ९ ॥

अङ्कः उत्सङ्गः उपस्थ इत्यनर्थान्तरम् । अङ्कस्य [14]धारणा अङ्कधारणा[14] । 'दक्षिणोत्तरिणोपस्थेन' (आश्रौ १, ३, ३१) इत्यङ्कक्रिया[15] । तस्या[16] धारणा[17] अविनाशः[18] । सा[19] [20]च तस्य[20] तस्य कर्तुर्नित्या भवति । 'उपविशेद् दक्षिणोत्तरिणोपस्थेन' (आश्रौ १, ३, ३१) इत्यङ्कक्रिया उपवेशने विहिता । उपवेशनमात्रमेव स्यात् सर्वत्र [21]आ कर्मसमाप्तेः[21] । अङ्कधारणा चेति च-शब्दः तस्य नित्याधिकृतसमुच्चयार्थ इति ॥ ९ ॥

---

१. प्रकृ° मै । २. गताः इति नास्ति मूको. । ३. कर्माणि ब[1,4] । ४. होत्राधि° मै । ५-५. तस्य ब[1,4] वा । ६. पित्र्यां ब[3,5] वा; तु. आश्रौ २,१९,४ । ७. होत्रशास्त्रेऽ° ब[1]; शास्त्रोऽ° ब[3-5] वि; होत्रेऽ° मै, शास्त्रेऽ° वा । ८. एव परि° ब[2,3,5] वा वि; एव परिसमाप्तिर्न मै । ९. °ज्ञः ब[3-5] वा वि । १०. ताभिधार्यते ब[1]; नाभिधीयते ब[2] वा ; नाभिधीयन्ते ब[3-5] वि । ११. °शति ब[2] ; °श्यति (?ते) मै । १२. तदाऽऽवृत्तिः ब[2] मै । १३. नास्ति ब[3,4] वि । १४-१४. धारणात् विधारणात् मै । १५. °त्यङ्कः क्रियते ब[2] । १६. अस्य ब[2]; तस्य मै । १७. विधारणा ब[2]; धारणं ब[3-5] वा वि । १८. आविनाशाः ब[1]; अविलक्षणा ब[2] । १९. क्षणं मै । २०-२०. वृतस्य ब[3,5] । २१-२१. आकर्म ब[2] मै ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[यज्ञोपवीतनियमस्यान्तर्विहारे शौचनियमस्य च नित्यत्वम्]

यज्ञोपवीतशौचे च ॥ १० ॥

यज्ञोपवीतं च शौचं च यज्ञोपवीतशौचे। ते [1]च तस्य[1] नित्ये[2] भवतः। स्मृतिशास्त्रविहिते[3] एते[4]। [5]सूत्रं च वस्त्रं च[5] यज्ञोपवीतं भवति। स्नानाचमनादि शौचम्। तयोः स्मृतिशास्त्रविहितयोः[6] विहारीयप्रयोजननित्यत्वार्थं[7] सूत्रारम्भः[8]। नित्यत्वात् पितृयज्ञेऽपि यज्ञोपवीतमेव। 'सन्नेषु अदिष्ठात्' (आश्रौ ५, १७, ५) इत्येवमादिषु वचनात् प्राचीनावीतम्। [9]'प्राचीनावीतीध्मम्' (आश्रौ २, ६, १२) इति नित्यवचनात् प्राचीनावीतं[9] तावन्मात्रमेव भवति 'उत्ताना अङ्गुलीः करोति प्राचीनावीती' (आश्रौ २, ३, २१)। पुनरनन्तरं यज्ञोपवीतमेव सर्वत्र अवचने[10] स्यात्। शंसतोऽनुब्रुवतो वा मुखाद् विप्रुषो निपतेयुः [11]तत्राचमनं न स्यात्[11]। श्रुतिवचनबलीयस्त्वात् 'शौचं[12] नित्यम्' (आश्रौ २, २, १०) इति वचनादाचमनं [13]भवति। वचनादनाचमनं[13] क्वचित्। क्वचित् 'आचम्य' (आश्रौ १, १३, १) इत्याह। तत्र नित्यानुवाद उत्तरो विधिः सर्वो भवति ॥ १० ॥

[विहारदेशाव्यवायेनावर्तनस्य नित्यत्वम्]

विहारादव्यावृत्तिश्च तत्र चेत् कर्म ॥ ११ ॥

[14]विहारादव्यावृत्तिः स्यात्[14]। विहारादसौ[15] तत्[16] कर्म कृत्वा [17]अन्यस्मै कर्मणे यदा आवर्तेत, तत्र अव्यवायेनाऽऽवर्तेत। नैतदर्थं† 'सूत्रारम्भः (?)। नानार्थः‡ सूत्रारम्भः। विहारदेशाऽव्यवायेनावर्तनमव्यावृत्तिःϕ[17]। सा च तस्य कर्मकर्तुर्नित्या भवति। च-शब्दः समुच्चयार्थः। हुत्वाऽऽहवनीयात् [18]प्रत्यङ् एति[18] तदा दक्षिणावृदावर्तेत। तत्र यदा दक्षिणाग्नौ हुत्वा आवर्तते तदा सव्यावृदिति। एवमव्यावृत्तिर्भवति। नित्यवचनात् सा सर्वत्र भवति।

१-१. एतस्य मं। २. नित्ये हि ब$^{3-5}$ वा वि। ३. शास्त्रे एते वि° मं। ४. नास्ति ब^{2}। ५-५. सूत्रं वस्त्रं च ब$^{1,3-5}$ वा वि। ६. स्मृतिवि° ब^{1}। ७. विहारप्र° ब^{2}; विहारे प्र° वि। ८. नास्ति मूको.। ९-९. नास्ति मं। १०. प्रवचने ब^{1}। ११-११. तत्रानाचमनत्वात् ब$^{3-5}$ वा वि। १२-१२. यज्ञोपवीतशौचे ब$^{3-5}$ वा वि; शौचे मं। १३-१३. नास्ति वा; °नादाचमनं मं। १४-१४. नास्ति ब^{2} म। १५. तद्विहारेऽसौ मं। १६. तत् तत् ब^{1} वा वि। १७-१७. अन्यसु······वृत्तिः ब^{4}। †. न तदर्थं ब^{1}। ‡. नार्थः ब^{2} मं; नानर्थः ब^{1,3,5} वि। ϕ. °र्तनमस्य व्या° ब^{1}; °र्तनस्य व्या° मं। १८-१८. प्रत्येति ब^{1}; प्रत्यक्चेति मं।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

दर्शपूर्णमास

Digitized by Madhuban Trust

[पदकृत्यता]

तत्र चेत् कर्म । प्रपन्नस्य इमाः परिभाषा नित्यवचनात् सर्वत्र कर्मणि कर्मान्तरेषु च प्राप्ताः । तत्र[1] कर्म चेत् क्रियते ततस्तद्धर्मा भवन्ति न कर्मान्तरेषु । तत्र ग्रहणात् परिभाषाः संबध्यन्ते । यद्येतत् पूर्वाङ्गं क्रियते [2]उत्तरा परिभाषा 'अनादेशे' (आश्रौ १, १, १३) इति कर्मान्तरेष्वपि कण्डूयनादिषु स्यात् । अथ यद्युत्तराङ्गं† क्रियते‡[2] पूर्वाः परिभाषाः कर्मान्तरेऽपि स्युः । तस्मादुभयार्थं पृथक् क्रियते ॥ ११ ॥

[एकाङ्गवचने दक्षिणाङ्गप्रतीतिः]

एकाङ्गवचने दक्षिणं प्रतीयात् ॥ १२ ॥

एकमङ्गम् एकाङ्गम्[3], एकाङ्गस्य वचनम् एकाङ्गवचनम्[4] । तस्मिन् एकाङ्गवचने दक्षिणम् अङ्गं प्रतीयात् न सव्यम् । 'पार्ष्णी[5] समां निधाय प्रपदेन वहिराक्रम्य' (आश्रौ १, १, २३) इति । एकग्रहणादनेकाङ्गवचने सर्वाण्यङ्गानि भवन्ति । 'अङ्गुल्यग्राण्यवक्ष्णुय' (आश्रौ १, २, १) इति । 'आकाशवतीभिरङ्गुलीभिः' (आश्रौ ५, ५, ९) इत्यत्र, दक्षिणस्यैवाङ्गुलयः, 'तद्गृह्णीयात्' (आश्रौ ५, ५, ८) इत्यधिकारात् । 'तेषां दक्षिणत उत्ताना अङ्गुलीः करोति' (आश्रौ २, ३, २१) इत्यत्र दक्षिणस्यैव[6] [7]पाणेर्निनयनं हि सव्येन क्रियते । 'अवनिनीय' (आश्रौ २, ३, २२) इति वचनात् । अङ्गग्रहणाद्[7] [8]इन्द्रियवचने न भवति । 'गृहानीक्षेत' (आश्रौ २,५,१७), 'अवघ्रायान्तःपरिधि°' (आश्रौ ६,१२,५) इति । वचनग्रहणादवचने उत्तरा परिभाषा[8] उत्तरत्रा(?)ग्रहणात्[9] ॥ १२ ॥

[सव्यदक्षिणानुल्लेखेऽपि दक्षिणप्रतीतिः]

अनादेशे[10] ॥ १३ ॥

अङ्गानाम् अनादेशे च दक्षिणमङ्गं प्रतीयात् । अङ्गशब्दोऽध्याह्रियते । यथा 'होतृषदनमभिमन्त्रयेत' (आश्रौ १,३,३०) इत्यत्र[11] । 'सर्वत्र[12] दक्षिणं प्रतियाद्' इति सिद्धे योगारम्भे प्रयोजनम् एकाङ्गवचनग्रहणम् । एकाङ्गे[13] दक्षिणं चाङ्गवचनं, [14]न च[14] सव्यमुत्तरम् । एकजातीयमङ्गमेकाङ्गमिति । एकाङ्गे दक्षिणस्यैव ।

---

१. यत्रप्राप्तास्तत्र ब[2-5] मै वा वि । २. नास्ति ब[3-5] । †. °राङ्गाः ब[1]; °राङ्गा ब[2] मै वि । ‡. क्रियेते ब[1] । ३. नास्ति मूको. । ४. नास्ति ब[1] । °चनः ब[2] मै । ५. पार्ष्णि ब[1] मै वा । ६. दक्षिण ब[3-5] वा वि । ७-७. नास्ति ब[3-5] वा वि । ८-८. नास्ति ब[3-5] वा वि । ९. ग्रहणात् ब[3-5] वा वि । १०. नास्ति ब[1-5] वा वि । ११. तत् ब[3-5]; नास्ति ब[1,2] मै वा वि । १२. सर्वं मूको. । १३. अनेकाङ्गे ब[1,3-5] वा वि । १४-१४. च न मूको. ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अङ्गुल्यग्राणाम् अवकर्षणं[1] च क्रियते, नेतरेषाम्[2]। द्वयस्यानर्थक्यम्[3], सर्वत्र दक्षिणमिति वक्तव्यम् ॥ १३ ॥

[कर्तृरहिते क्रियाविधौ होतर्येव कर्तृप्रत्ययः]

कर्मचोदनायां होतारम् ॥ १४ ॥

कर्मणश्चोदना कर्मचोदना। तस्यां कर्मचोदनायां कर्तुरनादेशे होतारं कर्तारं प्रतीयात्। दर्शपूर्णमासयोर्होता[4] [5]कर्मतो व्याख्यातेषु[5] [6]च। ततोऽन्यत्रोदाहरणं[6] यथाऽग्निप्रणयने 'उपविश्य प्रेषितः[7] प्रातरनुवाकम्' (आश्रौ ४, १३, ६) इति। वचनादन्यः पर्यग्निकरणादिषु ॥ १४ ॥

[दानविधौ यजमाने कर्तृप्रत्ययः]

ददातीति यजमानम् ॥ १५ ॥

ददातीति चोदिते तस्य दानकर्मणः कर्तारं यजमानं प्रतीयात्, [8]न होतारम्[8]। 'कर्मचोदनायां होतारम् (आश्रौ १, १, १४) इति प्राप्ते, यस्य [9]दानकर्मकर्तुरधिकारे'[9] यद् दानं तत् [10]तस्यैव प्राप्तम्[10]। यथा 'आज्याहुतिं हुत्वा मुख्यं धनं दद्यात्' (आश्रौ ३, १३, १८), 'द्वेष्ट्रे त्विह दक्षिणां दद्यात्' (आश्रौ ३, १४, ८), [11]'वरं दत्त्वा जुहुयात्'[11] (आश्रौ ३,१२,४)-इति। दक्षिणा-दाने ऋत्विक् कर्ता मा भूदितीदमारभ्यते। हुत्वा मुख्यं धनं दद्यादिति संबन्धात् प्राप्तः। तस्माद् दक्षिणादानादन्यत्र होतैव कर्ता 'वेदं पत्न्यै प्रदाय' (आश्रौ १, ११, १) इत्येवमादिषु ॥ १५ ॥

[जुहोति जपतीति प्रायश्चित्ते ब्रह्मणि कर्तृप्रत्ययः]

जुहोति जपतीति प्रायश्चित्ते ब्रह्माणम् ॥ १६ ॥

जुहोति-चोदिते जपति-चोदिते च प्रायश्चित्तविषये ब्रह्माणं कर्तारं प्रतयात्, न होतारं, न[12] यजमानमिति। दानकर्मणां संबन्धाद् यजमानस्य प्राप्तम् 'आहुतिं हुत्वा मुख्यं धनं दद्यात्' (आश्रौ ३, १३, १८) इति। 'मध्यमेन

---

१. आकर्षणं मै। २. तेषाम् मूको.। ३. °नर्थकं ब[1]; °नर्थक्यं ब[2]; °नर्थ्यवाच्यं ब[3-5] वा वि। ४. °पौर्ण° ब[2]। ५-५. तद्व्याख्यातेषु ब[1]; कर्मतद्-व्याख्यातेषु ब[2-5] मै; नास्ति वि। ६-६. नोच्यन्तोदाहृणं वि। ७. नास्ति मूको.। ८-८. नास्ति ब[3-5] वा वि; न ब[1,2] मै। ९-९. °कर्तुर्विकारे ब[2-5] मै वा वि। १०-१०. तस्यैवाप्राप्तम् ब[1]; तस्यैवाप्राप्ते ब[2]; तस्यैव प्राप्ते ब[2,3,5] मै वा वि। ११-११. नास्ति वि। १२. नास्ति मै।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

दर्शपूर्णमास
Digitized by Madhuban Trust

पलाशपर्णेन जुहुयात्' (आश्रौ ३, १०, २३), 'आज्याहुतिं हुत्वा समारोपयेत्' (आश्रौ ३, १०, ४) इत्यत्राऽध्वर्योः प्राप्ते ब्रह्मणो भवति । जपति-चोदितता[1] न विद्यते । तस्मादुपांशु प्रयुज्यमानाः सर्वे जपा भवन्ति । तद्दर्शनं[2] पित्र्यायां तु[3] । तस्माद् 'हविषां स्कन्नमभिमृशेत्' (आश्रौ ३,१३,१५), 'भिन्नसिक्तानि च' (आश्रौ ३,१०,२१), 'अपोऽभ्यवहरेयुः' (आश्रौ ३,१०,२२), 'यदि पुरोडाशः स्फुटेत्' (आश्रौ ३,१४,१३) इत्येवमादि ।

[पदकृत्यम्]

इति-करण-प्रयोगात् जुहोतिमात्रं [4]जपतिमात्रं[4] च[5] यत् कर्म तत्रैव ब्रह्मा कर्ता भवति । अध्वर्युकर्ममध्ये याश्चोदनास्तत्राध्वर्युरेव[6] कुर्यात् । यथा 'तमतिनीय चतुर्गृहीतमाज्यं जुहुयात्' (आश्रौ ३,१२,३) । 'अथैतदाज्यं जुहुयात्' (आश्रौ ३, १२, १८) इत्येव । प्रायश्चित्ते इति[7] वचनात् 'प्रेषितो जपति' (आश्रौ १,२,११) इत्यत्र न भवति ॥ १६ ॥

[ऋचः पादग्रहणे ऋग्वेदनम्]

ऋचं पादग्रहणे ॥ १७ ॥

पादस्य ग्रहणं पादग्रहणं तस्मिन् पादग्रहणे ऋचं प्रतीयात् 'प्र वो वाजा अभिद्यवः' (ऋ ३, २७ १; आश्रौ १, २, ७) । पादाऽवयवेऽपि पादग्रहणं भवति, 'अग्निर्मूर्धा'[8] 'भुवो यज्ञस्य'[9] (आश्रौ १, ६, १) । यावद् गृहीतम्, अपरिमाणासु वा प्राप्तासु सूत्रारम्भः ॥ १७ ॥

[सूक्तादौ हीने पादे गृहीते सूक्तप्रत्ययः]

सूक्तं सूक्तादौ हीने पादे ॥ १८ ॥

[10]सूक्तादौ हीने पादे[10] गृहीते सूक्तं प्रतीयात् 'अग्निमीळे'[11], 'अग्निं दूतम्'[12] (आश्रौ ४, १३, ७) ।

[पदकृत्यम्]

सूक्तादिवचनादसूक्तादौ हीने पादे ऋगेव भवति—'अग्निर्मूर्धा' । पादग्रहणं समासाऽधिकारनिवृत्त्यर्थम् । समासे अनुवर्तमाने सूक्तादौ हीने पादग्रहणे

---

१. °चोदिता मूको. । २. दर्शनं ब^{3,4} । ३. च ब^{2} । ४. °तिमन्त्रं मै । ५. नास्ति ब^{2} । ६. °नासूत्राध्व° ब$^{3-5}$ वा वि । ७. नास्ति ब^{3,5} । ८. ऋ ८,४६,१६ । ९. ऋ १०,८,६ । १०-१०. नास्ति ब^{4} । ११. ऋ १,१ । १२. ऋ १,१२ ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पादग्रहणे[1] च[2] स्यात् । 'प्र वो वाजाः' (ऋ ३,२७,१ ; आश्रौ १,२,७) इत्यत्रापि सूक्तं स्यात् । परिशेषात् पूर्वसूत्रे तु पादग्रहण एव ऋग् भवति ।। १८ ।।

[सूक्तादावसूक्तादौ चाधिके पादे गृहीते तृचज्ञानम्]

अधिके तृचं सर्वत्र ।। १६ ।।

[3]अधिके पादे गृहीते[3] तृचं प्रतीयात् सर्वत्र सूक्तादावसूक्तादौ च । 'अग्न आ याहि वीतये गृणानः'[4] (ऋ ६, १६, १० ; आश्रौ १,२,७), 'इमां मे अग्ने समिधमिमाम्' (ऋ २,६,१ ; आश्रौ ४,८,११) इति ।

[पदकृत्यम्]

सूक्ताद्यधिकारात् सर्वत्रग्रहणम् ।। १९ ।।

[जपादीनाम् उपांशु प्रयोक्तव्यत्वम्]

जपानुमन्त्रणाप्यायनोपस्थानान्युपांशु ।। २० ।।

जपश्चानुमन्त्रणं च आप्यायनं च उपस्थानं च एताभिः संज्ञाभिर्ये उपदिश्यन्ते मन्त्राः ते उपांशु भवन्ति । 'जपति । नमः प्रवक्त्रे' (आश्रौ १,१,२७ ; २, १) । वषट्कारमुक्त्वोक्त्वाऽनुमन्त्रयते' (आश्रौ १, ५, १७) । 'राजानमाप्याययन्ति' (आश्रौ ४, ५, ४) । 'एत्योपतिष्ठन्ते' (आश्रौ ३, ६, २७) ।

[5]अत्राऽभिमन्त्रणाऽभिमर्शनयोरप्युपसंख्यानं† ‡कर्तव्यम् । ϕन कर्तव्यम्ϕ । कर्मकरणत्वादेवोपसंख्यानमन्तरेण§[5] सिद्धम् । एतानि मन्त्रप्रधानानि कर्माणि । तस्मान्मन्त्रादिना सम्प्रयुज्यन्ते[6] [7]जपानुमन्त्रणाप्यायनोपस्थानानि[7] । [8]लुप्ते च[8] मन्त्रे कर्म[9] प्रवर्तते । सप्तानां वाचः[10] स्थानानामाद्यं स्थानम् । 'करणवदशब्दममनःप्रयोगमुपांशु' (तैप्रा २३, ६) इत्युच्यते ।। २० ।।

---

१. नास्ति ब[2-5] मै वा वि । २. च एवेति ब[1]; चेति ब[2-5] वा ; ति वि । ३-३. अधिकपादे गृहीते ब[2-5] वा वि ; अधिके पादेग्रहणे ब[1] मै । ४. गृणान इति ब[1] । ५-५. अत्राभिमन्त्रणाभिमर्शनयोरप्युपसंख्यानमन्तरेण ब[5] । †. °भिमर्शयो° मै । ‡. न क° वा । ϕ-ϕ. नास्ति ब[2] मै वा । §. °करणादेवो° ब[1,2] मै । ६. संयुज्यन्ते ब[2,3,5] मै वा । ७-७. आप्यायनोपस्थानानि मूको. । ८-८. जप्तैव ब[1]; जप्ते च ब[2] मै; जपे च ब[3-5]; जाते च वा ; जते च वि । ९. कर्म च न ब[1]; कर्मणे ब[2-5] वा वि । १०. च ब[1]; वाद ब[2-4] वा वि; वाव ब[5]; वा मै ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

दयानन्द...
Digitized by Madhuban Trust

[कर्मकरणमन्त्राणां चोपांशुत्वकथनम्]

मन्त्राश्च कर्मकरणाः ॥ २१ ॥

ऋग्यजुषां मन्त्रसंज्ञा । मन्त्राश्च उपांशु भवन्ति ये[१] कर्मकरणाः । कर्म क्रियते यैस्ते कर्मकरणाः । यथा 'होतृपदनमभिमन्त्रयेत' (आश्रौ १, ३, ३०), 'भूमौ प्रादेशं कुर्यात्' (आश्रौ १, ३, २२) । तन्त्रस्वरेषु[२] प्राप्तेषु इदमुच्यते ।

[पदकृत्यम्]

मन्त्रग्रहणात् शस्त्रादिभिः संज्ञाभिः इह[३] [४]नोक्ता ये[४] मन्त्राः कर्मकरणाः त एवोपांशु । [५]शस्त्रादिषु तु[५] ये मन्त्राः कर्मकरणाः[६] ते उपांशु[७] न भवन्ति " 'उदु ष्य देवः सविता हिरण्यया' (ऋ ६,७१,१) इत्यनूत्तिष्ठेत्" (आश्रौ ४,७,४) इत्येवमादिषु । च-शब्दः[८] समुच्चयार्थः । कर्मकरणा[९] इति वचनात् कर्मार्थो मन्त्रो भवति । अन्यथा न ज्ञायेत किमनेन क्रियत इति कर्मार्थत्वान्मन्त्रस्य कर्म प्रधानं भवति । तस्माल्लुप्ते[१०] मन्त्रे कर्म प्रवर्तते । तस्मात् प्रतिषेधो 'नेह प्रादेशः' (आश्रौ २, १९, ११) इति । कर्मप्रधानत्वान्मन्त्रान्ते कर्म[११] कर्तव्यम् । आदिसंयोगे सति[१२] ह्रस्वं कर्म दीर्घो मन्त्रः । [१३]कर्मसमाप्तौ †मन्त्रशेषश्च नोच्चार्यः† । आहुतिषु यत्र दीर्घं कर्म ह्रस्वो मन्त्र आ[१३] कर्मपरिसमाप्तेर्मन्त्रावृत्तिः प्राप्नोति । तस्मात् कृत्स्नस्य कर्मणो मन्त्रवत्त्वाय मन्त्रान्तेन कर्तव्यम्—'वेदतृणानि'[१४] (आश्रौ १,११,९) इति । अन्येषामप्युक्तम्—'मन्त्रान्तैः कर्मादीन् सन्निपातयेत्' (आपश्रौ २४, २, १) इति । कर्मकरणानां धर्मभेदात् पृथक् सूत्रं क्रियते ॥ २१ ॥

प्रसङ्गादपवादो बलीयान् ॥ २२ ॥

यो विधिः सकृदुक्तः सर्वत्र प्रसज्यते[१५] [१६]स प्रसङ्गो[१६] नाम । यथा यज्ञोपवीतम् । तस्यैकदेशिकः[१७] प्रतिषेधः प्रत्याम्नायो[१८] वा अपवादः । यथा

---

१. नास्ति ब[२] मै । २. तत्र स्वरेषु ब[१-५] वा वि । ३. नास्ति वा[३-५] वि । ४-४. उभये वा ब[१]; उभयं वा ब[३-५] वा वि ; उभये ब[२] मै । ५-५. °दिष्वनु ब[३-५] वा वि । ६. करणाः मूको. । ७. नास्ति ब[३-५] वा वि । ८. नास्ति ब[४] । ९. करणाः ब[४] वा वि । १०. तस्माज्जप्ते ब[२] मै । ११. नास्ति ब[३-५] वा वि । १२. न सति ब[१] । १३-१३. नास्ति ब[४] । †-†. °षश्चैवोच्चार्यः वा वि ; °षश्चैवोच्चर्यः ब[३,५]; °षश्च प्रोच्चार्यः ब[१] । १४. °तृणादीनि ब[३-५] मै वा वि ; °तृणादीति ब[२] । १५. प्रपद्यते ब[२] वि । १६-१६. प्रसंगो ब[२] मै ; सर्वगो ब[३-५] वा वि । १७. °कादशिकः ब[३] वा वि; °कदशिकः ब[१,२,४,५] वा वि । १८. अन्याम्नायो ब[३-५] मै वा वि; अत्याम्नायो ब[२] ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

'प्राचीनावीतिनो हविर्भिश्चरन्ति'[1] (आश्रौ २, १९, १६)। अविकल्पार्थः[2] सूत्रारम्भः। प्रकृष्टं सजति[3] प्रसङ्गः। प्रसक्तविधिमपेत्य[4] वदति अपवादः। तस्य[5] बाधको बलीयान् भवति, न तु विकल्प इति ॥ २२ ॥

[२३-२४ होतुरवस्थानकथनम्]

प्रपद्याभिहृततरेण पादेन वेदिश्रोण्योत्तरया पार्ष्णी[6] समां निधाय प्रपदेन बर्हिराक्रम्य संहितौ पाणी धारयन्नाकाशवत्यङ्गुली हृदयसंमितावङ्कसंमितौ वा द्यावापृथिव्योः सन्धिमीक्षमाणः ॥ २३ ॥

'दक्षिणावृद् विहारं प्रपद्यते' (आश्रौ १, १, ४) इत्येतस्य सूत्रान्तस्य[7] परिभाषाव्यवधानादतः प्रपद्येत्युच्यते। प्राचीं दिशमभिहृतः सव्यः। तस्मादप्यभिहृततरो दक्षिणः अभिनीततरः। तेन पादेन वेदिश्रोणिः क्लृप्ता। सा[8] [9]दक्षिणा उत्तरा च[9]। तयोः[10] [11]उत्तरया श्रोण्या[11]। पादस्य[12] पश्चिमो देशः पार्ष्णी[13]। तां समां श्रोणिसम्मितां निधाय स्थापयित्वा [14]पादस्य पूर्वो[14] देशः प्रपदम्। तेन वेद्यां बर्हिराक्रम्य तिष्ठेत्। संहितौ[15] संश्लिष्टौ उभौ पाणी धारयन्[16] भवति। आकाशं विद्यते यासाम् अङ्गुलीनां ता आकाशवत्योऽङ्गुलयः उभयोः। तौ आकाशवत्यङ्गुली पाणी। तौ हृदयसम्मितौ भवतः। अङ्कः उत्सङ्गः, तत्सम्मितौ वा भवतः। आसीनस्य विकल्पः। तिष्ठतो व्रजतो वा अङ्काऽभावाद् हृदयसम्मितौ एव। द्यौश्च पृथिवी च [17]द्यावापृथिव्यौ तयोः द्यावापृथिव्योः[17] सन्धिरिव यो दृश्यते तम् ईक्षमाणो भवति। ईक्षणं शरीरधारणार्थम्[18]। शरीरधारणाच्च सम्यक् स्वरवर्णोच्चारणप्रसिद्धिः[19] ॥ २३ ॥

---

१. होतारश्च° मै। २. °र्थं मै। ३. गच्छति मूको.। ४. प्रत्यक्तं विधि° ब[1]; प्रत्यक्तविधि° ब[2] वि; प्रसक्तविधिमपेक्ष्य ब[3,4] वा। ५. तस्य तस्य मै। ६. पार्ष्णि मै। ७. सूत्रान्तरस्य ब[1,4] वा; नास्ति वि। ८. या ब[3-5] वा वि। ९-९. नास्ति ब[2-5] वा वि। १०. तस्या ब[1-5] वा वि। ११-११. °रश्रोण्या ब[3-5]; °रवया श्रो° वा वि। १२. पदस्य ब[1,2,4]। १३. पार्ष्णिः ब[1,2] मै वा वि; पादमी ब[4]। १४-१४. पदस्य पूर्वो ब[2] वा वि; पादपूर्वो ब[3,4]। १५. संहतौ ब[3,4] वा; संहृती वि। १६. धारयमाणः ब[3-5]। १७-१७. °थिवी तयोर्द्या° ब[1,5] मै; द्यावापृथिव्योः ब[2,3] वा वि। १८. °रणाच्च ब[4]; नास्ति ब[2]। १९. °वर्णोच्चारणसिद्धिः ब[1]; °ण प्रसिद्धां ब[3]; °णसिद्धां ब[4,5]; °णप्रसिद्धः वि।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

एतद्धोतुः स्थानम् ॥ २४ ॥

'वेदिश्रोण्योत्तरया' (आश्रौ १, १, २३) इति यद् एतत्स्थानं[1] होतुः। अत्र स्थितः कर्म कुर्याद्। यदीदं[2] नोच्येत[3], अनियमः स्याद्। यत्र क्वचिदवस्थितः[4] सामिधेनीरनुब्रूयात्। यत्तु पूर्वमुक्तम् 'वेदिश्रोण्योत्तरया पार्ष्णी[5] समां निधाय प्रपदेन[6] बहिराक्रम्य' (आश्रौ १, १, २३) इति, तद्धर्ममात्रमेव स्यात्। इह होतृग्रहणादुत्तरा परिभाषा सर्वकर्तॄणां भवति—'सर्वत्रैवम्भूतः (आश्रौ १, १, २५) इति ॥ २४ ॥

[कर्तुरासनस्य कथनम्]

आसनं वा सर्वत्रैवंभूतः ॥ २५ ॥

वा-शब्दः समुच्चयार्थः। आसनं च एतदेव भवति। वेदिश्रोण्यामेव। वक्ष्यति[7]—'सदने सीदामीत्युपविशेत्' (आश्रौ १, ३, ३१) इति। अत्रैवोपविशेन्नान्यत्र। सर्वत्रैवंभूतः कर्माणि कुर्यात्। अनुच्यमाने[8] अविकृतयोरेव[9] स्यात्। पूर्वसूत्रे होतृग्रहणादियं [10]सर्वकर्तॄणां परिभाषा[10] भवति ॥ २५ ॥

वचनादन्यत् ॥ २६ ॥

'प्रपद्याऽभिहृततरेण' (आश्रौ १, १, २३) इत्येवमाद्येवम्भूतानां[11] दर्शपूर्णमासयोः[12] कर्मादौ विहितत्वात् [13]'सर्वत्रैवम्भूतः' (आश्रौ १,१,२५) इति वचनात् सर्व-कर्मणामादौ एव† प्राप्ताः कर्मणि‡ न प्राप्ताः। तस्मात् कर्मण्यपि प्राप्त्यर्थमिदमुच्यते—वचनादन्यत्‡। एवंभूतस्य[13] [14]तु सतः[14] सूत्रवचनाद् यद् वक्ष्यते सामिधेन्यादि, तच्च एवंभूतोऽनुब्रूयात्[15]। वचनादन्यदित्युक्तेः[16] अवचनाद् अवसन्नजल्पनादिष्वेवंभूतो[17] न[18] भवति ॥ २६ ॥

---

१. यत एतत्स्थानं ब$^{2-5}$ वा वि। २. यदिदं ब^{3,5} वा वि। ३. नोच्यते मै। ४. क्वचिदेव स्थितः ब^{2}; क्व च देशस्थितः ब$^{3-5}$ वि; क्व च स्थितः वा। ५. पार्ष्णि मै। ६. पदेन ब^{1,4,5}। ७. वक्ष्यते मै। ८. अनू° ब^{2,5} मै वि। ९. अधिक (°कृ ?) त° ब^{1,2}; अधिकृत° मै। १०-१०. कर्तृप° मै। ११. °म्भूताना ब^{2} मै; °म्भूतता ब$^{3-5}$ वि; °म्भूतेन वा। १२. °पौर्ण° ब^{2}। १३-१३. सर्वत्रैवभूतस्य ब^{5}। †. य एवं ब$^{1-4}$ वा वि। ‡. अन्यतः ब^{3,4} वा वि; अन्यच्च मै। १४-१४. कुतः ब^{2}; सतः वा। १५. °तो ब्रूयात् ब^{3,4} वा। १६. °त्युक्ते ब$^{3-5}$ वा वि। १७. वचनजल्पनादिष्वेव भूतो ब^{1}; वसनजल्पनादि° ब^{2}; यद्वत्स्वजनजल्पनादिष्टेष्वेवंभूतो ब$^{3-5}$; वसंनजल्पनादि° मै; वद्वसनजल्प° वा वि। १८. नास्ति ब$^{3-5}$ वा वि।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[सामिधेन्यर्थं प्रेषितस्य होतुर्जपविधानम्]

प्रेषितो जपति ॥ २७ ॥

एवं वेदिश्रोण्यामवस्थितोऽध्वर्युणा 'अग्नये समिध्यमानायानुब्रूही'ति प्रेषितो जपति [1]'नमः प्रवक्त्रे इति।'[1] प्रेषितवचनादप्रेषितो न जपति। जपति-ग्रहणादुपांशु ॥ २७ ॥

॥ इति [2]प्रथमः खण्डः[2] ॥

१-१. तम् मै। २-२. प्रथमा खण्डिका मै।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ प्रथमेऽध्याये द्वितीयः खण्डः

[सामिधेन्यर्थजपः]

नमः प्रवक्त्रे नम उपद्रष्ट्रे नमोऽनुख्यात्रे क इदमनुवक्ष्यति स इदमनुवक्ष्यति पएमोर्वीरंहसस्पान्तु द्यौश्च पृथिवी चाहश्च रात्रिश्चाऽऽपश्चौ-षधयश्च वाक्समस्थितयज्ञः साधुच्छन्दांसि प्रपद्येऽहमेव माममुमिति स्वं नामाऽऽदिशेत । भूते भविष्यति जाते जनिष्यमाण आ भजाम्यपाव्यं वाचो अशान्तिं वहेत्यङ्गुल्यग्राण्यवकृष्य जातवेदो रमया पशून् मयीति प्रतिसंदध्यात् । वर्म मे द्यावापृथिवी वर्माग्निर्वर्म सूर्यो वर्म मे सन्तु तिरश्चिकाः, तदद्य वाचः प्रथमं मसीयेति ॥ १ ॥

तत्र अमुम् इति द्वितीयया विभक्त्या[1] होता स्वं नामादिशेत ब्रूयात्—अहमेव मां देवत्रातमिति[2] । स्वग्रहणाद्[3] यजमानस्य न[4] भवति । 'वह' इत्येवमेतत्[5] समुपलक्ष्य[6] अङ्गुलीनामन्तान् अवकृष्य आकुञ्चनं कृत्वा । अग्र-वचनात् कृत्स्नानां न क्रियते । अनेकान्तत्वात् सर्वासां क्रियते । 'पशून् मयि' इत्येतमुपलक्ष्य[7] अङ्गुल्यग्राणि प्रतिसंदध्यात् ।

'जपति' (आश्रौ १,१,२७) इति वचनात् कर्मकरणौ न भवतः । तस्माद् 'न जपः प्रागभिहिंकारात्' (आश्रौ १, २, २४) इति [8]प्रतिषिद्धे मन्त्रे जपस्य[8] मन्त्रप्रधानत्वान्न[9] कर्म प्रवर्तते । कर्मकरणेषु तु लुप्ते मन्त्रे कर्म प्रवर्तते [10]कर्मप्रधानत्वात् । तज्ज्ञापयति[10] 'नेह प्रादेशः' (आश्रौ २, १८, ११) इति (?) ब्रुवन्[11] ॥ १ ॥

---

१. नास्ति मूको. । २. देवत्रात स्वमिति ब[3-5] वि । ३. ग्रहणाद् ब[3] वा । ४. नास्ति ब[4] । ५. इत्येवं तत् ब[1,3-5] वा वि । ६. समुपेत्य ब[2] मं ; समुपेक्ष्य ब[3] वा वि । ७. इत्येनमुप° ब[1,2,4,5]; इत्येवमुप° ब[3] । ८-८. प्रतिषेधे मन्त्रजपस्य ब[2] । ९. मन्त्रः प्रधानः स्यात् ब[3-5] वा वि ; मन्त्रप्रधाननात्वत् (°नत्वात् तत् ?) ब[1] । १०-१०. °न त्वात् ज्ञाप° ब[3-5] वा वि ; °न त्वान्तरे ज्ञाप° ब[2] मं । ११. ब्रुवन् वर्म मे ब[3-5]; ब्रुवन् चर्म मे वा वि ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

समाप्य सामिधेनीरन्वाह ॥ २ ॥

जपं समाप्य अन्तरं सामिधेनीरन्वाह। वक्ष्यमाणा ऋचः सामधेनीसंज्ञाः[1] भवन्ति। संज्ञायाः प्रयोजनं—'सामिधेनीनामुत्तमेन' (आश्रौ १, २, २७) इत्युक्ते एताः प्रत्येतव्याः। 'प्रेषितो जपति' (आश्रौ १, १, २७) इत्युक्ते [2]जपादनन्तरं वचनाज्जपः[2] प्राप्नोति। तस्मात् समाप्य सामिधेनीरन्वाह इत्युच्यते[3] ॥ २ ॥

हिं ३ इति हिंकृत्य भूर्भुवः स्वरो३मिति जपति ॥ ३ ॥

[4]हिं ३ इति[4] यथासमाम्नातं[5] हिंकृत्य हिंकारं कृत्वा भूर्भुवः स्वरो३मिति जपति। [6]हिं हुं हीं[6] इति[7] हिंकारबहुत्वादिष्टपक्षार्थं[8] समाम्नायः हिंकृत्येति संज्ञार्थम्। 'कौत्सो हिंकरोति' (आश्रौ १, २, ५) इत्युक्ते एतस्य ग्रहणम्। सामिधेनीरन्वाह (आश्रौ १, २, २) इत्युक्त्वा हिंकारमुपदिशति अभिहिंकारस्य सामिधेन्यङ्गत्वात्[9] तद्व्याप्तेषु शस्त्रादिषु 'उद्गातुर्हिंकारे प्रातःसवन आह्वयीरन्', 'प्रतिहार उत्तरयोः सवनयोः (आश्रौ ५, १०, २-३) इति ॥ ३ ॥

[सजपहिंकारस्याभिहिंकारसंज्ञाकथनम्]

एषोऽभिहिंकारः ॥ ४ ॥

एष[10] समुदायः[11] हिंकारश्च जपश्च अभिहिंकारसंज्ञौ भवतः। [12]अभिहिङ्कृत्य' (आश्रौ २, १६, १) 'अनभिहिङ्कृत्य' (आश्रौ ३, १, १० ; ४, ७, ३ ; ५,१,१; ९,१) इत्युक्ते[12] एतस्य ग्रहणमिति। अभिहिङ्कारः इति सिद्धे एषः इति वचनादुभयोर्ग्रहणम् ॥ ४ ॥

भूर्भुवः स्वरित्येव[13] जपित्वा कौत्सो हिंकरोति ॥ ५ ॥

न च पूर्वं जपं जपति ॥ ६ ॥

---

१. सामिधेन्यो मैं; सामिधेनीः सामिधेन्यो ब^{2} मैं। २-२. °नन्तरस्य वचनं ब$^{3-5}$ वा वि। ३. °च्यते। हुं जपति यथा समाम्नातम् मैं। ४. हुं ति ब^{1}; हुं जपति ब^{2}; नास्ति मैं। ५. नास्ति ब^{5} मैं। ६-६. हु हुं हां ब^{1}; हुं हीं ब^{2}; हिं हूं हीं ब^{3,4}; हिं हुं हें मैं; हीं हूं हीं वा; ही हिं हीं वि। ७ नास्ति मैं। ८. °क्षार्थे ब^{1}; °क्षार्थं ब^{5}। ९. °धेन्यङ्गत्वे अङ्गत्वात् ब^{2} मैं ; °धेन्यङ्गत्वा अङ्गत्वात् ब^{1}। १०. एषोऽभिहिङ्कार एव मैं; नास्ति ब$^{3-5}$; एवं ब^{1,2} वा वि। ११. °य ब^{2} मैं वा वि ; नास्ति ब^{3,5}। १२-१२. अभिहिङ्कृत्येत्युक्ते ब^{1}। १३. °रित्येवं मैं।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

दर्शपूर्णमास
Digitized by Madhuban Trust

भूर्भुवः स्वरित्येव[1] प्रणववर्जितं जपं जपित्वा कौत्सः आचार्यो हिंकरोति। [2]भूर्भुवः स्वर्हि इति हिंकरोति[2] । किं चान्यत् । पूर्वं च जपं 'नमः प्रवक्त्रे' (आश्रौ १, २, १) इत्येतं[3] न जपति। एवकारः[4] जपप्रणवनिवृत्त्यर्थः । जपित्वा इति[5] वचनात् पूर्वो जपः, अनन्तरो हिंकारः। कौत्सग्रहणाद् विकल्पः। च-शब्दः कौत्साधिकारसमुच्चयार्थः । पूर्वग्रहणात् 'नमः प्रवक्त्रे' इत्येतस्य प्रतिषेधः, नाभिहिंकारजपस्य[6] ॥ ५-६ ॥

अथ सामिधेन्यः प्र वो वाजा अभिद्यवो(ऋ ३, २७, १)ऽग्न आ याहि वीतये गृणान (ऋ ६,१६,१०) ईळेन्यो नमस्यस्तिरो (ऋ ३,२७,१३) ऽग्निं दूतं वृणीमहे (ऋ १, १२, १) समिध्यमानो अध्वरे (ऋ ३, २७, ४) समिद्धो अग्न आहुत (ऋ ५,२८,५) इति द्वे ॥ ७ ॥

अथ अभिहिंकारादनन्तरं सामिधेन्यो वक्ष्यन्ते 'प्र वो वाजाः' इत्येवमाद्याः । तस्मादारम्भादभिहिंकारस्य सामिधेनीसंज्ञा न[7] भवति । तस्मात् 'ताः सामिधेन्यः' (आश्रौ २, १९, ६) इत्युक्ते ऋचामेव स्थाने ता भवन्ति, नाऽङ्गभूतस्य। 'प्र वो वाजाः' इत्येवमाद्या यथागृहीता एकादश ऋचः सामिधेन्योऽत्र भवन्ति ॥ ७ ॥

ता एकश्रुतिसन्ततमनुब्रूयात् ॥ ८ ॥

यथाम्नातावसानस्वरेषु प्राप्तेषु[8] इदमुच्यते। ताः[9] ऋचः । एकश्रुतिसन्ततम् [10]एका श्रुतिः एकश्रुतिः[10] । एकश्रुतिश्च सन्ततं च एकश्रुतिसन्ततम् । का एकश्रुतिः[11], किं सन्ततम् इति तदुत्तराभ्यां सूत्राभ्यां वक्ष्यते । ताः इति वचनात् तासामेवैकश्रुतिर्भवति । जपस्तु यथासमाम्नात एव । तस्मात् [12]तद्व्याख्यातेषु[12] शस्त्रादिषु एकश्रुतिसन्ततं भवति । अतोऽन्यत्र जपादिषु यथाम्नातमेवाऽतिदेशाभावात्[13] ॥ ८ ॥

---

१. °रित्येवं मै । २-२. न च पूर्वं जपं जपति मै । ३. इत्येवं ब[१,२,४] मै ; इत्येव ब[३,५] वा वि । ४. एवं हिंकार ब[२]; एवंकारः मै । ५. नास्ति ब[१] । ६. °राज्जपश्च ब[३-५] वा वि । ७. नास्ति ब[३-५] मै । ८. नास्ति ब[३-५] वा वि । ९. ताः ता ब[१,४,५] वि । १०-१०. एकश्रुतिः ब[१,३-५] वा वि । ११. एका श्रुतिः ब[१-३,५] वा वि । १२-१२. व्याख्यातेषु ब[२]; °ख्यानेषु वि । १३. °तमेव निर्दे° ब[३,५]; °तमेव निदे° वा; °तमेवानिदे° वि ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

एकश्रुतीत्युक्ते[1] [2]उदात्तश्रुतिरनुदात्तश्रुतिश्च[2] प्राप्ता[3]। सन्ततमित्युक्ते अनवसानमेवेति प्राप्ते इदम् (९; १०) उच्यते—

[ऐकश्रुत्यलक्षणम्]

उदात्तानुदात्तस्वरितानां परः सन्निकर्ष ऐकश्रुत्यम् ॥ ९ ॥

उदात्तानुदात्तस्वरितास्त्रयः स्वरा आम्नाताः। तेषां परः सन्निकर्षः अतिसन्निकर्षो यस्तद् ऐकश्रुत्यम् इत्युच्यते। [4]सन्निकृष्यमाणा नाभिव्यज्यन्ते[4] [5]श्रुतिविशेषान्न लक्ष्यन्ते[5]। [6]प्रचय एकश्रुतिः[6]। प्रचयत्वाद् यथापूर्वं[7] निहन्यते ॥ ९ ॥

[सन्ततलक्षणम्]

स्वरादिमृगन्तमोकारं त्रिमात्रं मकारान्तं कृत्वोत्तरस्या अर्धर्चेऽवस्येत् तत् संततम् ॥ १० ॥

स्वरोऽस्य[8] वर्णस्यादिः स्वरादिः। ऋचोऽन्त ऋगन्तः[9]। [10]ऋचोऽन्त-वर्णः[10] स्वरादिं[11] कृत्वा [12]सह स्वरेण[12] व्यज्यते। तेन तस्य स्थाने ओंकारं कुर्यात्। तमोंकारं त्रिमात्रं मकारान्तं च कृत्वा उत्तरस्याः ऋचः अर्धर्चम् उक्त्वा अवस्येत्। ऋगन्ते[13] यथाऽवस्येत् तत् सन्ततम् इत्युच्यते।

[पदकृत्यानि]

स्वरादिवचने अक्रियमाणे व्यञ्जनान्तायाम् ऋचि व्यञ्जनस्यैव स्थाने ओंकारं कुर्यात्। 'सुम्नयुः' (ऋ ३,२७,१; आश्रौ १,२,७) इत्यत्र यथा। [14]स्वरान्तायां तु[14] सिद्धमेव ऋगन्तवचनात्[15]। ओंकारस्य द्विमात्रत्वात् त्रिमात्रमाह। श्रुत्यन्तरे[16] (आश्रौ ५,१,१,१२; पामा ८,२,८९) ओकारान्तः[17] शुद्धो भवति। तस्मादिहेष्टप्राप्त्यर्थं[18]

---

१. एकश्रुतिरित्युक्ते ब$^{1,3-5}$ मै वा वि; एकरित्युक्ते ब^{2}। २-२. उदात्तश्रुतिश्च ब$^{3-5}$ वा वि। ३. अपास्ता मै। ४-४. °माणान्नाभि° ब^{2} मै; °माणा ताभिर्व्यंवधत्ते ब$^{3-5}$ वा; °माणा ताभिर्व्यवधाने वि। ५-५. श्रुतिविशेषोऽत्र वक्ष्यते ब$^{3-5}$; श्रुतिविशेषा न लक्ष्यन्ते मै; श्रुतिविशेषान्न वक्ष्यन्ते वा वि। ६-६. नास्ति ब^{4}। ७. पूर्वं ब^{1,4}; पूर्वं ब^{2} वि; त्वोद्यात् पूर्वं मै; पूर्वात्पूर्वं वा। ८. स्वरो यस्य मै। ९. नास्ति ब^{1,2} मै। १०-१०. ऋचोन्तवर्णं ब^{1,2,4} मै; ऋचोन्तं वर्णं ब^{3,5}; ऋचोन्तवर्णं वा वि। ११. स्वरमादि ब^{3,5}; स्वरमादिं ब^{1} मै; स्वर आदिं वा; स्वरादि ब^{2}; स्वरमादि वि। १२-१२. स्वरेण ब^{1,2} मै; सह परेण ब$^{3-5}$ वा वि। १३. ऋगन्तेन ब^{1,2} मै। १४-१४. स्वरति यां नु मै। १५. ऋगन्ते वच° ब$^{3-5}$ वा वि। १६. °न्तरं मै। १७. मकारान्तः ब$^{1-5}$ वा वि। १८. तस्माद्दृष्ट° ब^{2} मै।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

दर्शपूर्णमास
Digitized by Madhuban Trust

मकारान्तं कृत्वा इत्युच्यते । मकारान्तं कृत्वाऽवसानमेव प्राप्तमाम्नायवत् । तस्मादुत्तरस्या अर्धर्चेऽवस्येदिति [1]उच्यते । तत् सन्ततम् इति वचनादसंततत्वे† 'तेन चोपसन्तानः' (आश्रौ ५,९,३) इत्युक्ते एतत् प्रत्येतव्यम्[1] ॥ १० ॥

[संततस्यावसानत्वकथनम्]

एतदवसानम् ॥ ११ ॥

[2]अर्धर्चेऽवस्येदिति[2] यदेतदेवावसानम् आम्नायात्[3] प्राप्तमपि पुनरुच्यते ऋचामनवसानार्थम्[4]। अन्यथा एतद् वाचनिकं स्यादन्यत्रानियमः। यत्राऽऽम्नाये 'द्वाभ्याम्[5] अवस्येत् त्रिपदासु पूर्वम्' (ऋप्रा १८, ४६) इत्येवमाद्यवसाननियमेऽपि[6] सति पञ्चपदास्वर्धर्चेष्ववसानं[7] दृश्यते । तथा[8] उक्ते[9] 'तूर्णिहव्यवाडित्यवसाय' (आश्रौ १, ३, ६) इति वचनादवसानम् । अतोऽन्यत्रापि[10] भवति । एवमिहापि[11] स्यात् । तस्माद् एतदवसानम् इत्युच्यते ॥ ११ ॥

[पूर्वोच्छ्वासाविनाशे उत्तरोच्छ्वासारम्भः]

उत्तरादानमविप्रमोहे ॥ १२ ॥

[12]विप्रमोहो विनाशः[12] । अस्माद् वचनात् प्रथमाया[13] अपि पूर्वे अर्धर्चे नावसानम्[14] । पूर्वस्यामृचि अविनाशे उत्तरस्या ऋच आदानं कर्तव्यम् । यदि पूर्वस्यां[15] किंचिद् विनष्टमस्ति तदेव संधातव्यमिति[16] । अथोत्तरादानं कर्तव्यमित्यर्थः। एवं कृते प्रायश्चित्ताऽभावं दर्शयति। तस्मादारम्भाद् विनष्टे सत्युत्तरादाने कृते प्रायश्चित्तमेव होतव्यम्, न पुनरावृत्तिः । अक्षरे विनष्टे एतद् भवति न मन्त्राऽन्तराये । 'पञ्चदशाऽभ्यस्ताभिः' (आश्रौ १, २, २२) इति संख्यावचनम्[17] ॥ १२ ॥

१-१. नास्ति ब[3-5] वा वि। †. °दसं (सां?)तत्ये मै । २-२. नास्ति ब[3-5] वा वि। ३. अन्यत् ब[3-5] वा वि। ४. ऋचामवसा (°स्था ब[3]) नार्थम् ब[1,2] मै वा ; अनृचावसानार्थम् वि। ५. ताभ्यां मूको. । ६. °सानं निय° ब[1,2] । ७. तु. आश्रौ ५, १४, ११; ऋप्रा १८, ४९ ; पञ्चपदादर्धर्चेष्ववसानो मूको. । ८. यथा ब[1,3-5] मै वा वि। ९. उक्त मूको. । १०. श्रुतोऽन्य° ब[3-5] वा वि। ११. एवमेवेहापि ब[2]; (?) आत्ममेवेहापि मै । १२-१२. नास्ति ब[2] वि ; विनाशो विप्रमोहः मै । १३. प्रथमायाम् ब[3,4] वा वि। १४. अवसानम् ब[1,2] मै ; वावसानम् ब[3-5] वा वि । १५. पूर्वस्यामृचि ब[1] । १६. °तव्यम् ब[3,5] वा वि। १७. नास्ति वि ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

समाप्तौ प्रणवेनाऽवसानम् ॥ १३ ॥

[1]अनुवचनसमाप्तौ ऋगन्तं प्रणवं कृत्वा तेन प्रणवेन एव अवसानं[1] कर्तव्यम्। [2]उत्तरसंतानलक्षणत्वात्[2] प्रणवस्य। संतानाऽभावात् प्रणवो[3] न प्राप्नोति। आम्नायवदेव[4] स्यात्। तस्मादिदमुच्यते। ऋगन्तलक्षण ओंकारो मकारान्त उक्तो यस्तमेव[5] प्रणव इत्याह। अधिकाराद् दर्शयतीव—'प्लुतादिः प्रणवे' (आश्रौ ५, ९, ६) इति, 'प्रणुत्याऽवस्येत्' (आश्रौ ४, ६, २) इति च ॥ १३ ॥

चतुर्मात्रोऽवसाने ॥ १४ ॥

अवसाने यः प्रणवः स चतुर्मात्रो भवति। त्रिमात्रे प्राप्ते चतुर्मात्रो विधीयते। तस्मादप्यारम्भात् पूर्वस्य प्रणवसन्ततं (?) भवति। पुनरवसानवचनादसमाप्तावप्यवसाने चतुर्मात्रप्राप्तिः प्रवर्ग्यादिषु ॥ १४ ॥

[प्रणवान्तमकारस्य वर्णान्तरापत्तिकथनप्रतिज्ञा]

तस्याऽन्तापत्तिः ॥ १५ ॥

तस्य[6] अधिकृतस्य प्रणवस्य। अन्तापत्तिः अन्तो मकारः [7]तस्यापत्तिः। अन्तापत्तिरित्यधिकृतं[7] [8]वेदितव्यम् इत उत्तरं यद् वक्ष्यामः। प्रणवान्तो मकारः[8] [9]स्पर्शादिषु निमित्तेषु यं यं वर्णविकारमापद्यते† सा‡ अन्तापत्तिः। असत्यधिकारे वक्ष्यमाणो वर्णविकारो[9] न ज्ञायेत कस्य[10] भवतीति ॥ १५ ॥

स्पर्शेषु स्ववर्ग्यमुत्तमम् ॥ १६ ॥

स्पर्शाः काऽऽदयः पञ्च वर्गाः[11] तेषु[12] ऋगादौ वर्तमानेषु[13] प्रणवान्तो मकारः स्ववर्ग्यमुत्तमम् आपद्यते। स्वो वर्गः। स्ववर्गे भवः। स्ववर्ग्यमुत्तममापद्यते। ककारे ङकारम् 'ओङ्क्या नः' (ऋ ४, ३१, १) इति। चकारे ञकारम् 'ओञ्चत्वारि शृङ्गा' (ऋ ४, ५८, ३) इति। तकारे नकारम् 'ओन्तत्त्वा यामि' (ऋ १, २४, ११) इति[14]। पकारे मकारम् 'ओम्प्र वो वाजाः' (ऋ ३, २७, १) इति। स्वग्रहणाद् अन्यस्माद्[15] वर्गादन्यन्नापद्यते[16] ॥ १६ ॥

१-१. नास्ति ब[2] वि। २-२. नास्ति वि; °रसंज्ञातल° ब[1]। ३. प्रणवे ब[2] मै वि। ४. °यवदेवमेकं (°तं मै) ब[1,2] मै। ५. यो यस्तमेव ब[3,5]; यः स्वयमेव मै। ६. अन्तस्य ब[3-5] वा वि। ७-७. तस्यान्तस्यापत्तिरित्यधिकृतं ब[3-5] वा वि; नास्ति ब[2]। ८-८. नास्ति ब[2]। ९-९. नास्ति ब[3-5] वा वि। †. विकार° ब[1] मै। ‡. नास्ति ब[1,2] मै। १०. तस्य मै। ११. वर्णाः ब[1] मै। १२. नास्ति ब[1]। १३. °नेषु तेषु ब[1]। १४. नास्ति मूको.। १५. अन्याद् ब[1-5] वा वि; अन्यावात् मै। १६. वर्गादन्यन्नापद्यते ब[2] मै; वर्गादन्यतापद्यते ब[3-5] वा वि।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

दृश्यपूर्णप्रास
Digitized by Madhuban Trust

अन्तस्थासु तां तामनुनासिकाम् ॥ १७ ॥

अन्तस्था यरलवाः। तासु ऋगादिभूतासु प्रणवान्तो मकारः तां ताम् एव अन्तस्थामापद्यते[1] अनुनासिकां तु[2]। 'ओयँ यो नः स्वो अरणः' (ऋ ६, ७५, १९)। [3]रस्याऽनुस्वारं वक्ष्यति[3] [4]"ओवँ वयमु त्वा"[4] (ऋ ६, ५३, १; ८, ६४, ६) 'ओलँ लोपाशः सिंहम्' (ऋ १०, २८, ४) इति। तां ताम् इत्यनुच्यमाने उत्तमाधिकारात् तामुत्तमाम् इति स्यात्, तस्मात् तां ताम् इत्युच्यते। [5]तां तामिति[5] वचनादनुनासिकाऽप्राप्ता, तस्मादनुनासिकामित्याह ॥ १७ ॥

रेफोष्मस्वनुस्वारम् ॥ १८ ॥

रेफे [4]च ऊष्मसु च[4] ऋगादिभूतेषु मकारः अं इत्यनुस्वारमापद्यते। 'ओं राये नु यम्' (ऋ ७, ९०, ३)। हशषसा ऊष्माणः। 'ओं हतो वृत्राण्यार्या' (ऋ ६, ६०, ६), 'ओं शतमिन्नु शरदः'[6] (ऋ १, ८९, ९), 'ओं षट्त्रिंशांश्च' (ऋ १०, ११४, ६), 'ओं सोमानं स्वरणम्' (ऋ १, १८, १) ॥ १८ ॥

[प्रथमोत्तमे ऋचौ त्रिरध्यर्धीकृत्य तयोरनुवचनम्]

त्रिः प्रथमोत्तमे अन्वाहाऽध्यर्धकारम् ॥ १९ ॥

सामिधेनीनां प्रथमा [4]च उत्तमा च[4] प्रथमोत्तमे ऋचौ त्रिरन्वाह। अध्यर्धेन अधिकां कृत्वा अध्यर्धकारम्। तदनन्तरेण सूत्रेण वक्ष्यते। सकृद्वचने त्रिरित्याह[7]। अध्यर्धकारं (द्र० २१) वक्ष्यते ॥ १९ ॥

[अध्यर्धयोर्ऋचोर्वचनावसानेऽध्यर्धचतुष्कात्मिकयोर्द्वयोर्ऋचोर्वचनम्]

अध्यर्धामुक्त्वाऽवस्येद्, अथ द्वे ॥ २० ॥

[8]अध्यर्धाम् ऋचम् उक्त्वाऽवस्येत्[8]। [4]त्रीन् अर्धर्चान् उक्त्वा, अथ द्वे, अथाऽनन्तरं द्वे ऋचौ उक्त्वाऽवस्येच्च चतुरोऽर्धर्चान्। तस्मादारम्भादन्यत्रापि उत्तरस्यां यदवसानं तत्रावस्येद्[4] यथा अपोनप्त्रियासु पञ्चार्धर्चान् (द्र. आश्रौ ५,१,१) ॥ २० ॥

---

१. अवस्था° मं। २. नास्ति ब[1]। ३-३. °स्वारं च वक्ष्यते ब[1]। ४-४. नास्ति ब[3-5] वा वि। ५-५. तामिति ब[3-5] वा वि। ६. शरदो वर्धमानः ब[1]। ७. त्रिरन्वाह ब[3-5] मं। ८-८. नास्ति ब[1]; °र्धामुक्त्वा ब[2]; °र्धामुक्त्वाऽ° ब[3-5] मं वा वि।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[उत्तमायामृचि आदौ द्वे पश्चाद् अध्यर्धा]

[1]द्वे प्रथममुत्तमस्यामथाध्यर्धाम्[1] ॥ २१ ॥

[2]उत्तमस्याम् ऋचि द्वे प्रथमं †ब्रूयादुपोत्तमयोरुत्तरेणार्धर्चेन† सह चतुरोऽर्धर्चान्[2] । अथाऽध्यर्धाम् । अथानन्तरम् अध्यर्धामृचं ब्रूयात् त्रीन् अर्धर्चान् । एतदध्यर्धकारलक्षणम् । यत्र अध्यर्धकारमित्याह (द्र. आश्रौ ५,१,५; ७,१२,१०) तत्रैतत् प्रत्येतव्यम् ॥ २१ ॥

ताः पञ्चदशाभ्यस्ताभिः ॥ २२ ॥

ताः[3] एताः सामिधेन्यः अभ्यस्ताभिः सह गण्यमानाः पञ्चदश भवन्ति । 'पञ्चदश दर्शपूर्णमासयोः' (ऐब्रा ३,४०) इति श्रुतिः । इह एकादश आम्नाताः, कथं पञ्चदशत्वमिति । तस्मादुच्यते अभ्यस्ताभिः सहेति । अस्माद् वचनात् सर्वत्र संख्या[4] अभ्यासैः सह एव[5] भवन्ति[6] शास्त्रेषु[7] [8]पञ्चदश सप्तदशेत्येवमादिषु[8] । [9]परिभाषाभिरधिकारव्यवायात् ताः इति पुनरुच्यते[9] ॥ २२ ॥

[शस्त्रयाज्यादिषु सामिधेनीनां कतिपयधर्मातिदेशः]

एतेन शस्त्रयाज्यानिगदानुवचनाभिष्टवनसंस्तवनानि ॥ २३ ॥

एतेन[10] सामिधेनीविधानेन शस्त्रादिभिः [11]संज्ञाभिर्विहितान्यपि तानि[11] [12]व्याख्यातानि । यथा 'मरुत्वतीयं शस्त्रम्' (आश्रौ ५, १४, २) । 'प्रेषितो यजति'† (आश्रौ १,५,३)। ‡शस्त्रादिभिर्याज्यादिभिश्च‡[12] संज्ञाभिरेव[13] संबन्धोऽत्र[14]। निगद्यते स निगदः । यथा—'अग्ने महाँ असि' (आश्रौ १, २, २७) इति । अत्र निगदग्रहणादेवंविधा निगदा इति दर्शयति । तस्मादिह[15] (?) सूक्तवाकः प्रैषा[16] इति

१-१. द्वे प्रथममुत्तमस्याम् ब[1,2] मै वा वि ; नास्ति ब[3-5] । २-२. नास्ति ब[3-5] । †-†. °त्तमायान्तरेणा° वा वि । ३. नास्ति ब[1,2] मै । ४. इह संख्या ब[1] मै । ५. एवं ब[1,2] मै । ६. भवति ब[1,2] । ७. शस्त्रेषु मै । ८-८. पञ्चदश शास्त्रादिभिः संज्ञादिभि (संज्ञाभि ब[4]) व्यवहिता ब[3-5] वा वि । ९-९ °यात् पुनरित्युच्यते ब[1-2] मै ; °यानान् पुनरित्युच्यते ब[3-5] वा वि । १०. तेन ब[1,3,4] । ११-११. संज्ञादिभिर्व्यवहितान्यपि तानि ब[2] मै वा वि ; °व्यवहितान् पठितानि तानि ब[3,5]; नास्ति ब[4] । १२-१२. नास्ति ब[4] । †. जपति ब[1,3,5] । ‡-‡. शास्त्रादिभिर्जपादिभिश्च ब[3] ; °दिभिर्जपादिभिश्च ब[2,5] वा ; °दिभिर्व्याहृत्यादिभिश्च मै ; °दिभिर्नयादिभिश्च वि । १३. संसादिभिश्च ब[2]; नास्ति मै । १४. °न्धमन्त्रः ब[1,2,5] मै; °न्धमन्त्र ब[3,4] वि; °न्धमन्त्रं वा । १५. तस्मादिदं ब[1-5] मै; स्यादिदं वा वि । १६. प्रेष मूको. ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

दर्शपूर्णमास
Digitized by Madhuban Trust

निगदाः, तेषाम् 'विभाषा छन्दसि' (पा १, २, ३६) इति त्रैस्वर्यम् ऐकश्रुत्यं वा प्राप्तम् । 'एतेन' इत्यतिदेशाद् एकश्रुतिर्भवति । अनुवचनम्—'अग्निमन्थनीया[1] अन्वाह' (आश्रौ २, १६, १) । अभिष्टवनम्[2]—'प्रेपितोऽभिष्टुयात् संस्तुयात्' (आश्रौ ४, ६, १) । संस्तवनम्— 'अन्त्यं परिधाय संस्तुयात्' (आश्रौ ३, १, १०) ॥ २३ ॥

[सामिधेनीभ्योऽन्यत्राध्यर्धकारप्रतिषेधादयः]

न त्वन्यत्राऽध्यर्धकारम् ॥ २४क ॥

'एतेन' इति प्राप्ते प्रतिषेधः । सामिधेनीभ्योऽन्यत्र शस्त्रादिषु अध्यर्धकारं न भवति । तु-शब्दोऽधिकृतव्यावृत्त्यर्थः[3] । अन्यत्र-वचनम् उत्तरसूत्रार्थम् । नाऽभिहिंकाराऽभ्यासौ सामिधेनीभ्योऽन्यत्र प्रयोजनम्[4] ॥ २४क ॥

न जपः प्रागभिहिंकारात् ॥ २४ख ॥

अभिहिंकारात् पूर्वो यो[5] जपः 'नमः प्रवक्त्रे' (आश्रौ १,२,१) इत्यादिः स शस्त्रादिषु न भवति 'एतेन' इति प्राप्तः । 'प्रागभिहिंकारात्' इति वचनाद् अभिहिङ्कारजपो न प्रतिषिध्यते ॥ २४ख ॥

नाभिहिङ्काराभ्यासावबहुषु प्रकृत्या ॥ २४ग ॥

अभिहिंकारश्चाऽभ्यासश्च अभिहिंकाराभ्यासौ । तौ प्रकृत्या अबहुषु [6]मन्त्रेषु, विकृत्या† बहुषु[6] अपि[7] न भवतः । " 'पुरीष्यासो अग्नयः' (ऋ ३, २२, ४) 'इति त्रिः' " (आश्रौ ४, ८, २०) इति । अत्र सामिधेनीभ्योऽन्यत्र इत्यनुवर्तते[8] (द्र० २४क) । तस्मात् पित्र्यायाम् 'उशन्तस्त्वा निधीमहि' (ऋ १०, १६, १२; आश्रौ २, १९, ६) इत्यत्राऽभिहिंकारो भवति । अबहुषु[9] अपि मन्त्रपरमभिधानम्[10] । तस्मादिडादिषु एको मन्त्र इति[11] अभिहिङ्कारो भवति । [12]अनुक्तत्वाद् अभ्यासो[12] न भवति ॥ २४ग ॥

---

१. मन्थनीया मूको. । २. अभिष्टवः ब[1,2]; अभिष्टु च वा ; अभिष्ट च वि । ३. °कृतो व्या° ब[3-5] वा वि । ४. प्रतियोजनम् ब[1]; योजनम् मै ; तियोजनम् ब[2]; नास्ति ब[4] । ५. नास्ति ब[3-5] वा वि । ६-६. नास्ति ब[2] । †. प्रकृत्या मै । ७. तु ब[3-5] वा वि । ८. इत्यत्र नावर्तते ब[3-5]; इत्यत्र तु वर्तते वा । ९. अबहुश्चेति ब[2] । १०. मन्त्रपरिमभिधानं ब[3]; मन्त्रः परिमाप्तिधानं ब[4]; मन्त्रः परिमभिधानं वा । ११. नास्ति ब[1,2] । १२-१२. अनूक्त्वाभ्यासे ब[1,5]; अनुक्ताभ्यासे ब[2] मै वि ; अनुक्ता समासे ब[3,4]; अनुक्त्वाभ्यासे वा ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[विहितेऽवसानेऽभिहिंकाराभ्यासवर्जनम्]

नावच्छेदादौ ॥ २५ ॥

यत्र[1] ऋगन्तावसाने अध्वर्युः सम्प्रैषमाह, तेन सम्प्रेषिते तदवच्छिन्नं भवति। तत्सम्प्रैषवशादनुवचनान्तरत्वात्[2] तत्राऽभिहिंकाराऽभ्यासौ प्राप्तौ तयोः प्रतिषेधः। अवच्छेदस्याऽऽदिः अवच्छेदादिः[3]। अवच्छेदादौ अभिहिंकाराऽभ्यासौ न भवतः। यथा[4] "संप्रेषितः 'श्येनो न योनिम्' " (ऋ ९,७१,६ ; आश्रौ ४,७,४) इति। आदिग्रहणादन्त्येऽभ्यासो भवति ॥ २५ ॥

शस्त्रेष्वेव होत्रकाणामभिहिंकारः ॥ २६ ॥

होतृब्रह्मपुरुषा[5] होत्रकाः। तेषां शस्त्रेष्वेवाभिहिंकारो भवति, नानुवचनादिषु पर्यग्निकरणादिषु। अभ्यासस्तु सर्वत्र भवति। एवेत्यवधारणार्थे। शस्त्रेष्वेव नान्यत्रेति[6]। होत्रकाणामेव[7] इति वदन्तः केचिद् ग्रावस्तोत्रेऽभिहिंकारं[8] मन्यन्ते। तथा सति होत्रकाणामिति वहुवचनमपार्थकं सर्वेषामनुवचनाभावात् ॥ २६ ॥

सामिधेनीनामुत्तमेन प्रणवेनाग्ने महाँ असि ब्राह्मण भारतेति निगदेऽवसाय ॥ २७ ॥

सामिधेनीनाम् ऋचाम् उत्तमेन अन्त्येन प्रणवेन अग्ने महान् इति निगदं संदध्यात् तत्र भारतेति निगदे अवसानं कृत्वा 'शस्त्रेष्वेव' (आश्रौ १, २, २६) इति तत्राऽधिकारव्यवधानात् पुनः सामिधेनीग्रहणम्। समाप्तौ प्रणवेनाऽवसाने प्राप्ते सन्तानो विधीयते। निगदग्रहणं प्रदर्शनार्थम्। एवंविधा निगदा भवन्तीति। ये उपांशु न प्रयुक्ता [9]अनार्चिकाश्च ते[9] निगदा इति। अवसायेति प्रवरणस्य (द्र. १, ३, १) स्थानविधानार्थम् ॥ २७ ॥

[10]॥ इति द्वितीयः खण्डः ॥[10]

---

१. अत्र ब[6]। २. °वचनान्तरं ब[3-5] वा वि। ३. नास्ति ब[4]। ४. अथ ब[3,5]; अथा ब[2,4] मं वा। ५. होतृपुरुषा ब[2] मं। ६. अन्यत्रेति मं। ७. तिसृणा° ब[1]; स्सृणा° ब[2]; स्तृणा° ब[3,4]; सृणा° ब[5] वि; तिसृणा° मं। ८. °स्तोत्राभि° ब[2]। ९-९. अनर्षिका° ब[1]; अनर्थकाश्चेति ब[2] मं; अनर्चिका° ब[3-5] वि। १०-१०. नास्ति मूको.।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

दर्शपूर्णमास

Digitized by Madhuban Trust

अथ प्रथमेऽध्याये तृतीयः खण्डः

यजमानस्यार्षेयान् प्रवृणीते यावन्तः स्युः ॥ १ ॥

यजमानस्य आद्यवंशप्रणेता य ऋषिः तस्यापत्यानि आर्षेया मन्त्रकृतः[1], तान् आर्षेयान् ऋषीन् । प्रवृणोते[2] होता प्रत्येकं वृणीते नामभिरष्टम्या विभक्त्या आमन्त्रयते यथाम्नातं प्रवरसमाम्नाये 'आङ्गिरसबार्हस्पत्यभारद्वाजेति' (आश्रौ १२, ११, ६)। यावन्तः स्युः यावन्तो[3] भवन्ति । एकः द्वौ त्रयः पञ्च वा (तु० आपश्रौ २, १६, ७) इति सर्वान् । यजमानस्येति होतुरधिकारात् । 'त्रीन् प्रवृणीते मन्त्रकृतो वृणीते' (आपश्रौ २४, ५, ६) इति श्रुत्यन्तरदर्शनाद् एकस्य द्वयोः पञ्चानां वा[4] प्राप्त्यर्थं[5] 'यावन्तः स्युः' इति । एवमपि श्रुत्यन्तरेऽस्ति— 'एकं वृणीते द्वौ वृणीते त्रीन् वृणीते[6] न चतुरो वृणीते न पञ्चातिवृणीते'[7] (आपश्रौ २४, ५, ७) इति ॥ १ ॥

परं परं प्रथमम् ॥ २ ॥

[8]यो यः परः ऋषिः[8] तं तं प्रथमं वृणीते पितामहं पितरं पुत्रमिति । अध्वर्युप्रवरे (द्र० काश्रौ ३, २, ८) पूर्वं पूर्वं प्रथमम् । तत्सहकारिवशाद् होतुरपि स्यादिति [9]परं परं[9] प्रथममित्युच्यते । सहकारिवशात्तु भवति प्रवरणं सर्वेषु विकल्पेषु । यथा ते कुर्वन्ति[10] पौरोहित्यान् राजऋषीन् वेति ॥ २ ॥

पौरोहित्यान् राजविशाम् ॥ ३ ॥

पुरोहितस्य प्रवराः पौरोहित्याः तान्[11] राज्ञां च वैश्यानां च प्रवृणीते । 'पुरोहितस्यार्षेयेण प्रवरं[12] प्रवृणीरन्' (ऐब्रा ७, २५) इति श्रुतिः ॥ ३ ॥

---

१. °कृतो ये ब[3-5] वा वि । २. वृणीते ब[1] मं । ३. °न्तो न (? °न्तोऽत्र) मं । ४. नास्ति ब[1-5] वा वि । ५. °र्थे ब[1,5] । ६. वृणीते पञ्च वृणीतेति (°त इति मं) मूको. । ७. पञ्चानामतिप्रवृङ्णम् मूको. । ८-८. परम् ऋषिं मं । ९-९. परं ब[1] । १०. कुर्वन्तीति मूको. । ११. ते ब[1-5] वा वि ; ते च मं । १२. नास्ति ब[3-5] वा वि ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[राज्ञां राजर्षिप्रवरणं पौरोहित्यप्रवरणं वा]

राजर्षीन् वा राज्ञाम् ॥ ४ ॥

ये राजर्षय आम्नाताः 'मानवैलपौरुरवसेति' (आश्रौ १२, १५, ५), तान् वा राज्ञां प्रवृणीते। उभयाधिकाराद्[1] राज्ञामिति नियमः, अधिकाराद्रुभयेषामिति स्यात् । वैश्यानामपि वैश्यर्षिराम्नातः, अन्येषामपि 'वात्सप्रेति' (आपश्रौ २४, १०, १६) । स वा कर्तव्यः ॥ ४ ॥

[प्रवराज्ञाने तत्संशये च वर्णत्रयस्य मानवेति प्रवरः]

[2]सर्वेषां मानवेति संशये ॥ ५ ॥[2]

राजन्यवैश्ययोः संशयाऽभावात् 'सर्वेषां मानवेति [3]संशये' इति नोपपद्यते। तस्मात् पृथग्योगं कृत्वा वक्ष्यामः। 'सर्वेषां मानवेति'[3] । सर्वेषां[4] ब्राह्मणक्षत्रियवैश्यानां[5] मानवेति वैकल्पिकः प्रवरो भवति । अन्येषामप्यस्ति—'मानवेति' (आपश्रौ २४, १०, १८) । [6]सर्ववर्णकृते† च तं‡ समामनन्तीति संशये संशये च अप्रज्ञातानां मानवेति[6] प्रवरो भवति। ब्राह्मणानामेव आचार्यप्रवरो वा[7] इत्युक्तम् अन्येषाम्[8] ॥ ५ ॥

[चतुर्दश निवित्पदानि आवाहननिगदश्च]

देवेद्धो, मन्विद्ध, ऋषिष्टुतो, विप्रानुमदितः, कविशस्तो, ब्रह्मसंशितो, घृताहवनः, प्रणीर्यज्ञानां, रथीरध्वराणाम्, अतूर्तो होता, तूर्णिर्हव्यवाळित्यवसायाऽऽस्पात्रं जुहूर्, देवानां चमसो देवपानो,ऽराँ इवाग्ने नेमिर्देवाँस्त्वं परिभूरसि ॥ ६क ॥

आर्षेयप्रवरानन्तरं[9] देवेद्धः इत्येवमादि यथाम्नातं निगदशेषं प्रतिपद्यते। अनियताऽवसाना निगदा भवन्ति । तथापि श्रुत्यन्तरे यान्यवसानान्याम्नातानि तानि[9] कर्तव्यान्यविरोधात्[10]—'घृताहवनः'[11]; 'हव्यवाट्'[12]; 'परिभूरसि'[13] इति। एवं चेत् किमर्थं हव्यवाळित्यवसायेत्युच्यते । इह[14] निवित्पदेषु यथाऽऽम्नातान्यवसानानि प्राप्तानि। तस्मादवसायेति नियमादन्येषु अनवसानम् ॥ ६क ॥

---

१. उभयोरधि° ब^{1} । २-२. नास्ति मूको. । ३-३. नास्ति ब^{5} । ४. नास्ति ब^{1,2} । ५. ब्रह्मक्ष° मै । ६-६. नास्ति ब^{2} । †. °कृतां ब$^{1,3-5}$ मै वा वि । ‡. तां ब^{3,5} वा वि ; तां च ब^{4} । ७. नास्ति ब^{3,5} । ८. तु. आपश्रौ २४,१०,१७; बौश्रौ २४,२८,६ । ९. आर्षप्रवराणामन° ब$^{3-5}$ मै वि ; आर्षेयप्रवराणामन° वा; आर्षप्रवरान° ब^{1,2} । १०. °व्यान्यवरो° मै । ११. ··· घृताहवन इत्यवसाय ··· (शांश्रौ १,४,१९) । १२. ···हव्यवाळित्यवसाय ··· (शांश्रौ १,४,२०) । १३. ··· परिभूरसीत्यवसाय (शांश्रौ १,४,२१) । १४. नास्ति ब^{1} ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

दर्शपूर्णमास
Digitized by Madhuban Trust

[1]आ वह देवान् यजमानायेति प्रतिपद्य देवता द्वितीयया विभक्त्याऽऽदेश-मादेशम् आ वहेत्यावाहयत्यादिं प्लावयन्[1] ॥ ६ख ॥

'आ वह देवान् यजमानाय' (तैब्रा ३, ५, ३, २) इत्यनेन निगदान्तेन देवताः प्रतिपद्यते । [2]प्रतिपत्तव्याश्च काः[2] या अत्र सूत्रे भवन्तीति ताः[3] । अष्टौ विभक्तयो व्याकरणसिद्धाः । तासु या द्वितीया, तया द्वितीयया विभक्त्या देवताऽऽदेशं कुर्यात् । [4]आदेश उच्चारणम्[4] । आदेशमादेशमा वहेत्यावाहयति । णमुल् । [5]आदिश्याऽऽदिश्यादेशम् । यावत्यो देवताः ताः सर्वा[5] आदिश्याऽऽदिश्य[6] आवहेत्यावाहयति अग्निम् । होतारं प्रयोजयति[7] । अग्निमावह, सोममावहेति । आवहशब्दस्य[8] आदिं प्लावयन् आदिममक्षरं[9] त्रिमात्रं कुर्वन् आ३वहेति । प्रतिपद्येतिवचनादयं[10] निगदो देवताप्रतिपत्त्यर्थो भवति । तस्माद् यत्र देवताऽऽवाहनं चोद्यते तत्रायं निगदो वक्तव्यस्तदर्थत्वात् । यथा[11] [12]उपसदि दृष्टस्तथा[12] पित्र्यायाम् । तत्र पितृशब्दार्थः[13] पुनरुच्यते । देवतावचनमधिकारार्थम् । देवतानामावाहनं[14] विधीयते । द्वितीयया विभक्त्या इति यथादिष्टानाम् आदेशो मा भूदिति । यथा[15] 'प्रथमायामग्निरग्निः पवमानः' (आश्रौ २,१,१९) इत्येवमादि[16] प्रकरणार्थः (?) । इदमादेशवचनं सर्वार्थम् । इह च प्रयाजादिषु[17] [18]च निगमेषु[18] षष्ठ्यादयो न[19] भवन्ति । तत् कथं ज्ञायते । पुनरादेशवचनाद् अन्वादेशकमनुशब्दस्य प्राप्त्यर्थम् । वीप्सावचनं देवताबहुत्वाद् । व्याकरणसिद्धा प्लुतिः पुनरुच्यते । आम्नायस्य बलीयस्त्वाद् यथाम्नातमेवावाहनशब्दं[20] कुर्यात्[21] । 'स्वं महिमानं आवह' शाङ्खायनके (शांश्रौ १, ५, ६) इति ॥ ६ख ॥

अग्न आवहेति तु प्रथमदेवताम् ॥ ७ ॥

[22]या प्रथमदेवता तां तु[22] अग्न आवहेति आवाहयेत् । तु-शब्दः प्राप्तव्यावृत्त्यर्थः ॥ ७ ॥

१-१. आवह देवा आदिं प्लावयन् मै । २-२. प्रतिपत्प्रवरा ब$^{1-5}$ मै वा; प्रति-पद्यवरा वि । ३. नास्ति मै । ४-४. आदेशो नामोच्चारणम् मै । ५-५. नास्ति मै । ६. आदिश्यावहेत्या° ब^{3,4} वा वि । ७. प्रत्वयाजति ब^{3,5} वि; प्रत्ययाजति ब^{4}; प्रजयाजयति वा । ८. आवहनश° ब$^{3-5}$ वि । ९. आदिमाकारं ब^{3,4} । १०. तत्रेति प्रति° ब^{1} मै या वि । ११. तथा ब^{1} । १२-१२. उपदिष्टस्तथा ब$^{3-5}$ । १३. °ब्दार्थे ब^{1} वा । १४. देवतावाहनं ब^{3,5} । १५. नास्ति मूको. । १६. इत्यादिः ब^{2} मै ; इत्येवमात् ब^{3,5} । १७. प्र वो वाजादिषु ब$^{3-5}$ वि । १८-१८. नास्ति वि; °गमनेषु ब$^{3-5}$ । १९. नास्ति ब$^{2-4}$ वि । २०. °वावाह-शब्दं वा वि । २१. कुर्वन् मै । २२-२२. याः प्रथमदेवताः तास्तु ब^{1,2}; याः प्रथमदेवतानामदेवतास्तासु यान् ब$^{3-5}$; याः (योः वा) प्रथम देवताः (°ता वा) तासु मै वा ; याः प्रथमदेवतानामदेवता नासु धान् वि ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

इदानीं देवता वक्ष्यन्ते —

अग्निं सोममित्याज्यभागौ ॥ ८ ॥

अग्निं सोमम् इति एते देवते आवाहयेत्[1]। तयोश्च आज्यभागौ इत्येषा संज्ञा। 'आज्यभागप्रभृति°'[2] (आश्रौ २,१८,३), 'आज्यभागौ'[3] (आश्रौ २,१,२३; ४, ३, ३) इत्युक्ते एतयोर्ग्रहणम्[4] ॥ ८ ॥

अग्निमग्नीषोमाविति पौर्णमास्याम् ॥ ९ ॥

अग्निम् अग्नीषोमौ इति एते देवते पौर्णमास्याम् आवाहयेत्। आज्यभागयोरनन्तरं पौर्णमास्याम् इति वचनाद् एते पौर्णमास्यामेव भवतः। अतोऽन्यदुभयत्र[5] समानं [6]"दर्शपूर्णमासयोः' (आश्रौ १, १, ४) इत्यधिकारात्[6] ॥ ९ ॥

अग्नीषोमयोः स्थान इन्द्राग्नी अमावास्यायामसंनयतः ॥ १० ॥

अग्नीषोमयोः स्थान इन्द्राग्नी देवता भवति अमावास्यायाम् असंनयतः सान्नाय्यमकुर्वतो यजमानस्य। 'नासोमयाजी संनयेत्' (शब्रा १, ६, ४, १०; आपश्रौ १, १४, ८) इति श्रुतिः। अग्नीषोमयोः स्थान इति स्थानवचनाद् आग्नेयो नित्यः। अमावास्यायाम् इति[7] पौर्णमास्याम् इत्यधिकारात्। तत्रैव [8]विकल्पः स्यात्[8]। असन्नयत इत्युच्यते सन्नयतो विध्यन्तरविवक्षार्थम्[9] ॥ १० ॥

इन्द्रं महेन्द्रं वा सन्नयतः ॥ ११ ॥

सन्नयतः इन्द्रं महेन्द्रं वा देवतामावाहयेद् अग्नीषोमयोः स्थाने। अमावास्यायामिति वर्तते। सन्नयतः सान्नाय्यं कुर्वतो यजमानस्य। व्यवस्थित-विभाषेयम्। ऊर्ध्वं सोमेज्यायाः संवत्सरमिन्द्रं यजेत। अत[10] ऊर्ध्वं महेन्द्रमिति। असन्नयत इत्यधिकारात् सन्नयत इत्युच्यते ॥ ११ ॥

अन्तरेण हविषी विष्णुमुपांश्वेतरेयिणः ॥ १२ ॥

आज्यभागयोरनन्तरं पौर्णमास्यां द्वे हविषी, अमावास्यायामपि[11]। तयोः[12] अन्तरेण मध्ये। [13]हविश्च हविश्च[13] हविषी। अन्तरेण [14]विष्णुं देवताम्[14] उपांशु

---

१. आवहेत् ब[१-५] मे वा। २. °प्रभृतिषु ब[१] मे। ३. अनाज्यभागा ब[१-५] वा वि। ४. तयोर्ग्रह° ब[३-५] वा वि। ५. अन्यदु° मे वि। ६-६. °सयोरधि° ब[१]। ७. अपि ब[३-५] वा। ८-८. विकल्पस्य मे। ९. विधितरवि° मे। १०. तत ब[३-५] वा वि। ११. °स्यायां वा ब[२]। १२. एतयोः मे। १३-१३. हविश्च ब[१-५] वि; नास्ति वा। १४-१४. विष्णु दे° मे।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

दर्शपूर्णमास

Digitized by Madhuban Trust

ऐतरेयिणः आचार्या मन्यन्ते। अन्तरेणेति स्थानविधानार्थम्। अनन्तरं तु [1]प्राप्तम्। अत्र हविर्ग्रहणाद्[1] आज्यभागयोर्हविः संज्ञा न भवति। 'आत[2] उपांशुहविषः' (आश्रौ २, १५, २) इत्यत्र आज्यभागयोरुपांशुत्वं न भवति। उपांश्विति वचनात् सर्वेषु निगमेषु देवतायास्तदर्थानां च शब्दानां याज्यानुवाक्ययोश्चोपांशुत्वम्। ऐतरेयिण इति वचनाद् विकल्पः। अन्येषां न भवतीत्यर्थः॥ १२॥

अग्नीषोमीयं पौर्णमास्यां वैष्णवममावास्यायामेके नैके कंचन॥ १३॥

[3]अन्तरेण हविषी[3] अग्नीषोमीयम् उपांशुयाजं पौर्णमास्याम् एके आचार्या मन्यन्ते। वैष्णवं च अमावास्यायां मन्यन्ते। उपांश्वधिकाराद् उपांशुयाजा[4] भवन्ति। नैके कंचन। एके आचार्याः कंचन उपांशुयाजं[5] न मन्यन्ते आम्नातं च, [3]अनाम्नातं च[3] प्राजापत्यादि। अधिकृतानां प्रतिषेधे सति सूत्रारम्भोऽनर्थकः[6]॥ १३॥

अन्येषामप्युपांशूनामावह स्वाहाऽयाट् प्रिया धामानीदं हविर्महो ज्याय इत्युच्चैः॥ १४॥

अन्येषामपि उपांशुहविषाम् 'अग्न्याधेयप्रभृत्यात उपांशुहविषः' (आश्रौ २, १५, २) इत्येवमादीनाम् अधिकृतानाम् अपि आवह, स्वाहा, अयाट्, प्रिया धामानि, इदं हविः, महो ज्यायः[7] इति एते षट्[8] शब्दा उच्चैः भवन्ति। देवताया उपांशुत्वात् तदर्था ये शब्दाः प्रवर्तन्ते तेषामप्युपांशुत्वे प्राप्ते उच्चैष्ट्वं विधीयते॥ १४॥

येऽन्ये तद्वचनाः परोक्षास्तानुपांशूच्चैर्वा॥ १५॥

एभ्यः[9] षड्भ्यो[10] येऽन्ये शब्दाः तद्वचनाः देवतावचनाः, देवतावाचिनः[11] परोक्षाः न देवता [12]शब्दं प्रत्यक्षं[12] ब्रुवन्ति। तानुपांशु ब्रूयाद् उच्चैर्वा। यथा— अजुषतावीवृधत ··· अक्रतेति (आश्रौ १,९,१)। तत्र येऽन्य इति वचनाद् यत्रैते

१-१. प्राप्तमा हविर्ग्रं° वि; प्राप्तमनु हविर्ग्रं° वा; मन्त्रहविर्ग्रं° मं। २. अत मूको.। ३-३. नास्ति मं। ४. °याज्याः ब[3-5] वा वि। ५. °याजकं ब्रा[3-5] वि। ६. °नर्थः ब[3-5] वि। ७. ज्याय इत्युच्चैः ब[3-5]। ८. नास्ति ब[3-5]। ९. उपांशूनाम् आवह स्वाहाऽयाट् प्रिया धामानीदं हविर्महोज्याय इति एभ्यः (एतेभ्यः वा) ब[3-5] वा वि। १०. षट्पद्भ्यः वि। ११. °तावादिनः ब[1]; °तावादतः ब[3,4]। १२-१२. शब्दप्रत्यक्षं ब[1]; प्रत्यक्षं ब[2]।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

षट् शब्दा [1]निगदस्थानगताः प्रैषगताश्च[1] [2]तत्रैतेभ्यो येऽन्ये[2] तद्वचनाः[3], तेषां विभाषा भवति, न[4] याज्याऽनुवाक्यागतानाम्[5]। तस्मात् प्रैषेषु आददादीनां[6] न विभाषा। एतेषाम्[7] उपांशुत्वम् [8]ओं-प्रैषस्योच्चैष्ट्वप्राप्त्यर्थम्। तद्वचना इत्येतस्माद् देवताशब्दस्यापि प्राप्ते परोक्षा इत्याह। तद्वचनत्वादुपांशुत्वं परोक्षत्वादुच्चैष्ट्वम्।†[8] ॥ १५ ॥

[विहितदेवतानामरूपस्य प्रत्यक्षस्योपांशुत्वम्]

प्रत्यक्षमुपांशु ॥ १६ ॥

यत् प्रत्यक्षं देवतानाम विष्णुरग्नीषोमौ प्रजापतिरिति तद् उपांशु एव[9]। 'विष्णुमुपांशु' (आश्रौ १,३,१२) इत्येतेनैव सिद्धे पुनरिदमुच्यते[10] आवाहन[11] उक्तम् उपांशुत्वं तत्रैव स्यादुत्तरेषु निगमेषु न स्याद्। यथा एकप्रदानानाम्[12] आवाहन उक्तो विधिरुत्तरेषु न प्राप्नोति। तस्मादाह— 'तथोत्तरेषु निगमेषु' (आश्रौ १, ३, १९क) इति। एवमिहापि वचनमन्तरेणोत्तरेषु निगमेषूपांशुत्वं चोच्चैष्ट्वं च न[13] प्राप्नोति। तस्मात् सर्वत्र प्राप्त्यर्थं प्रत्यक्षमुपांशिवति पुनरुच्यते।

अथोपांशिवति[14] न वक्तव्यम्, आवहादीनां[15] सर्वनिगमानामुच्चैष्ट्व-विधानात्[16]। तद्वचनानां च परोक्षाणां विभाषा वचनाद् (आश्रौ १, ३, १६-१८) अर्थादेव सर्वत्र प्रत्यक्षमुपांशु भविष्यतीति तत्र[17] ज्ञानविधानं[18] बलीयः। [19]यथा आवहादीनामुच्चैर्वचनाद्[19] याज्यानुवाक्या उपांशु भवन्ति। तत्र [20]ये अतद्वचनाः[20] शब्दास्तेऽर्थादुच्चैरतोन्द्रियत्वेन[21] च[4] तद्वचनाः[22] परोक्षा[23] विभाषया[24] प्रयुज्यन्ते। [25]†वचनात् ‡तेषां प्रैषे उच्चैः[4] प्रयुज्यन्ते। एवं प्रत्यक्षस्याप्यर्थादुपांशुत्वं न प्राप्नोतिϕ। तस्मात् प्रत्यक्षमुपांशिवत्युच्यते[25] ॥ १६ ॥

१-१. निगदप्रैषस्थानगताश्च वा; निगदमदस्थानगताश्च वि; निगदस्थानगताश्च ब[3-5]; निगदस्थान एताः प्रैष° ब[2] मै। २-२. तत्र चान्ये ब[2]; तत्रैतेऽन्ये मै। ३. °नात् मै। ४. नास्ति ब[3-5] वा वि। ५. °वाकग° मै। ६. तु. आश्रौ ३, ४, १५। ७. एव तेषाम् ब[1,3-5] वा वि। ८-८. ॐ प्रैषस्योच्चैः ब[3-5] वि। †. °दुच्चैः मै वा। ९. °पांशुत्वं परोक्षत्वं ब[3-5] वा वि। १०. पुन-रित्युच्यते ब[4]। ११. °हनम् ब[1-5] मै। १२. तु. आश्रौ १, ३, १८; २, ११, २; ५। १३. नास्ति ब[1,2] मै। १४. °पांश्वेव ब[3,5] वि; °पांशिवत्येव ब[4]। १५. आवाहनादीनां ब[3,5] मै वा वि; आवहनादीनां ब[2]। १६. सर्वाणि चा (वा वि) गमना° ब[3-5] वि; सर्वाणि निग° मै। १७. न ब[1-2] मै; तन्न वा। १८. ज्ञानविधानं ब[3,5]; अज्ञानविधानं ब[4]। १९-१९. यथा आदेद्यदीना° ब[3-5] वि; अथा अदेद्यदिना° ब[4]। २०-२०. ये ये तद्वच° ब[1]। २१. °दुच्चैरतन्द्रिय° ब[3,4]; °दुच्चैरिन्द्रिय° ब[1,2,5] मै वा वि। २२. °चनात् ब[2-5] मै वा वि। २३. परोक्षया ब[3-5] वा वि। २४. °षा ब[1]; °षा या ब[4]। २५-२५. नास्ति मै। †. त् ब[5]। ‡. नास्ति ब[3,5] वा वि। ϕ. आप्नोति वा वि।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

दर्शपूर्णमास

Digitized by Madhuban Trust

प्रतिचोदनमावाहनम् ॥ १७ ॥

देवतादेशश्चोदनेत्युच्यते । चोदनां चोदनां[1] प्रति प्रतिचोदनम्[2] । प्रतिचोदनमावाहनम् । प्रतिदेवतमावाहनमित्यर्थः । यदुक्तम्—'द्वितीयया विभक्त्याऽऽदेशमादेशमावहेत्यावाहयति' (आश्रौ १, ३, ६) इति, तत् प्राप्तमपि पुनरुच्यते अधिकारव्यवायादेकप्रदानानामावाहनविवक्षार्थम् । तस्मादेकप्रदानासु देवताऽधिकारः कर्तव्यः । द्वितीयया विभक्त्याऽऽवाहनमित्येतत् सर्वमधिकृतं भवति ॥ १७ ॥

सर्वा आदिश्य सकृदेकप्रदानाः ॥ १८ ॥

एकं प्रदानं यासां देवतानां ता एकप्रदानाः । ताः सर्वाः देवता द्वितीयया विभक्त्या[3] आदिश्य सकृद् आवहेत्यावाहयति[4] । यथा[5] [6]'अग्निं वसुमन्तं सोमं रुद्रवन्तम् इन्द्रं मरुत्वन्तं वरुणमादित्यवन्तमावहेति[6] । एवमिन्द्रमित्ययमपि[7] । 'प्रतिचोदनमावाहनम्' (आश्रौ १, ३, १७) इत्यधिकारात् सर्वा[1] इत्युक्तेर्देवताः संबध्यन्ते । आदिश्येत्युक्ते द्वितीयया विभक्त्याऽऽदेशः । सकृदिति वचनात् सकृदावाहनं[8] संबध्यते । प्रतिचोदनमित्यधिकारात् सर्वा आदिश्येत्याह । एकप्रदाना [9]देवता असमासेन[9] [10]चोदिताः, तस्मान्निगमेऽव्वसमासं[10] दर्शयति । मित्रविन्दायामसमासेन[11] याज्यादेशः[12] 'ये यजामहे त्वष्टारं सरस्वतीम्' (आश्रौ २, ११, ४) इति । किं सकृदिति संशयो भवति । अधिकारात् सकृदावाहयति । प्रतिचोदनमावाहने[13] प्राप्ते एकप्रदानासु सर्वा आदिश्यन्ते आवाहनाङ्गत्वात्[14] । आवाहनशब्दस्यावृत्तौ प्राप्तायां सकृदित्युच्यते ॥ १८ ॥

तथोत्तरेषु निगमेषु ॥ १९क ॥

यथाऽऽवाहने सर्वा आदिश्य सकृदावाहिताः तथा उत्तरेषु प्रयाजादिनिगमेषु[15] सर्वा आदिश्य सकृदेव [16]स्वाहादीन् ब्रूयात्[16] । आवाहने विहितो विधिस्तत्रैव स्यादुत्तरेषु न स्यादित्यारम्भः । निगमग्रहणाद् याज्यादेशेऽपि[17] प्राप्तिः ॥ १९क ॥

---

१. नास्ति ब[1] । २. नास्ति मै । ३. नास्ति वि । ४. वहेत्यावाहयति वि । ५. नास्ति ब[2-5] मै वा वि । ६-६. तु. आश्रौ २, ११, ११ । ७. °मिन्द्रियमपि वि । तु. आश्रौ ५, ३, १० । ८. समूहावाहनं ब[2] । ९-९. ताः समासेन ब[2] मै । १०-१०. तस्मान्निगमेथ वि ; °मेऽव्वसमासः मै । ११. °न्दायां वा समासेन ब[3-5]; °न्दायां वा समानेन वि । १२. यावद्देवतासमासेन यावद्देवतासमासेन यादेशं (°शः ब[1]) ब[4,5]; यादेयां वा समानेन यादेशं वि ; याज्यादेशः वा । १३. प्रचोद° ब[1]; चोद° वि । १४. आवाहनं कृत्वा ब[2]; आवाहनां गत्वा ब[3,5] वि ; आवाहनकृत्त्वात् मै । १५. °जादिषु निग° ब[1] । १६-१६. स्वाहादीमनुब्रू° ब[3,5]; स्वादीमब्रू° ब[4]; स्वादीन् ब्रूयात् ब[1]; स्वाहामब्रू° वि । १७. याज्यादेरपि ब[1] मै ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

एकामिव संस्तुयात् ॥ १९ख ॥

अत्र चकारोऽध्याहर्तव्यः समुच्चयार्थः । एकामिव च संस्तुयात् । [1]एकामिव च †द्व्यर्थानां द्विवचने† बह्वर्थानां बहुवचने प्राप्ते इदमेकवचनम्[1] विधीयते । [2]तदपीदृशामेकप्रदानानां[2] देवतानां सम्प्रदानविभक्तेरेकामिव च[3] संस्तुयात् । सूक्तवाके[4] 'अजुषतावीवृधत ... अक्रत' (आश्रौ १, ९, १) इति । एकवचनेन वेति विकल्पः । यथा मन्त्रेषु 'ऊर्ध्वायां दिशि यज्ञः संवत्सरः प्रजापतिर्मार्जयतां मार्जयन्ताम् इति वा[5] (आश्रौ १, ११, ७) । 'अग्न इन्द्र वरुण मित्र देवाः' (ऋ ५, ४६, २) इत्येतस्यामृचि बहुवचनेन[6] संस्तवः । 'स्वस्ति न इन्द्रो वृद्धश्रवाः' (ऋ १, ८९, ६) इत्येतस्यामृचि एकवचनेन संस्तवः । 'शं नो मित्रः शं वरुणः' (ऋ १, ९०, ९) इत्येतस्यामपि [7]विभक्तस्तुति तद् विद्यात् । उक्तमेवानुक्रमवाक्यम्[7] । 'यत्र द्विदैवते[8] मन्त्र एकवद् देवतोच्यते । विभक्तस्तुति तद् विद्याद् [9]बहुष्वबहुवच्च यत्' (बृदे ३, ८१-८२) इति[9] ॥ १९ख ॥

समानां देवतां समानार्थाम् ॥ २० ॥

अव्यवहितां सकृन्निगमेषु[10] ॥ २१ ॥

बहूनां[11] हविषामेकप्रदानानां नानाप्रदानानां वा [12]यदि समाना देवता भवन्ति†, यदि च समानार्था भवन्ति समानप्रयोजना‡ अन्ययाϕ देवतया अव्यवहिता भवन्ति । ता देवता आवाहनादिषु[12] निगमेषु [13]सकृन् निगमयेदिति । यावत्पादव्यावृत्तौ[13] प्राप्तायामारम्भः । उदाहरणम्[14] 'यावतोऽश्वान् प्रतिगृह्णीयात् तावतो वारुणांश्चतुष्कपालान्निर्वपेदिति' (तैसं २, ३, १२, १) । समानार्थामिति । देवता[13]

१-१. °मिव च बह्वष्टानां (बृह्वृचानां वा) बहुवचनं प्राप्तमेव एकवचनं ब[3-5] वा वि । †-†. द्व्यर्थानां द्व्यर्थानां द्विवचनम् ब[2] मं । २-२. तादपीदृष्टगायमेक° ब[1]; तापीदृष्टशायमेक° ब[2]; नापि दृष्टशायमेक° ब[3]; नापि दृष्टं शायमेक° ब[4,5]; तापीदृष्टशायमेक° मं; नापी दृष्टं शायमेक° वा; तापी दृष्टं शायमेक° वि । ३. नास्ति ब[3-5] । ४. °केषु ब[2,5] मं वा वि । ५. च वा वि । ६. बहुत्वेन ब[1,3-5] वा वि । ७-७. विभक्तस्तुतितत्त्वात् (°स्तुत्वात् मं) तथा चायुक्तमे° ब[2] मं; विभक्तिस्तुति तद्वि° ब[3-5]; विभक्तिस्तुति तद्वि° वा वि । ८. द्विदेवत्ये मूको. । ९-९. बहुष्वबहुवचनात् ब[1]; बहुष्वबहुवदिति वचनात् ब[2] मं; बहुवचनम् इति ब[3-5]; बहुवचनाना (°चनां वा) मिति वा वि । १०. °न्निगदेषु ब[2] मं । ११. हवीनां ब[2] । १२-१२. षु ब[4] । †. भवति ब[3] मं वा वि । ‡. °योजनम् ब[2] मं । ϕ. अन्यथा ब[3] वा वि । १३-१३. °येदित्यावशादावृत्तौ ब[1]; °येदित्यावश्यदावृत्तौ ब[2]; °येत् इज्यावशादावृत्तौ मं; °येदिवावश्यादव्यावृत्तौ वा; °येदिद्या वस्यादव्ये वृत्तौ वि । १४. °रणं च ब[3,4] ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

दर्शपूर्णमास
Digitized by Madhuban Trust

त्रीनर्थानधिकृत्य प्रवर्तते नित्यार्था भवति[1], निमित्तात्, कामाच्च । तेष्वपि चत्वारि भेदकारणानि[2] । [3]अङ्गं प्रधानम्[3] उपांशु उच्चैरिति[4] । दर्शपूर्णमासयोराग्रयणेष्टिमनुनिर्वपति । तत्र असन्नयतो यजमानस्य [5]इन्द्राग्नी देवता असमानार्थत्वात् । द्वयोः पृथङ्निगमः[5] । [6]एका नित्यार्था । नैमित्तिकी द्वितीया† । श्यामाकेष्टयामाज्यभागः सौम्यश्चरुः । समानदेवता[6] [7]†अङ्गं प्रधान†मित्यर्थभेदात् पृथङ्निगमः‡[7] । [8]पौर्णमास्याम् अग्नीषोमीय उपांशुयाजो† भवति‡ । नित्यश्चाग्नीषोमीयःϕ । समाना[8] देवता समानार्था च । स्वरभेदात् पृथङ्निगमः[9] । अव्यवहितानामिति वचनाद् व्यवहितानां पृथङ्निगमः[9] । 'अग्नये भ्राजस्वते [10]पुरोडाशमष्टाकपालं[10] सौर्यं चरुमग्नये भ्राजस्वते' (तैसं २, ३, ८, १) । कारीर्यां च[11] मरुतोऽव्यवहिताः[12] । शास्त्रान्तरेऽन्यव्यवहितानामपि[13] सकृन्निगम एव । तस्मादत्र[14] सकृदिति [15]वचनादेकस्यैव प्रतिषेधः[15] । पुनर्निगमग्रहणं तथोत्तरेषु निगमेष्वित्यधिकारादावाहनादिषु सर्वेषु प्राप्त्यर्थम्[16] ॥ २० ॥ २१ ॥

[आवापोद्धारयोग्यासु प्रधानदेवतासु कृतावाहनासु देवाज्यपास्विष्टकृताम् आवाहनप्रक्रियाकथनम्]

ओऽ३म्हास्त्वावापिकासु देवाँ आज्यपाँ आवहाग्निं होत्रायाऽऽवह स्वं महिमानमावहाऽऽवह जातवेदः सुयजा यजेति ॥ २२क ॥

परिभाषाभिर्व्यवधानात्[17] [18]पुनर्दार्शपौर्णमासिकाधिकारं[18] प्रतिपद्यते । आज्यभागयोरनन्तरम् [19]आवापस्थानम्, तत्राऽऽवापस्थाने[19] भवा आवापिका

---

१. भवन्ति मूको. । २. भेदकरणानि ब[1,2,4] वि । ३-३. अङ्गप्र° मूको. । ४. नास्ति वि । ५-५. इन्द्राग्नी असमानां नर्थत्वात् द्वयोः पृथङ्नियमः ब[1]; °ता समानार्थत्वाद्वैधयोः पृथिव्यां निगमः ब[2] मै ; °ता समाना देवता अङ्गप्रधानमित्यर्थः भेदात् पृथ° ब[3]; इन्द्रा समाना भवति यदि च समानार्था ब[4]; °ता समानादेव वि ; इन्द्राग्नी ब[5] वा । ६-६. नास्ति ब[3,5] वा वि; भवन्ति समानप्रयोजनान्यथा देवतया अव्यवहिता भवन्ति ता देवता आवाहनादि अग्निदेवता समाना देवता ब[4] । †. द्वितीयार्था मै । ७-७. नास्ति ब[3] वा । †-†. अङ्गप्रधा° ब[1,2,4-5] वि । ‡. °ङ्नियमः मै । ८-८. नास्ति वा । †. °याज्ञो ब[1] वि; °याज्या ब[3-5] । ‡. नास्ति ब[1] । ϕ. आव्यश्चाग्नी° मै ब[1,4]; आव्यश्चानग्नी° ब[3-5] वि । ९. °ङ्नियमः ब[1] । १०-१०. नास्ति मूको. । ११. नास्ति ब[3-5] । १२. °तो व्य° मूको. । १३. °न्तरे व्यव° ब[2] मै; °न्तरान्यव° ब[3-4] । १४. °दतः ब[2] मै; °द्यत्र ब[1]; °द्यतः ब[3-5]; °द्यत्तः वा वि । १५-१५. °स्यैवाप्र° ब[1,3,5] । १६. प्राप्तः ब[1,2]; प्राप्तिः ब[3-5] वा वि ; प्राप्ते मै । १७. °भिर्व्यवचनात् ब[2]; °भिर्व्य ··· वचनात् मै । १८-१८. °मासिकाधिकाधिकारं ब[1]; °पूर्णमासिकाधिकाधिकारं ब[2] ; °पूर्णमासि वा वृत्तिकान्तं ब[3]; °पूर्णमासी वाधिकाधिकान्तं ब[4]; °पूर्णमासिकाधिवृत्तिकान्तं ब[5]; °सिकावृत्तिकान्तं वा; °पूर्णमासिकाधिकारं मै; वृत्तिकान्तं वि । १९-१९. °पनं स्थात् त्वावापस्थाने ब[1]; °पस्थानं न चावापस्थाने ब[2]; °पस्थानं न वा वापस्थाने न ब[3-5] वा वि ; °पस्थानात् तत्रावा° मै ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

देवताः[1]। पौर्णमास्यामन्याः, अमावास्यायामन्याः। उभयोरनन्तरम्[2] इमा देवता आवाहयेदिति। 'देवाँ[3] आज्यपाँ आवह' इति प्रयाजानुयाजानामिदमावाहनम्[4]। 'अग्निं होत्रायावह स्वं महिमानमावह' इति स्विष्टकृतः[5]। [6]तत् प्रदर्शितं पित्र्यायाम्†। 'आवह जातवेदः सुयजा यजेति' आवाहनार्थो निगदशेषः। यत्रैतानि कर्माणि न विद्यन्ते तत्रैता देवता[6] न भवन्ति[7] उपसदादिषु। निगदशेषस्तु[8] भवत्येवावाहनार्थत्वाद्[9] [10]आवह जातवेदः सुयजा यजेति ॥ २२क ॥

आवाह्य यथास्थितमूर्ध्वजानुरुपविश्योदग्वेदेर्व्यूह्य तृणानि भूमौ प्रादेशं कुर्यात्। अदितिर्माताऽस्यान्तरिक्षान्मा च्छेत्सीरिदमहमग्निना† देवेन देवतया त्रिवृता स्तोमेन रथन्तरेण साम्ना गायत्रेण च्छन्दसाऽग्निष्टोमेन यज्ञेन वषट्कारेण वज्रेण योऽस्मान् द्वेष्टि यं च वयं द्विष्मस्तं हन्मीति[10] ॥ २२ख ॥

आवाह्य आवाहनं कृत्वा[11] यथास्थितं वेदिश्रोण्यामभिहृततरेण पादेन यथा[12] स्थितः [13]ऊर्ध्वजानुः ऊर्ध्वे जानुनी[13] कृत्वा उपविश्य उदग् वेदेः वेदेरुदीच्यां[14] दिशि व्युह्य तृणानि अपनीय तृणानि भूमौ संनिविष्टं प्रादेशं कुर्यात् 'अदितिः' इत्यनेन मन्त्रान्तेन। आवाह्येत्यनुक्रमार्थम्[15]। ऊर्ध्वजानुरित्युच्यते—'ऊर्ध्वज्ञुमासीनं होतारं वृणीते' (आपश्रौ २, १६, २) इति श्रुतिः। उदग्वेदेरिति निर्धारणे षष्ठी। तस्मादन्तर्वेदि भवति ॥ २२ख ॥

[आश्रावयिष्यतेऽध्वर्यवेऽनुमन्त्रणं तदनन्तरकरणीयं च]

आश्रावयिष्यन्तमनुमन्त्रयेताऽऽश्रावय यज्ञं देवेष्वाश्रावय मां मनुष्येषु कीर्त्यै यशसे ब्रह्मवर्चसायेति ॥ २३क ॥

[16]आश्रावयिष्यन्तम् आश्रावणं कुर्वन्तम्[16] अध्वर्युम् अनुमन्त्रयेत मन्त्रं ब्रूयाद् होता। अनुमन्त्रणत्वादुपांशु 'आश्रावय यज्ञम्' इत्यनेन[17] ॥ २३क ॥

---

१. °ता याः वि। २. उभयानन्तरं ब[1,2] मै। ३. नास्ति ब[1,2,5]। ४. प्रयाजानूया° ब[3,5] मै। ५. °कृतं ब[3,5]। ६-६. नास्ति ब[3,5] वा वि। †. तु. आश्रौ २, १९, ८। ७. भवति ब[3-5]। ८. °षो ब[1,2]; निगमशेषो मै। ९. °वाहनार्थता ब[3-5]। १०-१०. आवाहमप्रादेशं कुर्यात् ब[1]; आवाहनप्रादेशं कुर्यात् ब[2] मै। † मेत्सी° मै। ११. नास्ति ब[3-5]। १२. तथा ब[1-3,5] मै वा वि। १३-१३. ऊर्ध्वजानुनी ब[2] मै; ऊर्ध्वो जानु ऊर्ध्वो जानुनी ब[1]; ऊर्ध्वो जानुः ऊर्ध्वो जानुनी वि; ऊर्ध्वजानुः (°नु ब[4]) ऊर्ध्वे (°र्ध्व ब[4]) जानुनी ब[3,4] वा; ऊर्ध्वे जानुनी ब[5]। १४. उदीच्यां ब[3,5]। १५. °त्यनुग्रहार्थम् ब[3,5] वा वि। १६-१६. नास्ति वा। १७. इत्येतेन ब[1]।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

दर्शपूर्णमास

Digitized by Madhuban Trust

प्रवृणानं[1] देव [2]सवितरेतं त्वा वृणतेऽग्निं होत्राय सह पित्रा वैश्वानरेण द्यावापृथिवी मां पातामग्निर्होताऽहं मानुष इति[2] ॥ २३ख ॥

आर्षेयान् प्रवृणीते[3] [4]अध्वर्युः, तं होता[4] प्रवृणानम् अध्वर्युमनुमन्त्रयते 'देव सवितः' इत्यनेन यथाम्नातेन[5] मन्त्रेण ॥ २३ख ॥

मानुष इत्यध्वर्योः श्रुत्वोदायुषा स्वायुषोदोषधीनां रसेनोत्पर्जन्यस्य धामभिरुदस्थाममृताँ अन्वित्युत्तिष्ठेत् ॥ २३ग ॥

मानुष इत्यध्वर्योः वचनं श्रुत्वा 'उदायुषा' इति मन्त्रान्तेन उत्तिष्ठेत्[6] ॥ २३ग ॥

[7]षष्टिश्चाध्वर्यो† नवतिश्च पाशा अग्निं होतारमन्तरा विचृत्ताः‡ । सिनन्ति पाकमतिधीर एतीत्युत्थाय[7] ॥ २४ ॥

[8]'षष्टिश्चाध्वर्योः' इत्येतं[8] मन्त्रम् उत्थाय जपति । याजुषेषु मन्त्रेषु कर्मप्रचोदनावशाज्जपतीत्यध्याहर्तव्यं[9], [10]यजुषामुपांशुभावात् । 'उपांशु यजुर्वेदेन' (आपश्रौ २४, १, ९) इत्यन्येषाम्[10] । सर्वे च उपांशु प्रयुक्ता जपा इत्युच्यन्ते । तद् दर्शयति—'लुप्तजपा' (आश्रौ २, १९, ३) इति ॥ २४ ॥

ऋतस्य पन्थामन्वेमि होतेत्यभिक्रम्यांसेऽध्वर्युमन्वारभेत पार्श्वस्थेन पाणिना ॥ २५ ॥

'ऋतस्य पन्थाम्' इत्यनेन मन्त्रान्तेन अभिक्रम्य गत्वा [11]अध्वर्युसमीपम् । अंसे अध्वर्युमन्वारभेत[11] । दक्षिणे [12]अंसे अध्वर्युमारभेत[12] । पार्श्वस्थेन पाणिना । पार्श्वेन[13] स्थितः । पाणिग्रहणं पार्श्वस्थवचनार्थम् ॥ २५ ॥

---

१. प्रवृणानप्रवृणानं मैं । २-२. नास्ति ब^{1,2} मैं । ३. वृणीते मैं । ४-४. होतारं चाध्वर्युस्तं होता ब$^{3-5}$ वा वि ; होता ब^{2} मैं । ५. नास्ति मैं । ६. उपतिष्ठेत् मैं । ७-७. नास्ति ब^{1,2} । †. °श्चाध्वर्योर् मैं । ‡. विवृत्ताः मैं । ८-८. °र्युरिमे च ब^{3,5}; °र्योरित्येतं मैं ; °र्युरित्येव वा वि । ९. °दनाज्जप° ब^{1}; °दनायाञ्जप° ब^{2} मैं । १०-१०. य (या?) जुषाणामुपांशु यजुर्वेदेऽन्येषाम् ब$^{3-5}$ वा वि ; र्वेदिनोऽन्येषाम् मैं । ११-११. °मीपमध्वर्युमन्वालभेत ब^{2,4,5} वा वि ; °मीपमध्वर्युमन्वालभत ब^{1}; °मीपमध्वर्युमन्वारभत ब^{3}; °मीपमध्वर्यु° मैं । १२-१२. अंसेध्वध्वर्युमालभेत मैं ; अंसे दक्षिणमन्वारभेत ब^{4}; °मालभेत् वा ब^{1,2}; °मालभेत ब^{3,5} वि । १३. पार्श्वस्थेन ब$^{1,3-5}$ वा वि ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आग्नीध्रमङ्कदेशेन सव्येन वा ॥ २६ ॥

इन्द्रमन्वारभामहे होतृवूर्ये पुरोहितम् । येनाऽऽयन्नुत्तमं स्वर्देवा अङ्गिरसो दिवमिति ॥ २७ ॥

आग्नीध्रं ब्रह्मपुरुषम् अङ्कदेशेन उत्सङ्गेन आलभेत[१] [२]सव्येन वा† ‡पाणिना दक्षिणेंऽसे एवमन्वाऽऽरभेत‡ 'इन्द्रमन्वारभामहे' इत्यनेन मन्त्रान्तेन समारभेत[२] ॥ २६-२७ ॥

[इध्मसन्नहनरूपैरग्निसंमार्गतृणैरात्ममुखसंमार्जनम्]

सम्मार्गतृणैस्त्रिरभ्यात्मं[३] मुखं संमृजीत[४] संमार्गोऽसि[५] [६]सं मां[६] प्रजया पशुभिर्मृड्ढीति सकृन्मन्त्रेण द्विस्तूष्णीम् ॥ २८ ॥

अग्नेः सम्मार्गार्थानि[७] तृणानि सम्मार्गतृणानि, तैस्तृणैः [८]त्रिः अभ्यात्मम्[८] आत्मानमभि अभ्यात्मम्[८], नोर्ध्वं न तिर्यक्, मुखं संमृजीत[४] 'संमार्गोऽसि' इत्यनेन मन्त्रेण। सकृन्मन्त्रेण संमृजीत,[४] द्विस्तूष्णीम्, त्रिः, प्राप्तकर्मप्रधानत्वात्[९]। द्विस्तूष्णीम् इत्युच्यमाने[१०] अमन्त्वं द्विः कृत्वा सकृन्मन्त्रेण कुर्यात् ॥ २८ ॥

सर्वत्रैवं कर्मावृत्तौ ॥ २९ ॥

सर्वत्र यत्र यत्र कर्मावृत्तिः तत्र तत्र[११] त्रिः[१२], सकृन्मन्त्रेण द्विस्तूष्णीम्। एवं कर्मावृत्तौ। एवमित्यवधारणायाम्[१३]। कर्मावृत्तौ संस्कारकर्मणीत्यर्थः। [१४]अत्र 'त्रिरन्तरितं रक्षः' (आश्रौ २,३,७), 'दक्षिणा पांसूंस्त्रिरुदुप्य[१४]' (आश्रौ ४,४,२) इति द्वे एवोदाहरणे। गृह्यकर्मणि इयं परिभाषा[१५] भवति उत्पवने[१६] पुनरारम्भात् 'सकृन्मन्त्रेण' (आगृ १, ३, ३) इति। तस्मात् 'शिरस्त्रिरुन्दति' (आगृ १, १७, ७)

---

१. समारभेते ब[४]। २-२. नास्ति ब[४]। †. च वा ; नास्ति ब[२] वि। ‡-‡. इन्द्रपाणिना दक्षिण अंस एवमन्वालभेत ब[३,५]; इन्द्रपाणिना दक्षिणेन अंस एवमन्वालभेत वा; °एवमन्वालभेत वि ; दक्षिणा अंसे एव गत्वाऽऽरभेत मै ; °एवं गत्वाऽन्वालभेत ब[१]। ३. °रध्यात्मं मै। ४. संमृजेत मै। ५. सन्मार्गो° मै। ६-६. सन्मां मै। ७. सम्मार्गाणि ब[१,३-५] वा वि। ८-८. अध्यात्मम् मै। ९. प्राप्तौ कर्म° ब[१]; प्राप्तः कर्म° ब[२] मै। १०. इत्यनुच्यमाने ब[१,२] वा। ११. नास्ति मूको.। १२. नास्ति ब[१,२] मै। १३. एवेत्य° मूको.। १४-१४. मन्त्रविरहितं द° ब[३-५]; मन्त्रः त्रिरन्तरितं रक्षः मन्त्रत्रिरन्तरितं रक्षाणः (उक्षाणः मै) ब[२] मै। १५. परिभापा न ब[१] मै। १६. उत्सेवने ब[३] वि ; उत्सेचने ब[५] वा।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

दर्शपूर्णमास
Digitized by Madhuban Trust

एवमादिषु मन्त्रावृत्तिः[1] । एवमितिवचनात् संस्कारकर्मण्येवोदाहरणम् । तत्र तौल्यात् सकृन्मन्त्रेण द्विस्तूष्णीमिति[2] ॥ २९ ॥

[उदकस्पर्शानन्तरं होतृषदनाभिमन्त्रणम्]

स्पृष्ट्वोदकं [3]होतृषदनमभिमन्त्रयेताहे दैधिषव्योदतस्तिष्ठान्यस्य सदने[3] सीद योऽस्मत् पाकतर इति ॥ ३० ॥

स्पृष्ट्वोदकं[4] कमण्डलुना उदकं स्पृष्ट्वा । होता यस्मिन् सीदति तद् होतृषदनं तृणमयं भवति । तद् अभिमन्त्रयेत अभिमृश्य मन्त्रयेत 'अहे दैधिषव्य' (तैसं ३, २, ४, ४) इत्यनेन[5] मन्त्रेण । तत्राभिमर्शनाभिमन्त्रणे[6] कर्मकरणे भवतः[7] । इति[8] न्यायादनुमन्त्रणेन[9] सहोपसंख्यानं कुर्यात् ॥ ३० ॥

[दक्षिणोत्तरिणोपस्थेनोपवेशनं होतृषदनात् तृणनिरसनं च]

अङ्गुष्ठोपकनिष्ठिकाभ्यां होतृषदनात् तृणं प्रत्यग्दक्षिणा[10] निरसेन्निरस्तः परावसुरिति ॥ ३१क ॥

कनिष्ठिकाया[11] उप समीपे उपकनिष्ठिका । अङ्गुष्ठेन उपकनिष्ठिकया च[12] अङ्गुष्ठोपकनिष्ठिकाभ्यां होतृषदनात् तृणं गृहीत्वा प्रतीच्याश्च[13] दक्षिणायाश्चान्तरालं प्रत्यग्दक्षिणा । तस्यां दिशि तृणं[14] निरसेत् निक्षिपेत् 'निरस्तः' इत्येतेन मन्त्रेण । होतृषदनग्रहणं [15]होतृषदनादेव नान्यस्माद्देशादिति ॥ ३१(क) ॥

†इदमहमर्वावसोः सदने सीदामीत्युपविशेद्[15] दक्षिणोत्तरिणोपस्थेन† ॥३१ख॥

'इदमहम्' इत्येतेन‡ मन्त्रेण तस्मिन् होतृषदने उपविशेत्[15] । दक्षिणपाद[16] उत्तरो यस्योपस्यस्य स दक्षिणोत्तर्युपस्थः तेनोपविशेत् ॥ ३१(ख) ॥

[उक्तयोरेतयोस्तृणनिरसनोपवेशनयोः सर्वासनेषु प्रथमप्रयोग एव समानत्वम्]

एते निरसनोपवेशने सर्वासनेषु सर्वेषामहरहः प्रथमोपवेशनेऽपि समाने ॥ ३२ ॥

---

१. मन्त्रप्रवृत्तिः ब[3-5] वा वि । २. °मिति अष्टाक्ष शणि मै ; °मिति अष्टौ वाक्षराणि ब[3-5] वा वि; अष्टोक्षराणि ब[2] । ३-३. °ष्ठान्यस° मै । ४. नास्ति मै । ५. इत्येतेन वा वि । ६. तत्राभिमन्त्रे ब[3-5] । ७. भवति ब[1-5] वा वि । ८. नास्ति ब[2-5] वा वि । ९. न्ययोदनु° ब[3-5] वि ; न्यायोदनु° वा । १०. °णो मै । ११. °काम् मै ; °कायाम् ब[1,2,4] । १२. वा ब[2] मै । १३. °च्या मै । १४. नास्ति ब[4] । १५-१५. होतृपदनोपविशेत् ब[2] । †-†. नास्ति मै । ‡. इत्यनेन ब[1] मै; इत्येनेन वा । १६. °ण; पाद: मै ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

निरसनं च उपवेशनं च निरसनोपवेशने। एते निरसनोपवेशने सर्वासनेषु भवतो यावन्तीह शास्त्रे उपवेशनानि चोदितानि। सर्वेषां सर्वकर्तॄणां होतृब्रह्मणोर्होत्रकाणां[1] च। यथा[2] पश्चादस्योपविशेदिति[3]। सहोपदेशाद् उभयोः साहचर्यम्। साहचर्याद् 'अनिरस्य तृणम्' (आश्रौ ४, ७, ४) इत्युक्ते उपवेशनमन्त्रोऽपि न भवति। सर्वासनेष्विति सर्वग्रहणाद् ऐष्टिकादन्येष्वपि[4] अग्निप्रणयनादिषु भवतः[5]। सर्वेषामिति सर्वग्रहणं[6] होतुरधिकारात् सर्वकर्तॄणां प्राप्त्यर्थम्। [7]अहरहः अहर्गणे[7] अहन्यहनि[8] यत् प्रथममुपवेशनं तत्रैव[9] निरसनोपवेशने भवतो नोत्तरेषु। [10]समानेऽप्यासनेऽसमानेऽपि अहन्यहनि[10] तदेव स्थानं समानं[11] भवति। यथा होतुः स्वस्य धिष्ण्यस्य पश्चात् (तु० आश्रौ ४, ११, ३)। असमानं तु होत्रकाणाम्। तेषामग्नीषोमीये[12] आसनसंस्कारो न विद्यते। सर्वासनेषु सर्वेषामिति अहरहः प्रथमोपवेशनेऽपि[13] इत्याह। अपि-शब्दः समुच्चयार्थः। समानग्रहणादसमाने[14] प्रतिषेधः स्यात्। तस्मात्[15] समुच्चयः। अहरहरिति वचनाद् अन्यत्र समाने न[16] भवतः[17]। तस्मिन्नेवासने उपविशतीति[18] ॥ ३२ ॥

[गौतममतेन द्वितयेऽपि प्रयोगे तादृशनिरसनोपवेशनयोः सद्भावः]

द्विरिति गौतमः ॥ ३३ ॥

अपि समाने इति[19] वचनं[20] वर्तते। समानेऽप्यासने द्विः निरसनोपवेशने गौतम आचार्यो मन्यते [21]वक्ष्यमाणेषु निमित्तेषु[21] ॥ ३३ ॥

[22]॥ इति तृतीयः खण्डः ॥[22]

---

१. होतुर्ब्रह्मणो हो° ब[1]। २. यथा यथा ब[3,5]। ३. °स्योपविश्येति ब[2] मै; °स्योपविश्यत इति ब[3-5] वा वि। ४. अन्येष्वपि मै। ५. भवति ब[3-5] वा वि। ६. °णात् ब[1,3-5] वा वि। ७-७. अहरहो अहर्गणे मै; अहरहर्ग्रहणे ब[1-5] वा वि। ८. अहन्य इति मै। ९. तत्र मै। १०-१०. °सनेऽप्यह° ब[2-5]। ११. समा ब[4]; °मा ब[3]; नास्ति वि। १२. °ग्निष्टोमीये मै; °ग्निषोमीये ब[1,3,4]। १३. °शने मै। १४. °माने न मै। १५. यस्मात् ब[2] मै; नास्ति ब[1]। १६. नास्ति ब[2]। १७. भवति ब[1,3-5] वा वि। १८. उपविश्येति ब[3-5] मै वा वि; उपविशेति ब[1]; उपविश्ये ब[2]। १९. नास्ति ब[2]। २०. नास्ति ब[2-5] वा वि। २१-२१. नास्ति मै। २२-२२. तृतीया खण्डिका मै।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

दर्शपूर्णमास
Digitized by Madhuban Trust

अथ प्रथमेऽध्याये चतुर्थः खण्डः

[अग्न्याधेये ब्रह्मौदनप्राशनकाले ब्रह्मणो द्विर्निरसनोपवेशनकरणम्]

ब्रह्मौदने प्राशिष्यमाणेऽग्न्याधेये ब्रह्मा ॥ १ ॥

ब्रह्मौदनो[1] नाम चरुः अग्न्याधेये भवति। तं चत्वार ऋत्विजः प्राश्नन्ति। तस्य कर्मादौ 'नित्यः सर्वकर्मणाम्' (आश्रौ १, १२, ३) इत्येकं[2] निरसनोपवेशनं [3]कृतं भवति। ततः प्राशनकाले द्वितीयं निरसनोपवेशनं[3] ब्रह्मा कुर्यात्। [4]अग्न्याधेयग्रहणादश्वमेधे न भवतीति। तत्र ब्रह्मौदने विहितो विधिः, सर्वब्रह्मौदनेषु स एव भवितुमर्हति। तस्माद्[4] अग्न्याधेयग्रहणमग्न्याधेयभवे[5] ब्रह्मौदने भवतीति उपदिशति[6] शास्त्रान्तरगतत्वात्[7] ॥ १ ॥

[सर्वेषु सोमेषु बहिष्पवमानात् प्रत्येत्य ब्रह्मणः पूर्वासने पुनःकरणम्]

बहिष्पवमानात् प्रत्येत्य सोमे ॥ २ ॥

प्रातरनुवाककाले सकृन्निरसनोपवेशनं ब्रह्मणा कृतं भवति। ततः स्तुते बहिष्पवमाने तस्मात् प्रत्येत्य[8] तस्मिन्नेवासने[9] द्वितीयं निरसनोपवेशनं ब्रह्मा कुर्यात् सोमे। सोमग्रहणम् अग्न्याधेयाधिकारात्। अग्न्याधेये बहिष्पवमानो न विद्यत इति चेत्, अग्न्याधेयो नाम एकाहस्तत्रैव स्यात्। तस्मात् सर्वसोमेषु प्राप्त्यर्थं सोमग्रहणम् ॥ २ ॥

[आसने पश्वर्थमुपविष्टस्य होतुः सदःप्रसर्पणानन्तरं तत्रैव पुनःकरणम्]

प्रसृप्य होता ॥ ३ ॥

सवनीये[10] पशौ होत्रा निरसनोपवेशनं कृतं भवति। पुनः[11] पूर्वया द्वारा प्रसृप्य द्वितीयं निरसनोपवेशनं होता कुर्यात्। होतृग्रहणं ब्रह्मणोऽधिकारात् ॥ ३ ॥

---

१. वक्ष्यमाणेषु निमित्तेषु ब्रह्मौ° मै। २. इत्येवं ब[1-5] वा वि; इत्येतं मै। ३-३. नास्ति ब[1]। ४-४. नास्ति ब[2]। ५. °धेये भवेत् ब[3-5] वा वि। ६. °शन्ति ब[3,4]। ७. °न्तर्गत° ब[1]। ८. प्रतीत्य मै। ९. तस्मिन्नेवावसाने मै। १०. °नीयस्य ब[1]; °नीय° ब[4]। ११. नास्ति ब[1]।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[पशौ स्वाहाकृत्यर्थयोः स्रुगादापनयोः पुनःकरणम्]

स्रुगादापने पशौ ॥ ४ ॥

पशुकर्मणि[1] होत्रा निरसनोपवेशनं कृतं[2] भवति। पुनरुक्तमादापनम्, तेनात्र स्रुगादापने द्वितीयं निरसनोपवेशनं होता कुर्यात्। पशुग्रहणादैष्टिके स्रुगादापने न भवति। परिसमाप्ता[3] गौतमपक्षाः[4] ॥ ४ ॥

[पत्नीसंयाजार्थोपवेशनाकरणम्]

न पत्नीसांयाजिके ॥ ५ ॥

पत्नीसंयाजेषु भवं पत्नीसांयाजिकम्, तस्मिन् पत्नीसांयाजिके[5] निरसनोपवेशने न भवतः। आसना-भावं[5] दर्शयति—'ऊर्ध्वज्ञव आसीनाः' (आपश्रौ ३, ८, ८) इत्येकेषाम्[†][6] ॥ ५ ॥

[कौत्समतेन होतृभिन्नानामेतयोर्निरसनोपवेशनयोरकरणम्]

नान्यत्र होतुरिति कौत्सः ॥ ६ ॥

[7]होतुरासनाद् अन्यत्र निरसनोपवेशने न[†] भवतः। होतुरेव भवतो[7] नान्यस्य[8] कर्तुरिति [9]कौत्स आचार्यो[9] मन्यते। 'सर्वासनेषु सर्वेषाम्' (आश्रौ १, ३, ३२) इति प्राप्ते प्रतिषेधः ॥ ६ ॥

[उपविश्य देव बर्हिरिति मन्त्रपाठः]

उपविश्य देव बर्हिः स्वासस्थं त्वाध्यासदेयमिति ॥ ७ ॥

परिभाषाव्यवधानात् पुनर्दर्शपौर्णमासिकं[10] कृतान्तं[11] प्रतिपद्यते। उपविश्य उत्तरं[12] 'देवबर्हिः' इति एतं[13] मन्त्रं[14] जपति ॥ ७ ॥

---

१. पशौ क° ब^{1}; पशौ पशुक° मै। २. नास्ति वा। ३. °प्तौ ब$^{3-4}$ वा; °प्तः मै। ४. गौतमः पक्षः ब^{3,4} वि; गौतमपक्षः ब^{5} मै; गौतमः पक्षाः वा। ५. नास्ति ब$^{2-5}$ मै वा वि। ६-६. नास्ति वा वि। †. इत्यन्येषाम् ब^{2} मै; इत्येषाम् ब$^{3-5}$। ७-७. नास्ति वा वि। †. नास्ति ब^{1,5}। ८. नास्य ब^{1,4,5}। ९-९. कौत्साचार्यो मै। १०. °पूर्णं° ब^{3,4} वा। ११. कृतोनं ब^{1}; कृत्वा तं ब^{3}; कृत्वा ब^{4}; कृतां त वा; कृतां नं वि। १२. उपविश्य ब$^{3-5}$। १३. इत्यन्तं ब^{1}। १४. नास्ति ब^{2}।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

दर्शपूर्णमास
Digitized by Madhuban Trust

[जान्वग्रेण बर्हिरुपस्पृश्य अभि हि षेत्यादिमन्त्रजपः]

अभि हि ष होतः प्रतरां बर्हिषद् भवेति जानुशिरसा बर्हिरुपस्पृश्य ॥ ८ ॥

अभि हि षः इत्यनेन[1] मन्त्रेण, जानोः शिरः जानुशिरः, तेन जानुशिरसा वेदिर्बर्हिरुपस्पृश्य ॥ ८ ॥

[भूपतये नम इति जपानन्तरं प्रदीप्त इध्मेऽध्वर्यवे स्रुगादापनम्]

अत ऊर्ध्वं जपेद् भूपतये नमो भुवनपतये नमो भूतानां पतये नमो भूतये नमः प्राणं प्रपद्येऽपानं प्रपद्ये व्यानं प्रपद्ये वाचं प्रपद्ये चक्षुः प्रपद्ये श्रोत्रं प्रपद्ये मनः प्रपद्य आत्मानं प्रपद्ये गायत्रीं प्रपद्ये त्रिष्टुभं प्रपद्ये जगतीं प्रपद्येऽनुष्टुभं प्रपद्ये छन्दांसि प्रपद्ये ॥ सूर्यो नो दिवस्पातु (ऋ १०, १५८, १), नमो महद्भ्यो नमो अर्भकेभ्यः (ऋ १, २७, १३), विश्वेदेवाः शास्तन मा यथेह (ऋ १०, ५२, १), अराधि होता निषदा यजीयान् (ऋ १०, ५३, २), तदद्य वाचः प्रथमं मसीय (ऋ १०, ५३, ४) इति ॥ ६ ॥

[2]अस्माद् उपस्पर्शनादूर्ध्वं जपेद्[2] भूपतये इत्येतत् । अत ऊर्ध्वम् इति वचनाद् बर्हिरुपस्पर्शनं तन्मात्रमेव भवति । अन्यथा आ जपपरिसमाप्तेः स्यात् । तस्मिन् जपे पञ्च ऋचो यथोपदिष्टा भवन्ति ॥ ९ ॥

[अग्निर्होतेति निगदेनाध्वर्यवे स्रुगादापनं होतारमवृथा इति मन्त्रजपश्च]

समाप्य प्रदीप्त इध्मे स्रुचावादापयेन्निगदेनेति । अग्निर्होता वेत्वग्नेर्होत्रं वेतु प्रावित्रं साधु ते यजमान देवता यो अग्निम् इत्यवसाय होतारमवृथा इति जपेत् ॥ १० ॥

जपं समाप्य प्रदीप्त इध्मे स्रुचावादापयेद् ग्राहयेत् निगदेन वक्ष्यमाणेन अग्निर्होता इत्यनेन । समाप्येत्यनुक्रमविधानार्थम्[3] । असमाप्तेऽपि यदि प्रदीप्तो भवति समाप्यैव निगदं प्रतिपद्यते । अथ[4] यद्यप्रदीप्तो[5] भवति समाप्ते तावदास्ते

१. इत्येतेन ब[४,५] वा वि । २-२. नास्ति मै । ३. समापयेदनुक्रम° ब[२-५] मै वा वि ; समाप्तेत्यनुक्रम° ब[१] । ४. नास्ति ब[१] । ५. प्रदीप्तो ब[१] ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यावत्[1] प्रदीप्त इति । स्रुचावादापयेन्निगदेनेति[2] वचनात् स्रुचोरादापनार्थोऽयं[3] निगदो भवति । [4]तदर्थत्वाल्लुप्ततन्त्रायामप्युपसदि स्याद् । अध्वर्यूणामप्युक्तं[4] घृतवति-शब्दे जुहूपभृतावादाय (आपश्रौ २, १७, १) इति, प्रसूत इति चान्येषाम्[5] । अवभृथेष्ट्यां च सति ह्यर्थे भवति । असत्यर्थे न भवतीति । निगदग्रहणं जपाधिकाराद् । अग्निर्होतेति निगदः । तस्मिन् अग्निमित्यवसाय अवसानं[6] कृत्वा होतारमवृथा इत्येतं[7] जपेत् उपांशु ब्रूयात् ॥ १० ॥

[घृतवतीमिति निगदविधानम्]

अथ समापयेद् घृतवतीमध्वर्यो: स्रुचमास्यस्व देवयुवं विश्ववारे ईळामहै देवाँ ईळेन्यान्नमस्याम नमस्यान् यजाम यज्ञियान् (तु० तैसं २, ५, ९, ६) इति ॥ ११ ॥

अथ[8] जपादनन्तरं[9] निगदशेषं समापयेद् घृतवतीमित्येवमादि यजाम यज्ञियान् इत्यन्तम् । तत्रावसायेति [10]जपविवक्षार्थम् । अथ समापयेद् †इति वचनादुच्चैः† भवति । अधिकारादुपांशु प्राप्तम्‡[10] ॥ ११ ॥

[अध्वर्युकर्तृकमाश्रावणम्]

समाप्तेऽस्मिन्निगदेऽध्वर्युराश्रावयति ॥ १२ ॥

अस्मिन्निगदे समाप्ते अनन्तरमध्वर्युकर्म व्युपदिश्यते[11] आग्नीध्रस्य प्रत्याश्रावणविवक्षार्थं समाप्त इति पुनरुच्यते । अत्र[12] क्रमविधानार्थम् । अस्मिन्निगदे इति वचनाज्जपसंज्ञा न भवति । जपेद् इत्यधिकाराद् अथ समापयेद् इति जपशेषं समापयेदिति स्याद् ॥ १२ ॥

[उत्करदेशे तिष्ठताध्वर्युणा आग्नीध्रं प्रत्याश्रावणम्]

प्रत्याश्रावयेदाग्नीध्र उत्करदेशे तिष्ठन् स्फ्यमिध्मसंनहनानीत्यादाय दक्षिणामुख इति शाट्यायनकमस्तु श्रौ३षळित्यौकारं प्लावयन् ॥ १३ ॥

---

१. यदा ब[1,2] मै । २. °दापयति निग° मै । ३. स्रुचोपादानार्थं मै । ४-४. °सदि (°दी ब[4]) भवत्यध्व° ब[3-5] वा वि । ५. वाऽन्ये° ब[2,4] वि । ६. वसने मै । ७. इत्येनं वि । ८. नास्ति ब[3-5] वा वि । ९. जपानन्तरं मै । १०-१०. नास्ति ब[2] । †. घृतवतीमित्येवमादित्येवन् मादिरिवतिः ब[1] । ‡. प्राप्तेः ब[3-5]; प्राप्तः मै ; प्राप्ते वा वि । ११. अपदि° ब[4]; व्यपदि° मै वा । १२. अतः ब[3]; अंत वा वि ; अत ब[5] ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अध्वर्युराश्रावयति। अनन्तरं प्रत्याश्रावयेत् प्रत्याश्रवणं ब्रूयाद् आग्नीध्रो ब्रह्मपुरुषः। तत्प्रत्याश्रावणमुत्तरत्र वक्ष्यते। उत्करः देशः। तस्मिन् देशे तिष्ठन् प्रत्याश्रावयेत्। स्फ्यो वज्रः। इध्मसंनहनानि इध्मबन्धनानि तृणानि। स्फ्यं च इध्मसंनहनानि च। आदाय गृहीत्वा प्रत्याश्रावयेत्[1]। 'दक्षिणामुखो[2] भवती'ति शाट्यायनकं ब्राह्मणम्। अस्तु श्रौ३षळिति प्रत्याश्रावयेत्। औकारं[3] प्लावयन्[4] त्रिमात्रं कुर्वन्। उत्करदेशे इति देशग्रहणादविद्यमानेऽप्युत्करे[5] तस्मिन् देशे तिष्ठति। अत्रभृथेष्ट्यादिषु तिष्ठन्तश्चरन्ति[6] (आश्रौ ६, १३, ३) इति वचनात्। यद्यासीनः[7] कर्म कुर्यात् सोमे तिष्ठन्[8] प्रत्याश्रावयेद् अन्यत्र पत्नीसंयाजेभ्यः। तत्राह[9] सर्वे आसीना एव भवन्तीति। तस्य नित्याः (आश्रौ १, १, ८) इति प्राङ्मुखत्वे[10] प्राप्ते दक्षिणामुख एव भवति। श्रुतिसामर्थ्यात्, न विकल्पः। औकारस्य[11] व्याकरणेन सिद्धा प्लुतिः पुनरुच्यते[12] आम्नायस्य बलीयस्त्वादिति॥ १३॥

[13]॥ इति चतुर्थः खण्डः ॥[13]

---

१. आश्रावयेत् मै; श्रावयेत् ब१–५ वा वि। २. दक्षिणाभिमुखो ब१,२,४। ३. औंकारं मूको.। ४. प्लावयेत् मै; प्लावयेरन् ब२। ५. °प्युत्तरे मै। ६. तिष्ठन्तीति मूको.। ७. यद्यप्यासीनः ब२; यद्यप्यासीनत् मै। ८. तिष्ठतः ब३–५। ९. तत्र हि ब१,२। १०. °मुखे ब३–५ वा वि। ११. औंका° मूको.। १२. उच्यते ब३–५ वा। १३-१३. °र्थी खण्डिका मै।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ प्रथमेऽध्याये पञ्चमः खण्डः

[प्रयाजाधिकारप्रवर्तनम्]

प्रयाजैश्चरन्ति ॥ १ ॥

अधिकारसूत्रमेतत् । [1]ये इत[1] ऊर्ध्वं वक्ष्यन्ते ते[2] प्रयाजा इति वेदितव्याः । संज्ञा चेयम् । प्रयाजादि (आश्रौ ६, १३, ४) इत्युक्ते[3] एते प्रत्येतव्याः । चरन्ति [4]प्रवर्तन्त इत्यर्थः[4] ॥ १ ॥

[तनूनपान्नराशंसयोरन्यतरेण प्रयाजानां पञ्चसङ्ख्याकत्वम्]

पञ्चैते भवन्ति ॥ २ ॥

एते प्रयाजाः पञ्च भवन्ति दर्शपूर्णमासयोः[5] । विकृतौ नव एकादश वा[6] भवन्तीत्यर्थः । पञ्चग्रहणं तानूनपातानां[7] नाराशंसानां[8] चोभयेषामपि पञ्चैव भवन्ति । अन्यथा नराशंसो[9] अग्न आज्यस्य वेत्विति तेषाम् (आश्रौ १, ५, २२) इत्यधिकाराद् उत्तरा वक्ष्यमाणास्तेषामेव स्युः । तानूनपातानां[10] द्वावेव स्याताम् । एते इति वचनात् शुनासीरीये पञ्चप्रयाजे सति वैश्वदेव्यातिदेशान्[11] नवसु प्राप्तेषु कतमे पञ्च [12]भवन्तीति संशये एते पञ्च भवन्तीत्युच्यते[12] ॥ २ ॥

[प्रत्येकं प्रेषितो प्रत्येकं यजति न सर्वम्]

एकैकं प्रेषितो यजति ॥ ३ ॥

एतेन (आश्रौ १, २, २३) इति सामिधेन्यतिदेशात् प्रेषित इति प्राप्ते पुनरुच्यते । सकृत्प्रेषितएव यथा सामिधेन्यस्तथा सर्वान् प्रतिपद्येत[13] । तस्माद् एकैकं प्रेषितो यजतीत्युच्यते ॥ ३ ॥

१-१. अत ब[2] मै । २. नास्ति ब[3-5] । ३. °जादीनित्युक्ते मै । ४-४. प्रवर्तयन्तीत्यर्थः ब[1]; प्रवर्तेत इत्यर्थः ब[2]; प्रवर्तन्तीत्यर्थः ब[3-5] वा वि । ५. °पौर्ण° ब[2] । ६. नास्ति ब[1,2,3,5] मै वा वि । ७. तनू° ब[1-5] वा । ८. नरा° ब[1,3-5] वा वि । ९. नारा° मै । १०. तनू° ब[1-5] मै वि । ११. °तिशयात् मै । १२-१२. भवन्तीत्युच्यते ब[1] । १३. प्रतिपद्यते ब[1-3,5] मै ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

दर्शपूर्णमास
Digitized by Madhuban Trust

[अनुयाजरहितानां याज्यानामादिरागूर्भवति]

आगूर्याज्यादिरनुयाजवर्जम् ॥ ४ ॥

उत्तरत्र आगूर्वक्ष्यते[1]—ये३यजामहे (आश्रौ १, ५, ५ क) इति। आगूर्याज्यादिर्भवति। याज्याया आदिर्याज्यादिः। अनुयाजवर्जम् [2]अनुयाजान्† वर्जयित्वा। अनुयाजेषु[2]‡ आगूर्न[3] भवति। प्रयाजाधिकारात् प्रयाजेष्वेवागूः प्राप्ता अनुयाजवर्जमिति[4] प्रतिषेधात् सर्वयाज्यासु[5] भवति। याज्यायाः पूर्वपदस्य स्थाने प्राप्तेऽनुकाराभावात्[6] समीपे भवति। यत्र[7] स्थाने[8] दृष्टं[9] तत्रानुकारो यथा[10] अयमिह प्रथमोऽधायि धातृभिरिति तु (आश्रौ २, १७, ७) इति॥ ४॥

[आगूःस्वरूपं वषट्कारस्वरूपञ्च]

ये३यजामह इत्यागूः ॥ ५(क) ॥ वषट्कारोऽन्त्यः सर्वत्र ॥ ५(ख) ॥

ये३यजामह इत्येतस्य आगूरित्येषा[11] संज्ञा। [12]आगूर्याज्यादिः (आश्रौ १, ५, ४) इत्युक्ते एतस्य ग्रहणम्[12] ॥ ५(क) ॥

वषट्कारोऽन्त्यः सर्वत्र। [13]वषट्कारमुत्तरत्र वक्ष्यति—वौषळिति वषट्कारः (आश्रौ १, ५, १५)। अन्ते भवोऽन्त्यः। सर्वत्र सर्वयाज्यानामन्त्यो[14] भवति। सर्वत्रग्रहणमनुयाजेषु प्राप्त्यर्थम् ॥ ५(ख) ॥

[याज्याया उच्चैस्त्वं बलीयस्त्वञ्च]

उच्चैस्तरां बलीयान् याज्यायाः ॥ ६ ॥

[15]याज्यायाः †स्वराद् ईषद्यमान्तरम्† उच्चैस्तरां[15] वषट्कारस्य स्वरो भवति। [16]बलीयांश्च भवति[16]। शब्दत ईषत्स्पृष्टकरणो[17] [18]वकारः। बलीयान् इति वचनात् स्पृष्टकरणो[18] भवति। याज्यायाः इति वचनाद् याज्यास्वरावित्यर्थः[19]। तरशब्द इति वचनाद् ईषदयमान्तरमुच्चैर्भवति[20] ॥ ६ ॥

---

१. °वंक्ष्यति ब$^{2-5}$ मै वा वि। २-२. नास्ति वि। †. अनू° ब^{1,3}। ‡. अनू° ब^{3,5}। ३. आगूः ब^{4}; न वि। ४. अनू° ब^{3,5}। ५. °याज्या न ब$^{3-5}$; °याज्या नु वा वि। ६. प्राप्त्यनुका° ब^{2} मै। ७. अत्र ब^{3,5} वा। ८. अस्थाने ब^{4}। ९. इष्टं ब^{3,4} वा वि। १०. नास्ति ब$^{3-5}$। ११. आगूरित्येतेषां ब^{2} मै; आगूरित्येषां ब$^{3-5}$। १२-१२. आगूर्या वि। १३. सर्वत्र वष° मै। १४. याज्या° ब$^{3-5}$। १५-१५. नास्ति वि। †-†. स्वरादि षट् यमान्तरं ब^{1} मै; स्वरादि षत् यमान्तरं ब^{2}; स्वरादीषत् नियमान्तरं ब$^{3-5}$। १६-१६. नास्ति ब^{1}। १७. इषदुत्सृष्टकरणो ब^{2} मै; दुस्पृष्टकरणो ब$^{3-2}$ वि; स्पृष्टकरणो वा। १८-१८. नास्ति मै। १९. °स्वरादिरित्यर्थः मै। २०. नियतान्तरं ब$^{3-5}$; यमान्तरं वा वि।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[आगूर्वषट्कारयोराद्योः प्लुतिकरणम्]

तयोरादी प्लावयेत् ॥ ७ ॥

'तयोरादी प्लावयेत्'[1] आद्ये अक्षरे त्रिमात्रे कुर्यात् । स्वरस्यैव प्लुतिर्भवति न[2] व्यञ्जनस्य । ये३, वौ३° । आम्नायस्य बलीयस्त्वाद् यथाम्नाते प्राप्ते प्लुतिरारभ्यते ॥ ७ ॥

[याज्यान्तस्य प्लुतिकरणम्]

याज्यान्तं च ॥ ८ ॥

याज्याया अन्तो याज्यान्तः । याज्यान्तं चाक्षरं प्लावयेत् त्रिमात्रं कुर्यात्—हव्यवाहा३म् (ऋ १०, ८, ६ ; आश्रौ १, ६, १) इति । च-शब्दः प्लुत्यधिकार-समुच्चयार्थः ॥ ८ ॥

[याज्यान्तस्य प्लुतिकरणप्रक्रिया]

विविच्य सन्ध्यक्षराणामकारम् ॥ ९क ॥ न चेद् द्वैवचनो ॥ ९ख ॥ व्यञ्जनान्तो वा ॥ ९ग ॥

'ए ऐ ओ औ' इति सन्ध्यक्षराणि । तेषाम् 'ए ऐ' इत्येतयोः आइ[3], 'ओ औ' इत्येतयोः आउ[4] इत्येवं कृत्वा अकारं[5] प्लावयेत् । याज्यान्तं च (आश्रौ १, ५, ८) इति इकारस्य [प्लुतौ] प्राप्तायां[6] विश्वचर्षणा३इ (ऋ १०,५०,४ [आश्रौ १, ६, १]) वौ३° इति । सोमं वीराय शिप्रिणे पिबध्या३इ (ऋ ६, ४४, १४ [आश्रौ ६, ४, १०]) वौ३° इति । इयक्षसि प्रयज्या३उ (ऋ ६, ४९, ४ [आश्रौ ८, ८, ६]) वौ३° इति । सहस्रस्थूणं विभृथः सह द्वा३उ (ऋ ५, ६२, ६) वौ३° इति ॥ ९क ॥

[प्लुतिकरण-प्रतिषेधः]

न चेद् द्वैवचनः । विविच्य सन्ध्यक्षराणामकारम् इति [7]द्विवचनस्य वा[7] द्विवचनान्तस्य [8]वा विवेके[8] प्राप्ते प्रतिषेधः—न चेद् द्वैवचनः । द्विवचने भवो द्वैवचनः[9] । द्वैवचनश्चेन्न भवति, ततो विवेकः क्रियते । द्विवचनश्चेद् भवति विवेको न कर्त्तव्यः । नक्तोषासा न दर्शते३ (ऋ ९, ५, ६) वौ३° इति । नेति प्रतिषेधः । चेदिति यदि भवतीत्यर्थः । न चेद् द्विवचन इति वक्तव्ये द्वैवचन इति

१-१. नास्ति ब[1,2,5] । २. नास्ति ब[3] । ३. आइ ब[1]; आय् मै ; अइ अन्यत्र । ४. आउ ब[1]; आए मै ; अउ अन्यत्र । ५. आकारं ब[1] वि ; अकारं अन्यत्र । ६. प्राप्तौ ब[1]; प्राप्ता ब[2-5] वा वि । ७-७. नास्ति ब[1,4] वा । ८-८. वाऽविवेके ब[1-5] वा वि ; चाविवेके मै । ९. नास्ति ब[3-5] वा वि ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

दर्शपूर्णमास
Digitized by Madhuban Trust

गुरुकरणाद् [1]द्विवचने भवो द्वैवचनः[1]। कः। प्रगृह्य इति। तस्मात् सर्वप्रगृह्याणां[2] विवेकप्रतिषेधो भवति। रायस्पोषं विष्यतां नाभिमस्मे३ (ऋ २, ४०, ४) वौ३° इति। शाङ्खायनकेऽपि[3] उक्तम्—न चेत् प्रगृह्यः (?) इति। एवं चेत् कविः कविमियक्षसि प्रयज्या३उ (ऋ ६, ४९, ४ [आश्रौ ८, ८, ६]) वौ३° इति। अत्रापि विवेकप्रतिषेधः प्राप्नोति। द्विवचनादीनां प्रतिषेधात् प्रथमे न। दृश्यते च अध्वर्या३उ[4] (?) इति ॥ ९ख ॥

व्यञ्जनान्तो वा। सन्ध्यक्षरसंज्ञो वर्णो व्यञ्जनान्तो यदि न भवति ततो विवेकः क्रियते। यदि व्यञ्जनान्तो भवति विवेको न कर्तव्यः। पृथिव्याचले त्रे[5] वौ° (?) इति। रक्षसस्तपिष्ठैर् (ऋ ४, ४, १) वौ°। द्युम्नान्यर्यो वि दुरो अभि द्यौ३द् (ऋ ४, ४, ६) वौ° इति। वेति समुच्चयार्थः व्यञ्जनान्तश्च यदि न भवतीत्यर्थः ॥ ९ग ॥

[अनवर्णोपधस्य विसर्जनीयस्य रेफीभावः]

विसर्जनीयो नत्यक्षरोपधो रिफ्यते ॥ १० ॥

एष विसर्जनीयः। इकारादीनि नत्यक्षराणि, तानि उपधापूर्वाणि यस्य विसर्जनीयस्य स नत्यक्षरोपधः। स रिफ्यते रेफमापद्यते। स्तृणीमहि देवव्यचा वि बर्हि३र् (ऋ ३,४,४) वौ°। विचरन्त पूर्वी३र्° (ऋ ३,४,५) वौ° इति। देवा देवानामनु हि व्रता गुर् (ऋ ३, ७, ७) वौ°। अदितिर्धायसे वेर् (ऋ १, ७२, ९) वौ°। [6]प्र नो नव्येभिस्तिरतं देष्णैर् (ऋ ७, ९३, ४) वौ°[6]। अथाधत्तं यजमानाय शं योर् (ऋ १, ९३, ७) वौ°। पर्येका चरति वर्तनिं गौर् (ऋ ३, ७, २) वौ° ॥ १० ॥

[रेफिसंज्ञिनोऽवर्णोपधस्य विसर्जनीयस्य रेफीभावः]

इतरश्च रेफी ॥ ११ ॥

इतरः नत्यक्षरोपधादन्यो विसर्जनीयः अकारोपध आकारोपधो वा स रिफ्यते यदि रेफी भवति। पदकाले यदि रेफः श्रूयते। सरस्वति तमिह धातवे का३र् (ऋ १, १६४, ४९) वौ°[7]। चशब्दः समुच्चयार्थः ॥ ११ ॥

[अरेफसंज्ञस्यावर्णोपधस्य विसर्जनीयस्य लोपः]

लुप्यतेऽरेफी ॥ १२ ॥

[8]इतर इति वर्तते। अनत्यक्षरोपधो[8] विसर्जनीयो लुप्यते, योऽरेफी भवति

१-१. द्विवचनः ब$^{3-5}$ वा वि। २. प्रगृह्याणां ब$^{3-5}$। ३. शाङ्खायनिके ब^{1}; साङ्ख्यायने ब^{2} मै। ४. °र्य उ ब$^{2-5}$ वा वि; °र्या मै। ५. पृथिव्यावलेत्रे ब$^{3-5}$ वा वि; पृथिव्यावलेत्रे मै। ६-६. नास्ति ब$^{1-2}$। ७. कावौ° ब$^{2-5}$; वा वि। ८-८. नास्ति वि।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यस्य पदे रेफो न विद्यते। युक्तग्रावा जायते देवकामा३ (ऋ ३, ४, ९) वौ°। [1]क्षप उस्रा वरिवस्यन्तु देवा३ (ऋ ६, ५२, १५) वौ°[1]। विसर्जनीयो[2] रिफ्यते लुप्यते इति वक्तव्यम्। एवं सति रिफितस्यैव[3] रेफः स्यादनामिपूर्वस्य न स्यात् ॥ १२ ॥

[वर्गाणां प्रथमस्य स्वतृतीयवर्णापादनम्]

प्रथमः स्वं तृतीयम् ॥ १३ ॥

वर्गप्रथमः स्ववर्ग्यं तृतीयमापद्यते, ककारो गकारम्[4]। स वेद यज्ञमानुषा३ग् (ऋ ३,११,१) वौ°। अतन्द्रो दूतो अभवो हविर्वा३ड् (ऋ १, ७२, ७) वौ°। सीदतां बर्हिरा सुमा३द् (ऋ १, १४२, ७) वौ°। सोमो विराजमनुराजति ष्टुब् (ऋ ९, ९६, १८) वौ°। स्वग्रहणादन्यवर्गीयं नाऽऽपद्यते॥ १३ ॥

[मकारे सानुनासिकभावस्य नित्यत्वम्]

नित्यं मकारे ॥ १४ ॥

नित्यं नियतं मकारे यदेव[5] प्रागुक्तम् अन्तःस्थासु तां तामनुनासिकाम् (आश्रौ १, २, १७) इति, तदेव भवति। [6]जिह्वामग्ने चकृषे[6] [7]हव्यवाहा३वँ (ऋ १०, ८, ६) वौ३° इति[7]।

रेफोष्मस्वनुस्वारम् (आश्रौ १, २, १८) इति च। देवा अग्निं धारयन् द्रविणोदां३ (ऋ १, ९६, १) स्वधा नम[8] इति॥ १४ ॥

[वौषट्शब्दस्य वषट्कारस्वरूपत्वम्]

ये३यजामहे समिधः समिधो अग्न आज्यस्य व्यन्तु३ वौ३षळिति वषट्कारः ॥ १५ ॥

यथोक्तं याज्यानिदर्शनम् एतद्। वक्ष्यति च—एतद् याज्यानिदर्शनम् (आश्रौ १, ५, २०)[9] इति। निदर्शनं[9] कस्मात्। असंशयार्थम्। आगूः समीपे भवति, न तु[10] स्थाने[11]। आगूर्याज्ययोर्मध्ये अवसानमनवसानमिति[12] च। एवं[13]

१-१. नास्ति ब[1,2]। २. विष्णोः पदे परमे मध्व उत्सा ता (वौ°) (ऋ १,१५४,५) विसर्ज° मै। ३. नास्ति ब[3-5]। ४. गकारत्वम् ब[1]। ५. यदि च ब[3-5] वा वि। ६-६. नास्ति ब[1]। ७-७. हव्यवाहं ब[1]; हव्यवाहां वौ३ इति ब[2-5] वा वि; हव्यवाहां ता इति मै। ८. तु. आश्रौ २,१९,२४। ९-९. नास्ति ब[3-5] वा वि। १०. आगुरः ब[1-3,5] वा वि ; आगूः ब[4] मै। ११. द्र. देवव्रात भा० १, ५, ४। १२. °सानमव° मै। १३. नास्ति वा।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

दर्शपूर्णमास

Digitized by Madhuban Trust

वषट्कारोऽपि[1] तद्दर्शनात्[2] समीपे भवति[3], अनवसानं[4] च[5]। वषट्कारश्च क्रियते[6], [7]पूर्वमनाम्नातत्वाद् इष्टपक्षार्थं[7] च[5] [8]वषट् श्रौषट् वौषळिति वषट्कारबहुत्वादिति (तु० आपश्रौ २४, १०, ११)। वौषळिति[8] वषट्कार इति। याज्यान्ते वौषळिति यः शब्द आम्नातः, तस्य[9] च[10] वषट्कार इत्येषा संज्ञा भवति। कथं ज्ञायते वषट्कारोऽन्त्यः (आश्रौ १, ५, ५) इति वचनात्, शब्दतश्च दर्शनादन्त्यश्च शब्दस्य भवति। तस्माद् वषट्कारमुक्त्वोक्त्वा (आश्रौ १, ५, १७) इति उक्त एतस्य ग्रहणम्॥ १५॥

[प्रथमप्रयाजोपसंहारः]

इति प्रथमः॥ १६॥

इत्ययं [11]प्रथमः प्रयाजः[11]। प्रयाजाधिकारव्यवायात् प्रथम इत्युच्यते। द्वितीये विधिद्वयविवक्षार्थम्[12]॥ १६॥

[वषट्कारोच्चारणपूर्वकोऽनुमन्त्रणप्रकारः]

वागोजः सह ओजो मयि प्राणापानाविति वषट्कारमुक्त्वोक्त्वाऽनुमन्त्रयते॥ १७॥

वागोजः इत्यनेन वषट्कारमुक्त्वोक्त्वाऽनुमन्त्रयते। कर्ता उक्त्वोक्त्वा एतं[13] मन्त्रमाह। प्रथमाऽधिकाराद् वीप्सा सर्वयाज्याप्राप्त्यर्थम्। अनुमन्त्रणवचनादुपांशु (द्र० आश्रौ १, १, २०)॥ १७॥

---

१. °रेऽपि मूको। २. न दर्शनात् ब^{1} वि; तद्दर्शनात् ब^{2,4} मै; तद्वदर्शनात् ब^{3,5} वा। ३. भवतः ब^{2} मै। ४. नैवसानं ब$^{3-5}$ वा वि; नवसानं ब^{2} मै। ५. नास्ति ब$^{3-5}$। ६. विद्यते मै ब^{1,2} वा वि। ७-७. पूर्वमाम्नातत्वात् इष्टेर्थयज्ञो ब$^{3-5}$; °क्षार्थे ब^{1}। ८-८. वषट् वौषळिति वषट्कारबहुत्वादिति ब^{1}; वषट् श्रौषट् श्रौषळिति वषट्कारबहुत्वा इति मै; वषट्कारः वौ० वौषळिति वषट्कारबहुत्वादिति ब^{3,4}; वषट्कारौ०। वौषळिति वषट्कारबहुत्वादिति ब^{5}; वषट् वौषट् वौषडिति वषट्कारबहुत्वादिति ब^{2}; वषट्कारः वौषट् वौषळिति वषट्कारबहुत्वादिति वा वि। ९. एतस्य ब$^{3-5}$ वा वि; एकस्य ब^{2} मै। १०. नास्ति ब$^{1-5}$ वा वि। ११-११. नास्ति ब$^{3-5}$ वा वि। १२. °क्षार्थे ब^{1}; °क्षार्थः ब$^{3-5}$ वि। १३. एवं ब^{1,2}।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[वषट्कारस्य दिवाकीर्त्तनीयत्वम्]

दिवाकीर्त्यो वषट्कारः ॥ १८ ॥

दिवा एव कीर्तयितव्यो न रात्रौ। कीर्तनं नाम ग्रहणं वोच्चारणं[1] वा। स्वाध्यायधर्मोऽयं[2] व्यपदिश्यते, न विरोधः। स्वाध्यायधर्मोऽन्यत्राऽनपदिष्ट[3] इहाऽपदिश्यते[4]। इह भविष्यति च महानाम्नीषु[5] महाव्रते च ॥ १८ ॥

[अनुमन्त्रणस्य दिवाकीर्त्तनीयत्वम्]

तथाऽनुमन्त्रणम् ॥ १९ ॥

अनुमन्त्रणवाक्यं[6] दिवाकीर्त्यमेव[7] वागोजः इत्येतत्[8] ॥ १९ ॥

[याज्यास्वरूपनिदर्शनम्]

एतद् याज्यानिदर्शनम् ॥ २० ॥

ये३ यजामहादि[9] इति[10] प्रथमः (आश्रौ १, ५, १६) इति प्रयाज आम्नातः। एतद् याज्यानां निदर्शनं याज्यानिदर्शनम्[11]। निश्चितं दर्शनम्। [12]लक्षणोक्तस्य विधिरसंशयार्थं[12] भवति[13]। अन्यथा[14] [15]प्रथमप्रयाज एव[15] यथाऽऽम्नातं[16] भवति। अन्यत्राऽऽद्यन्तयोः[17] पादयोः[18] स्थाने[19] आगूर्वषट्कारौ स्याताम्। वषट्कारश्चाऽनियतः कश्चन स्यात्। अनुमन्त्रणमुक्त्वा एतद् याज्यानिदर्शनमित्याह। तस्मादनुमन्त्रणं वषट्काराङ्गम्। हुताऽनुमन्त्रणम् अनन्तरं भवति यदि यजमानो होता ॥ २० ॥

[वसिष्ठादिभिन्नानां द्वितीयप्रयाजकथनम्]

तनूनपादग्न आज्यस्य वेत्विति द्वितीयोऽन्यत्र वसिष्ठशुनकाऽत्रिवध्र्यश्वराजन्येभ्यः ॥ २१ ॥

---

१. वाचो ब[3-5] वा वि। २. अध्याय° ब[3-5] वा वि। ३. °आनुप° ब[3-5]; °आन्यप° ब[2] मै। ४. इहोप° ब[3-5]। ५. न महा° ब[1] वा वि। ६. नास्ति ब[3-5] वा वि। ७. वाचा दिवा° ब[1,3-5] वा वि। ८. इति ब[3-5] वा वि। ९. °मह इत्यादि ब[1]। १०. नास्ति मूको। ११. नास्ति ब[2]। १२-१२. °णोक्तविधि° ब[3-5]। १३. चेति ब[2] मै। १४. अथ ब[3-5] वा वि। १५-१५. प्रथम एव प्रयाजः ब[2-5] मै वा वि। १६. प्रयाजे आम्नातं ब[1]; प्रयाजो यथाम्नातं वा। १७. नास्ति वि। १८. पादयोः ब[1,2]; नास्ति ब[4] वि। १९. नास्ति ब[3-5]।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

दर्शपूर्णमास

Digitized by Madhuban Trust

तनूनपाद् इति यथाम्नात[1] इत्ययं[2] द्वितीयः प्रयाजो भवति अन्यत्र वसिष्ठादीनां[3] गोत्राणाम् । [4]वसिष्ठाश्च शुनकाश्च अत्रयश्च[4] वध्र्यश्वाश्च[5] राजन्याश्च[6] । एतेभ्योऽन्येषां तनूनपाद् भवति ॥ २१ ॥

[वसिष्ठादीनां द्वितीयप्रयाजकथनम्]

नराशंसो अग्न आज्यस्य वेत्विति तेषाम् ॥ २२ ॥

इत्ययं द्वितीयः प्रयाजस्तेषां भवति वसिष्ठादीनाम् ॥ २२ ॥

[तृतीयप्रयाजकथनम्]

इळो अग्न आज्यस्य व्यन्त्विति तृतीयः ॥ २३ ॥

इत्ययं तृतीयः प्रयाजो भवति । तेषामेव [प्रयाजे] प्राप्तेऽधिकारात्[7], पञ्चग्रहणात् सर्वेषां भवति । सहपरिपठितानामाद्यन्तज्ञापनार्थं[8] तृतीयग्रहणं चतुर्थग्रहणं च । यथा—देवादयोऽनुयाजाः[9] । वीतवत्पदान्ताः (आश्रौ १, ८, ३; ४) इति ॥२३॥

[चतुर्थपञ्चमप्रयाजकथनम्]

बर्हिरग्न आज्यस्य वेत्विति चतुर्थः ॥ २४क ॥

बर्हिरित्ययं[10] चतुर्थः प्रयाजो भवति ॥ २४क ॥

आगूर्य पञ्चमे [11]स्वाहाऽमुं स्वाहाऽमुमिति यथाऽऽवाहितमनुद्रुत्य देवताः[11] ॥ २४ ख ॥

आगुरं[12] कृत्वा पञ्चमे प्रयाजे स्वाहामुं स्वाहामुमिति स्वाहाशब्दमुक्त्वोक्त्वा

---

१. °तम् ब^{1,2} मै; नास्ति ब^{5} । २. नास्ति ब^{5} मै । ३. वसिष्ठात्र्यादीनां ब^{1} ; °ष्ठास्यादीनां ब^{2} मै ; °ष्ठाख्यादीनां ब$^{3-5}$ वा ; नास्ति वि । ४-४. °ष्ठश्चात्रेयश्च शुनकश्च (°काश्च ब^{2} मै) ब^{1,2} मै ; °ष्ठाश्चात्रेयाश्च शुनकाश्च ब$^{3-5}$; °ष्ठाश्चात्रयश्च शुनकाश्च वा ; नास्ति वि । ५. नास्ति ब^{1,2,5} मै वि । ६. °न्यश्च ब^{1,5} । ७. प्राप्तोऽधिकारः ब^{2} मै ; प्राप्ते इत्यधि° ब$^{3-5}$ वा ; धिकारात् वि । ८. सहपठि° ब^{1,4} । ९. °नूयाजाः मै । १०. अयं ब$^{3-5}$ वा वि । ११-११. नास्ति ब^{1,2}; '°देवताः' इत्यनन्तरं 'यथाचोदितम्' इत्यादि 'व्यन्त्विति' इत्यन्तं सूत्रशेषः मै । १२. केवल आगुरं ब^{3,5}; कवम् अगुरं ब^{4} ; हेवल आगुरं वा वि ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

द्वितीयया विभक्त्या देवतामादिशेत्, यथावाहितक्रमेण [1]ताश्चानुद्रुत्य उक्त्वा देवताः[1]। आगूर्य इति पुनरुच्यते निगदस्थानविवक्षार्थम्[2]। पञ्चमग्रहणं चतुर्थाऽधिकाराच् चतुर्थ एव निगमनं स्यात्। वीप्सावचनं देवताबहुत्वात्। [3]यथावाहितवचनमुत्तरसूत्रविवक्षार्थम्। अन्यथाऽनावाहितानामेवं विधिः स्यात् ॥ २४ ख ॥

यथाचोदितमनावाहिताः ॥ २४ ग ॥

यस्यामिष्टावनावाहिता †देवतास्तस्यां[3] [4]पञ्चमे प्रयाजे[4] यथाचोदितं निगमनं कर्तव्यम्। यथा सूत्रे चोदिता देवता यथा [5]चाऽध्वर्युचोदिता वाऽवभृथेष्टचाम्[5]। तत्र यथाचोदितवचनात् स्विष्टकृद्देवताया[6] अपि निगमनं भवति ॥ २४ ग ॥

स्वाहा देवा आज्यपा जुषाणा अग्न आज्यस्य व्यन्त्विति ॥ २४घ ॥

यथाऽऽम्नाता याज्या भवति[7]। आम्नायादेव स्विष्टकृद्देवताया निगमनप्रतिषेधः[8] ॥ २४ घ ॥

[अग्निमन्थनादीनां मन्द्रस्वरेण प्रयोक्तव्यत्वम्]

आऽतो मन्द्रेण ॥ २५ ॥

[9]आ अतः[9] एतस्मात् प्रयाजाद्[10] यदनुक्रान्तं सामिधेन्यादि तत्सर्वं मन्द्रस्वरेण[11] भवति। आतो-[12] वचनादनैष्टिकस्यापि अग्निप्रणयनादेर्भवति[13] ॥ २५ ॥

[शंयुवाकादूर्ध्वं मन्द्रस्वरेण प्रयोगः]

ऊर्ध्वं च शंयुवाकात् ॥ २६ ॥

१-१. तावन्त्यश्चानुद्रुत्यानुक्त्वा ब[1]; तावत्पश्चानुहृत्यानुक्त्वा ब[2]; भाव्यं नश्चानुहृत्यानु (°नू ब[5]) क्ता ब[3-5]; भाव्यं ता (न्म वि) श्चानुहृत्यानु (°नू वि) क्ता वा वि; तावत्पश्चादनुद्रुत्यानुक्त्वा मै। २. निगमस्थान° ब[2,3,5] वा वि; नास्ति ब[4]। ३-३. °चनमुत्तरस्य ब[3,4]। †. °स्तस्याः मै। ४-.४ नास्ति ब[4,5]। ५-५. °दिता वा यथावभयेष्टचां ब[1]; °दिता यथा वावभृयेष्टचां ब[3-5] वा वि। ६. °तायाम् मै। ७. भवन्ति ब[3-5] वा वि; नास्ति ब[2]। ८. निगमनयति ब[2]; °मनं प्रति° ब[3-5] वि। ९-९. आ ब[1,2]; अतः ब[3-5] वा वि मै। १०. °जात् अतः ब[1,3,5] वा वि; °जाद्यतः ब[2] मै; °जा ब[4]। ११. मन्द्रेण ब[3-5]। १२. अतो ब[2-5]। १३. °नादि भ° ब[2-5] वा वि; °नादिर्भ° मै।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

दर्शपूर्णमास

Digitized by Madhuban Trust

शंयुवाको वक्ष्यते। तस्माच्च शंयुवाकादूर्ध्वं पत्नीसंयाजादि यत्तस्य च मन्द्रस्वरो भवति। च-शब्दः समुच्चयार्थः। उरसि मन्द्रः कण्ठे मध्यमः शिरसि तारं इति ॥ २६ ॥

[स्विष्टकृत्पर्यन्तं मध्यमस्वरेण प्रयोगः]

मध्यमेन हवींष्या स्विष्टकृतः ॥ २७ ॥

मध्यमस्वरेण हवींषि भवन्ति। उक्तम्—अन्तरेण हविषी[1] (आश्रौ १, ३, १२) इति। तस्मादाज्यभागौ[2] स्विष्टकृतमन्तरेण[3] यानि हवींष्युच्यन्ते[4]। आ स्विष्टकृतोऽत्र च-शब्दोऽध्याहर्तव्यः[5]। आ स्विष्टकृतश्च[6]। आङ् मर्यादायाम्। अध्वर्युवशाद् ऊर्ध्वं प्रयाजेभ्यः प्राक् स्विष्टकृतो हविर्भ्यो यदन्यत् तच्च मध्यमस्वरेण[7] भवति[8]। च-शब्दो मध्यमस्वरसमुच्चयार्थः। यथाऽऽज्य-भागवपासुरा[9]-ग्रहपुरोडाशस्विष्टकृदिळामनोतादीनां[10] मध्यमः स्वरः। मध्यमेना स्विष्टकृत इति सिद्धे हवींषीति हविर्ग्रहणाद् यत्र हविरेव भवति तत्रापि[11] मध्यमस्वरो भवति। यथा एतस्मिन्नेवासने वैश्वानरीयस्य यजति (आश्रौ ४, ८, २६), पौर्णदर्वम्' (आश्रौ ९, २, १५) इति। वाजिनस्य तु सवनस्वर एव[12] भवति। यथा सवनगतानां हविषाम् ॥ २७ ॥

[इडादिशंयुवाकान्तरूपस्य शेषस्योत्तमेन प्रयोज्यत्वम्]

उत्तमेन शेषः ॥ २८ ॥

उत्तमस्वरेण[13] शेष उक्तशेषः स्विष्टकृदादि आ [14]शंयुवाकात् ॥ २८ ॥

[पूर्वोत्तरयोराज्यभागयोर्याज्याऽनुवाक्यादेवताऽऽदेशकथनम्]

उक्तौ आज्यभागौ। तयोर्याज्याऽनुवाक्या वक्ष्यन्ते[14]—

अग्निर्वृत्राणि जङ्घनदिति पूर्वस्याज्यभागस्यानुवाक्या ॥ २९ क ॥

---

१. हवींपि मूको। २. °भागे ब^{1,2} मै वा वि। ३. °कृत्यन्तरेण मूको। ४. हवींषीत्युच्यते ब$^{1-5}$; हवींषीत्युच्यन्ते वा वि; हवींष्वित्युच्यन्ते मै। ५. अध्याहारः कर्तव्यः ब^{1}। ६. °कृत् मै। ७. मध्यमेन स्वरेण ब^{1}; मध्यमेन मै। ८. नास्ति ब$^{3-5}$। ९. °भागौ वपा सुरा- ब$^{1,3-5}$ वा वि; °भागो वपा शुर- ब^{2}; °भागौ वपा घुरा- मै। १०. -ग्रहाः पुरोडाशः स्विष्टकृदिळा मनोतादीनां ब$^{1,3-5}$ वा वि; -ग्रहाः पुरोळाशः स्विष्टकृदिळा म (मा मै) नोतादि (°दी मै) ता (तापि मै) ब^{2} मै। ११. न तत्रापि ब^{2} मै। १२. एवं ब^{2} मै वि। १३. उत्तमेन स्वरेण ब^{3,5}। १४-१४. नास्ति वि।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अग्निर्वृत्राणि जङ्घनद् (ऋ ६, १६, ३४) इतीयम् ऋक् पूर्वस्याज्यभागस्यानुवाक्या भवति[1]। अनुवचनम् अनुवाक्या ॥ २९ क ॥

त्वं सोमासि सत्पतिरित्युत्तरस्य ॥ २९ ख ॥

त्वं सोमासि सत्पतिः (ऋ १, ९१, ५) इतीयमृग् उत्तरस्य आज्यभागस्य ॥ २९ ख ॥

[2]जुषाणो अग्निराज्यस्य वेत्विति पूर्वस्य याज्या ॥ २९ ग ॥

इयं कल्पजाऽऽग्नेयस्य याज्या ॥ २९ ग ॥

जुषाणः सोम आज्यस्य हविषो वेत्वित्युत्तरस्य ॥ २९ घ ॥

जुषाणः सौम्यस्य कल्पजैव याज्या[2] ॥ २९ घ ॥

तावागूर्याऽऽदेशं यजति ॥ २९ ङ ॥

आगूर्य आगुरं कृत्वा। आदिश्य देवतादेशं कृत्वा। यजति—ये३ यजामहेऽग्निं जुषाण इति। उत्तरस्येत्यधिकारात् तावित्याह। आगूर्येति पुनरुच्यते [3]आदेशस्थानविवक्षार्थम्[3] ॥ २९ (ङ) ॥

[अनुवाक्यावतीनामप्रैषाणां चान्वायात्याज्योऽन्यासां देवतानामादेशपूर्वकयागकथनम्]

सर्वाश्चानुवाक्यावत्योऽप्रैषाः ॥ ३० क ॥

सर्वाश्च यावत्यो याज्यास्ताश्चागूर्यादिशं[4] यजति। अनुवाक्या यासां विद्यन्ते [5]ता अनुवाक्यावत्यः। अप्रैषाः †प्रैषा यासां न विद्यन्ते† ता अप्रैषाः। अनुवाक्या यासां विद्यन्ते प्रैषाश्च न विद्यन्ते[5] ताः सर्वा आगूर्यादिशं कृत्वा यजति। यथा—भुवो यज्ञस्य (ऋ १०, ८, ६), अयमग्निः सहस्रिणः (ऋ ८, ७५, ४) इति। सर्वग्रहणादाज्यभागयोरपि[6] सप्रैषयोरादेशप्रतिषेधः[7]। च-शब्दः समुच्चयार्थः[8]। अनुवाक्यावत्य इति वचनाद् अननुवाक्यावतीषु प्रयाजानुयाजेषु च यथाम्नातमिति भवति। अप्रैषा इति वचनात् सप्रैषाणामादेशो[9] न भवति[10]। आज्यभागादिषु अप्रैषाणामप्यन्येषाम्[11] ॥ ३० क ॥

---

१. नास्ति ब[1]। २-२. नास्ति ब[1,2]। ३-३. नास्ति मै। ४. या आम्नाताश्चागू° ब[4,5] वा वि। ५-५. नास्ति ब[2]। †-†. प्रैषो यासां विद्यते ब[1]। ६ °दाज्ययोरपि मै। ७. °षयोरपि देशप्र° वा वि; देशप्र° ब[3-5]। ८. °यार्थे ब[1]। ९. °षास्वादेशा ब[1,2] मै। १०. भवन्ति ब[1,2] मै। ११. °षाना (?°णा) मन्ये° मै; °षाणप्यन्ये° ब[2]।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

दर्शपूर्णमास
Digitized by Madhuban Trust

अन्या[1] अन्वायात्याभ्यः ॥ ३० ख ॥

देवसुवादीनि अन्वायात्यानि। अन्वायात्यानां याज्या अन्वायात्याः। ताभ्योऽन्या या याज्यास्ता आगूर्याऽऽदेशं यजति। अन्वायात्यानामिदं तु न क्रियते। सर्वाश्चाऽनुवाक्यावत्यः इति प्राप्ते[2] प्रतिषेधः। न तु[3] तेषां निगमेष्वनुवृत्तिर्[4] (आश्रौ ३, ५, ७) इति आदेशप्रतिषेधे प्राप्ते सर्वाश्चानुवाक्यावत्यः इति सर्वग्रहणाद् [5]आदेशः प्राप्तः[5]। तस्याऽन्वायात्येषु प्रतिषेधादन्वायात्येभ्यः सन्त्यन्यानि ऊर्ध्वमावाहनादुत्पन्नानि यानि पत्नीसंयाजादीनि तेषामादेशो भवति ॥ ३० ख ॥

[सोमकर्मणि वैश्वानरीयपत्नीसंयाजयोर्मध्ये तत्रोत्पन्नाभ्यो देवताभ्योऽन्यासामादेशपूर्वको यागः]

सौमिकीभ्यश्च या अन्तरेण वैश्वानरीयं पत्नीसंयाजांश्च ॥ ३१ ॥

सोमे भवाः सौमिक्यो याज्याः। तासां या अन्यास्ता आगूर्यादेशं यजति। सौमिकीनाम् आदेशो न क्रियते। कास्ताः। या[6] अन्तरेण वैश्वानरीयं पत्नीसंयाजांश्च। एतस्मिन्नेवासने वैश्वानरीयस्य यजति (आश्रौ ४, ८, २६) इति वैश्वानरीयम्। सवनान्ते पत्नीसंयाजाः। तदन्तरेण[7] [8]मध्ये या याज्यास्तासामादेशो[8] न क्रियते। यथाऽश्वमेधे वैश्वानरीयादनन्तरं सर्वपृष्ठां,[9] पशुपुरोडाशकाले यथाऽऽज्यभागौ[10] भवतः। साद्यस्के अग्नीषोमीयस्य पशोः स्थाने अग्नीषोमीयः पुरोडाशो भवति, प्रातःसवने वाजिनः। संस्थिते मरुत्वतीये बार्हस्पत्येष्टिः (आश्रौ ९, ९, ६)। दक्षिणे मार्जालीये पित्र्या (आश्रौ ९, २, १७)। [11]ऊर्ध्वं शंयुवाकाद्धारियोजनः[11] (आश्रौ ६, ११, ८)। यदि सोमग्रहणात् [12]सवनेष्वेव भवति प्रधानत्वाद् दर्शयति च सोम एवैक (आश्रौ ३, १, १५) इति ब्रुवन् तर्हि वैश्वानरीयग्रहणम् अनर्थकं स्यात्। तस्माद् वैश्वानरीयग्रहणादौपवसथ्येऽपि भवति तदङ्गत्वात्। सौमिकीभ्यः इति वचनात् सौमिकीष्वेव नाऽन्यत्र। पूर्वेद्युर्वैश्वानरपार्जन्याम् (आश्रौ २, १५, १) इति। †पत्नीसंयाजग्रहणाद्[12] वाजिने[13]

---

१. यान्या वि; या अन्या ब[2] मै वा; या ब[3-5]। २. नास्ति ब[5]।
३. ननु ब[2,3,5] वा वि। ४. °ष्वनिवृ° ब[2]। ५-५. °श प्राप्तौ मै।
६. नास्ति मूको। ७. तदेभ्योऽन्तरेण ब[2]; तदनन्तरेण ब[5]; तेभ्योन्तरेण मै।
८-८. मध्ये याज्या° ब[1,2]; मध्ये याया याज्या° ब[3-5]; मध्ये याज्या याज्या° वा।
९. °पृष्ठाः मूको; तु० आपश्रौ २०, ९, २। १०. यद्याज्य° ब[2-5] मै वा।
११-११. ऊर्ध्वं सूक्तवाकाद् वा वाजिनः ब[1]; ऊर्ध्वं शंयुवाकाद् वाजिनः ब[2-5] मै वि; ऊर्ध्वं शंयुवाकाद् वा वाजिनः वा। १२-१२. नास्ति ब[3-5] वा वि।
†पत्नीसंयाजसमीपे ब[1]। १३. वाजिनो ब[3-5] वा वि।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आदेशप्रतिषेधोऽन्यथा[1] पत्नीसंयाजग्रहणमनर्थकं स्यात्। [2]नहि पत्नीसंयाजसमीपे अन्यत् प्रतिषेद्धव्यमस्ति। अत एकस्मादेव† कारणात् सवनीयाः पत्नीसंयाजा गृह्यन्ते, नान्यो‡ हारियोजनान्तः सोमः[2]। तस्मात्[3] पत्नीसंयाजे आदेशः क्रियते। वैश्वानरीयं सोमाङ्गं न भवति, अग्न्यङ्गमेव। तस्मादादेशः क्रियते। अग्न्यङ्गत्वादेव एतस्मिन्नेवासने वैश्वानरीयस्य[4] यजति (आश्रौ ४, ८, २६) इति उक्तम्। च-शब्दोऽवधिसमुच्चयार्थः[5]। यथा गामान्तरेण[6] गच्छतश्चेति ॥ ३१ ॥

[पौर्णमास्यामाज्यभागयोर्वार्त्रघ्नसंज्ञाकथनम्]

एतौ वार्त्रघ्नौ पौर्णमास्याम् ॥ ३२ ॥

एतावधिकृतावाज्यभागौ वार्त्रघ्नसंज्ञौ भवतः। पौर्णमास्यां भवतो नामावास्यायामिति। एताविति पुनरुच्यते अधिकारव्यवायात्[7]। वार्त्रघ्नाविति संज्ञा संव्यवहाराभावात्। संज्ञाने[8] धर्मः। दर्शपूर्णमासयोरित्यधिकारात्[9] पौर्णमास्यामित्युच्यते ॥ ३२ ॥

[अनुवाक्यात एव विचारः]

अनुवाक्यालिङ्गविशेषान्नामधेयान्यत्वम् ॥ ३३ क ॥

[10]अनुवाक्यालिङ्गं† लिङ्गशब्दो भवति। लिङ्गमेव विशेषो लिङ्गविशेषः। तस्मात्[10] लिङ्गविशेषाद् नामधेयस्यान्यत्वं[11] वार्त्रघ्नौ वृधन्वन्तौ पुष्टिमन्ताविति। वार्त्रघ्नावित्युक्ते देवताविशेषणं प्राप्तम्। यथा अग्निरायुष्मान् (आश्रौ २, १०, ३), अग्निः स्वस्तिमान् (आश्रौ २, १०, ७) इति। तथा हि आवाहनादिषु निगमेषु[12] प्राप्तेषु[13] इदमुच्यते। अनुवाक्यालिङ्गविशेषान्नामधेयं[14] न[15] देवताविशेषणमिति[16]। नामधेयान्यत्वमिति वचनान्नामधेयं भवति। तस्मात् पुष्टिमन्तावित्युक्ते आज्यभागयोरेतन्नामधेयमिति[17] ज्ञानं भवति। अन्यथा न ज्ञायेत किमेतदिति ॥ ३३ क ॥

---

१. अन्यत्प्रति° ब[1]। २-२. नास्ति ब[3-5] वा वि। †. एवास्मादेव ब[1/2] मै। ‡. नान्ये ब[2]। ३. नहि ब[3/5] वा वि। ४. वैश्वानरस्य मै। ५. °ब्दो विधि° ब[4/5] वा वि। ६. ग्रामान्तरेण ब[1/2] मै। ७. अधिकृतव्य° ब[1]। ८. ज्ञाने ब[1/2] मै वा वि। ९. °मासयोरधि° ब[1]। १०-१०. नास्ति ब[2]। †. क्ययोर्लिङ्गम् ब[2] मै। ११. नामधेयाल्लिङ्गान्नामधेयान्यत्वम् मै। १२. निगमे ब[3-5] वा वि; अनियमे मै; नास्ति ब[1]; अतिगमे ब[2]। १३. प्राप्ते ब[2-5] मै वा वि। १४. °धेयेन ब[2]; °धेयत्वं ब[3-5]। १५. नास्ति ब[3-5]। १६. अदेव° ब[2]। १७. °योरनन्तं नाम° ब[2]; °योस्तन्नाम° ब[3-5]; °योरतन्नाम° वा वि।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

दर्शपूर्णमास
Digitized by Madhuban Trust

ततो विचारः ॥ ३३ ख ॥

ततः अनुवाक्यातः विचारः। आज्यभागयोरनुवाक्यातः अन्यत्वं भवति। अन्ये अनुवाक्ये भवत इत्यर्थः। अस्मादारम्भात् पुष्टिमन्तौ अग्निना रयिमश्नवत् (ऋ १, १, ३), गयस्फानो अमीवहा (ऋ० १, ९१, १२ [आश्रौ २, १, २७]) इत्युक्ते आज्यभागयोरेते अनुवाक्ये भवत इति ज्ञातं[1] भवति। अन्यथा न ज्ञायते किमेताभ्यां क्रियत इति॥ ३३ ख॥

[अनुवाक्यादेवतयोरनन्यत्वकथनम्]

नित्ये याज्ये ॥ ३४ ॥

[2]अनुवाक्ययोर्लिलङ्गान्यत्वाद् याज्ययोरपि[2] तल्लिङ्गत्वादूहे प्राप्ते इदमुच्यते। नित्ये[3] पूर्वोक्ते यथाम्नाते याज्ये भवतः। विज्ञायते तयोर्जुषाणेनैव[4] यजति (ऐब्रा १, १७) इति॥ ३४॥

[आदित आरभ्याज्यभागपर्यन्तं वाग्यमनम्]

वृधन्वन्तावमावास्यायाम् ॥ ३५ क ॥

वृधञ्छब्दो[5] ययोर्विद्यते तौ वृधन्वन्तौ आज्यभागौ अमावास्यायां भवतः॥ ३५ क॥

अग्निः प्रत्नेन मन्मना सोम गीर्भिष्ट्वा वयम् इति ॥ ३५ ख ॥

अग्निः प्रत्नेन मन्मना (ऋ ८, ४४, १२), सोम गीर्भिष्ट्वा वयम् (ऋ १, ९१, ११) इत्यनुवाक्ये नित्ये याज्ये॥ ३५ ख॥

आतो[6] वाग्यमनम् ॥ ३५ ग ॥

आज्यभागेभ्यः आऽतो[7] यदनुक्रान्तं नमः प्रवक्त्रादि[8] ततो वाग्यमनं वाचः संयमनं, नाभिभाषते। निगदानुवचनजपेषु प्राप्तं [9]वाग्यमनम् अन्तरालेष्वपि[9] प्राप्त्यर्थोऽयमारम्भः॥ ३५ ग॥

---

१. ज्ञानं वा। २-२. °न्य त्वादाज्य° ब[2-5] वि; °न्यत्वाज्य° मै। ३. नास्ति ब[3-5] वा वि। ४. एत° मूको। ५. वृधन्वच्छब्दो ब[1,3-5] वा वि; वृधन्वन् शब्दो मै। ६. अतो ब[1-5] वा वि। ७. अतो ब[3,4] मै वा वि। ८. तु. आश्रौ १, २, १। ९-९. वाक्या नानान्त° ब[2]; °नम् अनन्तरा° ब[3-5]।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[याज्यानुवाक्ययोर्मध्ये वाग्यमनम्]

अन्तरा च याज्यानुवाक्ये ।। ३६ ।।

[१]याज्या च अनुवाक्या च[१] याज्यानुवाक्ये। ते चाऽन्तरा मध्ये वाग्यमनं भवति । च-शब्दः समुच्चयार्थः । तयोस्तु मध्येऽवसानस्य परिमितकालत्वाद् वाग्यमनं विधीयते ।। ३६ ।।

[निगदादीनामारम्भादासमाप्तेर्वाग्यमनम्]

निगदाऽनुवचनाऽभिष्टवनशस्त्रजपानां चारभ्याऽऽसमाप्ते:[२] ।। ३७ ।।

निगदादीनां चाऽऽरभ्य आ समाप्तेर्वाग्यमनं भवति। निगदेषु [३]अनियतावसानत्वाद् अवसानकाले परिमाणाभावाच्च[३] वाग्यमनं न वक्तव्यम्[४]। [५]तथा जपानामपि। अनुवचनादिषु तु† ऋगन्ते सन्तानवचनादवसानस्य परिमितकालत्वाच्च वाग्यमनं न‡ वक्तव्यम्[५] । यत्र तु ऋगन्ते प्रणवेनावसानं तदर्थोऽयमारम्भः । यथा—समाप्य प्रणवेनोपरमेत् (आश्वौ ४, १०, ३) । ऋगन्तावसाने च तूष्णी-शंसादिषु[६] च[७], जपग्रहणाज्जपादिषु च[८] कर्मकरणेषु च वाग्यमनं भवति । अत्र संस्तवनस्योपसंख्यानम् । ऋगन्तेऽवसानाभावात् । आ समाप्तेरिति सिद्धे [९]आरभ्य वचनं[९] [१०]पृथक्-पृथक् प्राप्त्यर्थम्[१०] अन्यथा बहूनां समवाये तेषामन्तरा-लेष्वपि वाग्यमनप्राप्तिः स्यात् ।। ३७ ।।

[वाग्यमननियमातिक्रमे अतो देवा इति वैष्णव्या ऋचो जपः]

अन्यद् यज्ञस्य साधनाद् आपद्यातो देवा अवन्तु न इति जपेत् ।।३८।।

यज्ञः साध्यते येन वाक्येन तद् यज्ञसाधनम्। यज्ञसाधनाद् अन्यदापद्य[११] अतो देवा अवन्तु नः (ऋ १, २२, १६) इत्येतामृचं जपेत्। [१२]यज्ञसाधनार्थमापद्य न† जपेदित्यर्थः। केचिद् अन्यस्य साधनाद् इति ϕपृथक् कृत्वाϕ यज्ञसाधनमयज्ञ[१२]-

---

१-१. अन्तरा च ब[१,२] मं ; याज्यानुवाक्या ब[3-५] वा वि । २. °प्तेरिति वा। ३-३. अनियतावसानस्य परिमा° ब[3-५] वा वि । ४. कर्तव्यम् ब[3-५] । ५-५. नास्ति ब[3-५] । †. नास्ति ब[२] मं वा । ‡. नास्ति ब[२] । ६. तूष्णीं सर्वेषु ब[3-५] । ७. नास्ति ब[५] वा । ८. नास्ति ब[२-४] मं वि । ९-९. अनुवचनं ब[3,४] । १०-१०. पृथक्प्रा° ब[3-५] वा वि । ११. यज्ञस्य साधनादापद्य ब[3] । १२-१२. नास्ति ब[४] । †. इति ब[३] ; नास्ति ब[3,५] वा वि । ϕ-ϕ. पृथग्यज्ञत्वात् ब[१,२] मं ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

'साधनं च आपद्य एतां जपेद्' इत्याहुः। तथा सति अन्यद् यज्ञस्य साधनाद् इति पर्युदासोऽनर्थकः[२] ॥ ३८ ॥

[वाग्यमननियमातिक्रमेऽन्यस्या अपि वैष्णव्या ऋचो जपविधानम्]

अपि वाऽन्यां वैष्णवीम् ॥ ३९ ॥

अपि अन्यां वैष्णवीम् ऋचं जपेत्। अपि वा, अतो देवाः (ऋ १, २२, १६ ⌊आश्रौ १,५,३८⌋) इति। [३]अपि-शब्दस्तुल्यविकल्पार्थः[३]। [४]अन्यां वैष्णवीम् इत्युक्ते[४] अतो देवाः इति दैवीनिपातः। वैष्णवीति [५]अतुल्यविकल्पः स्यात्। वेति विकल्पार्थः[५]। [६]अन्यामिति वचनात्[६] पूर्वोक्ताऽपि[७] अतो देवाः इति वैष्णवी एव भवति। अन्यथा न स्यात्। [८]अतो देवा इति दैवी[८]। सूक्तशेषस्तु वैष्णवः (बृदे ३, ९३) इति वचनात्। ३९ ॥

[९]॥ इति पञ्चमः खण्डः ॥[९]

१-१. नास्ति ब[४]। २. पर्यवसानार्थकः ब[२] मै। ३-३. नास्ति ब[१]; अपिशब्दार्थस्तु° मै। ४-४. नास्ति ब[१]; अन्या उक्ता देवता वैष्ण° ब[५]। ५-५. अतुल्या स्याद् विकल्पार्थे ब[१]; अनुकल्पः स्याद् वेति विकल्पार्थे ब[२]; अतुल्यः कल्पः स्याद् वेति विकल्पार्थे मै; अल्पं स्याद्वेति वि। ६-६. अन्यव° ब[१,२] मै; अन्यान्यव° बा; अन्यान्याव° ब[५] वि; अन्या इति व° ब[३,४]। ७. तु० आश्रौ १, ५, ३८। ८-८. अतो दे (दै ?) वी मै। ९-९. पञ्चमी खण्डिका मै।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ प्रथमेऽध्याये षष्ठः खण्डः

[विधिक्रमप्राप्तानां देवतानां याज्यानुवाक्याः]

उक्ता देवतास्तासां याज्यानुवाक्याः ।। १ क ।।

उक्ता[1] व्याख्याता देवता[2] आवाहने । तासाम् इदानीं याज्यानुवाक्या वक्ष्यन्ते । [3]उक्ता इति देवताः[3] पुनरधिक्रियन्ते याज्यानुवाक्याविवक्षार्थम् । [4]अन्यथा देवताभिः[4] सह याज्यानुवाक्या न संबध्यन्ते । एवमप्युक्तवचनमनर्थकम् । देवतास्तासां याज्यानुवाक्या इति सिद्धेऽप्युक्तवचनं विकृत्यर्थम् । [5]विकृता उक्ताः । देवताया[5] या[6] [7]ऋचो वक्ष्यन्ते तास्तासां† याज्यानुवाक्या इति ज्ञानं भवति । यथा प्रथमायामग्निरग्निः पवमानः (आश्रौ २, १, १९) इत्युक्ते‡[7] [8]या ऋचो वक्ष्यन्ते ता उक्तानां याज्यानुवाक्या भवन्ति । अन्यथा न ज्ञायेत किमेताभिः क्रियत इति । याज्याऽनुवाक्या[8] इति संज्ञा । संज्ञाचोदितत्वादनुब्रूहीति[9] चोदितेऽनुवाक्या भवति, यजेति चोदिते याज्या भवति । तस्मात् पूर्वाऽनुवाक्या उत्तरा याज्या सम्प्रैषवशात् । अन्यथा याज्यानुवाक्या इति वचनात् पूर्वा याज्या उत्तराऽनुवाक्या स्यात् । [10]दर्शनं चाज्यभागयोः[10] स्विष्टकृति च पूर्वाऽनुवाक्या[11] उत्तरा याज्येति[12] । अत्र[13] प्रेषितः प्रेषित इति[14] वक्तव्यम्, [15]यथा प्रयाजेषु† । न वक्तव्यम्[15] प्राप्तत्वात् । सामिधेनीषु प्रेषितः (आश्रौ १, १, २७) इत्युक्तं[16] तद्व्याख्यातेष्वपि[17] प्राप्तम्[18] । एवं प्राप्ते प्रयाजेषु आरम्भे प्रयोजनं न[1] सकृत्प्रेषितमात्रः[19] प्रतिपद्यत इति । [20]अथाऽग्निमन्थनादिषु अवस्थायाऽभिहिङ्कृत्य (आश्रौ २, १६, १) इति सम्बन्धवचनाद् अप्रेषितः प्रतिपद्यते† तस्मात् प्रेषितः इत्युच्यते ।। १ क ।।[20]

---

१. नास्ति ब[2-5] वा वि । २. नास्ति ब[2] वि । ३-३. उक्ता दे° ब[2,4] मै वा वि । ४-४. अन्यदे° ब[1,4] । ५-५. विकृतावुक्ता देवतां या मै । ६. नास्ति मूको । ७-७. नास्ति मै । †. तास्ता ब[3-5] । ‡. इत्युक्तो ब[2]; नास्ति ब[4] । ८-८. नास्ति ब[4] । ९. चोदित° ब[4,5] । १०-१०. दर्शनाद्याज्या° ब[1]; दर्शनाच्चाज्य° ब[2] मै । ११. पूर्वा अ° ब[2,3] मै । १२. याज्या इति ब[2-5] मै वा वि । १३. अनु° ब[2-5] मै वा वि । १४. इति न ब[1] । १५-१५. नास्ति ब[2] । †. तु. आश्रौ १, ५, १ । १६. °क्ते ब[1] । १७. °ष्वपि ब[3-5] मै । १८. प्राप्तः मूको । १९. °मात्रं ब[3-5] वा वि । २०-२०. अथाग्निः ब[1] । †. प्रतिपद्यते ब[2-5] ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

दर्शपूर्णमास
Digitized by Madhuban Trust

[1]अग्निर्मूर्धा भुवो यज्ञस्यायमग्निः सहस्रिण इति वेदं विष्णुर्वि चक्रमे त्रिर्देव: पृथिवीमेष एतामग्नीषोमा सवेदसा युवमेतानि दिवि रोचनानीन्द्राग्नी अवसाऽऽगतं गीर्भिर्विप्र: प्रमतिमिच्छमान एन्द्र सानसिं रयिं प्र ससाहिषे पुरुहूत शत्रून् महाँ इन्द्रो य ओजसा भुवस्त्वमिन्द्र ब्रह्मणा महान् इति ॥ १ ख ॥

अग्निर्मूर्धा (ऋ ८, ४४, १६), भुवो यज्ञस्य (ऋ १०, ८, ६) इत्यग्नेः। द्वे द्वे तु याज्यानुवाक्ये (आश्रौ २, १, ७) इति वक्ष्यति । अयमग्नि:[1] सहस्रिण: (ऋ ८, ७५, ४) इति वा याज्याविकल्पः । अनन्तरवचनाद् व्यवस्थित-विभाषेयम् । यत्र सर्वा गायत्र्यो भवन्ति प्रकरणे तत्र युज्यते अग्न्याधेये । इह तु सर्वास्त्रिष्टुभो याज्यास्तस्मात् त्रिष्टुबेव भवति । इदं विष्णुर्वि चक्रमे (ऋ १, २२, १७), त्रिर्देव: पृथिवीमेष एताम् (ऋ ७, १००, ३) इति विष्णोः। अग्नीषोमा सवेदसा (ऋ १, ९३, ९), [2]युवमेतानि दिवि रोचनानि (ऋ १, ९३, ५) इति[2] अग्नीषोमयोर्नित्ये भवत: । उपांशुयाजस्योत्तरत्र[3] वक्ष्यति । इन्द्राग्नी अवसाऽऽगतम् (ऋ ७, ९४, ७), गीर्भिर्विप्र: प्रमतिमिच्छमान: (ऋ ७, ९३, ४) इतीन्द्राग्न्योः । एन्द्र सानसिं रयिम् (ऋ १, ८, १), प्र ससाहिषे (ऋ १०, १८०, १) इतीन्द्रस्य । महाँ इन्द्र: (ऋ ८, ६, १), भुवस्त्वम् (ऋ १०, ५०, ४) इति महेन्द्रस्य ॥ १ ख ॥

[4]यद्यग्नीषोमीय उपांशुयाजोग्नीषोमा यो अद्य वामान्यं दिवो मातरिश्वा जभारेति[4] ॥ १ ग ॥

यदि भवति अग्नीषोमीय उपांशुयाज: तस्य याज्यानुवाक्ये अग्नीषोमा यो अद्य वाम् (ऋ १, ९३, २), आन्यं दिवो मातरिश्वा जभार (ऋ १, ९३, ६) इति । यदिवचनाद् विष्णोर्नित्यत्वं दर्शयति । उपांशुयाजवचनात् पूर्वोक्ते नित्ययोर्भवत:[5] ।

१-१. अथाग्नि: ब[1] । २-२. युवमेतानि दिवीति ब[2] मै वा वि ; युवमेतानीति ब[1] । ३. तु. आश्रौ २, १, २७ । ४-४. नास्ति ब[2] मै । ५. नित्यार्थो भ° ब[3] ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[1]अन्यद्वचनाददृष्टादेशे† पूर्वोक्ते भवतः[1] । अन्यथा एते प्राप्नुतोऽन्याधेये तृतीयस्याम् अग्नीषोमाविन्द्राग्नी (आश्रौ २, १, २७) इत्यत्र ।। १ ग ।।

[प्रधानानन्तरं स्विष्टकृतो यागः, सर्वत्र पूर्वमनुवाक्यायाः पश्चाद्याज्याया विधानम्]

अथ स्विष्टकृतः पिप्रीहि देवाँ उशतो यविष्ठ इत्यनुवाक्या ।। २ ।।

अथानन्तरं प्रधानदेवताभ्योऽनन्तरं स्विष्टकृतो[2] याज्यानुवाक्ये[3] वक्ष्येते[4]। उक्ता देवताः (आश्रौ १, ६, १ क) इति वचनाद् आज्यपा[5] अनन्तरा[6] भवन्ति[7]। [8]तस्मात् क्रमान्तरमिदमुच्यते[8] । अग्निः स्विष्टकृद् देवता । वक्ष्यति—अग्निं स्विष्टकृतम् (आश्रौ १, ६, ३) इति । तस्य याज्यानुवाक्ये—पिप्रीहि देवाँ उशतो यविष्ठ (ऋ १०, २, १) इत्यनुवाक्या भवति । अनुवाक्यावचनं याज्याविवक्षार्थम् । अन्यथा सर्वमेव याज्याविधानं स्यात् । उत्तरत्र अनवानं यजति (आश्रौ १, ६, ५ ख) इति वचनात् ।। २ ।।

[ये यजामह इत्युक्त्वा देवतादेशः प्रिया धामानीति मन्त्रपाठश्च]

ये३ यजामहेऽग्निं स्विष्टकृतम् अयाळग्निरित्युक्त्वा षष्ठ्या विभक्त्या देवतामादिश्य प्रिया धामान्ययाळित्युपसंतनुयात् ।। ३ ।।

ये३ यजामहे इत्यागुरं कृत्वा अग्निं स्विष्टकृतम् इति देवतादेशं कृत्वा अयाळग्निः इति निगदावयवम् उक्त्वा अनन्तरं[9] विभक्तिषु या षष्ठी विभक्तिस्तया विभक्त्या प्रथमं देवतामादिश्य तामुक्त्वा पुनरनन्तरम् प्रिया धामान्ययाळित्युपसन्तनुयात् उपसंदध्याद्[10] अग्नेः प्रिया धामान्ययाळिति । अग्ने यदद्य विशः (ऋ ६, १५, १४) इति याज्यादावागुरादेशौ प्राप्तौ, निगदादौ तु अप्राप्तयोराम्नातम् । अग्निं स्विष्टकृतमित्यप्राप्तं विधीयते । यथा[11] अग्निं होत्रायावह (आश्रौ १, ३, २२) इत्यावाहितं[12] तथाऽऽदेशो न भवति । उक्त्वावचनं निगमस्थानविवक्षार्थम् । द्वितीयया विभक्त्याऽऽदेशः (आश्रौ १, ३, ६) इति प्राप्ते षष्ठी-

---

१-१. नास्ति मै । †. तु आश्रौ २, १, ८ । २. [अ?] प्रधानस्वि° ब[1] । ३. °वाक्या ब[1] । ४. वक्ष्यते ब[1,2] मै । ५. याज्यायाद् वा । ६. °न्तरं ब[2] । ७. भवति ब[3-5] वा । ८-८. नास्ति वि ; तत्क्रमा° ब[4] । ९. नास्ति ब[1,2] मै । १०. संदध्यात् ब[3-5] वा वि । ११. नास्ति ब[3-5] वा वि । १२. °वहत्याविधानेन ब[3-4] ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

दर्शपूर्णमास

Digitized by Madhuban Trust

वचनम् । उपसन्तनुयादिति वचनाद् देवतायाः पूर्वस्यायाट्शब्दस्यैतत्[1] सन्तानम् ॥ ३ ॥

[प्रथमदेवतायाः पुरस्तादयाडग्निशब्दस्य, उत्तरासामयाट्शब्दस्य सर्वासामुपरिष्टात्, प्रिया-धामानि-शब्दस्य च सन्ततप्रयोगकथनम्]

एवमुत्तराः ॥ ४ क ॥

एवमेतेन विधानेन [2]प्रथमाया विधानेन[2] [3]उत्तरा अपि देवता[3] निगमयेत् ॥ ४ क ॥

अयाळग्निरग्नेः प्रिया धामान्ययाळिति (द्र. १, ६, ३) प्रथमायां यदुक्तं तथैवोत्तरासु प्राप्तम्[4] अयाळग्निरग्नेः प्रिया धामान्ययाट् सोमस्येति[5] । तस्मादुत्तरमुच्यते—

अयाळयाळिति त्वेव तासां पुरस्तात् ॥ ४ ख ॥

अयाळिति[6] तु यः शब्दः स एव तासां पुरस्ताद् भवति । यस्तु अयाळग्नि-शब्दः स मा भूदिति । वीप्सावचनात् प्रतिदेवतं[7] भवति । तु-शब्दो विशेषणार्थः । यस्मिन्नग्निशब्दो[8] न विद्यते तस्य ग्रहणार्थः । एवशब्दोऽवधारणार्थः ॥ ४ ख ॥

[याज्याविशेषेऽनुच्छ्वासस्य कर्तव्यत्वम्]

आज्यपान्तमनुक्रम्य देवानामाज्यपानां प्रिया धामानि यक्षदग्नेर्होतुः प्रिया धामानि यक्षत् स्वं महिमानमायजतामेज्या इषः कृणोतु सो अध्वरा जातवेदा जुषतां हविः ॥ ५ क ॥

[9]आज्यपान्तं निगदमनुक्रम्य[9] देवानामाज्यपानां निगदमनुक्रमिष्यन् उक्ता देवताः (आश्रौ १, ६, १ क) इत्येवमादि यथाम्नातं निगदं[10] समापयेत् । आज्यपान्तमनुक्रम्येति वचनादाज्यपानामपि पुरस्तादयाट्शब्दो[11] भवति । अन्यथा[12] आज्यपानां तु न स्यात् ॥ ५ क ॥

---

१. पूर्वस्या आदिष्टश° ब[1] ; °स्या आदिष्टास्येतत् ब[2] ; °स्या आदिष्टस्यैतत् मै । २-२. विधानेन प्रथमायाः ब[3-5] वा वि । ३-३. उत्तरास्वपि देवतासु ब[1,2] मै । ४. प्राप्ते ब[3-5] वा वि । ५. होम° वा वि । ६. अयाळयाळिति ब[1,2] मै । ७. °देवं ब[4] । ८. तस्मि° ब[1-5] मै । ९-९. नास्ति ब[2-5] वि ; आज्यपान्तमनुक्रम्य मै । १०. °दे ब[1] । ११. °स्तादाज्यशब्दो ब[2-5] वा वि । १२. नास्ति मूको ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अग्ने यदद्य विशो अध्वरस्य होतर् (ऋ ६, १५, १४) इत्यनवानं यजति ।। ५ ख ।।

अग्ने यदद्य[1] इत्येतयर्चा अनवानं यजति। तत्र देवतानां याज्याः सर्वा अनवानं प्रयाजानुयाजेषु आज्यभागयोश्च। तस्मात् समानविधानत्वात् स्विष्टकृत्युत्तमे[2] वाऽनुयाजे अनवानं[3] यजति ।। ५ ख ।।

[अर्धर्चे वोच्छ्वासकथनम्]

प्रकृत्या वा ।। ६ ।।

प्रकृत्या अर्धर्चावसानं वा भवति ऋग्धर्मबलीयस्त्वात्[4]। प्रकरणाद्धि ऋग्धर्मो बलीयान्[5] ।। ६ ।।

।। इति [6]षष्ठः खण्डः[6] ।।

---

१. °द्य विशः मं। २. यत्स्विष्टकृतीत्यु° ब$^{3-5}$ वा वि; °ष्टकृतीत्यु° ब^{2}; °ष्टकृतेत्यु° मं। ३. अनवसानं ब^{2} मं। ४. °र्मे बलीयान् स्यात् ब$^{3-5}$ वा वि। ५. बलीयः ब^{1,2} मं। ६-६. षष्ठी खण्डिका मं।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

दर्शपूर्णमास
Digitized by Madhuban Trust

अथ प्रथमेऽध्याये सप्तमः खण्डः

[अध्वर्युणा प्रदेशिनीपर्वाञ्जनपूर्वकमोष्ठापवर्गशोधनम्]

प्रदेशिन्याः पर्वणी उत्तमे अञ्जयित्वौष्ठयोरभ्यात्मं निमार्ष्टि ॥ १ ॥

प्रदेशिनी अङ्गुली, तस्याः पर्वणी, पर्व सन्ध्योरन्तरालम् । तथा श्रुतिः— पञ्चाङ्गुलयश्चतुष्पर्वाः (ऐआ १, २, २) इति । ते पर्वणी उत्तमे, नाधरे, अञ्जयित्वा द्वयोरोष्ठयोः, सप्तमीद्विवचनम् । आत्मानमभि अभ्यातमम्, नोर्ध्वं न तिर्यङ्, [1]निमार्ष्टि निःशेषेण †मार्ष्टि[1] ॥ १ ॥

[उत्तराधरौष्ठयोः शोधनस्य मन्त्रकथनम्]

वाचस्पतिना ते हुतस्येषे प्राणाय प्राश्नामीत्युत्तरमुत्तरे मनसस्पतिना ते हुतस्योर्जेऽपानाय प्राश्नामीत्यधरमधरे ॥ २ ॥

वाचस्पतिना ते[2] इत्यनेन मन्त्रेण उत्तरम् अञ्जनम् [3]उत्तरे ओष्ठे[3] निमार्ष्टि । मनसस्पतिना ते[4] इत्यनेन मन्त्रेण अधरम् अञ्जनम् अधरे ओष्ठे निमार्ष्टि ॥ २ ॥

[इडाग्रहणपूर्वकावान्तरेडादापनप्रकारः]

स्पृष्ट्वोदकमञ्जलिनेळां प्रतिगृह्य सव्ये पाणौ कृत्वा पश्चादस्या उदगङ्गुलिं पाणिमुपधायावान्तरेळामवदापयीत ॥ ३ ॥

स्पृष्ट्वोदकं[5] यथार्थमुदकस्पर्शनं[6] कृत्वा अञ्जलिना प्रतिग्रहसमर्थेन इळाम् अध्वर्युरानयति । तां प्रतिगृह्य[7] गृहीत्वा तां सव्ये पाणौ कृत्वा पश्चादस्या

१-१. नास्ति ब[3-5] । †. निमार्ष्टि ब[1,2] मै । २. तु. शब्रा १, ८, १, १५ । ३-३. उत्तरोष्ठे मै । ४. तु शब्रा १, ८, १, १४ । ५. नास्ति वि । ६. प्राणसंमितां वा उद° ब[1] ; उद° ब[2] मै वि । ७. परिगृह्य मूको ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

उत्तरस्यां[1] दिशि। अस्या इत्यनुच्यमाने[2] अनन्तरमिति स्यात्। पश्चादनन्तरमिति। उदगङ्गुलिं पाणिम् उपधाय[3] [4]उप समीपे स्थापयित्वा। †अवान्तरेण वक्ष्यमाणम्† अवदानम् अवान्तरेळा। ताम् अवदापयीत पाणावध्वर्युम् [अवदानाय] प्रयोजयति (°जयेत)॥ ३ ॥[4]

[होत्रेडाया अवान्तरेडाग्रहणप्रकारः]

[5]अन्तरेणाङ्गुष्ठमङ्गुलीश्च स्वयं द्वितीयमाददीत ॥ ४ ॥

अन्तरेण मध्ये। स्वयं होता द्वितीयम् आददीत गृह्णीयात्। अध्वर्योरधिकारात् स्वयंग्रहणम् ॥ ४ ॥[5]

[अध्वर्युणावान्तरेडाग्रहणम्]

प्रत्यालब्धामङ्गुष्ठेनाभिसंगृह्य ॥ ५ ॥

उपलिप्तायाम्[6] [7]अङ्गुल्या †प्रत्यालभेताऽध्वर्युस्ताम्[7] प्रत्यालब्धाम् अङ्गुष्ठेनाभिसंग्रहणं कृत्वा ॥ ५ ॥

[इडोपह्वानप्रकारः]

प्रत्याहृत्याङ्गुलीरमुष्टिं कृत्वा दक्षिणत इळां परिगृह्याऽऽस्यसम्मितामुपह्वयते प्राणसम्मितां वा ॥ ६ ॥

[8]प्रत्याहृत्याङ्गुलीरवान्तरेळां[8] प्रति अङ्गुलीरध्यानयति[9]। यथा च[10] मुष्टिर्न भवति तथा कृत्वा दक्षिणतो दक्षिणस्यां दिशि तेन[11] पाणिना इळां परिगृह्य। आस्यं वदनम्। आस्यसम्मितामिति कृत्वा उपह्वयते[12], [13]प्राणसम्मितां वेति[13] ॥ ६ ॥

---

१. इतरस्यां मै। २. इत्युच्यमाने ब[3,4] वा वि; इत्यनूच्यमाने ब[1,2,5]।
३. उपनिधाय ब[1]; निधाय वा; नास्ति वि। ४-४. नास्ति ब[3-5] वा वि।
†-†. अवान्तरेळां वक्ष्यमाणाम् ब[1,2]। ५-५. नास्ति ब[3-5] वा वि।
६. अत्र वंडितं या माली तदिदं लिप्तायाम् ब[3-5]; अत्र चांजितं या मालं तदिदं लिप्तायाम् वा; डितं या अमाली तदिदं लिप्तायाम् वि; नास्ति ब[2] मै। ७-७. नास्ति ब[2] मै। †. °भेदध्व° ब[1,3-5] वा वि। ८-८. प्रत्याहृत्याङ्गुलीनां ब[3-5] वा वि।
९. °ली न° ब[2]। १०. नास्ति वि। ११. नास्ति मै। १२. °यति ब[3-5] वा वि।
१३-१३. नास्ति मूको।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

दर्शपूर्णमास
Digitized by Madhuban Trust

[इडोपह्वानम्]

इळोपहूता सह दिवा बृहताऽऽदित्येनोपास्माँ इळा ह्वयतां सह दिवा बृहताऽऽदित्येनेळोपहूता सहान्तरिक्षेण वामदेव्येन वायुनोपास्माँ इळा ह्वयतां सहान्तरिक्षेण वामदेव्येन वायुनेळोपहूता सह पृथिव्या रथन्तरेणाग्निनोपास्माँ इळा ह्वयतां सह पृथिव्या रथन्तरेणाग्निना उपहूता गावः सहाशिर उप मां गावः सहाशिरा ह्वयन्ताम् उपहूता धेनुः सह ऋषभोप मां धेनुः सह ऋषभा ह्वयताम् (तैब्रा ३, ५, ८, १)। उपहूता गौर्घृतपद्युप मां गौर्घृतपदी ह्वयतामुपहूता दिव्याः सप्त होतार उप मां दिव्याः सप्त होतारो ह्वयन्ताम् उपहूतः सखा भक्षः (तैसं २, ६, ७, ३)। उप मां सखा भक्षो ह्वयतामुपहूतेळा वृष्टिरूप मामिळा वृष्टिर्ह्वयतामित्युपांश्वथोच्चैः । इळोपहूतोपहूतेळोपास्माँ इळा ह्वयतामिळोपहूता मानवी घृतपदी मैत्रावरुणी ब्रह्मदेवकृतमुपहूतं दैव्या अध्वर्यव उपहूता उपहूता मनुष्या य इमं यज्ञमवान्ये च यज्ञपतिं वर्धानुपहूते द्यावापृथिवी पूर्वजे ऋतावरी देवी देवपुत्रे उपहूतोऽयं यजमान उत्तरस्यां देवयज्यायामुपहूतो भूयसि हविष्करण इदं मे देवा हविर्जुषन्तामिति तस्मिन्नुपहूत इति (तैसं २,६,७; मैसं ४,१३,५) ॥ ७ ॥

उपांश्वधिकाराद्[1] उपांशु[2] प्राप्ते उच्चैरित्याह। अथ-शब्द [3]उपहवसंज्ञा-समुच्चयार्थः[3]। तस्मिन्नुपहूत इति करणम् उपहवान्तज्ञापनार्थम् ॥ ७ ॥

[अवान्तरेडाभक्षणपूर्वकेडाभक्षणम्]

उपहूयावान्तरेळां प्राश्नीयादिळे भागं जुषस्व नः पिन्व गा जिन्वार्वतो रायस्पोषस्येशिषे तस्य नो रास्व तस्य नो दास्तस्यास्ते भागमशीमहि । सर्वात्मानः सर्वतनवः सर्ववीराः सर्वपूरुषाः सर्वपुरुषा इति वा ॥ ८ ॥

उपहूय उपहवमुक्त्वा अनन्तरम् अवान्तरेळां प्राश्नीयाद् भक्षयेद् होता इळे भागम् इत्यनेन मन्त्रेण। पुनरुपहूयेति अनुक्रमार्थम्। [4]उपहूय प्राश्नीयादिति[4]

---

१. उपहूयते उपांश्व° मैं। २. उपांशुत्वे ब[3-5]। ३-३. °संज्ञया समु° ब[3,5] वा; °संज्ञाया [:] समु° वि। ४-४. उपहूयेळां प्रा° ब[3-5] वा वि।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वक्तव्ये अवान्तरेळावचनमिळाप्राशनप्रतिषेधार्थम् । प्राशनं तु[1] प्राप्तम् इळा सर्वेषाम् (आश्वौ १२, ९, १४) इति विकृतिवचनात् । अध्वर्यूणां तु व्यक्तम्[2]— यजमानपञ्चमा इळां प्राश्नन्ति[3] (आपश्रौ ३, २, ११) इति तत्सूत्रकारः । अवान्तरेळाप्राशनेनैव[4] कृतार्थमित्याह । विकृतौ [5]तु व्यक्तम्[5] नेळायां भक्षभक्षणम्[6] (आश्वौ २, १९, १२) इति । प्रकृत्यर्थं च भवति । दृश्यते च लिङ्गम्— अवान्तरेळां प्राश्याचम्य होतृचमसं भक्षयेत् (आश्वौ ५, ६, १४) इति । मन्त्रस्तु सर्वेषां समानोऽधिकाराल्लिङ्गत्वाच्च[7] । यथा आसन्दीनां वाहनादीनाम् (?) एवमिहापि ।

सर्वपुरुषा इति वेति मन्त्रान्तविकल्पः[8] । यदि कृत्स्नस्य विकल्पः स्यादिति-करणं कुर्यात्—सर्वपूरुषा[9] [इति] सर्वपुरुषा इति वेति[10] ॥ ८ ॥

॥ इति [11]सप्तमः खण्डः[11] ॥

---

१. नास्ति ब$^{3-5}$ । २. व व्यक्तं ब^{1} ; वक्तव्यं ब^{2} मै । ३. प्राश्य मुपा (मुद्रितपाठः) । ४. °रेळामाज्येळां प्रा° ब$^{3-5}$, °न्तरेलां प्रा° वि ; ळाप्रा° ब^{1,2} । ५-५. वक्तव्यं मै । ६. भक्तभ° ब$^{2-5}$ वा वि ; भक्षणं मै । ७. °नाधि° मूको (शोधमूतेऽपि पाठः संगच्छते) । ८. मन्त्रान्ते वि° ब^{1} । ९. नास्ति ब$^{1-2}$ मै पू । १०. वेति चेति ब$^{3-5}$ वा वि ; चेति ब^{2} ; चेति वेति मै । ११-११. सप्तमी खण्डिका मै ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

दर्शपूर्णमास
Digitized by Madhuban Trust

अथ प्रथमेऽध्याये अष्टमः खण्डः

[इडाभोक्तुर्मार्जनपूर्वकमनुयाजचरणम्]

मार्जयित्वाऽनुयाजैश्चरन्ति ।। १ ।।

मार्जयित्वा[1] वक्ष्यति मार्जनम्। [2]तत्[†] कृत्वा अनन्तरम्[2] अनुयाजैश्चरन्ति प्रचरन्ति। अनुयाजानपि[3] वक्ष्यति। अनुक्रमविधानार्थमिदमुच्यते। अनुक्रमान्मार्जनस्य स्थानं सिद्धम्। वक्ष्यति विधानमेव न तु स्थानम्। प्राशनाङ्गत्वादिळान्तायामपि[4] भवति गृहमेधीयायाम्[5]। पत्नीसंयाजे इळायामपि भवति सहकारिवशात् ।। १ ।।

[मार्जनप्रकारः]

परिस्तरणैरञ्जलिमन्तर्धायाप आसेचयते तन्मार्जनम् ।। २ ।।

परिस्तरणैराहवनीयपरिस्तरणैर्वेदिपरिस्तरणैर्वा तृणैरञ्जलिमुदकधारण-समर्थं कृत्वाऽन्येन केनचित् परिकर्मिणा आसेचयते[6] सेचनं कारयो(?ये)त। तन्मार्जनं तदेतन्मार्जनसंज्ञं भवति। मार्जयित्वाऽस्मिन् ब्रह्मभागम् (आश्रौ १, १३, २) इत्युक्ते एतत् प्रत्येतव्यम्। चात्वाले मार्जयन्ते (आश्रौ ३, ५, १), नेदमादिषु मार्जनम् (आश्रौ ४, २, ६) ।। २ ।।

[अनुयाजसंज्ञाविधानम्]

देवादयोऽनुयाजाः ।। ३ ।।

देवशब्द आदिर्येषां ते देवादयोऽनुयाजसंज्ञाः। अनुयाजवर्जम्[7] (आश्रौ १, ५, ४), अनुयाजान्ता (आश्रौ ६, १३, ४) इत्युक्ते एते प्रत्येतव्याः ।। ३ ।।

[अनुयाजकथनम्]

वीतवत्पदान्ताः ।। ४ ।।

---

१. नास्ति ब[१-५] वा वि। २. मार्जयित्वा अन° मूको। †. नास्ति ब[१] मं।
३. °जास्तानपि ब[२-५] वा वि। ४. इलाया° ब[१]। ५. °मेधीये मूको।
६. °यति ब[३-५] वा वि। ७. नास्ति ब[३-५]।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वेतु व्यन्तु वीतामिति यत् पदं तद्वीतवत्पदमन्ते येषां ते वीतवत्पदान्ता: आद्यन्तप्रज्ञापनार्थमिदमुच्यते। प्रकृतौ विकृतौ च यत्र ते[1] भवन्ति। इति प्रथम: (आश्रौ १, ५, १६), इति[2] द्वितीय: (आश्रौ १. ५, २१) इति वा वक्तव्यं यथा प्रयाजेषु। पुनरनुयाजग्रहणं मार्जनाधिकारात् ॥ ४ ॥

[अनुयाजानां त्रित्वम्]

त्रय: ॥ ५ ॥

त्रय: त्रयो भवन्ति। सर्वत्र प्रयाजानुयाजानां[3] समसंख्यत्वाद्[4] इहापि आवृत्तौ[5] प्राप्तायां [6]त्रय इत्याह[6] ॥ ५ ॥

[एकैकं प्रेषितस्य यजनम्]

एकैकं प्रेषितो यजति ॥ ६ ॥

यथा सामिधेनी:[7] सकृत्प्रेषित: सर्वा: प्रतिपद्यते एवमिहापि प्राप्ते इदमुच्यते— एकैकमध्वर्युणा प्रेषितो यजतीति ॥ ६ ॥

[स्थलविशेषे यजनविशेषकथनम्]

देवं बर्हिर्वसुवने वसुधेयस्य वेतु। देवो नराशंसो वसुवने वसुधेयस्य वेतु (मैसं ४, १०, ३)। देवो अग्नि: स्विष्टकृत् (वासं २१, ५८)। सुद्रविणा मन्द्र: कवि: सत्यमन्मायजी होता होतुर्होतुरायजीयानग्ने यान् देवानयाड् याँ अपिप्रेयें ते होत्रे अमत्सत तां ससनुषीं होत्रां देवंगमां दिवि देवेषु यज्ञमेरयेमं स्विष्टकृच्चाग्ने होता भूर्वसुवने वसुधेयस्य नमोवाके वीहि (तु. मैसं ४, १०, ३) इत्यनवानं वा ॥ ७ ॥

देवं बर्हि: इत्येवमादयो यथाम्नातास्त्रय इतिकरणान्ता:। [8]अनवानं वा इति उत्तमे विभाषाप्रकरणादनवानमृच: †स्वधर्मेण वा इत्युक्तं† स्विष्टकृत्प्रकरणे[8] ॥ ७ ॥

॥ इति [9]अष्टम: खण्ड:[9] ॥

---

१. न मूको। २. नास्ति ब[1]। ३. °जानूया° ब[4] मै। ४. °संख्यात्वाद् मै वा वि। ५. अन्यावृत्तौ ब[3-5] वा वि; अत्रावृत्तौ ब[2]। ६-६. आह त्रय इति मै। ७. °धेन्य: ब[2-5] वा वि मै। ८-८. नास्ति ब[3-5] वा वि; तु. आश्रौ १, ६, ५; ६। †-†. स्वधर्मश्चेत्युक्तं मै। ९-९. अष्टमी खण्डिका मै।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

दर्शपूर्णमास
Digitized by Madhuban Trust

अथ प्रथमेऽध्याये नवमः खण्डः

[सूक्तवाकाय संप्रेषितस्य देवताऽऽदेशानन्तरमुपसन्तननम्]

सूक्तवाकाय संप्रेषित इदं द्यावापृथिवी भद्रमभूदार्ध्म सूक्तवाकमुत नमोवाकमृध्यास्म सूक्तोच्यमग्ने त्वं सूक्तवागसि । उपश्रुती दिवस्पृथिव्योरोमन्वती तेऽस्मिन् यज्ञे यजमान द्यावापृथिवी स्ताम् । शंगयी जीरदानू अत्रस्नू अप्रवेदे उरुगव्यूती अभयंकृतौ । वृष्टिद्यावारीत्यापा शंभुवौ मयोभुवा ऊर्जस्वती पयस्वती सूपचरणा च स्वधिचरणा च तयोराविदि (तु. मैसं ४, १३, ९) इत्यवसाय प्रथमया विभक्त्याऽऽदिश्य देवताम् इदं हविरजुषताऽवीवृधत महो ज्यायोऽकृत (मैसं ४, १३, ९) इत्युपसन्तनुयात् ॥ १ ॥

सूक्तवाकाय[1] सूक्तवाक इति संज्ञा वक्ष्यमाणस्य । ताः सूक्तवाक एवाऽनुवर्तयेत् (आश्रौ ५, ३, ११) इत्युक्ते एतस्य ग्रहणम् । तस्मै सूक्तवाकाय सूक्ता ब्रूहि (मैसं ४, १३, ९) इत्यध्वर्युणा[2] सम्प्रेषितो होता इदं द्यावापृथिवी (मैसं ४, १३, ९) इति यथासमाम्नातं निगदं प्रतिपद्यते । सामिधेन्यतिदेशात् संप्रैषे प्राप्ते सम्प्रेषितवचनम्[3], विद्यमाने सम्प्रैषे आकाङ्क्षमाणा (साकाङ्क्षता?), विद्यमानेळायां[4](?) यथा । तयोराविदि इत्यवसाय अवसानं कृत्वा [5]विभक्तिषु या प्रथमा विभक्तिस्तयाऽऽदिश्य† उक्त्वा प्रथमां देवताम् इदं ‡हविर् इत्यादीन् अकृतेत्यन्तान्‡ शब्दान् ϕउपसन्तनुयाद्[5] देवतानाम्ना सन्दध्याद् अनवानविवक्षार्थम्[6]। द्वितीयया विभक्त्या [7]आदेशे प्राप्ते[7] प्रथमाग्रहणम् ॥ १ ॥

---

१. सूक्तवाकाय मैं ; नास्ति अन्यत्र । २. तु. ऋखि ५, ७, ११ ।
३. सम्प्रेषिते वचनं $ब^{3-5}$ वि ; °चने मैं । ४. °माने इळायां $ब^{3-5}$ वा वि ।
५-५. विभक्तिषु सन्तनुयात् $ब^{2}$ । †. °स्तया विभक्त्याऽऽदिश्य मैं ।
‡-‡. हविरित्येतान् $ब^{3-5}$ वा वि । ϕ. सन्तनुयात् मैं । ६. °क्षायै $ब^{1}$ ।
७-७. आदेश प्राप्ते $ब^{1}$; आदेशमिति प्राप्ते $ब^{2-5}$ मैं वा वि ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[उत्तरा अपि देवता आदिश्य पूर्ववदुपसन्तननम्]

एवमुत्तराः ॥ २ ॥

यथा प्रथमायां निगमनमुक्तम् एवम् उत्तरा अपि निगमयेत् । प्रतिदेवतं निगमप्राप्त्यर्थोऽयमारम्भः ॥ २ ॥

[देवतासङ्ख्यावशेन अक्रतेत्यस्य वचनभेदः]

अक्रातामक्रतेति यथार्थम् । ३ ॥

अक्राताम् अक्रतेत्येतौ शब्दौ यथार्थं[1] प्रयोक्तव्यौ । अक्रातामिति द्विवचनं[2] द्विदेवत्याभिधायि[3] अग्नीषोमीये[4] । अक्रतेति बहुवचनं बहुदेवत्ये वैश्वदेवी[5]-याज्यपेषु यथा आम्नातम् अक्रतेति । एवमाम्नायो यत्र न विद्यते तत्र[6] अकृषातामिति[7] द्विवचनं प्राप्नोति । [8]अग्नीषोमीये । अकृषतेति[†] बहुवचनं प्राप्नोति[8] वैश्वदेवे । तस्माद् यथा मन्त्रे दृष्टम् आज्यपादिषु तथा आम्नातम् अक्राताम् अक्रतेति । यथार्थमित्यनुच्यमाने विकल्पः स्यात् अकृत अक्राताम् अक्रतेति [9]वा इति[9] ॥ ३ ॥

[उपांशुदेवताया निगदकथनम्]

उक्तमुपांशोः ॥ ४ ॥

उपांशुदेवताया आवहादयो[10] ये[11] शब्दा[12] उच्चैर्ये उपांशु येषां च विभाषा तत् सर्वमुक्तं व्याख्यातम्[13] । तस्य पुनर्वचने प्रयोजनम् [14]उपांशूच्चयोर्भिन्नत्वात् संतानो[14] न विद्यते । इह[15] चोपसन्तनुयादित्याह । तस्मादुपांशुदेवताया ये शब्दा उपसंधीयन्ते सर्वे ते उपांशु प्राप्ताः, तस्माद् उक्तमुपांशो इत्युच्यते ॥ ४ ॥

---

१. यथार्थे ब[1] । २. वचनं ब[2] । ३. °यिनि मै । ४. °येति ब[5] ।
५. °देवीया अन्येषु ब[3-5] ; °देवीयाज्यपेक्षया (?) मै । ६. तत्र न ब[1] ।
७. अक्राताम् ब[1-5] वा वि । ८-८. नास्ति मै । †. अक्रतेति ब[3-5] वा वि ।
९-९. नास्ति ब[2-5] । १०. आवाहनादयो ब[3-5] वा वि । ११. ये ये मूको ।
१२. नास्ति मै । १३. तु. आश्रौ १, ३, १२-१५ । १४-१४. °भिन्नसन्तानो ब[1,2] मै ।
१५. नास्ति ब[1] ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

दर्शपूर्णमास
Digitized by Madhuban Trust

[आवापिकदेवताक्रमकथनम्]

आवापिकान्तमनुद्रुत्य [1]देवा आज्यपा आज्यमजुषन्ताऽवीवृधन्त महो ज्यायोऽक्रताग्निर्होत्रेणेदं हविरजुषताऽवीवृधत महो ज्यायोऽकृत । अस्यामृधेद्धोत्रायां देवंगमायामाशास्तेऽयं यजमानोऽसावसावित्यस्यादिश्य नामनी उपांशु संनिधौ गुरोः । आयुराशास्ते सुप्रजास्त्वमाशास्ते रायस्पोषमाशास्ते सजातवनस्यामाशास्त उत्तरां देवयज्यामाशास्ते भूयो हविष्करणमाशास्ते दिव्यं धामाऽऽशास्ते विश्वं प्रियमाशास्ते यदनेन हविषाऽऽशास्ते तदश्यात् तदृध्यात् तदस्मै देवा रासन्तां तदग्निर्देवो देवेभ्यो वनते । वयमग्नेर्मानुषाः । इष्टं च वित्तं चोभे च नो द्यावा-पृथिवी अंहसः पातामिह गतिर्वामस्येदं नमो देवेभ्य[1] इति ॥ ५ ॥

आवापिकान्तम्[2] । स्विष्टकृदाज्यभागयोरन्तरा आवापस्थानम् । आवापस्थाने भवा आवापिकाः । ता अन्ते यस्य निगदस्य तम् आवापिकान्तं निगदमनुद्रुत्य[3] उक्त्वाऽनन्तरं देवा आज्यपाः इति यथासमाम्नातं[4] निगदं ब्रूयात् । परिभाषा-व्यवधानात् कृतान्तप्रतिपत्त्यर्थम्[5] आवापिकान्तमनुद्रुत्य[3] इत्युच्यते । असावसौ इति प्रथमया विभक्त्या अस्य [6]यजमानस्य । आदिश्य उक्त्वा । नामनी द्वे नामनी नक्षत्रनाम अभिवादनीयं च । असावसाविति† वीप्सा द्वयोः प्राप्त्यर्थम् । अस्येति वचनाद्[7] यजमानस्य भवति । अन्यथा होतुः स्यात् । स्वं नामादिशेत (आश्रौ १, २, १) इत्यधिकारात् । नामनी इति द्विवचनाद् द्विनामा भवति । तस्माद् द्विनामा ब्राह्मणोऽर्द्धकः (तैसं ६, ३, १, ३) इति श्रुतिः[8] । नामनी इत्युक्ते सांव्यवहारिकं च अभिवादनीयं चेति प्राप्ते द्वितीयं [9]नक्षत्रनामेति । श्रुत्यन्तरे अविशेषाद् विशेषश्रुतेर्बलीयस्त्वात् तदेव भवति । तत्र द्वितीयमिति वचनाद् द्वितीयं[9] नक्षत्रनाम भवतीत्येके । द्वितीयग्रहणं संख्यार्थम् । अनुक्रमार्थमित्यपरे । द्वे नामनी भवत इत्यर्थः । तयोरनुक्रमः । जातमात्रो हि नक्षत्रेण युज्यते । उत्तरकालमितरेण । तत्र जातः (पा ४, ३, २५) इत्येतस्मिन्नर्थे तद्धित उत्पद्यते ।

१-१. तु. तैब्रा ३, ५, १०, ४; ५; मैसं ४, १३, ९ । २. °कान्तं नाममा (°मी वि) ब[3-5] वि; °कान्तस्य ब[2] मैं; °कान्तं नामनी वा । ३. °मनुहृत्य ब[2] मैं । ४. यथाम्नातं ब[1] । ५. °त्यर्थः ब[3] मैं । ७-७. नास्ति ब[1] । †. असाविति ब[2-5] मैं वा वि । ८. श्रुतेः ब[3-5] । ९-९. नास्ति ब[3-5] वा वि ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[1]मघा इति जातनाम, पश्चात् माघो देवदत्त[1] इति। तस्मादेव[2] प्रयोगो भवति— आनुराधो[3] देवदत्त इति। अभिवादनीयमेव[4] प्रयोक्तव्यं मन्त्रत्वात् न तु सांव्यवहारिकम् अमन्त्रत्वात्। उपांशु सन्निधौ गुरोः। उपांशु नामनी आदिशेत् सन्निधौ सन्निहिते यजमाने गुरोरेव नान्यस्य होतुः। गुरोः [5]पितुराचार्यस्य[5] च गुरोः समीपे नामग्रहणं प्रतिषिद्धम् आचारशास्त्रे[6]। अग्रहणे[7] तु श्रुति-विरोधस्तस्मादुपांशु विधीयते। संनिधाविति वचनाद् असंनिधौ उच्चैरेव। नमो देवेभ्यः (मैसं ४, १३, ९ ; १७) इति। इतिकरणः सूक्तवाकान्त-प्रदर्शनार्थः ॥ ५ ॥

॥ इति [8]नवमः खण्डः[8] ॥

१-१. यथाभिजातनाम पश्चाद्देवदत्ता ब[1] ; अथाभिजाता नाम यथादेवत ब[2] मै ; मघा इति जातनाम माघा देवता ब[3-4] वा ; देवता वि। २. तस्मादेवं ब[2-4] मै वा वि। ३. अनुराघो मूको। ४. अभिधानीय° मै। ५-५. आचार्यस्य ब[1]। ६. आचरे छास्त्रे ब[3-2] ; आचरे शास्त्रे वा वि। ७. ग्रहणे ब[1,2]। ८-८. नवमी खण्डिका मै।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

दर्शपूर्णमास

Digitized by Madhuban Trust

अथ प्रथमेऽध्याये दशमः खण्डः

[शंयुवाकाय प्रेषितस्य प्रणवरहितमन्त्रपाठः]

शंयुवाकाय सम्प्रेषितस्तच्छंयोरावृणीमह इत्याहानुवाक्यावदप्रणवाम् ॥ १ ॥

शंयुवाक इति संज्ञा वक्ष्यमाणस्य मन्त्रस्य[1]। शंयुवाकस्य चोपरिष्टात् (आश्रौ २, १६, १३) इत्युक्ते एतस्य ग्रहणम्। तस्मै [2]शंयुवाकाय अर्थेऽध्वर्युणा[2] सम्प्रेषितो होता तच्छंयोरावृणीमहे (खि ५, ३, ७) इत्येतामृचमाह। अनुवाक्यया तुल्यमनुवाक्यावदाह एकश्रुत्या प्रणववर्जिताम्। समाप्तौ प्रणवेनावसानम् (आश्रौ १, २, १३) इति भवति[3]। आहेति चोदितम् [4]अन्वाहेति नाँ चोदितं[4] शंयोर्ब्रूहीति[5] अध्वर्युराह, नानुब्रूहीति। तस्मादनुवचनसंज्ञा न प्राप्नोति। अप्राप्तायामैकश्रुत्यादयो धर्मा न प्राप्नुवन्ति। तस्मादनुवाक्यावदिति[6] उच्यते[7] ऐकश्रुत्यादिप्राप्त्यर्थम्। अनुवाक्यावदिति वचनात् प्रणवः प्राप्तः, अप्रणवामिति प्रतिषेधः ॥ १ ॥

[प्रेषितायाध्वर्युणा वेददानम् मन्त्रपाठश्च]

वेदमस्मै प्रयच्छति ॥ २ ॥

तं गृह्णीयाद् वेदोऽसि वेदो विदेयेति ॥ ३ ॥

वेदो दर्भमयो भवति। वत्सज्ञु[8] पशुकामस्य (आपश्रौ १, ६, ५) इति। तं वेदम् अस्मै होत्रे प्रयच्छति अध्वर्युः[9]। तं वेदं गृह्णीयाद्धोता। अस्मै[10] इत्यनुच्यमाने वेदं प्रयच्छति इत्युक्ते कर्मचोदनायाम् (आश्रौ १, १, १४) इति वचनाद्धोता वेदोऽसि प्रयच्छतीति प्राप्नोति। अध्वर्युस्तं गृह्णीयादिति च अध्वर्योर्ग्रहणम्। वेदोऽसि वेदो विदेय इत्यनेन मन्त्रेण ॥ २-३ ॥

---

१. नास्ति ब[1]। २-२. °वाकार्थेऽ° ब[3–5]। ३. नास्ति ब[1,3–5] वा वि। ४-४. नास्ति ब[2] मं। †. नास्ति ब[1] वा। ५. शंयो ब्रूहीति ब[1–5] वा वि। ६. °क्यावत् ब[2–5] वा वि। ७. तदुच्यते मं। ८. वत्सजानु ब[3-5] वा वि; वत्सन्न् मं। ९. एतस्माद् अग्रे तृतीयं सूत्रम् मं। १०. तस्मै मं।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[उदायुषेत्याविमन्त्रेणोपोत्थानं गार्हपत्यसमीप आज्येन देवतानां यजनञ्च]

उदायुषेत्येतेनोपोत्थाय पश्चाद् गार्हपत्यस्योपविश्य सोमं त्वष्टारं देवानां पत्नीरग्निं गृहपतिम् इत्याज्येन यजन्ति ॥ ४ ॥

उदायुषा (आश्रौ १, ३, २३) इत्येतेन[1] मन्त्रेण यथासमाम्नातेन उपोत्थाय[2] उप समीपे पत्नीसंयाजकाले उत्थाय पश्चादपरस्यां दिशि गार्हपत्यस्याग्नेरुपविश्य। ऊर्ध्वज्ञव आसीनाः (आपश्रौ ३, ८, ८) इति श्रुत्यन्तरे । तस्माग्निरसनप्रतिषेधः। सोमं त्वष्टारं देवानां पत्नीरग्निं गृहपतिम् इति एता देवता आज्येन द्रव्येण यजन्ति अध्वर्यवः । ऋचं पादग्रहणे (आश्रौ १, १, १७) इति ऋक्षु यथा तथा[3] याज्ञिकेषु परिभाषाऽभावात् तावन्मात्रग्रहणे प्राप्ते कृत्स्नप्राप्त्यर्थम् एतेनेत्युच्यते। इह[4] प्रोक्तमन्यत्राप्येवम् सुमित्रिया न आप ओषधयः सन्तु (वासं ३५, १२; आश्रौ ३, ६, २४) इति चेत्येवमादिषु । आज्यग्रहणं जाघन्यामिळायां[5] च समानप्रदर्शनार्थम्। प्रजाकामस्य च असमानं स्यात्। कथम्। जाघन्यां[6] विकल्पः आज्येन जाघन्या[7] [8]पत्नीः संयाजयन्ति (माशब्रा ३, ८, ५, ६) इति[8]। इळायां तु आज्यं पाणितले (आश्रौ १, १०, ८) इति। आह। जाघन्या प्रयोगेऽपि आज्य-मिळायां स्यात्, जाघनी मा भूदिति आज्यग्रहणं समानविधानप्रदर्शनार्थम् । आज्येन यदा यजन्ति आज्यमेवेळायां भवति। यदा जाघन्या तदा इळापि तस्या एवेति[9] ॥ ४ ॥

[पत्नीसंयाजसंज्ञाकरणम्]

आप्यायस्व समेतु ते सं ते पयांसि समु यन्तु वाजा इह त्वष्टारमग्रियं तन्नस्तुरीपमध पोषयित्नु देवानां पत्नीरुशतीरवन्तु न इति द्वे अग्निर्होता गृहपतिः स राजा हव्यवाळग्निरजरः पिता न इति पत्नीसंयाजाः ॥ ५ ॥

आप्यायस्व समेतु ते सं ते पयांसि समु यन्तु वाजाः (ऋ १, ९१, १८) इति सोमस्य। इह त्वष्टारमग्रियम् (ऋ १, १३, १०), तन्नस्तुरीपमध पोषयित्नु (ऋ ३, ४, ९) इति त्वष्टुः । देवानां पत्नीरुशतीरवन्तु नः (ऋ ५, ४६, ७-८)

---

१. इत्यनेन ब[1,2] मै। २. उत्थाय मूको। ३. नास्ति ब[3-5] वा वि। ४. नास्ति मै। ५. इज्यायामि° मूको। ६. इज्यायां ब[1,2,5] मै वा वि; इळायां ब[3,4]। ७. °न्या वा ब[1,2] मै; °न्या च वा; °न्या चा वि। ८-८. पत्नीसंयाजाय न यजन्तीति मै। ९. तु. काश्रौ ६, ९, १६-१९।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

दर्शपूर्णमास
Digitized by Madhuban Trust

इति द्वे देवपत्नीनाम्। अग्निर्होता गृहपतिः स राजा (ऋ ६, १५, १३), हव्यवाळग्निरजरः पिता नः (ऋ ५, ४, २) इति अग्नेर्गृहपतेः। इति पत्नीसंयाजाः इत्येते पत्नीसंयाजसंज्ञा वेदितव्याः। पत्नीसंयाजान्तानीतराणि (आश्रौ ७, १, ५) इत्युक्ते एतेषां ग्रहणम् ॥ ५ ॥

[प्रजाकामस्य यागविशेषकथनम्]

अथ प्रजाकामो राकां सिनीवालीं कुहूमिति प्राग्गृहपतेर्यजेत ॥ ६ ॥

अथेत्यधिकारापेक्षार्थम्। अधिकृतेषु पत्नीसंयाजेषु प्रजाकामो यजमानो राकां सिनीवालीं [1]कुहूमिति तिस्रो देवताः प्राक् पूर्वं गृहपतेः यजेत[1] ॥ ६ ॥

[होत्रा याज्यानुवाक्याकरणं कुहूमहमितिमन्त्रपाठे यजमानकर्तृत्वम्]

[1]एतासां याज्यानुवाक्या वक्ष्यन्ते[1]—

राकामहं सिनीवालि कुहूमहमिति द्वे द्वे याज्यानुवाक्ये ॥ ७ ॥

[2]राकामहम् (ऋ २, ३२, ४), यास्ते राके (ऋ २, ३२, ५), सिनीवालि (ऋ २, ३२, ६), या सुबाहुः (ऋ २, ३२, ७), कुहूमहम्, कुहूर्देवानाम् (तैसं ३, ३, ११; ५) इति[2]। ऋचं पादग्रहणे (आश्रौ १, १, १७) इति प्राप्ते द्वे द्वे याज्यानुवाक्ये इत्याह। याज्यानुवाक्याग्रहणं पूर्वं याज्यानुवाक्या इत्यनुक्तत्वाद्[3] इहागत्य उक्तं द्रष्टव्यम्। अनुच्यमाने तु आज्येन यजन्ति (आश्रौ १, १०, ४) इति चोदितत्वाद् याज्या एव सर्वाः स्युः अनुवाक्या न स्युः। [4]अथ† किमेताभिर्ऋग्भिः[4] क्रियते इति संशय एव[5] स्यात्, तस्माद् याज्यानुवाक्याग्रहणम् ॥ ७ ॥

[पाणितलस्थाज्यरूपेळोपह्वानानन्तरं तद्भक्षणं मन्त्रस्वरूपकथनञ्च]

कुहूमहं सुवृतं विद्मनापसमस्मिन् यज्ञे सुहवां जोहवीमि। सा नो ददातु श्रवणं पितॄणां तस्यै ते देवि हविषा विधेम। कुहूर्देवानाममृतस्य पत्नी हव्या नो अस्य हविषः शृणोतु। सं दाशुषे किरतु भूरिवामं रायस्पोषं यजमाने दधात्विति। आज्यं पाणितलेऽवदायेळामुपहूय सर्वां प्राश्नीयात् ॥ ८ ॥

१-१. नास्ति ब[2]। २-२. राकामहं सिनीवालि कुहूमिति मै; नास्ति ब[2-5] वा वि। ३. इत्युक्तत्वात् मै। ४-४. अनुवाक्यावाक्यमेता° मै। †. अथवा ब[3] वा। ५. एवं ब[3-5] वि।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

देवता उक्ता। नोक्ता याज्यानुवाक्येति कुहूमहम् इत्येते आम्नाते कुह्वाः[1]। तयोः पूर्वमादिग्रहणं[2] याज्यानुवाक्यासंज्ञाप्राप्त्यर्थम्। आज्यं पाणितले। [3]पाणेः तलं पाणितलं[3] तस्मिन् पाणितले अध्वर्युणा आज्यम् अवदापयीत तं प्रयोजयति। चतुरवत्तं भवति। तत इळामुपहूय पूर्वोक्तेन विधिना सर्वां प्राश्नीयाद् होता। इळावचनात् पूर्ववत् पुरोळाशादीनाम् अवदाने प्राप्ते आज्यमित्याह। इळापात्रे एव[4] प्राप्ते पाणितल इत्याह। इळामुपहूयेति वचनात् प्रधाने चोदिते साङ्गा भवति। प्रदेशिन्याः (आश्रौ १, ७, १) इत्येवमादि सर्वम्। अवान्तरेळावदानं तु अर्थाल्लुप्यते पाणितले इति चोदितत्वात्। सर्वग्रहणं तु होतैव प्राश्नीयात्, न यजमानपञ्चमाः॥ ८॥

[अत ऊर्ध्वं शंयुवाको भवेन्नवेत्यत्रेतिकर्तव्यताविधानम्]

शंयुवाको भवेन्न वा॥ ९॥

प्राशनादनन्तरं[5] शंयुवाको[6] भवेत् [7]केषांचिदध्वर्यूणाम्। स व्याख्यातः[7]। शंयुवाको[8] [9]भवेद् इति वचनाच्छंयुवाको भवेत्। सूक्तवाको †भवेन्न वा† भवेदिति। येषां तु‡ सूक्तवाको[9] [10]भवेत् तेषां पूर्वं न प्रयुज्यते[10]। तथा सति पत्नीसंयाजदेवतानामपि[11] निगमनं प्राप्तं, न तु क्रियते, नान्येषामूर्ध्व-मावाहनादुत्पन्नानाम् (आश्रौ ३, ५, ८) इति प्रतिषेधात् न वा शंयुवाको भवेत्[12]॥ ९॥

॥ इति [13]दशमः खण्डः[13]॥

---

१. कुह्वोः ब^{1} मै; नास्ति ब^{2}। २. तु. आश्रौ १, १०, ७। ३-३. तलः पाणितलः ब$^{3-5}$ वा वि; नास्ति ब^{2}। ४. एवेति मै। ५. अत्र प्राश° ब^{3}; अत्र प्राशनानन्तरं ब^{4,5}; नास्ति ब^{1,2}। ६. नास्ति ब^{1,2}। ७-७. नास्ति ब$^{3-5}$। ८. नास्ति मूको। ९-९. नास्ति ब$^{3-5}$। †-†. भवेद् वा न वा मै वा वि; नास्ति ब^{2}। ‡. नास्ति ब^{1}। १०. प्रयुञ्जते ब^{1}; युज्यते मै। ११. °संयाजके दे° ब^{2} मै। १२. भवति ब$^{3-5}$ वा वि। १३-१३. दशमी खण्डिका मै।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ प्रथमेऽध्याय एकादशः खण्डः

[पत्न्यै वेदप्रदानं मन्त्रपाठश्च]

वेदं पत्न्यै प्रदाय वाचयेद्धोताऽध्वर्युर्वा वेदोऽसि वित्तिरसि विदेय कर्मासि करणमसि क्रियासं सनिरसि सनितासि सनेयं घृतवन्तं कुलायिनं रायस्पोषं सहस्रिणं वेदो ददातु वाजिनं यं बहव उपजीवन्ति यो जनानामसद् वशी । तं विदेय प्रजां कामाय त्वेति ॥ १ ॥

वेदो दर्भमयः, तं पत्न्यै यजमानस्य भार्यायै तूष्णीमेव प्रदाय दत्त्वा वाचयेत् । कः । होता वाचयेदध्वर्युर्वा—वेदोऽसीति यथाऽऽम्नातम्[1] । होतृग्रहणेऽक्रियमाणे[2] अध्वर्योरेव विकल्पः स्यात् । होतुश्चाध्वर्योश्च यदि समानो मन्त्रस्तदा विकल्पः । असमानश्चेत् समुच्चयो भवति, यथा योक्त्रविमोक्षे[3] ॥ १ ॥

[प्रजाकामवत्याः पत्न्या वेदशिरसा स्वनाभ्यालम्भनम्]

वेदशिरसा नाभिदेशमालभेत प्रजाकामा चेत् ॥ २ ॥

वेदस्य शिरो वेदशिरस्तेन वेदशिरसा [4]यथैव †जानुशिरसा[4] बद्धदेशेन नाभिदेशं नाभिप्रदेशम् आलभेत पत्नी प्रजाकामा चेद् भवति[5] । [6]संपन्नप्रजा चेन्नालभेत[6] ॥ २ ॥

[पत्न्या योक्त्रविमोकः]

अथास्या योक्त्रं विचृतेत् प्र त्वा मुञ्चामि वरुणस्य पाशादिति ॥ ३ ॥

[7]अथ अनन्तरम् अस्याः पत्न्या योक्त्रं येन संनद्धा भवति[7] [8]तत्† विचृतेत् विमुञ्चेत्‡ प्र त्वा मुञ्चामि वरुणस्य पाशात् (ऋ १०, ८५, २४) इत्यनेन । होता मन्त्रमाह सा[8] विचृतेत् । एवमुपचरन्त्यध्वर्यवोऽपि । [9]तस्माद्दारादुपकारित्वात् पत्नीबहुत्वेऽपि[9] मन्त्रो नाऽऽवर्तते । अस्या योक्त्रम् इति वचनाद् अस्या योक्त्रमस्तीति दर्शयति ॥ ३ ॥

---

१. यथा समाम्नातम् मै । २. °णेऽधिक्रि° ब[1,2] मै । ३. योक्त्रावि° मै । ४-४. नास्ति ब[4] । †. वेदशिरसा ब[1] ; तु. आश्रौ १, ४, ८ । ५. भवति तदा वा । ६-६. नास्ति ब[2] वा । ७-७. नास्ति वा । ८-८. नास्ति ब[1] । ९-९. तत्वेऽपि वि । †. तदा वा । ‡. विमुञ्चति ब[3-5] वा वि ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[द्विगुणितयोक्त्रस्योपरिष्टाद् वेदतृणानां निधानम्]

तत् प्रत्यग्गार्हपत्याद् द्विगुणं प्राक्पाशं निधायोपरिष्टादस्योदग्ग्राणि वेदतृणानि करोति ॥ ४ ॥

तद् योक्त्रं प्रत्यग् अपरस्यां दिशि गार्हपत्यादग्नेः द्विगुणं कृत्वा प्राक्पाशं बन्धनार्थो यः पाशः स प्राच्यां दिशि [१]यथा भवति तथा[१] निधाय स्थापयित्वा उपरिष्टादस्य योक्त्रस्य †उपरिष्टात्[१] उदगग्राणि उदीच्यां दिशि [२]यथा भवन्ति[२] अग्राणि तथा[३], वेदतृणानि उदगग्राणि करोति होता। अस्येत्यनुच्यमाने अन्यत्र देशे [४]उपरि स्याद्[४] यथा—उपरि [५]समिधं कृत्वा[५] (?) इति ॥ ४ ॥

[वेदतृणेभ्यः पुरस्तात् पूर्णपात्रनिधानम् अभिमृश्य मन्त्रवाचनञ्च]

पुरस्तात् पूर्णपात्रं संश्लिष्टं वेदतृणैः ॥ ५ ॥

अभिमृश्य वाचयेत् पूर्णमसि पूर्णं मे भूयाः सुपूर्णमसि सुपूर्णं मे भूयाः सदसि सन्मे भूयाः सर्वमसि सर्वं मे भूया अक्षितिरसि मा मे क्षेष्ठा इति ॥ ६ ॥

वेदतृणेभ्यः पुरस्तात् पूर्वस्यां दिशि पूर्णपात्रम् उदकपूर्णं भवति। पूर्णपात्रात् प्रतिदिशमुदकम् (आश्रौ १, ११, ७) इति वक्ष्यति। संश्लिष्टं संपृक्तं वेदतृणैर्भवति ॥ ५ ॥

तदभिमृश्य वाचयेदभिमृशन्तीं[६] पूर्णमसीत्येतद् यथाम्नातम्। पत्न्या अभिमर्शनं वक्तव्यं, प्राप्तमन्त्रप्रधानत्वात्[७] कर्मणः[८] ॥ ६ ॥

[पूर्णपात्रोदकमुदुक्षन् उदुक्षन्तीं पत्नीं मन्त्रं वाचयति]

अथैनां पूर्णपात्रात् प्रतिदिशमुदकमुदुक्षन्नुदुक्षन्तीं वाचयति प्राच्यां दिशि देवा ऋत्विजो मार्जयन्तां दक्षिणस्यां दिशि मासाः पितरो मार्जयन्तां प्रतीच्यां दिशि गृहाः पशवो मार्जयन्ताम् उदीच्यां दिश्याप ओषधयो वनस्पतयो मार्जयन्ताम् ऊर्ध्वायां दिशि यज्ञः संवत्सरः प्रजापतिर्मार्जयतां मार्जयन्तामिति वा ॥ ७ ॥

१-१. नास्ति वि। †. नास्ति ब[3-५] वा। २-२. नास्ति ब[१,3-५] वा वि मै।
३. नास्ति मूको। ४-४. उपरिष्टाद् ब[१-५] वा वि। ५-५. समिधे कृत्या ब[3-५] वि।
६. °दभिमृशतीति ब[3-५]; °दभिमृशती ब[२] वा; °दभिमृशन्ती मै; °दिति मृशन्ति ब[१] वि।
७. प्राप्तं मन्त्र° ब[3-५] वा वि। ८. कर्मणे ब[3-५] वा वि।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

दर्शपूर्णमास
Digitized by Madhuban Trust

अस्माद् वाचनादनन्तरम्[1] एनां[2] पत्नीम् अधिकृतां पूर्णपात्राद् [3]दिशं दिशं प्रति[3] प्रतिदिशम् । पञ्च[4] दिशः [5]मन्त्रलिङ्गात्[†] । उदकम् उदुक्षन् अप उत्सिञ्चन्[‡] होता उदुक्षन्तीं[5] पत्नीम् उत्सिञ्चन्तीं वाचयति[6] । प्राच्यामित्येवमादि यथाम्नाताः [7]पञ्च मन्त्राः । लिङ्गात्[7] पञ्च दिशो भवन्ति । एनामित्यादिषु[8] वचनेषु एनामिति चोक्तम्[9] इतरासु सर्वार्थमुक्तं[10] द्रष्टव्यम् । उदुक्षन्तीमिति वचनात् पूर्वसूत्रेऽपि अभिमृशन्तीमिति सिद्धं भवति । मार्जयन्तामिति वेति मन्त्रविकल्पः ॥ ७ ॥

[पत्न्या मन्त्रवाचनविधिः]

अथास्या उत्तानमञ्जलिमधस्ताद् योक्त्रस्य निधायाऽऽत्मनश्च सव्यं पूर्णपात्रं निनयन् वाचयेन्माऽहं प्रजां परासिचं या नः सयावरी स्थन। समुद्रे वो निनयानि स्वं पाथो अपीथेति ॥ ८ ॥

[11]अथ उदुक्षणादनन्तरम् अस्याः[11] पत्न्या उत्तानम् अञ्जलिम् उदकधारण-समर्थम् अधस्ताद् योक्त्रस्य निधाय आत्मनश्च सव्यं पाणिम् उत्तानं निधाय अञ्जलौ पूर्णपात्रं निनयन् सिञ्चन् होता तां पत्नीं वाचयेत्—माऽहं प्रजाम् इति यथा समाम्नातम् । अस्या इत्यनुच्यमाने[12] अन्यस्याञ्जलौ[13] प्राप्नोति । वाचयेदिति पुनरुच्यते तस्य [14]निनयनस्य संभवाद्[14] वाचनं न स्यादिति ॥ ८ ॥

[गार्हपत्यादाहवनीयं प्रति गमनविधिः]

वेदतृणान्यग्रे गृहीत्वाऽविधून्वन्त्संततं स्तृणन्त्सव्येन गार्हपत्यादाहवनीयमेति तन्तुं तन्वन् रजसो भानुमन्विहीति ॥ ९ ॥

---

१. °वचनान्तरम् ब[2] ; °वचनादनन्तरम् ब[5] वा ; °वचनानन्तरम् मै , नास्ति वि । २. एतां ब[1,2] वि । ३-३. दिशं प्रति ब[3-5] वा वि । ४. चतस्रः मूको । ५-५. नास्ति वि । †. अनुलिङ्गात् ब[2-5] वा ; पञ्चलिङ्गात् मै । ‡. उत्सिञ्चति ब[3-5] वा ; उपसिञ्चन् मै । ६. °ति होता मूको । ७-७. पञ्चमात्रालिङ्गाः मै । ८. एतामित्यादि ब[1] ; एतामि° ब[2] । ९. नोक्तम् मूको । १०. सर्वार्थमुदकं ब[1] ; नास्ति वि । ११-११. नास्ति ब[1] । १२. इत्यनूच्यमाने ब[2] वा वि । १३. इत्यस्याञ्जली ब[3-5] वा वि । १४-१४. °नस्यासंभ° ब[1,2] मै ; °नस्य संभावाद् ब[4,5] ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अनादेशे[1] दक्षिणेन अविधून्वन् अविकम्पयन् [2]सन्ततमन्येन संहितम्[2] अविच्छिन्नं[3] स्तृणन्[4] तृणेन स्तरणं कुर्वन् सव्येन पाणिना गार्हपत्यादारभ्य आहवनीयमेति गच्छति तन्तुं तन्वन् इत्येतयर्चा ।। ९ ।।

[वेदतृणानि शेषयित्वा सर्वप्रायश्चित्तहोमविधानम्]

शेषं निधाय प्रत्यगुदगाहवनीयादवस्थाय स्थाल्याः स्रुवेणाऽऽदाय सर्वप्रायश्चित्तानि जुहुयात् स्वाहाकारान्तैर्मन्त्रैर्न चेन्मन्त्रे पठितः ।। १० ।।

शेषं[5] निधाय वेदस्तरणशेषम् आहवनीयसमीपे निधाय। याजमाने प्रयोजनम्। आहवनीयात् [6]प्रत्यगुदीच्यां दिशि[6], अवस्थाय अवस्थानं कृत्वा, आज्यस्थाल्याः स्रुवेणाज्यमादायेति[7] वचनादादायादाय[8] प्रत्याहुति जुहुयात्, न सकृद्गृहीतेन। सर्वप्रायश्चित्तानीति संज्ञा वक्ष्यमाणानामाहुतीनाम्[9]। सर्वप्रायश्चित्तानि जुहुयाद् (आश्रौ १, १३, ७) इत्युक्ते एतानि प्रत्येतव्यानि। स्वाहाकारान्तैर्मन्त्रैः। स्वाहाकारान्तो मन्त्रः प्रयोक्तव्यः। [10]तमुत्तरे मन्त्रान्ते दर्शयति—भूः स्वाहेति प्रयोक्तव्यः[10]। न चेन्मन्त्रे पठितः। मन्त्रान्ते यद्यनाम्नातो भवति ततः प्रयोक्तव्यः। यद्याम्नातः[11] स एव भवति। पुनर्द्वितीयो न प्रयोक्तव्य [12]इत्यर्थः†। न चेत् पठितः इति वक्तव्ये मन्त्रग्रहणात् कृत्स्ने ‡मन्त्रे आदौ‡ मध्ये वा यदि पठितोऽस्ति तदा⌀ अन्ते न प्रयोक्तव्यः[12]। यथा प्रवृत्ताहुतिषु इह रमेह रमध्वम् (ऐब्रा ५, २२ ⌊आश्रौ ८, १३, १⌋) इति ।। १० ।।

[अप्रेषितेन अन्यहोमेष्वपि स्वाहाकार एव कर्तव्यः]

यत्किंचाप्रेषितो यजेदन्यत्रापि ।। ११ ।।

---

१. द्र. आश्रौ १, १, १३। २-२. सन्ततमित्यनेन संततम् (संहितम् वा वि) ब[3-5] वा वि; °मन्येन सहितम् ब[1]। ३. अव्यवच्छिन्नं ब[3-5] वा वि। ४. नास्ति मूको। ५. पत्नीशेषं ब[1]। ६-६. प्रागुदीच्यामिति मै; °च्यामिति ब[2]; °च्यां दिशीति ब[3-5] वा वि। ७. °ज्यमवदायेति ब[1]। ८. °नादादाय मै। ९. तु. आश्रौ १, ११, १३। १०-१०. नास्ति ब[3-5]; यथाम्नातः स एव भवति पुनर्द्वितीयो न प्रयोक्तव्यः वा वि। ११. यथाम्नातः मै। १२-१२. नास्ति ब[3-5]। †. नास्ति मै। ‡-‡. मन्त्रग्रहणे ब[1]। ⌀. नास्ति ब[2] वा वि।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

दर्शपूर्णमास
Digitized by Madhuban Trust

सर्वप्रायश्चित्तेभ्योऽपि[1] अन्येष्वपि होमेषु विप्रुड्ढोमादिषु यत्किंचिद् द्रव्यम् आज्यमौषधं पृषातकं[2] समिधः [3]शकलानि वा अध्वर्युणा[3] अप्रेषितो यत्र यजेत्[4] तत्र स्वाहाकारान्तैर्मन्त्रैर्जुहुयात् । यत्र प्रेषितो यजति तत्र वषट्कारो भवति । यत्किंचेत्यनुच्यमाने आज्यहोमेष्वेव स्यात् । यजेदिति[5] वचनात् समिदाधानेऽपि भवति स्वाहाकारः । जुहुयादित्युक्ते न स्यात् । यजेदिति वचनाद् याज्यायामपि प्राप्त-स्तस्मादप्रेषित इत्याह । अन्यत्रापीत्यनुच्यमाने सर्वप्रायश्चित्तेष्वेव स्यात् ॥ ११ ॥

[पूर्वविधिनैवाव्यक्तहोमादीनि कर्माणि विधेयानि]

एवंभूतोऽव्यक्तहोमाभ्याधानोपस्थानानि च ॥ १२ ॥

प्रत्यगुदगाहवनीयादवस्थाय स्थाल्याः स्रुवेणादाय (आश्रौ १, ११, १०) इत्येवंभूतः अव्यक्तहोमाभ्याधानोपस्थानानि कुर्यात् । येषु होमेषु[6] स्थानमासनं [7]वा प्रह्वो[7] वा [8]आज्यमौषधं वा[8] आहवनीये गार्हपत्ये वेति व्यक्तचोदना न विद्यते ते[9] अव्यक्तहोमाः विप्रुड्ढोमादयः । अभ्याधानम्— ततः समिधोऽभ्यादधाति (आश्रौ २, ५, ११) । एत्योपतिष्ठन्ते (आश्रौ ३, ६, २७) इत्युपस्थानम् । च-शब्दः समुच्चयार्थः । एवंभूतोऽव्यक्तहोमाभ्याधानोपस्थानानि सर्वप्रायश्चित्तानि चेति । च-शब्दे अक्रियमाणे एवंभूतोऽव्यक्तहोमादीनि कुर्यान्न सर्वप्रायश्चित्तानीत्ययमर्थः स्यात् ॥ १२ ॥

[सर्वप्रायश्चित्तहोममन्त्रनिर्देशः]

[10]इह तानि[10] सर्वप्रायश्चित्तानि वक्ष्यन्ते—

अयाश्चाग्नेऽस्यनभिशस्तीश्च सत्यमित्त्वमया असि । अयासावयसा-कृतोऽया सन् हव्यमूहिषेऽया नो धेहि भेषजं स्वाहा । अतो देवा अवन्तु न इति द्वाभ्यां व्याहृतिभिश्च भूः स्वाहा भुवः स्वाहा स्वः स्वाहा भूर्भुवः स्वः स्वाहेति ॥ १३ ॥

---

१. प्रायश्चित्तेभ्योऽपि ब[1,2] ; सर्वप्रायश्चित्तानि तेभ्योऽपि वा ; सर्वप्रायश्चित्तात् तेभ्योऽपि वि । २. °तकः मूको । ३-३. °ला अ° ब[3-5] वा वि । ४. यजेत ब[2-5] वा वि । ५. यत्किञ्चेति ब[1,2] मै । ६. नास्ति ब[3-5] वा वि । ७-७. वोपह्वो ब[3] ; वोपह्ववो ब[4] ; वा पह्वो ब[5] वा वि । ८-८. आज्यस्रौवध्रुवा ब[3-5] । ९. नास्ति ब[2-5] वा वि । १०-१०. इहैतानि ब[1] ; इहोतिनि (?) ब[2] ; इति तानि मै ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अयाश्चाग्ने: इति यथा समाम्नाता एका । अतो देवा अवन्तु न: (ऋ १, २२, १६-१७) इति द्वाभ्याम् ऋग्भ्याम् द्वे आहुती । नाभिहिङ्काराभ्यासावबहुषु (आश्रौ १, २, २४) इत्यत्र मन्त्रपरत्वाद् वाक्यस्य ऋङ्मन्त्रो भवति, तस्मादेकस्य द्वयोश्चाभिहिंकाराभ्यासौ न भवत: । तस्मात् अतो देवा: इति द्वौ मन्त्रौ द्वे आहुती भवत: । 'गृह्ये तु'[1] प्रत्यृचम् (आगृ १, ८, ९) इत्याह । तस्य प्रयोजनं तत्रैव वक्ष्याम: । व्याहृतिभिश्च० स्वाहेति । वक्ष्यमाणानां व्याहृतय इति संज्ञा । व्याहृतिभिर्वा (आश्रौ २, १४, २८) इत्युक्ते एतासां ग्रहणम् । समस्तव्यस्तानां होमे समस्तव्यस्ता एव । [2]व्याहृतिभिश्च पृथग्घुत्वा (आश्रौ ८, १४, ४-५) इति पृथग्ग्रहणाद् होमादन्यत्र समस्ता एव[2] । व्याहृतिभिर्वा देवतामादिश्य (आश्रौ २, १४, २८-२९) इति ताभिर्व्याहृतिभिश्च यथासमाम्नाताभिश्चतस्र[3] आहुतीर्जुहुयात्[4] । च-शब्द: समुच्चयार्थ: । [5]पूर्वोक्ताभिरेताभिश्चेति[5] । भू: स्वाहेति यथा समाम्नाता: इतीतिकरणान्ता: ।। १३ ।।

[सर्वप्रायश्चित्तहोमसंस्थाजपोपस्थानतीर्थनिष्क्रमणानन्तरं प्रचरणेऽनियम:]

हुत्वा संस्थाजपेनोपस्थाय तीर्थेन निष्क्रम्याऽनियम: ।। १४ ।।

सर्वप्रायश्चित्तानि हुत्वा संस्थाजपेनोपतिष्ठते[6] । तमुत्तरत्र वक्ष्याम: । संस्थाजप इति संज्ञा । तत: संस्थाजप: (आश्रौ ३, ६, २८) इत्युक्ते एतस्य ग्रहणम् । तेन जपेनोपस्थाय तीर्थेन निष्क्रामेत्[7] । व्याख्यातं तीर्थम् । तेन निष्क्रम्य । ततोऽनियम: यथेष्टं[8] प्रचरन्ति । हुत्वोपस्थाय तीर्थेन निष्क्रम्येति त्रीणि कर्माणि सम्बन्धार्थानि । सम्बन्धादनन्तरं [9]कर्म तत्कालमेव[9] भवति । अनियम इति वचनात् कर्मणि नियमो भवतीत्यर्थादापन्नम्[10] । नियम: इति वचनात् कर्मैव कुर्यान्नान्यल्लौकिकं कर्म । उपस्थाय तीर्थेन [11]निष्क्रम्यानियम इति अस्मात् सम्बन्धादनुपस्थायां† तीर्थेन निष्क्रमणे नियम एव भवति तीर्थेन[11] निष्क्रम्यासीतामा-पुरोळाशश्रपणात् (आश्रौ ३, ५, ४) इत्यत्र ।। १४ ।।

[संस्थाजपस्वरूपम्]

ओं च मे स्वरश्च मे यज्ञोप च ते नमश्च । यत्ते न्यूनं तस्मै त उप यत्तेऽतिरिक्तं तस्मै ते नम इति संस्थाजप: ।। १५ ।।

१-१. गृह्येषु ब[1,2] मै । २-२. नास्ति ब[3-5] वा वि । ३. °भिश्च तिस्र मै । ४. आज्याहु° वा । ५-५. °ताभिर्व्याहृतिभिश्चेति ब[2] । ६. °तिष्ठन्ते ब[2] मै । ७. निष्क्रम्यते ब[1] ; निष्क्रमणे ब[2] मै ; निष्क्रमेत वा वि । ८. यदेष्टं मै । ९-९. कर्मकालमेव मै । १०. °दाप्यते मै । ११-११. नास्ति ब[1] । †. °येति मै ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

दर्शपूर्णमास

Digitized by Madhuban Trust

ओं च म इति यथासमाम्नात इति संस्थाजपः। [1]संस्थाजप इति[1] संज्ञा। संस्थाजपेनोपस्थाय (आश्रौ १, ११, १४) इत्युक्ते एतस्य जपस्य[2] ग्रहणम् ॥ १५ ॥

[होतुः कर्मण उपसंहारः]

इति होतुः ॥ १६ ॥

इति एतत् कर्म होताऽऽमन्त्रितः (आश्रौ १, १, ४) इत्यत आरभ्याऽऽ[3]-संस्थाजपाद् [4]होतुः कर्म[4]। होताऽस्य कर्ता भवतीत्यर्थः। प्राप्तमपि[5] पुनरुच्यते[6] ब्रह्मणो विधिविवक्षार्थम्। अनुच्यमाने तु दार्शपौर्णमासिके[7] कर्मणि ब्रह्मा अनधिकृतः स्यादिति। होतुरित्युच्यमाने तु अस्मिन् कर्मणि ब्रह्मणोऽपि विधानं वक्ष्याम इत्यर्थः ॥ १६ ॥

॥ इति एकादशः खण्डः ॥

१-१. नास्ति ब[२-५] वा वि। २. नास्ति ब[२]। ३. °भ्य सं° मूको। ४-४. नास्ति ब[२]; होतृकर्म मै। ५. प्राप्तमिति ब[२-५] मै वा वि। ६. °च्यते। इत्येकादशी खण्डिका मै। ७. दर्शपू° ब[३-५] वा; दर्शपौ° ब[२] मै; नास्ति वि।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ प्रथमेऽध्याये द्वादशः खण्डः

[ब्रह्मकर्मण उपक्रमः]

अथ ब्रह्मणः ॥ १ ॥

अथ-शब्दः पूर्वापेक्षार्थः। किं प्रकृतम्। दर्शपूर्णमासयोः †[1]होतुः कर्म†। तयोरेव[1] दर्शपूर्णमासयोः[2] ब्रह्मणो यत् कर्म तदुच्यते। ब्रह्मा नाम ऋत्विक्[3]। ब्रह्माणमेव प्रथमं वृणीते (आगृ १, २३, ३) इति वक्ष्यति ॥ १ ॥

[होतृवद् ब्रह्मणोऽपि आचमनादिकथनम्]

होत्राऽऽचमनयज्ञोपवीतशौचानि ॥ २ ॥

[4]होता† पूर्वमुक्तः‡, ϕतेन होत्रा आचमनंϕ यज्ञोपवीतं च शौचं च एतानि[4] व्याख्यातानि ब्रह्मणः। होतुरुक्तं यज्ञोपवीत्याचम्य (आश्रौ १, १, ४)[3] इति तदन्यस्य कर्तुर्न प्राप्नोति। तस्माद् यथा होतुस्तथा ब्रह्मणोऽपि[3] भवतीत्युच्यते। शौचं तु पारिभाषिकं यज्ञोपवीतशौचे च (आश्रौ १, १, १०) इति। तत् सर्वेषां प्राप्तं तस्यारम्भे प्रयोजनं तत् प्रपन्नस्य प्राप्तम्, अप्रपन्नस्यापि तदेव स्यादित्ययमारम्भः। यत्र शौचं व्याख्यातम् (?) इति वचनाद् होतुरप्रपन्नस्य शौचविधिर्न[5] भवति। तस्मादभिहितम् शौचमनृत्विग्दीक्षितब्रह्मचारिणा[6] (आशौच० गौध १४, १) इति। उक्तं धर्मशास्त्रे तदप्रपन्नस्यापि ऋत्विक्संज्ञाऽस्तीति। तस्माच्छौचग्रहणम् ॥ २ ॥

[अन्यतः प्राप्तस्य ब्रह्मणो नियमकथनम्]

नित्यः सर्वकर्मणां दक्षिणतो ध्रुवाणां व्रजतां वा ॥ ३ ॥

१-१. नास्ति ब[2]; होतुः वि। †-†. होतृकर्म ब[3-5] वा। २. नास्ति ब[1,2] मै वि। ३-३. नास्ति वि। ४-४. नास्ति वि। †. नास्ति ब[4]। ‡. नास्ति मूको। ϕ-ϕ. नास्ति ब[4]। ५. °विधेर्न ब[3-5] वा वि; °विधिः मै; ६. शौचमृत्वि° मै।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

दर्शपूर्णमास
Digitized by Madhuban Trust

नित्य: ब्रह्मा अच्युत:[1] सर्वकर्मणामैष्टिकानां पाशुकानां च सौमिकानां च दक्षिणतो दक्षिणस्यां दिशि भवति। ध्रुवाणां व्रजतां वा। ध्रुवे अच्युते[2] विहारे एव क्रियन्ते तानि ध्रुवाणि इष्टयादीनि। यानि [3]पुनर्व्रजद्भि: क्रियन्ते[3] अग्निप्रणयनादीनि तानि व्रजन्ति। ध्रुवाणां दक्षिणतो ध्रुवो भवति [4]व्रजतां दक्षिणतो[4] [5]व्रजन् भवति[5]। नित्य इति वचनात् कर्मान्तरालेष्वपि न च्यवते यथा आसन्नेषु हवि:षु यावद्धोता न प्रपद्यते[6]। सर्वकर्मणामिति वचनाद् ऐष्टिके चाऽनैष्टिके च। प्रवर्ग्यादिषु ध्रुवाणाम् इति[7] सिद्धमपि[8] पुनरुच्यते व्रजतां विवक्षार्थम्। [9]नित्य: सर्वकर्मणां दक्षिणतो व्रजताम् इत्युच्यमाने व्रजतामेव स्याद् न ध्रुवाणाम्। तस्माद् ध्रुवाणामित्युच्यते। व्रजताम् इत्यनुच्यमाने† व्रजतां दक्षिणतो‡ व्रजनं नϕ प्राप्नोति[9]। नित्य: सर्वकर्मणाम्[10] इति वचनाद् अग्निप्रणयनादिषु व्रजत्स्वपि सर्वेषु ब्रह्मा न व्रजेत्[11] ॥ ३ ॥

[बहिर्वेदि ऋत्विजामभिमुखाया दिश: प्राचीत्वकथनम्]

बहिर्वेदि यां दिशं व्रजेयु: सैव तत्र प्राची ॥ ४ ॥

वेदेर्बहि: यां दिशम् अवभृथादिषु व्रजेयु: सैव दिक् तत्र तस्मिन् कर्मणि प्राची भवति। प्राचीं कृत्वा दक्षिणतो ब्रह्मा भवति। बहिर्वेदीति वचनाद् अन्तर्वेदि: व्रजतां न भवति। एव-शब्दोऽवधारणार्थ:। तत्रेति वचनाद्[12] व्रजनक्रियायामेव[13] सा। प्राचीं गत्वा यत् कर्म क्रियते तस्मिन् कर्मणि यैव प्राची सैव प्राची ॥ ४ ॥

[अमन्त्रककर्मसु स्थानाऽऽसनयोर्विकल्पकथनम्]

चेष्टास्वमन्त्रासु स्थानासनयोर्विकल्प: ॥ ५ ॥

अपोनप्तृकरणे[14] चेष्टा: कर्माणि [15]अमन्त्राणि मन्त्रवर्जितानि[15] वेदिकरणादीनि। तेषु स्थानासनयोर्विकल्प:। स्थितो वा भवत्यासीनो[16] वा। स्थानमासनं वा इति वक्तव्ये विकल्पवचनादाविकल्पो[17] न[18] भवति, कदाचिदासनं कदाचित् स्थानमिति ॥ ५ ॥

---

१. अव्यक्त: ब$^{3-5}$। २. अव्यक्ते ब$^{3-5}$। ३-३. नास्ति मै। ४-४. व्रजतो दक्षिणतो दक्षिणतो ब$^{3-5}$ वा वि। ५-५. व्रजति भवति ब$^{1-5}$ मै; व्रजति न भवति वा; व्रजति वि। ६. प्रतिपद्यते ब^{3,4} वा वि; तु. आश्रौ १, १, ४। ७. अपि ब^{1,2} मै वा। ८. सिद्धमिति वा; सिद्धं ब^{1,2} मै। ९-९. नास्ति ब^{1}। ϕ. नास्ति ब^{4} वि। †. इत्युच्यमाने ब$^{2-5}$ वा वि। ‡. दक्षिणा ब$^{2-5}$ वा वि। १०. °र्मणां दक्षिणत: ब^{1}। ११. तद् व्रजेद् मै। १२. नास्ति ब$^{3-5}$ वा वि। १३. क्रियायामेव ब^{2} मै। १४. अपांनप्तृ° ब^{2}। १५-१५. अमन्त्रवर्जि° ब$^{3-5}$ वा वि। १६. भवतीत्या° ब$^{2-5}$ वा वि। १७. वचनादवि° मै। १८. नास्ति ब^{2}।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[तिष्ठतां होमेषु अवषट्कारेषु च कर्मसु स्थानाऽऽसनयोर्विकल्पः]

तिष्ठद्धोमाश्च येऽवषट्काराः ॥ ६ ॥

तिष्ठता हूयन्ते तिष्ठद्धोमा वसोर्धारादयः, [1]येऽवषट्काराः[1] [2]ये वषट्कारप्रदाना न भवन्ति तेषु च स्थानासनयोर्विकल्पः । च-शब्दः †समुच्चयार्थः[2] । तिष्ठद्धोमवषट्कारप्रदानेष्वपि[3] प्राप्ते प्रतिषेधः ॥ ६ ॥

[उपर्युक्तकर्मभ्योऽन्यत्राऽऽसननियमः]

आसीताऽन्यत्र ॥ ७ ॥

दर्शपूर्णमासयोः दक्षिणतः कुशेषूपविशेत् (आश्रौ १, १२, ८) इत्यासनं चोदितम् । व्रजत्सु व्रजेदित्युक्तम् (तु. १, १२, ३) । चेष्टास्वमन्त्रासु तिष्ठद्धोमेषु च विकल्पः[4] । अतोऽन्यत्राऽनैष्टिके कर्मणि । प्रवर्ग्यादिष्वनियमे प्राप्ते आसीनो भवति ॥ ७ ॥

[ब्रह्मोपवेशनपूर्वमुद्राप्रदर्शनम्]

समस्तपाण्यङ्गुष्ठः ॥ ८ क ॥

समस्तपाण्यङ्गुष्ठः अङ्गुलीभिः समस्तौ संहितौ पाणी अङ्गुष्ठौ च यस्य सोऽयं समस्तपाण्यङ्गुष्ठो ब्रह्मा । संहितौ[5] पाणी धारयन्नाकाशवत्यङ्गुली (आश्रौ १, १, २३) इति प्राप्ते विशेषविधानमिदं द्रष्टव्यम् ॥ ८ क ॥

[ब्रह्मोपवेशनविधिकथनम्]

अग्रेणाहवनीयं परीत्य दक्षिणतः कुशेषूपविशेत् ॥ ८ ख ॥

परिभाषा उक्ताः । इदानीं दार्शपौर्णमासिकं कर्मोपदिश्यते । अग्रेण पूर्वेण आहवनीयम् अग्निम् । अपरेणेत्यन्येषां[6] संचरः[7] । परीत्य गत्वा दक्षिणतः[8] दक्षिणस्यां दिशि कुशेषु दर्भेषु उपविशेद् ब्रह्मा । परीत्येत्यनुच्यमाने ऋत्विग्ग्रहणे [9]दक्षिणतो वेति विकल्पः स्यात् । †नित्यः सर्वकर्मणां दक्षिणतः[9] (आश्रौ १, १२, ३) [10]†इत्याहवनीयस्यैव दक्षिणतः‡[10] [11]प्राप्त्यर्थं कुशग्रहणम्[11] । यत्राऽध्वर्युणाऽऽसनं कल्पितं तत्राऽऽसीत ॥ ८ ख ॥

१-१. नास्ति ब[1] । २-२. नास्ति वा । †. समुद्धत्यर्थः वि । ३. तिष्ठद्धोमावष° ब[1-5] मै वि ; प्रदानेष्वपि वा । ४. तु. आश्रौ १, १२, ५ ; ६ । ५. संहती ब[3-5] वा । ६. उपरीत्य° मै । ७. संचारः मै । ८. नास्ति ब[1] । ९-९. नास्ति वा । †. आतो नित्यः ब[1] । १०-१०. नास्ति वा वि । †. आह° ब[1-5] मै । ‡. वेदिदक्षि° मै । ११-११. नास्ति वा ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

दर्शपूर्णमास

Digitized by Madhuban Trust

[उपवेशनानन्तरं जपविधानम्]

बृहस्पतिर्ब्रह्मा ब्रह्मसदन आसिष्यते बृहस्पते यज्ञं गोपायेत्युपविश्य जपेत् ॥ ९ ॥

बृहस्पतिः इत्येतं मन्त्रम् उपविश्य जपेत्। उपविश्य [1]इत्यनुच्यमानेऽत्रो-पवेशनार्थोऽयं[1] जपः स्याद् इदमहमर्वावसोः (आश्रौ १, ३, ३१) इत्येतस्य स्थाने ॥ ९ ॥

[उक्तजपस्य ब्रह्मजपसंज्ञाकरणम्]

एष ब्रह्मजपः सर्वयज्ञतन्त्रेषु साऽग्नौ यत्रोपवेशनम् ॥ १० ॥

[2]एष य उक्तो[2] जपः एष[3] ब्रह्मजपसंज्ञो वेदितव्यः। न तु सौमिके प्रणयने ब्रह्मजपः (आश्रौ १, १२, २९) इत्युक्त एतस्य प्रतिषेधः। सर्वयज्ञतन्त्रेषु एष ब्रह्मजपः सर्वेष्वैष्टिकेषु अनैष्टिकेषु च प्रवर्ग्यादिषु यज्ञतन्त्रेषु यज्ञकर्मसु स्यात्[4] साऽग्नौ यत्रोपवेशनम्। सहाऽग्निना साऽग्नि कर्म। साऽग्नौ कर्मणि यत्रोपवेशनम् अग्निप्रणयने प्रवर्ग्ये प्रातरनुवाकादौ सदसि च एकविधा(?)वित्येवमादिषु। अनग्नौ कर्मण्युपवेशने न[3] भवति, सोमक्रये अग्नौ निधीयमाने[5] प्रवर्ग्यसंभरणादिषु। सर्वतन्त्रेषु इत्यनुच्यमाने अधिकृतयोर्दर्शपूर्णमासयोरेव स्यात् तद्विकारेषु[6] च इष्टि-पशुप्रवर्ग्यादिषु [7]न स्यात्[7]। एवमपि यज्ञतन्त्रेषु इति न वक्तव्यम्। [8]एष ब्रह्मजपः सर्वत्र† साग्नौ यत्रोपवेशनम् इत्येतावता सिद्धत्वादितः प्रयोजनम् एकस्मिन् कर्मणि द्विर्ब्रह्मजपो[8] मा भूदिति। [9]गौतमपक्षे प्राप्तस्तु[9] यत्रोपवेशनमिति वचनात् ॥ १० ॥

[उपविष्टब्रह्मणोऽध्वर्युकर्तृकमतिसर्जनम्]

उपविष्टमतिसर्जयते ॥ ११ ॥

१-१. °माने तो पवे° ब[1,4]; °माने नोपवे° ब[2] वि; °माने नोपवि° ब[3,5] वा; °माने नो उपवे° मै। २-२. उक्तो ब[1]; एष यदुक्तो ब[2-5] मै वा वि। ३. नास्ति ब[2-5] वा वि। ४. नास्ति ब[1,2] मै। ५. विधीय° ब[1,2,4,5] मै वा वि। ६. न तद्वि° मै। ७-७. तस्मात् मै। ८-८. एष द्विर्ब्रह्मजपो ब[1]। †. सर्वत्राग्नो मै; सर्वत्र साग्नो वि। ९-९. °पक्षो प्राप्तस्तु ब[3-5] मै वा वि; °पक्षाव्याप्तस्तु ब[1]; तु. आश्रौ १, ३, ३३।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[1]उपविष्टं ब्रह्माणम् अतिसर्जयते[1] अनुज्ञापयति[2] अध्वर्युः। उपविष्टम् इति वचनाद् अध्वर्योरतिसर्जनम्। अन्यथा ब्रह्मणः प्राप्नोति[3]॥ ११॥

[अतिसर्जनरूपानुज्ञाप्रकारः]

ब्रह्मन्नपः प्रणेष्यामीति श्रुत्वा भूर्भुवःस्वर्बृहस्पतिप्रसूत इति जपित्वों प्रणयेत्यतिसृजेत् सर्वत्र ॥ १२ ॥

श्रुत्वा अध्वर्योर्वचनं श्रुत्वा भूर्भुवः स्वरित्येतं [4]जपं जपित्वा ओं प्रणयेत्यतिसृजेद् ब्रह्मा सर्वत्र, यत्र यत्राऽध्वर्युरतिसर्जयते आश्रावणे परिग्रहे[4] च। श्रुत्वा-वचनं तत्कालार्थम्। [5]सर्वत्रवचनादेतस्य च[5] सर्वत्र विधानम्[6]॥ १२॥

[ओं प्रणयेत्यस्य कर्मानुरूपमादेशग्रहणम्]

यथाकर्म त्वादेशाः ॥ १३ ॥

ओं प्रणयेति सर्वत्र प्राप्तम्, तस्य तु स्थाने [7]यथाकर्म यादृशं† कर्म तादृश आदेशो भवति[7]। [8]प्रोक्षणकर्मणि ब्रह्मन्प्रोक्षिष्यामीत्युक्ते ओं प्रोक्षेति भवति। परिग्रहे परिग्रहीष्यामीत्युक्ते †ओं परिगृहाणेति भवति। आश्रावणे आश्रावयिष्यामीत्युक्ते† तत्र ओं आश्रावयेति भवति[8]। [9]तु-शब्दः स्थाने[9] प्राप्त्यर्थः॥ १३॥

[प्रणवादिरुच्चैरतिसर्ग इति विधानम्]

प्रणवाद्युच्चैः ॥ १४ ॥

प्रणवमादिं कृत्वा अतिसर्ग उच्चैर्भवति। ओं प्रणयेति[10] (आश्रौ १, १२, १२) प्राप्तमपि पुनरुच्यते[11] अन्तविवक्षार्थम्[12]। अनुच्यमाने तु[13] ऊर्ध्वं वा प्रणवात् (आश्रौ १, १२, १५) इत्युक्ते प्रणवे लोपः प्राप्नोति। प्रणवादूर्ध्वं यत् तदेव भवतीत्यर्थः स्यात्। इयं विभाषा सर्वत्र भवति। अनाम्नातेष्वपि[14] [15]ओं प्रतिष्ठ (वासं २, १३) इति, ओं स्तुध्वम् (आश्रौ ५, २, १२) इति च। एतस्मिन् न्याये प्राप्ते अविभाषार्थं† मैत्रावरुणः‡ स्तुध्वमित्युच्चैर् (आश्रौ ५, २, १४) इत्युक्तं[15] भवति॥ १४॥

१-१. उपविष्टमतिसर्जयते ब[2]; उपविष्टमतिसर्जयते ब्रह्मन्नपः प्रणेष्यामीति ब्रह्माणमिति सर्जयते ब[4,5]। २. नास्ति ब[1,2] मै। ३. प्राप्नोति सृजेत् ब[3-5] वा वि। ४-४. नास्ति वि। ५-५. °चनादेव स च मूको। ६. निधानम् मै। ७-७. नास्ति वा। †. तादृशम् ब[2-5] मै वि। ८-८. नास्ति ब[2] वा। †-†. नास्ति मै। ९-९. नास्ति वा। १०. °येति प्राप्तः मूको। ११. °च्यते। ऊर्ध्वं वा प्रणवात्। मै। १२. अन्तर्वि° ब[4]। १३. नास्ति ब[3-5]। १४. आम्नातेष्वपि ब[1-5] मै। १५-१५. नास्ति ब[1]। †. भाषार्थं ब[3-5] वा वि। ‡. मित्रावरुणस्य ब[2] मै; मैत्रावरुणस्य ब[3-5] वा वि।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

दर्शपूर्णमास
Digitized by Madhuban Trust

[प्रणवादूर्ध्वमुच्चैर्भाव इति कथनम्]

ऊर्ध्वं वा प्रणवात् ॥ १५ ॥

ओं प्रणयेति एतत् प्रणवाद्युच्चैर्[1] (आश्रौ १, १२, १४) इत्युक्तम् । अथवा प्रणवादूर्ध्वं यत् तदेव उच्चैर्भवति प्रणयेति । प्रणवस्तु उपांश्वेवेति विकल्पः सर्वत्र ॥ १५ ॥

[अतिसर्जनादूर्ध्वं हविष्कृन्मन्त्रोच्चारणपर्यन्तं वाग्यमनपूर्वकमासनम्]

अत ऊर्ध्वं वाग्यत आस्त आ हविष्कृत उद्वादनात् ॥ १६ ॥

अतः अस्माद् अतिसर्जनादुपवेशनाद् ऊर्ध्वं वाग्यत अभाषमाण आस्ते ब्रह्मा । कियन्तं कालम् । आ हविष्कृत उद्वादनात् । आङ् अभिविधौ । [2]हविष्करोतीति हविष्कृत्[2] पत्नी भवति । तस्या हविष्कृत उच्चैर्वचनं येन क्रियते वाक्येन तदुद्वादनं वाक्यं हविष्कृदेहीति । आ एतस्माद् हविष्कृत उद्वादनाद् वाग्यत आस्ते ॥ १६ ॥

[पशुयागे चात्वालमार्जनपर्यन्तं वाग्यमनम्]

आ मार्जनात् पशौ ॥ १७ ॥

अत ऊर्ध्वं वाग्यत आस्ते इति वर्तते । कियन्तं कालम् । आ मार्जनात् पशौ[3] । यावत्कालं[4] मार्जयते तावद् वाग्यतो भवति पशौ । पशुग्रहणम् इष्टयधिकारात् । अक्रियमाणे तु पशुग्रहणे इष्टयामेव विकल्पः स्याद् आ हविष्कृद् आ मार्जनाद् वा इति ॥ १७ ॥

[सोमयागे घर्मातिप्रैषारम्भतः सुब्रह्मण्यापर्यन्तं वाग्यमनम्]

सोमे घर्मादि चातिप्रैषादि चाऽऽ सुब्रह्मण्यायाः ॥ १८ ॥

[5]सोमे ज्योतिष्टोमादिषु घर्मादि च प्रवर्ग्यादि च अतिप्रैषादि च अननुवषट्कृतेऽतिप्रैषम् (आश्रौ ६, ११, १३) इति तदादि च वाग्यत आस्ते । कियन्तं कालम् । आ सुब्रह्मण्याया [6]यावत् सुब्रह्मण्याया[6] आह्वानम् ।

---

१. °वादिरुच्चै° ब[1,2] मै वा ; °वादित्युच्चै° वि । २-२. हविष्कारिणी ब[1] ; हविष्करोतीति हविष्का मै ; हविष्करोति हविष्का ब[2] ; हविष्करो हविष्का ब[3-5] वा ; हविष्का वि । ३. नास्ति ब[1-5] वा वि । ४. यावच्च कालं ब[1,2] मै वा । ५. नास्ति मूको । ६-६. नास्ति ब[1,2] मै ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[1]द्विश्चकारकरणात् घर्मादि च उपसदादि च, अविद्यमाने घर्मे तद् भवति। सोमग्रहणं पश्वधिकारात्। न पशोर्घर्मादयो विद्यन्ते। पशुर्नाम एकाहोऽस्ति[1], तत्रैव स्यादधिकारात्। तस्मात् सर्वसोमेषु प्राप्त्यर्थं सोमग्रहणम् ॥ १८ ॥

[प्रातरनुवाककालादन्तर्यामहोमपर्यन्तं वाग्यमनम्]

प्रातरनुवाकाद्याऽन्तर्यामात् ॥ १९ ॥

प्रातरनुवाकादि वाग्यतो भवति आ अन्तर्यामहोमात् ॥ १९ ॥

[हरिवतः प्रैषादारभ्येडापर्यन्तं त्रिष्वपि सोमेषु वाग्यमनम्]

हरिवतोऽनुसवनमेळायाः ॥ २० ॥

होता यक्षदिन्द्रं हरिवान् (खि ५, ७, ४, १-३ ⌊आश्वौ ५, ४, ३⌋) इति प्रैषः। तस्माद्धरिवतः प्रैषादारभ्य अनुसवनं [2]त्रिष्वपि सवनेषु[2] वाग्यतो भवति। [3]आ इळायाः[3] यावद् इळोपाह्वानम् ॥ २० ॥

[स्तोत्रेषु अतिसर्जनादारभ्य शस्त्रयाज्यावषट्कारपर्यन्तं वाग्यमनम्]

स्तोत्रेष्वतिसर्जनाद्या वषट्कारात् ॥ २१ ॥

स्तोत्रशब्दादिशस्त्रेषु[4] अतिसर्जनं भवति ओं स्तुध्वम् (आश्वौ ५, २, १२) इति। तदादि वाग्यतो भवति। आ वषट्कारात् यावच्छस्त्रयाज्याया[5] वषट्कारः ॥ २१ ॥

[पवमानस्तोत्रेषु उपाकरणादिसमाप्तिपर्यन्तं वाग्यमनम्]

ओदृचः पवमानेषु ॥ २२ ॥

पवमानेषु[6] उद्गन्तो भवति। आ उदृचः आ पवमानसमाप्तेः[7]। पवमानेषु[8] एतद्वचनं शस्त्रेण[9] विप्रकर्षात्। पवमानेष्वित्यनुच्यमाने सर्वस्तोत्रेषु विकल्पः। आ वषट्कारादास्तोत्रस्योदृच इति ॥ २२ ॥

[सर्वत्र मन्त्रवति कर्मणि वाग्यमनम्]

यच्च किं[10] च मन्त्रवत् ॥ २३ ॥

१-१. द्विचकाम एकाहोऽस्ति ब[1]। २-२. त्रिष्वाज्यसवनेषु ब[2]; त्रिष्विज्यमानेषु मं। ३-३. नास्ति मं। ४. स्तोत्रशब्दादिशास्त्रेषु ब[1,2]; स्तोत्रशब्दादिति शस्त्रेषु ब[3-5] वा; स्तोत्रशब्दादिति शास्त्रेषु मं वि। ५. °याज्यया मं। ६. नास्ति ब[1,2] मं। ७. नास्ति ब[1]। ८. पवमाने मूको। ९. शास्त्रेण ब[1,2] मं। १०. किंचित् ब[1]।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यद् इति सर्वनाम[1] सर्वनिर्देशार्थं, किम् इति च। यच्च किंचिन् मन्त्रवत् कर्म भवति, तत्र[2] वाग्यतो भवति, आ यागस्य परिसमाप्तेः। यथा [3]अधिवपनं कपालोपधानं संवापो[3] वेदिकरणम्। यच्चेति चकारो वाग्यमनाधिकारसमुच्चयार्थः[4]। मन्त्रवद् इति[5] वचनादमन्त्रवति वाग्यतो न[6] भवति वेदिमानादिषु ॥ २३ ॥

[अन्यत्रापि होतृकर्मवद् ब्रह्मणो वाग्यमनम्]

होत्रा शेषः ॥ २४ ॥

होत्रा शेष उक्तः। अनुक्तो यः[7] [8]स शेषः[8]। शेषो वाग्यमविषयः[9] होत्रा व्याख्यातः। आऽतो वाग्यमनम् (आश्रौ १, ५, ३५) इत्येवमादि[10] होतुर्यदुक्तं तद् ब्रह्मणोऽपि भवति ॥ २४ ॥

[होतृवद् ब्रह्मणोऽपि वाग्यमनभ्रेषे प्रायश्चित्तविधानम्]

आपत्तिश्च ॥ २५ ॥

होत्रा व्याख्याता। आपद्याऽतो देवा अवन्तु नः इति जपेत् (आश्रौ १, ५, ३८) इति आपत्तिः[11]। सा होतुरधिकारे दृष्टा ब्रह्मणो [12]न स्यादितीदमुच्यते[12]। होत्रकाणां तु[13] [14]अङ्गकारित्वात् प्रधानविहिता धर्मा भवन्ति[14] ॥ २५ ॥

[इष्टयां पशौ सोमे वाऽग्निप्रणयने तदादि वाग्यमनम्]

यत्र त्वग्निः प्रणीयतेऽपि ससोमे तदादि तत्र वाग्यमनम् ॥ २६ ॥

---

१. नास्ति ब[3,4] वा वि। २. तत्र च ब[2-4] मै वा वि। ३-३. अचित्त (अवित्त ब[2]; अधिप ब[3-5] वा; अवि मै; अधि वि) एकवचनं (एवचनं ब[2] वि; वचन ब[3-5] वा; एव वचनं मै); कल्पालायो एवं च तं (कलायो एवं वचनं ब[2]; कलापोपवचनं ब[3]; कलापो वचनं ब[4]; कलापोपवचन ब[5]; कलापो एवं च न मै; कलापो एवं वा; कल्लापो एवं चनं वि) संवापः (संवायः ब[1,2] वि; सवापः ब[3,4] वा) मूको। ४. वाग्यतो मन्त्राधिकार° ब[2-5] मै वा वि; वाग्यतो मन्त्रविकार° ब[1]। ५. मनुवदिति ब[2] मै। ६. नास्ति ब[1,2-5] वा वि। ७. यः शेषो वा ब[2-5] मै वा वि। ८-८. शेषो वा ब[1]। ९. वाग्यमनवि° ब[3-5]। १०. इत्यादि मै। ११. नास्ति मूको। १२-१२. तस्मादितीद° मै; नास्ति ब[3-5]। १३. नास्ति ब[1,5]। १४-१४. अङ्गादित्वाप्रधान° ब[2]; °त्वात् प्रधानविधिना (°धितो वा) धर्मो भवति ब[3-5] वा वि; °त्वप्रधानविहिता धर्म्या भवन्ति मै।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यत्र तु [1]यस्मिन् कर्मणि इष्ट्यां पशौ सोमे वा[1] अग्निः प्रणीयते। तु-शब्दो विशेषार्थः[2]। [3]अग्निप्रणयने विशिष्टे[3] कर्मणि वाग्यमो विधीयते। [4]अपि ससोमे तदादि तत्र वाग्यमनम्। अपि-शब्दः समुच्चयार्थः[4]। अग्निप्रणयने[5] [6]सह सोमेन[6] प्रणयनम्, तस्मिन् ससोमे[7], अप्यसोमेऽपि [8]प्रणयने तदादि प्रणयनमादि[8] कृत्वा तत्र तस्मिन् कर्मणि वाग्यमनं भवति आ हविष्कृत उद्वादनादामार्जनाद् वा (आश्रौ १, १२, १६ ; १७)। ऐष्टिकाद्[9] वाग्यमनात् प्राक् कर्मान्तरेष्वपि वाग्यमनप्राप्त्यर्थोऽयमारम्भः। पुनर्वाग्यमनवचनं जपविवक्षार्थम्। अन्यथा [10]तदादि जप एव स्यात्[10] न[11] वाग्यमनम्[12] ॥ २६ ॥

[दक्षिणतो व्रजतो ब्रह्मणः सूक्तजपः]

दक्षिणतश्च व्रजञ्जपत्याशुःशिशान इति सूक्तम् ॥ २७ ॥

अपि ससोमे प्रणयन इत्यधिकारः। प्रणयने दक्षिणतश्च दक्षिणस्यां दिशि। च-शब्दः समुच्चयार्थः। वाग्यमनं भवति सूक्तं च जपति। व्रजन्निति विशेष-वचनाद् दिङ्नियमप्रतिषेधः[13] स्यात् तस्माद् दक्षिणत इत्याह। व्रजन्निति वचनात् तदादि कर्मणि जपो न भवति। जपति-वचनमुपांश्वर्थम्। आशुः शिशानः (ऋ १०, १०३, १) [14]इत्येतत्[†] सूक्तं जपति। सूक्तवचनात् सूक्तमेव[‡] भवति न हीनं नाऽधिकम्। ϕयदा ह्रस्वोϕ विहारः व्रजञ्जपतीति वचने ¶सूक्तशेषस्य लोपः प्राप्नोति*। यदा पुनर्महान् विहारस्तदा µसूक्तस्याभ्यावृत्तिः प्राप्नोतिµ[14]। तस्मात् सूक्तमित्याह ॥ २७ ॥

१-१. नास्ति मै। २. विशेषणार्थः ब[1-5] वा वि। ३-३. °यनविशिष्टे ब[3-5] वा वि। ४-४. नास्ति ब[2]। ५. °प्रणये ब[1] ; नास्ति ब[2-5] वा वि। ६-६. नास्ति ब[2]। ७. सोमे मूको। ८-८. प्रणयनसादि ब[1] ; प्रणयनादात्यमन्ययनमादि ब[2] ; प्रणयनाप्रणयनमादि ब[3-5] वा वि ; प्रणयनादादित्यप्रणयनमादि मै। ९. नास्ति ब[2]। १०-१०. तदादि (°दि न ब[2]) एव स्यात् (स्या ब[2]) ब[1,2] मै। ११. नास्ति ब[1]। १२. वाग्यमः ब[3,4] वा वि। १३. अथम-प्रतिषेधः ब[1] ; अग्निप्रणयनप्रतिषेधः मै। १४-१४. नास्ति ब[4]। †. एतत् ब[2]। ‡. सूक्तमेव न ब[2] ; सूक्तमेवेह मै। ϕ-ϕ. यथा दूरस्थो ब[3-5] ; यदाह। स्वो मै ; यदा दुस्वो वि। ¶. सूक्ते शे° ब[2] ; सूक्तविशे° मै। *. प्राप्ते ब[3,5] वि ; प्राप्तो वा। µ-µ. सूक्तस्यावृत्तिः प्राप्नोतीति ब[2]।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

दर्शपूर्णमास
Digitized by Madhuban Trust

[सूक्तजपं समाप्योपवेशनादि होतृवत्कर्तव्यम्]

समाप्योपवेशनाद्युक्तम् ।। २८ ।।

समाप्य[1] [2]सूक्तं समाप्य[2] अनन्तरम् उपवेशनादि दक्षिणतः कुशेषूपविशेत् (आश्रौ १, १२, ८) इत्येवमादि एवमुक्तं व्याख्यातं तदिह कर्तव्यमित्यर्थः । समाप्य[3]-वचनमनुक्रमविधानार्थम् । जपानन्तरमुपवेशनादि भवतीति । यथा समाप्य सामिधेनीरन्वाह (आश्रौ १, २, २) इति ।। २८ ।।

[सौमिके प्रणयने ब्रह्मजपनिषेधः]

न तु सौमिके प्रणयने ब्रह्मजपः ।। २९ ।।

न इति प्रतिषेधः । तु-शब्दः प्राप्तव्यावृत्त्यर्थः । सौमिके सोमे भवं सौमिकम् । औपवसथ्ये अग्निप्रणयने अग्नीषोमीयप्रणयने च ब्रह्मजपो न विद्यते बृहस्पतिर्ब्रह्मा (आश्रौ १, १२, ९) इति । एष ब्रह्मजपः (आश्रौ १, १२, १०) इति । उक्तं सूक्तं समाप्य दक्षिणतो बहिर्वेद्यास्ते[4] एतं[5] ब्रह्मजपं न जपति । तथा[6] [7]आग्नीध्रीये निहिते[7] सूक्तं समाप्य नोपविशेत् कर्मभावात्[8] ।। २९ ।।

[ब्रह्मणोऽयज्ञीयभाषणनिषेधो यज्ञमनस्त्वञ्च]

अन्यत्र विसृष्टवागबहुभाषी यज्ञमनाः ।। ३० ।।

उक्ताद् वाग्यमनविषयाद्[9] अन्यत्र अन्येषु प्रदेशेषु उद्वावनान्मार्जनाच्च उपरिष्टात्[10] [11]कर्मान्तिरेषु । विसृष्टा वागनेन[11] स[12] विसृष्टवाग् भवति । यथार्थं संभाषयेदित्यर्थः[13] । अबहुभाषी [14]न बहु भाषते अबहुभाषी[14] भवति । यज्ञमनाः यज्ञ एव मनोऽस्य यज्ञमनाः । इदं कर्म एवं भवतीति । एतदेवमपि कर्तव्यं नान्यदिति । मनसैव ब्रह्मा संस्करोति (ऐब्रा ५, ३३) इति श्रुतिः । विसृष्टवागित्युच्यते अबहुभाषीति विवक्षार्थम् । अबहुभाषीति बहुशब्दो यज्ञबाह्य इति वर्तते । यज्ञार्थमेवाभिभाषते नान्यभाषीति ।। ३० ।।

---

१. नास्ति ब$^{3-5}$ ।　२-२. नास्ति ब^{4} ।　३. °प्य तु ब^{2} मै । नास्ति ब$^{1,3-5}$ वा वि ।　४. तु. आश्रौ ४, ८, २८ ।　५. एव ब^{1} ; एवं ब$^{2-5}$ मै वा वि ।　६. अथ ब^{1} ।　७-७. अग्नीषोमीये तर्हिते ब^{3,5} ; अग्नीषोमीय ते तर्हिते ब^{4} ; अग्नीषोमीये तिर्हिते वा वि ।　८. कर्माभावात् ब$^{3-5}$ । ९. °मवि° ब^{1,2,5} वा वि ।　१०. उपविष्टात् (ष्ट ब^{2} ; °ष्टा मै) ब^{2} मै वि ।　११-११. °रेषु त्रिषु वाग्यमनेन मै ; °वागन्तेन ब$^{3-5}$ ।　१२. नास्ति ब^{3,5} । १३. °षेदित्यर्थः ब$^{2-5}$ वा वि ।　१४-१४. न बहुभाषी ब$^{3-5}$ ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[विपर्यासान्तरितयोः प्रायश्चित्तविधानम्]

विपर्यासेऽन्तरिते मन्त्रे कर्मणि वाऽऽख्याते वोपलक्ष्य वा जान्वाच्याऽऽहुतिं जुहुयात् ॥ ३१ ॥

[1]आदिष्टकर्मान्तरिते[2] आदिष्टस्य[3] स्थाने यदन्यत्[4] क्रियते स विपर्यासः आदिष्टमकृत्वाऽनन्तरं यत् क्रियते तदन्तरितम्। विपर्यासान्तरिते[5] एकस्मिन् मन्त्रे कर्मणि च। वा-शब्दः समुच्चयार्थः। मन्त्रविपर्यासे मन्त्राऽन्तरिते च [6]कर्मविपर्यासे कर्माऽन्तरिते च[6]। आख्याते वा इदं वृत्तमिति केनचिदाख्याते। [7]उपांशुत्वाद्-देशाऽन्तरितत्वाच्चाऽऽख्यातः स्वयमुपलक्षयतेऽत आह[7] उपलक्ष्य वा। स्वयं वा उपलक्ष्य। द्विर्वाशब्दः तृतीयकल्पप्राप्त्यर्थः। [8]न च केनचिदाख्यातं, न चोपलक्षितम्, कालान्तरे ज्ञातम्। अनन्तरं दोषात् कर्तव्यमिति न्यायात् कालान्तरेऽपि क्रियत इत्यर्थः[8]। जान्वाच्य दक्षिणं जानु नीचं कृत्वा आहुतिं[9] जुहुयात् स्थाल्याः स्रुवेणाऽऽदाय आहुतिं[10] जुहुयात् ॥ ३१ ॥

[वेदविशेषे भ्रेषे प्रायश्चित्तविशेषविधानम्]

ऋक्तश्चेद् भूरिति गार्हपत्ये, यजुष्टो भुव इति दक्षिण आग्नीध्रीये सोमेषु ॥ ३२ ॥

ऋक्तश्चेत् ऋग्वेदविहिताच्चेत् कर्मणः मन्त्रे विपर्यासे[11] अन्तरिते[12] वा, कर्मणि विपर्यासेऽन्तरिते वा भूरिति भूः स्वाहेति गार्हपत्ये जुहुयात्[13] ब्रह्मा। यजुष्टो भुव इति दक्षिणे। यजुष्टः यजुर्वेदविहितात् कर्मणः। विपर्यासेऽन्तरित इति वर्तते। जान्वाच्य भुव इति भुवः स्वाहेति दक्षिणे दक्षिणाग्नौ जुहुयात्।

---

१. इत आरभ्य १, १३, १ सूत्रव्याख्यास्य— 'आचम्यान्वाचामेत्° सीरिति' इति पर्यन्तः पाठो नास्ति ब[4]। २, आदिकर्मान्तरस्थापिते ब[2]; आदिकर्मान्तरिति मै। ३. अस्पष्टस्य ब[2]। ४. यद्यन्यत् ब[2] मै; य वा। ५. °यसिऽन्त° ब[1,3,5] वा वि; °यसिऽनन्त° मै। ६-६. नास्ति ब[3,5] वा वि। ७-७. उपांशुत्वादेवा (°देषा ब[2,3,5] मै वा वि) न्तरितत्वाच्चाख्यातेः (°तः ब[2,3,5] मै वा वि) स्वयमुपलक्ष्यते ब[1-3,5] मै वा वि। ८-८. नास्ति ब[2] वा। ९. °तीः ब[1,2] मै; °तिः ब[3,5] वा वि। १०. °तीः ब[1,2] मै। ११. प्राप्ते ब[1-3,5] मै वा वि। १२. अनन्त° ब[1,2,5]। १३. तज्जु° वि।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आग्नीध्रीये सोमेषु । यजुष्टो 'भुव इति' । भुवः स्वाहेति आग्नीध्रीये जुहुयादिति । न[2] दक्षिणाग्नौ सोमेषु ज्योतिष्टोमादिषु ॥ ३२ ॥

[सामवेदतः सर्ववेदतश्च भ्रेषे प्रायश्चित्तविधानम्]

सामतः स्वरित्याहवनीये सर्वतोऽविज्ञाते वा भूर्भुवः स्वरित्याहवनीय एव ॥ ३३ ॥

सामतः सामवेदविहितात्[3] कर्मणः विपर्यासेऽन्तरिते च स्वरित्याहवनीये [4]स्वः स्वाहेत्याहवनीयेऽग्नौ[4] जुहुयाद् ब्रह्मा । [5]सर्वतोऽविज्ञाते वा भूर्भुवः स्वरित्याहवनीय एव[5] । सर्वतः[6] ऋक्तः यजुष्टः सामतश्च युगपद्विपर्यासेषु[7] अन्तरितेषु[8] वा अविज्ञातेषु[9] वा[10] विज्ञातेषु[11] वा[12] प्रायश्चित्ते कुत[13] इदमुत्पन्नमिति[14] यन्न विज्ञायते[15] तस्मिन्नविज्ञाते[16] च [17]सर्वा अनुद्रुत्याऽऽहवनीय[17] एव जुहुयात्[18] । यथा—प्रायश्चित्तं[19] वा हुत्वा[20]ऽन्तरमारभेत (आश्रौ ६, ८, ७) इति । एवशब्दोऽवधारणार्थः । आहवनीये नेतरयोरिति । तस्माद् यदि यज्ञ ऋक्त आर्तिर्भवति भूरिति ब्रह्मा गार्हपत्ये जुहुयात् (आश्रौ १, १२, ३२ ⌊ऐब्रा ५, ३४⌋) इत्यविशेषेण सर्वभ्रेषार्थं ब्रह्मणः । आचार्यस्तु परिमितविषयार्थमुपदिशति—विपर्यासेऽन्तरिते (आश्रौ १, १२, ३१) इति । कथं सर्वतः सर्वभ्रेषार्थः स्यादिति । तदुच्यते । प्रदर्शनार्थं[21] स्यात् । [22]एवंजातीया भ्रेषा[22] भवन्ति इति । प्रकृतेरन्यथाकरणं विपर्यासः । आम्नातस्याऽकरणम् अन्तरितं भवति । द्विविधो विध्यपराधः प्रदर्शितो भवति । तत् सर्वभ्रेषार्थमेवोपदिष्टं भवति । एवमेतत्

१-१. नास्ति ब[2,3,5] । २. नास्ति ब[2] मै । ३. सामविहितात् ब[2,3,5] मै वा वि । ४-४. अग्नौ मै । ५-५. नास्ति ब[1,2] मै । ६. नास्ति ब[3,5] वा वि । ७. °पर्यस्तेषु ब[2] मै वा वि । ८. नास्ति ब[3,5] । ९. °ते ब[3,5] वा वि । १०. च ब[3,5] वा वि ; नास्ति ब[2] मै । ११. नास्ति ब[1,3,5] वा वि । १२. नास्ति ब[1-3,5] मै वा वि । १३. ऋक्तः ब[1] ; वा ऋक्तः ब[2] ; हुते ब[3,5] ; हुता वा वि ; नास्ति मै । १४. °मुपपन्न° मै वा । १५. ज्ञायते ब[3] मै वा ; विज्ञाते ब[5] ; यज्ञोते ब[2] ; ज्ञाये वि । १६. नास्ति ब[5] ; तदस्मि° ब[1] । १७-१७. सर्वानुहूत्या° ब[1,5] ; सर्वानुहृत्या° ब[2] ; सर्वानुद्रुत्या° ब[3] ; सर्वा अनहुत्या° मै ; सर्वा अनुहुत्या° वा , सर्वानुदुत्या वि । १८. तु. ऐब्रा ५, ३२ । १९. सर्वप्रा° मै । २०. हुत्वानन्त° ब[1] ; हुत्वाऽन्त° ब[2,3,5] मै वा वि । २१. °र्थः ब[3,5] वि । २२-२२ जानीयाभ्रेषा ब[1] ; जानीयात्रेषा (°यान्नेषा वा) ब[2] वा वि ; जानीयादेव नैषा ब[3,5] ; जानीयात्रैषा मै ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सर्वश्रेषाणां सामान्यविधानमुक्तं भवति। सर्वत्रैवैतत्[1] कर्तव्यम्। यत्रानाम्नातं[2] तु तदर्थं कर्तव्यं भवति। आम्नाते विकल्पमेके उपदिशन्ति। सैषा सर्वप्रायश्चित्तिर्यदेता व्याहृतयः तस्मादेषैव यज्ञे प्रायश्चित्तिः कर्तव्या (ऐब्रा ५, ३२) इति श्रुति-चोदनात्[3] ॥ ३३ ॥

[प्राक् प्रयाजेभ्योऽङ्गारे परिधितो बहिर्निर्गते स्रुवदण्डेनाभिनिधानं तन्मन्त्रश्च]

प्राक् प्रयाजेभ्योऽङ्गारं बहिष्परिधिनिर्वृत्तं[4] स्रुवदण्डेनाऽभिनिदध्यान्मा तपो मा यज्ञस्तपन्मा यज्ञपतिस्तपत्। नमस्ते अस्त्वाय ते नमो रुद्र पराय ते। नमो यत्र निषीदसीति ॥ ३४ ॥

प्राक्[5] पूर्वं प्रयाजेभ्यः अङ्गारम् अग्न्यङ्गारं बहिष्परिधिनिर्वृत्तं परिधि-बहिर्निर्गतं स्रुवदण्डेनाऽभिनिदध्यात् [6]स्रुवस्य दण्डदेशेन[6] अभ्युपरि निदध्यान् निगृह्य धारयेत् मा तपः इत्यनेन मन्त्रेण ॥ ३४ ॥

[अङ्गारे परिधितो बहिर्निर्गते प्रतिदिशं क्रमेण ऋत्विग्यजमानैरभिनिधानम्]

अमुं मा हिंसीरमुं मा हिंसीरिति च प्रतिदिशमध्वर्युयजमानौ पुरस्ताच्चेद् ब्रह्मयजमानौ दक्षिणतो होतृपत्नीयजमानान् पश्चात्। आग्नीध्रयजमाना उत्तरतः ॥ ३५ ॥

अमुम् इति द्वितीयया विभक्त्या नाम गृहीत्वा मा हिंसीः इति वक्तव्यम्। ये ये पुरुषा वक्ष्यन्ते यस्यां दिशि। वीप्सावचनं प्रतिपुरुषप्राप्त्यर्थम्। च-शब्दो मन्त्रसमुच्चयार्थः। के पुरुषाः कस्यां दिशीति तदुच्यते— अध्वर्युयजमानौ पुरस्ताच्चेत्। पुरस्तात् पूर्वस्यां दिशि यदि चेदङ्गारो [7]निर्वर्तते तं[7] स्रुवदण्डेनाभिनि-गृह्णीयात् मा तपः इत्यनेन[8] मन्त्रेण। अध्वर्युं [9]मा हिंसीर्यजमानं[9] मा हिंसीरिति वक्तव्यम्। अमुं [10]मा हिंसीरमुं[10] मा हिंसीरिति वीप्सावचनाद् असमासः। ब्रह्मयजमानौ दक्षिणतः[11]। दक्षिणस्यां दिशि निर्वृत्तम्[12] अङ्गारं स्रुवदण्डेनाऽभिनिदध्यात् मा तपः इत्यनेन मन्त्रेण। ब्रह्माणं मा हिंसीर्यजमानं

---

१. चैतत् ब[1,2]। २. यत्र नाम्नातं मै वा वि। ३. श्रुतिः मै; श्रुतिः चोदनात् ब[2]। ४. °वृत्तं परिधिवहिर्निर्गतं मै। ५. चोदनात् प्राक् मै। ६-६. स्रवद° ब[1]। ७-७. निवृत्तिः (°त्ति ब[2]) तेन ब[1,2]; निवर्तते तं ब[3,5] वा वि; निवर्तेत मै। ८. इति ब[1]। ९-९. नास्ति ब[3,5] वा वि। १०-१०. नास्ति ब[2]। ११. नास्ति ब[1]। १२. निवृत्तम् ब[1,2,5] मै वि।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

मा हिंसीरिति जप्तव्यम्[1]। होतृपत्नीयजमानान् पश्चात् अपरस्यां दिशि अङ्गारं निर्वृत्तं[2] स्रुवदण्डेन अभिनिदध्यात् मा तपः इत्यनेन मन्त्रेण। [3]होतारं मा हिंसीः पत्नीं मा हिंसीर्यजमानं मा हिंसीरिति जप्तव्यम्। आग्नीध्रयजमाना उत्तरतः। उत्तरतश्चेदङ्गारो निर्वृत्तो भवति स्रुवदण्डेनाऽभिनिदध्यात् मा तपः इत्यनेन मन्त्रेण[3]। आग्नीध्रं मा हिंसीर्यजमानं मा हिंसीरिति च जप्तव्यम् ।। ३५ ।।

[अध्वर्य्वनुप्रहरणम्]

अथैनमनुप्रहरेदाहं यज्ञं दधे निर्ऋतेरुपस्थात् तं देवेषु परिददामि विद्वान् । सुप्रजास्त्वं शतं हिमा मदन्त इह नो देवा मयि शर्म यच्छतेति ।। ३६ ।।

अथाऽनन्तरं स्रुवदण्डेनाऽभिनिधानादनन्तरम्[4] एनम् अङ्गारम्[5] अग्नावेव अनुप्रहरेत् अन्वेव तदानीमेव प्रक्षिपेत् आहं यज्ञम् इत्यनेन मन्त्रेण। अधिकारे पुनरेनमिति वीप्सार्थे प्राग्वद्[6] द्रष्टव्यम्। सर्वतश्चेदङ्गारा निर्वर्तयेयुः ।। ३६ ।।

[प्रकृताङ्गाराभिहोमकथनम्]

तमभिजुहुयात् सहस्रशृङ्गो वृषभो जातवेदाः स्तोमपृष्ठो घृतवान्त्सुप्रतीकः। मा नो हिंसीद्द्विसितो दधामि न त्वा जहामि गोपोषं च नो वीरपोषं च यच्छ स्वाहेति ।। ३७ ।।

तम् अङ्गारम् अग्नौ क्षिप्तम् अभि उपरि जुहुयात् स्रुवाहुतीः[7] सहस्रशृङ्गः इति अनेन [8]मन्त्रेण। अधिकारे[8] पुनस्तमिति अङ्गारबहुत्वे सर्वेषु होमार्थम्। तं[9] तमभिजुहुयादिति ।। ३७ ।।

।। [10]इति द्वादशः खण्डः[10] ।।

---

१. वक्तव्यम् ब[1]। २. निवृत्तं ब[1-3,5] मै वि। ३-३. नास्ति ब[5]।
४. °धानानन्तरम् ब[1]। ५. नास्ति ब[3,5]। ६. प्राग् ब[1-3,5] वा वि।
७. सर्वाहुतीः ब[5]। ८-८. मन्त्राधि° मूको। ९. नास्ति ब[3]।
१०-१०. इति द्वादशी खण्डिका। अथ त्रयोदशी खण्डिका प्रारभ्यते मै।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ प्रथमेऽध्याये त्रयोदशः खण्डः

[प्राशित्रस्य समन्त्रकमाहरणं निधानं प्राशनञ्च]

प्राशित्रमाह्रियमाणमीक्षते मित्रस्य त्वा चक्षुषा प्रतीक्ष इति। देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामीति तदञ्जलिना प्रतिगृह्य पृथिव्यास्त्वा नाभौ सादयाम्यदित्या उपस्थ इति कुशेषु प्राग्दण्डं निधायाऽङ्गुष्ठोपकनिष्ठिकाभ्यामसंखादन् प्राश्नीयाद् अग्नेष्ट्वाऽऽस्येन प्राश्नामि बृहस्पतेर्मुखेनेत्याचम्याऽन्वाऽऽचामेत् सत्येन त्वाऽभिजिघर्मि या अप्स्वन्तर्देवतास्ता इदं शमयन्तु चक्षुः श्रोत्रं प्राणान्मे मा हिंसीरिति इन्द्रस्य त्वा जठरे दधामीति नाभिमालभेत प्रक्षाल्य प्राशित्रहरणं त्रिरनेनाऽभ्यात्ममपो निनयते ॥ १ ॥

प्राशित्रमित्यवदानस्य [1]संज्ञा । तत्[1] [2]प्राशित्रहरणेन पात्रेणाध्वर्युः पुरुष आहरति । तद्[†] आह्रियमाणं ब्रह्मा ईक्षते मित्रस्य[2] त्वा चक्षुषा प्रतीक्षे[3] (तु. तैसं १, १, ४, १) इत्येतेन[4] मन्त्रेण। देवस्य त्वा (मासं १, २४) इत्येतेन तदञ्जलिना प्रतिग्रहसमर्थेन प्रतिगृह्य पृथिव्यास्त्वा (मासं १, ११) इत्येतेन कुशेपु अन्तर्वेद्यामित्यर्थः। प्राग्दण्डम् प्राच्यां दिशि दण्डो भवति यथा प्राशित्रहरणस्य[5] तथा तन् निदध्यात्[6] स्थापयेत्[7] । [8]अङ्गुष्ठोपकनिष्ठिकाभ्याम् । अङ्गुष्ठश्च, कनिष्ठिकाया उप समीपे उपकनिष्ठिका अङ्गुली च, ताभ्याम्[8] अङ्गुष्ठोपकनिष्ठिकाभ्यां[9] तत् प्राशित्रं गृहीत्वा असंखादन् दन्तैरस्पृशन् प्राश्नीयाद् भक्षयेत्—अग्नेष्ट्वाऽऽस्येन (काण्वसं २, ३, ५) इत्यनेन मन्त्रेण। अधिकारे सति पुनस्तदिति वचनात् समुदायस्य ग्रहणम् । आचम्यान्वाचामेत्-हिंसीरिति[10] ।

१-१. संज्ञितम् ब[१,२] मै ; नास्ति वि । २-२. नास्ति वि । †. तम् ब[१,२] मै । ३. नास्ति ब[१] । ४. इत्यनेन ब[१,२] मै । ५. प्राशित्रग्रहणस्य ब[२,३,५] मै वा वि । ६. निदधीत मै । ७. नास्ति ब[१] । ८-८. अङ्गुष्ठेनो (°ष्ठो ब) पकनिष्ठिक (°ष्ठा ब[२]) योप समीपे (योरप सा वा) उपकनिष्ठिका (°निष्ठा ब[२]) अङ्गुली ताभ्याम् ब[१-३,५] वा वि ; नास्ति मै । ९. °ष्ठेनोपक° मै । १०. आच ... सीरिति इत्यादाय पौरस्त्यो व्याख्यापाठः १, १२, ३१ सूत्रीयादिभागावधिको नास्ति ब[४] ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

दर्शपूर्णमास
Digitized by Madhuban Trust

प्राश्य आचम्य अन्वेव अनन्तरमेव आचामेत् मन्त्रेण सत्येन त्वा इति अनेन। यज्ञोपवीतशौचे च (आश्रौ १, १, १०) इति प्राप्ते आचम्येति न वक्तव्यम्। अनुच्यमाने तु प्राशनादनन्तरं समन्त्रमाचमनं शौचार्थमेव भवति, न विध्यर्थम्। अन्यत्र विधीयमानं विध्यर्थं भवति अग्निहोत्रादिषु, शौचार्थं च[1] न। वक्तव्यं तु मन्त्रोपदेशार्थम्। वचनात्तु उच्छिष्टस्य समन्त्रमाचमनं स्यात्, तस्मादाचम्येत्युच्यते। [2]इन्द्रस्य त्वा जठरे दधामीति नाभिमालभेत[2]। इन्द्रस्य त्वा जठरे दधामि इत्यनेन मन्त्रेण नाभिमालभेत। प्रक्षाल्य—निनयते। उदकेन प्रक्षाल्य प्राशित्रहरणपात्रं[3] निर्लेपं कृत्वा त्रिरनेन पात्रेण अभ्यात्मम् आत्मानमभि अभ्यात्मम्[4] अपः उदकं निनयते निषिञ्चते[5]। अनेनेत्यनुच्यमाने कमण्डलुना प्राप्नोति। अनेनेति वचनादासेचनवत् पात्रं भवति। अभ्यात्ममित्यनुच्यमाने अन्वञ्चं तिर्यञ्चं वा प्राप्नोति ॥ १ ॥

[इडाभक्षणमार्जनपूर्वकं प्राशित्रहरणे ब्रह्मभागस्य निधानम्]

मार्जयित्वाऽस्मिन् ब्रह्मभागं निदध्यात् ॥ २ ॥

उक्तं[6] मार्जनम्। तत् कृत्वा अस्मिन् प्राशित्रहरणे ब्रह्मभागं निदध्यात् ॥ २ ॥

[प्राशित्रहरणस्य पश्चात् कुशेषु यजमानभागस्य निधानम्]

पश्चात् कुशेषु यजमानभागम् ॥ ३ ॥

पश्चात् अपरस्यां दिशि कुशेषु एव यजमानभागं निदध्यात्, वेदेन ब्रह्म-यजमानभागौ परिहरति[7] (आपश्रौ ३, ३, ६) इत्यध्वर्यूणां वचनात्। ऋत्विग्भिः सह ब्रह्मा मार्जनं करोति। अस्मिन्नित्यनुच्यमाने प्राशित्रहरणे न प्राप्नोति। कुशग्रहणे अक्रियमाणे प्राशित्रप्रहरणे [8]एव पश्चिमे देशे[8] स्यात् ॥ ३ ॥

[समन्त्रकमन्वाहार्यावेक्षणम्]

अन्वाहार्यमवेक्षेत प्रजापतेर्भागोऽस्यूर्जस्वान् पयस्वानक्षितिरसि मा मे क्षेष्ठा अस्मिंश्च लोकेऽमुष्मिंश्च प्राणापानौ मे पाहि कामाय त्वेत्यस्पृशन् ॥ ४ ॥

---

१. नास्ति ब[1]। २-२. नास्ति मूको। ३. °रणं पात्रं ब[1,2].मै। ४. अभ्यात्मानम् ब[1-5] वा वि। ५. सिञ्चति मै। ६. तु. आश्रौ १, ८, २। ७. सह परि° मूको। ८-८. एवं पश्चिमदेशः ब[2] मै।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अन्वाहार्यो नाम चरुः। तमन्तर्वेद्यासन्नं यजमानात् पूर्वो ब्रह्मा अवेक्षेत। प्रजापतेर्भागोऽसि (काण्वसं २, ३, ७) इति अनेन मन्त्रेण अस्पृशन् पाणिना अस्पृशन् अवेक्षेत। अवेक्षेतैव न स्पृशेदित्यर्थः॥ ४॥

[अन्वाहार्यस्यावघ्राणं शिष्टभागस्य ब्रह्मभागे निधानञ्च]

अवघ्रायाङ्गुष्ठोपकनिष्ठिकाभ्यां शिष्टं गृहीत्वा ब्रह्मभागे निदध्यात्॥ ५॥

अवेक्षणादनन्तरम्[1] अङ्गुष्ठोपकनिष्ठिकाभ्याम् चरोरेकदेशं गृहीत्वाऽवघ्राय नासिकाभ्यां गन्धोपादानं कृत्वा अप उपस्पृशेदिति वाक्यशेषो भवति। शिष्टं गृहीत्वा। शिष्टं निर्दिष्टं [2]ब्राह्मणे† आध्वर्यवे अयं त[2] ओदनः[3] इति [4]यजमानेन निर्दिष्टमन्वाहार्य[4] पाणिना गृहीत्वा स्वयमन्वाहार्यभागं ब्रह्मभागे निदध्यात्। शिष्टं ब्रह्मभागे निदध्यादित्युक्ते कृत्स्नस्य निधानं[5] प्राप्नोति। गृहीत्वेति वचनाच्चतुर्धा कृत्वा स्वमंशं गृहीत्वा[6] निदध्यादिति भवति॥ ५॥

[अध्वर्युवचनं श्रुत्वा मन्त्रजपपूर्वकं ब्रह्मणोऽनुज्ञावचनम्]

ब्रह्मन् प्रस्थास्याम इति श्रुत्वा बृहस्पतिर्ब्रह्मा ब्रह्मसदन आसिष्ट बृहस्पते यज्ञमजूगुपः स यज्ञं पाहि स यज्ञपतिं पाहि स मां पाहि भूर्भुवः स्वर्बृहस्पतिप्रसूत इति जपित्वों प्रतिष्ठेति समिधमनुजानीयात्॥ ६॥

ब्रह्मन् प्रस्थास्यामः इति एतदध्वर्योर्वचनं श्रुत्वा बृहस्पतिर्ब्रह्मा (आश्रौ १, १२, ९) इत्येतं मन्त्रं[7] जपित्वा ओं प्रतिष्ठ (मासं २, १३) इति उच्चैः [8]समिधम् अनुजानीयात् ‡समिध एतदनुज्ञापनम्‡ अनुज्ञा। अनुज्ञात† आग्नीध्रः समिधमादधातीति[8]।

---

१. अवेक्षमाणादनन्तरम् ब$^{2-4}$ मै वा वि। २-२. ब्रह्मणे अयं व ब^{1}; ब्राह्मणे अयं व ब^{2} मै; ब्रह्मणे अध्वर्यव ब$^{3-5}$ वा; ब्रह्मणे अयं वि। †. तु. माश. १, ७, ४, १८। ३. उदानः मै। ४-४. °माननि° ब$^{3-5}$। ५. विधानं मै। ६. नास्ति ब^{1}। ७ जपं ब$^{3-5}$ वा वि। ८-८. नास्ति वि। ‡-‡. समिध एतदनुजा॥ भूर्भुवः स्वर्बृहस्पतिप्रसूत इति जपित्वों३प्रतिष्ठेति समिधमनुजानीयात् मै। †. अनुज्ञातम् मै; नास्ति ब^{2}।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

–दर्शपूर्णमास
Digitized by Madhuban Trust

समिधमनुजानीयादिति[1] न वक्तव्यम्[1]। तस्यारम्भप्रयोजनम् अनुज्ञातेन समिध आधेया[2] भवन्तीति आग्नीध्रकर्म प्रदर्शितं भवति। आग्नीध्रकर्मापि[3] इह शास्त्रे किंचित् प्रदर्श्यते[4] न[5] सर्वम् ।। ६ ।।

[सर्वर्त्विक्कर्मणि समाप्ते ब्रह्मणः सर्वप्रायश्चित्तहोमविधानम्]

संस्थिते जघन्य ऋत्विजां सर्वप्रायश्चित्तानि जुहुयात् तमितरेऽन्वालभेरन् ।। ७ ।।

संस्थिते[6] परिसमाप्ते कर्मणि जघन्य ऋत्विजाम् जघनम् अन्तो भवति। जघने भवो जघन्यः। सर्वऋत्विजां कर्मणि परिसमाप्ते जघन्यः अन्त्यो भूत्वा ब्रह्मा सर्वप्रायश्चित्तानि जुहुयात्। सर्वप्रायश्चित्तानि व्याख्यातानि[7]। तमितरेऽन्वालभेरन्। [8]तं ब्रह्माणं प्रायश्चित्तानि जुह्वतम् इतरे मैत्रावरुणादयो होत्रकाः प्रकृतौ विकृतौ †चान्वालभेरन्[8] अनु पश्चात् तिष्ठन्तः पाणिभिरालभेरन् स्पृशेरन्[9]। ऐष्टिके कर्मण्याग्नीध्रः, पशौ तु[10] मैत्रावरुणो भवति। ब्राह्मणाच्छंस्यादयः सोमेषु। बहुवचनं सोमार्थम्। तत्र पत्नीसंयाजैश्चरित्वाऽवभृथं व्रजन्ति (आश्रौ ६, १३, १) इति चोदिते अस्माद् बहुवचनात्[11] प्रायश्चित्तानि हुत्वा[12]ऽवभृथं कर्तव्यम्[12]। अन्यथा बहुवचनम् अनर्थकं भवति। सवनीयादन्यानि सर्वाण्येव [13]कर्माणि संस्थितान्येव[13] ।। ७ ।।

[होता वा सर्वप्रायश्चित्तानि जुहुयादिति विधानम्]

होतारं वा ।। ८ ।।

होतारं वा प्रायश्चित्तानि जुह्वतम् इतरे होत्रकाः[14] अन्वालभेरन्, ब्रह्माणं वेति विकल्पः ।। ८ ।।

[ब्रह्महोत्रोर्होमस्य नित्यताप्रतिपादनम्]

एतयोर्नित्यहोमः ।। ९ ।।

१-१. °दिति व° मूको। २. अभ्याधेया ब$^{3-5}$ वा वि। ३. °कर्मणि ब$^{3-5}$। ४. प्रदृश्यते ब$^{3-5}$ वा वि। ५. तत् ब^{1} नास्ति ब$^{3-5}$। ६. नास्ति ब$^{3-5}$ वा वि। ७. तु. आश्रौ १, ११, १०; १३। ८-८. नास्ति ब^{2}। †. चान्वारभेरन् ब^{1}; वान्वाल° ब^{3,5} वा; वाचान्वाल° ब^{4}। ९. नास्ति ब^{1}। १०. नास्ति ब^{2}। ११. वचनात् ब^{1}। १२-१२. °थं न क° ब^{1,2}। १३. कर्मण्यसं° ब^{1,2} मै। १४. होत्राः ब^{1,2} मै।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

एतयोः होतृब्रह्मणोः। नित्यहोमो नित्यो होमो नित्यहोमः[1]। नित्यं[2] संस्थिते कर्मणि हूयते तस्मान्नित्यो होमः। [3]एतयोर्होतृब्रह्मणोर्भवति। इदानीमेव तयोर्होमं विधाय किमर्थं पुनरुच्यते एतयोर्नित्यहोम[3] इति। इदं प्रयोजनम्—तमितरेऽन्वालभेरन् (आश्रौ १, १३, ७) इत्युक्ते ब्रह्माणं जुह्वतं होता होत्रकाश्च अन्वालभेरन् इति [4]प्राप्ते, होतारं वा जुह्वतं ब्रह्मा होत्रकाश्च अन्वालभेरन्निति[4] प्राप्तम्। तयोरन्योन्यस्य चान्वालम्भो विकल्पेन प्राप्तः। तत्र निषेधनार्थम्[5] उच्यते—एतयोर्नित्यहोमः इति॥ ९॥

[सर्वर्त्विजामाहवनीयस्योपस्थानविधानम्]

सर्वे संस्थाजपेनोपतिष्ठन्त उपतिष्ठन्ते[6] ॥ १० ॥[6]

सर्वे ब्रह्मा होत्रकाश्च संस्थाजपेन उपतिष्ठन्ते। उक्तः संस्थाजपः[7]। तेन उपस्थानमाहवनीयस्य कुर्वन्ति[8]। सर्वग्रहणात् तयोर्होतृब्रह्मणोः संस्थाजपप्राप्तिः[9]। अन्यथा होत्रकाणामेव स्यात्। इतरे (आश्रौ १, १३, ७) इत्यधिकारात् त[10] एव[11] संबध्येरन्। उपस्थाय तीर्थेन निष्क्रम्यानियमः (आश्रौ १, ११, १४) इत्येतदपि सर्वेषां प्राप्तम्, संस्थाजपेन संबन्धात्। उपतिष्ठन्ते इत्यध्यायान्तलक्षणोऽभ्यासः, ब्राह्मणे दृष्टत्वात्॥ १०॥

॥ [12]इति त्रयोदशः खण्डः[12] ॥

इत्याश्वलायनसूत्रव्याख्यायां वराहकाचार्यदेवत्रातस्य[13] कृतौ प्रथमोऽध्यायः॥ १॥

कृष्णार्पणमस्तु॥

॥ समाप्तः॥

---

१. नास्ति ब[3] वा वि। २. नित्य° ब[1-5] वा वि। ३-३. नास्ति ब[2]।
४-४. नास्ति ब[3-5]। ५. °धार्थम् ब[3]। ६. एतदनन्तरम्। इति त्रयोदशी खण्डिका। मै।
७. तु. आश्रौ १, ११, १५। ८. कुर्वंते ब[1,2] मै। ९. °जप इति प्राप्तिः ब[2] मै।
१०. नास्ति ब[1,2]। ११. एवं ब[1]। १२-१२. नास्ति मै। १३. वराहकायदे° ब[1,2] मै।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[1]अथ द्वितीयोऽध्यायः[1]

[पौर्णमासेनेष्टिपशुसोमानामुपदिष्टत्वम्]

पौर्णमासेनेष्टिपशुसोमा उपदिष्टाः ॥ १ ॥

व्याख्यातौ दर्शपूर्णमासौ। इदानीं तद्विकारा इष्टिपशुसोमा वक्तव्याः। तेषामेतौ प्रकृतिः, प्रकृतित्वादेव पूर्वं व्याख्यातौ। तयोरपि पौर्णमासः प्रकृतिः पूर्ववचनात्। तस्मात् पौर्णमासेन कर्मणा इष्टयश्च पशवश्च[2] सोमाश्च उपदिष्टाः। यत्पौर्णमासे कर्म होताऽऽमन्त्रितः (आश्रौ १, १, ४) [3]इत्यत आरभ्य[3] तीर्थेन निष्क्रम्यानियमः (आश्रौ १, ११, १४) [4]इत्यन्तम्। तेनाऽतिदेशः[4] क्रियते। लाघवाऽर्थः सूत्रारम्भः। अग्न्याधेयप्रभृतय इष्टयो वक्ष्यन्ते। तेषां पौर्णमासेनाऽतिदेशः क्रियते। पौर्णमासग्रहणम् आमावास्यनिवृत्त्यर्थम्[5]। तस्मादिष्टिपशुसोमेषु वार्त्रघ्नावेवाऽऽज्यभागौ भवतो, न वृधन्वन्तौ। एवं हि[6] ब्राह्मणम्—वृत्रं वा एष हन्ति, यं यज्ञं उपनमति, तस्माद् वार्त्रघ्नावेव कर्तव्यौ (ऐब्रा १, ४) इति वार्त्रघ्नौ सर्वकर्मार्थौ[7] दृष्टौ। वृधन्वन्तौ तु सर्वार्थौ न[8] भवतः। तथा हि ब्राह्मणम्—अग्निः प्रत्नेन मन्मना (ऋ ८, ४४, १२), सोम गीर्भिष्ट्वा वयम् (ऋ १, ९१, ११) इति, यः पूर्वमीजानः स्यात् तस्मै प्रत्नमिति पूर्वं कर्माभिवदति (ऐब्रा १, ४) इति। यत्पूर्वं कर्म प्रारब्धं[9] भवति। तथा चैतौ न सर्वकर्मार्थौ। तत्प्रदर्शयति आचार्यः द्वितीयस्यां वृधन्वन्तौ (आश्रौ २, १, २५), उत्तरस्यां वृधन्वन्तौ (आश्रौ २, १८, ३) इति। तस्मादामावास्येनाऽतिदेशो[10] न क्रियते पौर्णमासेनैव क्रियते। सोमस्य तु पौर्णमासेनाऽतिदेशात् पौर्णमासं तन्त्रं सामिधेन्यादि सोमस्य प्राप्तं तत्[11] सवनीयः पशुरुपजीवति, सर्वाश्च इष्टयः। यत्पौर्णमासे तन्त्रे न विद्यते[12] तत् स्वार्थं पशुराकर्षति। याज्यादि प्रैषादि च सामिधेन्यादि सौमिकं तन्त्रं यस्मात्

१-१. द्वितीयाध्यायः मै। २. नास्ति वि। ३-३. इत्यारभ्य मै। ४-४. इत्यन्तेनाति° ब^{2} मै; इत्यस्य ते तस्य वचनातिदेशः ब^{3,4} वा वि। ५. अमावस्यानि° ब^{2} मै वि; अमा° ब^{3,4} वा। ६. नास्ति ब$^{2-4}$ मै वा वि। ७. सर्वकामार्थौ ब^{3,4} वा वि। ८. नास्ति ब^{3,4}। ९. आरब्धं मै; प्रारभ्य ब^{3,4}। १०. एतस्मादा (°द ब^{2} मै) मा° ब$^{2-4}$ मै वा वि। ११. नास्ति ब^{1}; तं ब^{2}; तन्त्र ब^{3,4} वा वि। १२. विद्यन्ते ब^{3} वि; वाद्यते मै।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तस्मादावाहनादि[1] सुन्वच्छब्दोऽग्रे यजमानशब्दात्[2] प्रयुज्यते यद्येतत्[3] पाशुकं स्यात् सुन्वच्छब्दं न कुर्याद् यथा ऋतुयाजप्रैषे[4]। सौमिकत्वादेव सोमवशात् सामिधेन्योऽपि विवर्धन्ते। विषुवति महाव्रते च[5] पाशुके सति न वर्धन्ते। सवनदेवताश्च सौमिके[6] एव[7] तन्त्रे निगम्यन्ते, न पाशुके। कस्मादावाहने सूक्तवाके च निगम्यन्ते, वनस्पतौ स्विष्टकृति च निगमनं न क्रियते। अङ्गकर्मणि प्रधानदेवतानां [8]निगमो न विद्यते[8]। अङ्गानां तु प्रधानकर्मणि निगमनमस्ति, यानि प्रागावाहनादुत्पद्यन्ते। [9]यथाऽऽग्रयणेष्टिः† आधानेष्टयश्च‡। φइज्याक्रमेणφ तु निगमनम्। यथाऽऽज्यभागौ एवं पशुदेवताया वनस्पतेश्च पूर्वं निगमनम्। ये पूर्वम् आवाहनादुत्पद्यन्ते[9] तेषां निगमः। पौर्णमासेन[10] सोमस्याऽतिदेशाद्[11] आज्यभागौ नित्यौ वेदस्तरणं च। यत्र प्रधानाः पशवस्तत्र कृताऽकृतौ[12]। सोमे याज्यानां वषट्कारस्य स्वरो यः पौर्णमासे। इळाप्राशनं सर्वेषाम् अधिकृतानां यथा पौर्णमासे, हविरुच्छिष्टप्राशनदर्शनात्[13]। वेदग्रहणमुपोत्थानं वेदवाचनं[14] पूर्णपात्रं वेदस्तरणं[15] सर्वप्रायश्चित्तानि एतानि [16]च षट्[16] कर्माणि सोमे प्राप्नुवन्ति पाशुकाऽतिदेशाऽभावात्। [17]पौर्णमासेनाऽतिदेशात् सर्वाण्येतानि क्रियन्ते। एतानि सर्वाणि[17] सोमे क्रियन्ते पौर्णमासेनातिदेशात्॥ १॥

[अमावास्यायां पौर्णमास्यां वेष्टिपशुसोमैर्यजनविधानम्]

तैरमावास्यायां पौर्णमास्यां वा यजेत ॥ २ ॥

---

१. तस्मादाहवनादि ब[4]; तस्मात्तयोहुतादि ब[2]; तस्मात्तयोहुतादि मै। २. यजमानशब्दादाहवशब्दात् मै; तु. आश्रौ ५, ३, ७; ८। ३. तत् ब[1]; यद्यत् ब[2]; मध्ये तत् मै। ४. क्रतुयातप्रै° ब[1]; अनु (°नू ब[3]) याज° ब[3,4] वा वि; तु. खि ५, ७, ५, १२। ५. नास्ति ब[3,4] वा वि। ६. सौमिके च सौमिकिके ब[1]; सौमिके (°कै) श्च सौमिके ब[2] मै। ७. इहैव मै। ८-८. निगमनं विधीयते ब[3,4]; °मा न विद्यन्ते वा वि। ९-९. नास्ति ब[1]। †. तु. आश्रौ २, ९, १२। ‡. तु. आश्रौ २, १, १८। φ-φ. इत्याक्रमेण ब[2] वा वि; इष्टयाक्रमेण ब[3,4]। १०. °मासे ब[3,4] वा वि; °मास ब[1,2] मै। ११. तु. आश्रौ ३, १, १२। स्तोमस्या° मै। १२. तु. आश्रौ ३, १, १२। १३. तु. आश्रौ ५, ७, १०। १४. देववाचनं ब[4] मै; वेदनामानं वि। १५. वेदा° ब[2]। १६-१६. वषट् ब[1,2]; षट् मै। १७-१७. पौर्णमासे सर्वाणि वि।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

अग्न्याधेयम्
Digitized by Madhuban Trust

तैः इष्टिपशुसोमैः अमावास्यायां यजेत [1]पौर्णमास्यां वा[1] यजेतेति[2] इष्टेः कालोऽभिधीयते[3]। पौर्णमासेनोपदेशात् पौर्णमास्यामेव प्राप्ते अमावास्यायामपि प्राप्त्यर्थम् इदमुच्यते । सोमस्य [4]तु पर्वणि[4] दीक्षा [5]सुत्या वा[5] भवति ॥ २ ॥

[क्षत्रियवैश्ययोः पर्वणोरेवाग्निहोत्रहोमकर्तव्यताविधानम् ।

राजन्यश्चाऽग्निहोत्रं जुहुयात् ॥ ३ ॥

राजन्यः क्षत्रियजातिः । स च अमावास्यायां पौर्णमास्यां च[6] अग्निहोत्रं जुहुयात् नाऽन्यस्मिन्नहनि । च-शब्दोऽधिकारसमुच्चयाऽर्थः । अत्र च[7]-शब्दः समुच्चयार्थो भवति अमावास्यायां पौर्णमास्यां चेति[8] ॥ ३ ॥

[पर्वेतरकालेषु राजन्येन ब्राह्मणाय भक्तदानस्य विधानम्]

तपस्विने ब्राह्मणायेतरं कालं भक्तमुपहरेत् ॥ ४ ॥

तपस्विने तपोऽस्य विद्यते स तपस्वी तस्मै तपस्विने ब्राह्मणाय [9]न क्षत्रियाय न वैश्याय । इतरं कालं शेषं कालम् । अमावास्यायाः पौर्णमास्याश्च† य इतरः कालः तस्मिन् । भक्तं सिद्धमन्नम्‡ । भक्तम् उप समीपे हरेत् नयेत् सायं[9] प्रातर्होमकाले । तपस्वी यज्ञे[10] भवति [11]तप एव तप्यमानाः सोमपीथं भक्षयन्तः (ऐब्रा ४, १३) इति ब्राह्मणम् । यज्ञं तन्वानास्तपसाऽभ्यपश्यम् (ऋ ८, ५९, ६) इति मन्त्रः । नित्यस्वाध्यायवाँस्तपस्वी भवति[11] । तपः स्वाध्याय[12] इति ब्राह्मणम् । ब्राह्मणग्रहणाद् अन्यस्मै तपस्विनेऽपि हि नोपहरेत् ॥ ४ ॥

[ऋतसत्यशीलः सोमयाजी सदाऽग्निहोत्रं जुहुयान् न केवलं पर्वणोरेवेति कथनम्]

ऋतसत्यशीलः सोमसुत् सदा जुहुयात् ॥ ५ ॥

राजन्य इति वर्तते । ऋतं शीलमस्य ऋतशीलः । सत्यं शीलमस्य सत्यशीलः । ऋतशीलश्च सत्यशीलश्च राजन्यः । सोमसुत् राजन्यः । सोमं सुतवान् सोमसुत्[13] । एवं गुणसम्पन्नः सदा नित्यं जुहुयात् अग्निहोत्रम् । यो मनसा प्रभूतार्थं न चिन्तयति[14] [15]स ऋतशीलो भवति । वाचा यः प्रभूतार्थं न वदति[15]

१-१. नास्ति ब[२] । २. आयजेतेति मै ; यजेत ब[१-४] या वि । ३. कालो विधी° वि ; कालो धी° ब[२] । ४-४. अपर्वणि मै । ५-५. सू (सु ब[२]) त्यन्ता ब[१,२] ; शुत्यन्ता मै । ६. वा ब[१] । ७. वा मै । ८. वेति ब[३,४] वा वि । ९-९. नास्ति ब[४] । †. नास्ति ब[२,३] वा वि । ‡. अन्नम् मै । १०. यज्ञो मूको । ११-११. नास्ति वा । १२. तु. तैब्रा २, १४, १ । १३. स सोम° ब[३,४] । १४. वदति ब[२] । १५-१५. नास्ति ब[२] ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

स सत्यशीलो भवति। मनसो हि न किञ्चन पूर्वमस्ति (ऐब्रा २, ४०) इति श्रुतिः। ऋतमग्रे प्रथमं जज्ञ ऋते सत्यं प्रतिष्ठितम् (श्राग् १, ५, ४) इति मन्त्रः। मनसो रेतो वाग् वदति[1] इति श्रुतिः[2] ॥ ५ ॥

[अनेकविषयेषु बहूनां कथने यथाक्रमं सम्बन्धो ज्ञेयः]

बहुषु बहूनामनुदेश आनन्तर्ययोगः ॥ ६ ॥

बहुषु अनेकेषु कर्तृ-द्रव्य-कालेषूपदिष्टेषु आनन्तर्यमेवैषां द्रव्यजातिमतामेवाऽनुदेशे[3] निर्देशे क्रियमाणे पूर्वोपदिष्टानामनुदिष्टानां[4] च आनन्तर्येण अनुक्रमेण योगो भवति। प्रथमं प्रथमेन युज्यते[5] द्वितीयं द्वितीयेन तृतीयं तृतीयेन इति[5]। एवं [6]ग्रीष्मवर्षाशरत्सु त्रिषु[6] कालेषूपदिष्टेषु क्षत्रियवैश्योपक्रुष्टाः तिस्रो जातयः अनुदिष्टाः[7] आनन्तर्येण युज्यन्ते, ग्रीष्मे राजन्यः, वर्षासु वैश्यः, शरद्युपक्रुष्टः। यवागूरोदनो दधि सर्पिः (आश्रौ २, ३, २)। ग्रामकामस्य यवागूः। अन्नाद्यकामस्य ओदनः। दधीन्द्रियकामस्य। सर्पिः तेजस्कामस्य। एवं [8]बहूनामनुदेश आनन्तर्ययोगः[8] सर्वत्र। बहुषु बहूनाम् इति वचनाद् द्वयोश्च न प्राप्नोति। इमं महे विदथ्याय शूषम् (ऋ ३, ५४, १), अयमिह प्रथमो धायि धातृभिः (ऋ ४, ७, १), इति तु राजन्यवैश्ययोराद्ये (आश्रौ २, १७, ७), मुखहृदये अभिमृशेरन् (आश्रौ ५, ६, २६) इत्येवमादिषु। तस्माद् बहुशब्दोऽनेकार्थो द्रष्टव्यः। एकस्मिन्नुपदिष्टे[9] एकमनुदिष्टं तेनैव[10] युज्यते[11]। पयसा नित्यहोमः (आश्रौ २, ३, १) इति। अनेकेषूपदिष्टेषु ग्रीष्मादिकालेषु क्षत्रियादीनां सर्वेषां सर्वे कालाः प्राप्ताः। तस्मादानन्तर्येण योगार्थः सूत्रारम्भः ॥ ६ ॥

[प्रतिदेवतं द्वे द्वे ऋचौ याज्यानुवाक्यात्वेन ज्ञेये]

द्वे द्वे तु याज्यानुवाक्ये ॥ ७ ॥

---

१. तु. ऐआ २, १, ३। २. श्रुतेः ब[3,4] वा वि। ३. °जातिमाता (°आ?) नुदेशे मै। ४. °मनुपदिष्टानां ब[1,4] मै वा। ५. नास्ति ब[1]। ६-६. °शरदृतुषु ब[2]। ७. अनिर्दिष्टाः ब[1,2] मै; अनुपदिष्टाः ब[3,4]। ८-८. नास्ति ब[1-4] वा वि। ९. एतस्मिन्नुपदिष्टे ब[1,2]; °स्मिन्नुद्दिष्टे ब[3,4] वा वि। १०. तथैव ब[2]। ११. युज्यन्ते ब[1,2] मै।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

अग्न्याधेयम्

Digitized by Madhuban Trust

देवतासु उपदिष्टासु तासां[1] याज्यानुवाक्यादेशे कृते आनन्तर्येण योग इति वचनादेकैकस्या देवताया[2] [3]एकैका† ऋक् प्राप्नोति । तस्मादिदमुच्यते । एकैकस्या देवताया[3] द्वेद्वे[2] ऋचौ याज्यानुवाक्ये भवतः। एका अनुवाक्या एका याज्या [4]इति। तु-शब्दः †प्राप्तक्रमव्यावृत्त्यर्थः[4] । [5]वीप्सावचनं† देवताबहुत्वे[5] †प्राप्ते ॥ ७ ॥

[देवताविशेषस्य याज्यानुवाक्यानादेशे प्रागुक्तयोरेव तयोर्विधानम्]

अदृष्टादेशे नित्ये ॥ ८ ॥

देवता उक्ताः† । याज्यानुवाक्या[6] वक्ष्यन्ते। तासां दैवतेन व्यवस्थानम् । यस्या देवताया [7]याज्यानुवाक्ययोरादेशो न दृष्टः, नाम्नाते याज्यानुवाक्ये, सः[7] [8]अदृष्टादेशः। तस्मिन् अदृष्टादेशे सति नित्ये प्रागुक्ते †एव[8] [9]याज्यानुवाक्ये† भवतः[9] । यथा प्रथमायामग्नेः पवमानस्याम्नाते[10] । आग्नेयस्य तु अदृष्टादेशत्वात् पौर्णमासोक्ते[11] भवतः । द्विराम्नाते सति पूर्वोक्ते भवतः, यथा[12] मरुताम्[13] ऐन्द्रामारुतीम् (आश्रौ २, ११, १२) इत्यत्र। वरुणप्रघासेषु च तत्[14] ज्ञापितम् । अग्नीषोमीयस्योपांशुयाजस्य [15]याज्यानुवाक्ययोरनन्तरं तदुपदेशः[15] ॥ ८ ॥

[अग्न्याधेयाधिकारकथनम्]

अग्न्याधेयम् ॥ ९ ॥

अधिकारसूत्रमेतत् । यदित ऊर्ध्वं वक्ष्यामः, तदग्न्याधेयस्य विधानम् । संज्ञा चेयं वक्ष्यमाणस्य कर्मणः। अग्न्याधेयप्रभृतीन्याह[16] (आश्रौ १, १, २) इत्युक्ते एतद् भवति ॥ ९ ॥

---

१. तासु मै । २. नास्ति वि । ३-३. नास्ति ब[3,4] वा वि । †. एकैक ब[2] । ४-४. नास्ति ब[4] । †. प्राप्तव्या° ब[1,2] मै ; क्रमव्या° ब[3,4] वा वि । ५-५. नास्ति ब[4] वि । †. °चनाद् ब[1,3] वा मै ; °चनदे° ब[2] । ६-६. नुवाक्या ब[4] । †. तु. आश्रौ १, ६, १ । ७-७. नास्ति ब[4] । ८-८. नास्ति ब[2,4] । †. नास्ति ब[1] वि । ९-९. नास्ति ब[2] । †. °क्ये एव वि । १०. तु. आश्रौ २, १, २० । ११. तु. आश्रौ १, ६, १ । १२. नास्ति मै । १३. मारुतीम् ब[1] मै । १४. त ब[1,3] वा वि ; न ब[2] । १५-१५. °न्तरादुपदेशः मै ; तु. आश्रौ १, ६, १ । १६. °प्रभृति ब[1] मै ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[अग्न्याधेयार्थं नक्षत्रषट्कनिरूपणम्]

कृत्तिकासु रोहिण्यां मृगशिरसि फल्गुनीषु विशाखयोरुत्तरयोः प्रोष्ठपदयोः ॥ १० ॥

अग्न्याधेयं कृत्तिकादिषु षट्सु नक्षत्रेषु भवति। 'उत्तरयोरिति वचनात्[१] पूर्वयोर्न भवति। तन्नक्षत्रैश्चन्द्रमा यदा युक्तः स्यादिति ॥ १० ॥

[पूर्वोक्तनक्षत्रेषु अन्यतमस्य विधानम्]

एतेषां कस्मिंश्चित् ॥ ११ ॥

एतेषां[२] नक्षत्राणां कस्मिंश्चिदन्यतमे नक्षत्रे ॥ ११ ॥

[ब्राह्मणस्याग्न्याधेयकालनिरूपणम्]

वसन्ते पर्वणि ब्राह्मण आदधीत ॥ १२ ॥

वसन्ते ऋतौ पर्वणि अमावास्यायां पौर्णमास्यां वा[३] ब्राह्मणो, न[४] क्षत्रियो न[५] वैश्यः, आदधीत अग्नीन् धारयति। एतेषां[६] कस्मिंश्चिद् इति प्राप्तमपि[६] पुनरुच्यते, उत्तरेषु योगेषु प्राप्त्यर्थम्। अन्यथा[७] इहैव स्यान्नोत्तरेषु। ब्राह्मणग्रहणं क्षत्रियादिनिवृत्त्यर्थम्[८]। अन्यथा इमे सर्वे कालाः क्षत्रियादीनामेव स्युः ॥ १२ ॥

[क्षत्रियवैश्योपक्रुष्टानामग्न्याधेयकालनिरूपणम्]

ग्रीष्मवर्षाशरत्सु क्षत्रियवैश्योपक्रुष्टाः ॥ १३ ॥

ग्रीष्मश्च वर्षाश्च शरच्च ग्रीष्मवर्षाशरदः त्रय ऋतवः। [९]तेषु ऋतुषु एतेषां[९] कस्मिंश्चिन्नक्षत्रे पर्वणि च क्षत्रियवैश्योपक्रुष्टाः आदधीरन्। क्षत्रियश्च वैश्यश्च उपक्रुष्टश्च क्षत्रियवैश्योपक्रुष्टाः[१०]। [११]उपक्रुष्टो† रथकारो भवति। वैश्यः सन् रथकारवृत्त्या जीवति। एतेषामानन्तर्येण योगः, ग्रीष्मे क्षत्रियाः, वर्षासु वैश्याः[११], शरद्युपक्रुष्टाः[१२] ॥ १३ ॥

१-१. °रयोर्वच° ब[3,4]। २. तेषां मूको। ३. नास्ति ब[3,4] वा वि। ४. नास्ति ब[1] वि मै। ५. नास्ति ब[1,3,4] मै। ६. प्राप्तमिति तद् मै। ७. नास्ति मै। ८. °दिविवक्षार्थम् ब[2-4] वा वि; °दिव्यावृत्त्यर्थम् मै। ९-९. ते च त्रिषु एतेषु मै। †. तेषां ब[2-4]। १०. क्षत्रिय ब[4]। ११-११. नास्ति ब[3,4] वा वि। †. नास्ति ब[2]। १२. नास्ति ब[4]।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[आपदि आधानपक्षे कालनियमाभावकथनम्]

यस्मिन् कस्मिंश्चिदृतावादधीत ॥ १४ ॥

[1]उक्तः सर्ववर्णानाम् ऋतुनियमः। इदानीं सर्ववर्णानामनियमो विधीयते इति† विकल्पः[1]। [2]यस्मिन् कस्मिंश्चिदृतावादधीत। एतेषां †कस्मिंश्चिन्नक्षत्रे। पर्वणि-इत्यनुवर्तमाने† अयमपरः कल्पः[2]। श्रुत्यन्तरेऽप्येवम्। यदेवैनं श्रद्धोपनमेदथादधीत (बौश्रौ २, १२ : १६) इति[3]। तदेवोक्तमाचार्येण ॥ १४ ॥

[सोमेन यक्ष्यमाणस्यर्तुनक्षत्रनियमाभावकथनम्]

सोमेन यक्ष्यमाणो नर्तुं पृच्छेन्न नक्षत्रम् ॥ १५ ॥

ज्योतिष्टोमेन यक्ष्यमाणो भवति यः स न च ऋतुं पृच्छेन्न च नक्षत्रं पृच्छेत्। यस्मिन् कस्मिंश्चिदृतौ यस्मिन् कस्मिंश्चिन्नक्षत्रे पर्वणि दीक्षाकाले[4] च तदर्थमाधानं कृत्वा सोमेन यजेत। सर्ववर्णानामेतदविशेषवचनात्[5]। श्रुत्यन्तरेऽप्येवम्—यदेवैनं यज्ञ उपनमेदथाऽऽदधीत सैवास्यर्द्धिः (तैब्रा १, १, २, ८) इति। सोमनिमित्ते आधाने नर्तुं पृच्छेन्न नक्षत्रम् इति वचनाद्[6] अन्यत्र ऋतुनक्षत्रे पृच्छेदिति अर्थादापन्नं[7] भवति। तस्मादुक्तेभ्योऽन्येष्वपि ऋतुषु नक्षत्रेषु चाधानं[8] भवतीति दर्शयति—यथा हस्तादिषु[9] काम्यं दृष्टमाधानम्। यथा[10] शिशिरः सार्ववर्णिकः (आपश्रौ ५, ३, २०) इति च। यथा [11]वर्षा रथकारस्य शरद् वैश्यस्य[11] (आपश्रौ ५, ३, १८) इति च ॥ १५ ॥

[अश्वत्थाच्छमीगर्भादरण्याहरणविधिः]

अश्वत्थाच्छमीगर्भादरणी आहरेदनवेक्षमाणः ॥ १६ ॥

अश्वत्थो वृक्षः। [12]शमी च[12] शमीगर्भः शम्यामुत्पन्नो योऽश्वत्थः, तस्माद् अश्वत्थात्। अरणिश्च अरणिश्च अरणी, उत्तराऽधरा च। आहरेत् आनयेद् यजमानः अनवेक्षमाणः[13]। आहरन् अश्वत्थं नावेक्षते[14] ॥ १६ ॥

१-१. नास्ति ब[4]। †. वेति ब[1,3] वा वि ; चेति ब[2]। २-२. नास्ति ब[2]। †-†. कस्मिन्नक्षत्रे इत्य° मै। ३. तु. तैब्रा १, १, २, ८। ४. दीक्षाधाने ब[3,4]। ५. सर्वपर्वणामेत° मै ; सर्ववर्णानामेत° ब[1,2]। ६. °चनम् ब[3,4] वा वि। ७. अर्थो मै। ८. वा आधानं ब[1,2] मै। ९. नक्षत्रादिषु ब[1] मै। १०. तथा ब[1-4] वा ; तथा तथा मै। ११-११. शरद् वैश्यस्य वर्षा रथकारस्य इति मुद्रितपाठः। १२-१२. नास्ति ब[1,2]। १३. अनपेक्षमाणः मूको। १४. नापेक्ष्यन्ते ब[2] ; नोपेक्ष्यन्ते ब[2] ; नोपेक्ष्य मै ; तमैक्षते ब[3,4] ; नामेक्षत वा ; क्षते बि।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[अग्न्याधेयस्य पूर्णाहुत्यन्तस्य कर्तव्यत्वविधानम्]

यो अश्वत्थः शमीगर्भ आरुरोह त्वे सचा। तं त्वा हरामि ब्रह्मणा यज्ञियैः केतुभिः सह (तैब्रा १, २, १, ८) इति। पूर्णाहुत्यन्तमग्न्याधेयम् ॥ १७ ॥

यो अश्वत्थः इत्यनेन मन्त्रेणाहरति । अप्यशमीगर्भाद्[1] इत्यन्येषाम् । इदं याजमानमिह विधीयते अरण्योः जीर्णयोर्नष्टयोर्वा[2] एतेनाऽऽहरणार्थम् । पूर्णाहुत्यन्तमग्न्याधेयम् । पूर्णाहुतिः आध्वर्यवे सिद्धा । पूर्णाहुतिः अन्तो यस्य कर्मणस्तत् पूर्णाहुत्यन्तम् । [3]अरण्याहरणादि पूर्णाहुत्यन्तं[3] यत् कर्म तद् अग्न्याधेयं पुनराधेयं वा (आश्रौ ३, १२, २९) इत्युक्ते एतत् प्रत्येतव्यम् ॥ १७ ॥

[इष्टिषु इष्ट्यन्तमग्न्याधेयमिति कथनम्]

यदि त्विष्टयस्तनुयुः ॥ १८ ॥

यदि[4] तु वक्ष्यमाणा इष्टयस्तनुयुः विस्तारयेयुः[5] कुर्युः । [6]इष्टिषु क्रियमाणासु इष्ट्यन्तमग्न्याधेयं भवति[6] । यदीति[7] वचनात् तु[8] कृताकृता[9] इष्टयोऽध्वर्यूणाम् । तु-शब्दः[10] पूर्णाहुत्यन्तव्यावृत्त्यर्थः[11] । क्रियमाणास्विष्टिषु इष्ट्यन्तमेव न पूर्णाहुत्यन्तम् ॥ १८ ॥

[प्रथमायामिष्टौ अग्निपवमानाग्निसंज्ञे द्वे देवते]

प्रथमायामग्निरग्निः पवमानः ॥ १९ ॥

इष्ट्यन्ते सति इष्टयो वक्ष्यन्ते । तत्र [12]प्रथमाया अधिकारः[12] । प्रथमायाम् इष्ट्याम् अग्निर्देवता अग्निः पवमान इति च । देवतागमे नित्यानामपायः (आश्रौ २, १, २२) इति[13] नित्यानां स्थाने एते भवतः ॥ १९ ॥

---

१. अथ शमी° मूको ; तु. आपश्रौ ५, १, ३ । २. जीर्णयोर्वा ब[1] ; जीर्णयोर्नष्टो वा ब[2] ; जीर्णयोर्वापि ब[3,4] ; जीर्णयोर्नयोष्टावपि वा ; नास्ति वि । ३-३. नास्ति ब[2] मं । ४. यत् ब[3,4] वा । ५. विस्तरयेयुः ब[1,2] मे ; विस्तरयेयुः कुर्युः ब[3,4] वा ; नास्ति मं । ६-६. नास्ति ब[1,2] मं । ७. यदिति ब[3,4] वा वि ; यदि ब[1] । ८. नास्ति ब[1-4] मं वा । ९. कृतः ब[2] ; कृता ब[3,4] ; प्राक्तना वा ; नास्ति मं । १०. °शब्दात् ब[1] । ११. °व्यावृत्तिः ब[1,2] मं । १२-१२. नास्ति ब[1] । १३. नास्ति मूको ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

आश्वलायन
Digitized by Madhuban Trust

तयोर्याज्यानुवाक्या:—

[अग्निपवमानाग्न्योर्याज्यानुवाक्याविधानम्]

अग्न आयूंषि पवसेऽग्ने पवस्व स्वपाः ॥ २० ॥

अग्न आयूंषि पवसे (ऋ ९, ६६, १९), अग्ने पवस्व स्वपाः (ऋ ९, ६६, २१) इति, [1]दैवतेन व्यवस्था: (आश्वौ ७, १, ९) इति वचनादग्नेः पवमानस्य एते भवतः। आग्नेयस्य अदृष्टादेशत्वात् अग्निर्मूर्धा (ऋ ८, ४४, १६), अयमग्निः सहस्रिणः (ऋ ८, ७५, ४) इति[1] गायत्र्यौ सर्वयाज्यानां गायत्रत्वात्[2] ॥ २० ॥

[स्विष्टकृतो याज्यानुवाक्ययोः संयाज्यासंज्ञाकरणम्]

स हव्यवाळमर्त्योऽग्निर्होता पुरोहित इति स्विष्टकृतः संयाज्ये इत्युक्ते सौविष्टकृती प्रतीयात् ॥ २१ ॥

स हव्यवाळमर्त्यः (ऋ ३, ११, २), अग्निर्होता पुरोहितः (ऋ ३, ११, १) इति [3]स्विष्टकृतो याज्यानुवाक्ये । शेषं पौर्णमासेन । समाप्ता प्रथमा । संयाज्ये इत्युक्ते† सौविष्टकृती स्विष्टकृति भवे सौविष्टकृती याज्यानुवाक्ये प्रतीयात् जानीयादित्यर्थः । अग्निमीळे पुरोहितम् (ऋ १, १, १) इति[3] संयाज्ये (आश्वौ २, १, २९), इमो अग्ने (ऋ ७, १, १८) इति संयाज्ये (आश्वौ २, १, ३०) इति । [4]संयाज्ये इति[4] श्रुतिविहिता[5] संज्ञा । सा प्रयुज्यते लाघवार्थं ज्ञानार्थं[6] च ॥ २१ ॥

[सर्वत्र देवताविशेषनिर्देशे प्रकृतदेवतानामपगमः]

सर्वत्र देवतागमे नित्यानामपायः ॥ २२ ॥

सर्वत्र आधानेष्टिषु अन्यत्रापि अन्यास्वपीष्टिषु देवतागमे[7] देवतागमादेशे नित्यानां पौर्णमासदेवतानाम् अपायः [8]अपगमनम्† उद्धारः[8] ॥ २२ ॥

१-१. नास्ति ब[3,4] । २. तु. आश्वौ १, ६, १ दैवतातम् ।
३-३. नास्ति वा । †. इत्येवमुक्ते ब[2,3] वि ; इत्युक्ते संयाज्ये इत्येवमुक्ते ब[1,4] मै ।
४-४. नास्ति ब[1,2] मै । ५. विहिता ब[3,4] वा वि ; तु. ऐब्रा १, ५ ।
६. ज्ञापनार्थं ब[1] । ७. नास्ति ब[4] । ८-८. नास्ति ब[4] ।
†. अथ निगमनम् ब[3] ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

कासाम् उद्धारः ?—

[स्विष्टकृतमाज्यभागौ चान्तरा यष्टव्यदेवतास्थाने निर्देशविशिष्टदेवतादेशः]

[1]याः स्विष्टकृतमन्तराऽऽज्यभागौ च तास्तत्स्थाने ॥ २३ ॥

याः स्विष्टकृतम् अन्तरा‡ आज्यभागौ च अन्तरा मध्ये इज्यन्ते तासामपायः[1], [2]नाऽऽज्यभागस्विष्टकृत्प्रयाजाऽनुयाजपत्नीसंयाजदेवतानाम्[2] । [3]या आगमिष्यद्-देवताः तास्तत्स्थाने तासां स्थाने नित्यानां[3] स्थाने ता भवन्ति । एकाऽपि सर्वासां स्थाने भवति समानजातित्वात्[4] । अग्न्याधेयाधिकारात् सर्वत्रेत्युच्यते [5]अन्यास्व-पीष्टिषु प्राप्त्यर्थम् । पौर्णमासेनातिदेशान्नित्यानामागमिकानां च समुच्चये प्राप्ते देवतागमे नित्यानामपाय इत्युच्यते[5] । [6]सर्वासां देवतानामुद्धारे प्राप्ते इष्टाना-मुद्धारार्थम् याः स्विष्टकृतमन्तराऽऽज्यभागौ च इत्युच्यते[6] । [7]†एकस्या आगमे† एकस्या ‡एव नित्यायाः‡ अपायः, द्वयोरागमे द्वयोरेव प्राप्तःϕ । ¶तास्तत्स्थाने इति वचनादेकस्या µअप्यागमे[7] सर्वासां नित्यानामपायः समानजातित्वात् ॥ २३ ॥

[समानजातिधर्मातिदेशे एकस्य स्थाने बहूनां बहूनां च स्थाने एकस्यादेशो भवति]

एष समानजातिधर्मः ॥ २४ ॥

एष उक्तः तास्तत्स्थाने[8] इति, [9]एकाऽपि देवता बह्वीनां स्थाने भवतीति एष समानजातीयानां धर्म इह उक्तः सर्वत्र भवति[9] । पञ्चदशानां [10]सामिधेनीनां स्थाने एकाऽपि सामिधेनी भवति । पित्र्यायां तिस्रोऽपि† भवन्ति । उपसदि ‡समानजातिदेवतासामिधेनी[10] [11]जातिः । जातेरेव स्थाने[11] आदिष्टां कृत्स्ना-मुद्धरति । एष हि समानजातीयानां धर्मः ॥ २४ ॥

१-१. नास्ति ब[4] । ‡. नास्ति ब[1,2] मै वा वि । २-२. नाज्यभागे (°ग वा वि मै ; °गं ब[3] ; भः ब[4]) स्विष्टकृत्प्रयाजानामनुयाज (°त्प्रयाजानू ⌊°नु ब[4] वा⌋ याज ब[3,4] वा ; °त्प्रयाजा वि) पत्नीसंयाज (°जे ब[1,4] ; °जा ब[2]) देवतानाम् मूको । ३-३. नास्ति ब[3,4] । ४. °तित्वात् । एष समानधर्मः मै । ५-५. नास्ति ब[4] । ६-६. नास्ति ब[2,4] । ७-७. नास्ति वा । †-†. एकस्यागमे (°स्य आगमे ब[2]) ब[1-3] वि । ‡-‡. एवम-नित्यायाः ब[2-4] वि । ϕ. प्राप्तं ब[2-4] वि ; प्राप्त मै । ¶. ताः स्वस्थाने ब[2] मै ; °त्स्थान एष ब[1] । µ. आगमे मै ; गमे ब[2] । ८. ताः स्वस्थाने ब[2] मै । ९-९. नास्ति ब[3,4] । १०-१०. सामिधेनी ब[1] । †. तिस्रो ब[3,4] मै वा वि । ‡. समानदे° ब[2] मै । ११-११. जातिजातेरस्थाने (°नं मै) ब[2] मै ; जातिस्थाने स्याते ब[3,4] ; जातिजाते स्थाने वा वि ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

आज्याघेयम्
Digitized by Madhuban Trust

[द्वितीयस्यामिष्टौ आज्यभागदेवतायाज्यानुवाक्यासंयाज्याकथनम्]

द्वितीयस्यां वृधन्वन्तौ । अग्निः पावकोऽग्निः शुचिः स नः पावक दीदिवोऽग्ने पावक रोचिषाऽग्निः शुचिव्रततम उदग्ने शुचयस्तव । साह्वान् विश्वा अभियुजोऽग्निमीळे पुरोहितमिति संयाज्ये ।। २५ ।।

इदानीं [1]द्वितीयस्या इष्टचा[1] [2]अधिकारः । वृधन्वन्तौ द्वितीयस्याम् इष्टचां[2]† वृधन्वन्तौ आज्यभागौ भवतः आमावास्यप्राप्त्यनुग्रहार्थम् । पौर्णमासमामावास्यं वैराजम्[3] इति सर्वाणि तन्त्राणि अग्न्याधेये क्रियन्ते सर्वक्रत्वर्थत्वादग्न्याधेयस्य । अग्निः पावक इति देवता, अग्निः शुचिरिति च । तयोर्याज्यानुवाक्याः । स नः पावक दीदिवः (ऋ १, १२, १), अग्ने पावक (ऋ ५, २६, १) इत्यग्नेः पावकस्य याज्यानुवाक्ये । अग्निः शुचिव्रततमः (ऋ ८, ४४, २१), उदग्ने शुचयस्तव (ऋ ८, ४४, १७) इति अग्नेः शुचेः नित्यानां देवतानां स्थाने । साह्वान् विश्वा अभियुजः (ऋ ३, ११, ६), अग्निमीळे पुरोहितम् (ऋ १, १, १), इति संयाज्ये । संयाज्ये[4] इत्युक्ते सौविष्टकृती याज्यानुवाक्ये भवत इत्युक्तम्[5] । शेषं पौर्णमासेन । व्याख्याता[6] द्वितीया[7] ।। २५ ।।

[तृतीयस्यामिष्टौ सामिधेनीद्वयवर्धनम्]

तृतीयस्यां सामिधेन्यावावपते प्रागुपोत्तमायाः पृथुपाजा अमर्त्य इति द्वे ।। २६ ।।

तृतीयस्याम् इष्टचां विधिरुच्यते । सामिधेन्यावावपते । पञ्चदश प्राप्ताः[8] सप्तदश विधीयन्ते । सामिधेन्यौ ऋचौ आवपते[9] वर्धयते । कस्मिन्[10] देशे । प्रागुपोत्तमायाः । [11]उत्तमायाः† समीपे उपोत्तमा[11] । उपोत्तमायाः प्राक् पुरस्तात् । समिद्धो अग्न आहुत (⌊आश्रौ १, २, ७⌋ ऋ ५, २८, ५) इत्येतस्याः पुरस्तात् ।

१-१. °यस्यामिष्टचाम् (°ष्टचा ब[2]) मूको । २-२. नास्ति ब[2]; अधिकारः । वृधन्वन्तौ वि । ३. तु. आश्रौ २, १४, १३-१६ । ४. नास्ति ब[1,2] । ५. तु. आश्रौ २, १, २१ । ६. °तं मै । ७. °यं मै । ८. मासाः ब[1] । ९. आधापने ब[2]; आह्वयते ब[3,4]; आवप्यते; आधयते वा वि । १०. तस्मिन् मै । ११-११. समीपे ब[1] । †. उपोत्तमायाः ब[2-4] मै वा वि ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अन्ते प्राप्ते[1] एतद् विधीयते। पृथुपाजा अमर्त्यः (ऋ ३, २७, ५; ६) इति एते[2] द्वे ऋचौ। पादग्रहणादेका प्राप्ता, सामिधेन्याविति [3]द्विवचनात् तस्या[3] एवाभ्यासे प्राप्ते [4]द्वे इत्युच्यते[4] ॥ २६ ॥

[तत्र धाय्याऽऽज्यभागयाज्यानुवाक्यातद्विकल्पकथनम्]

धाय्ये इत्युक्ते एते प्रतीयात् पुष्टिमन्तावग्निना रयिमश्नवद् गयस्फानो अमीवहेति । अग्नीषोमाविन्द्राग्नी विष्णुरिति वैकल्पिकानि ॥ २७ ॥

[5]यत्र धाय्ये इत्याह[5] तत्र पृथुपाजा अमर्त्यः (ऋ ३, २७, ५; ६) इत्येते ऋचौ प्रतीयात् जानीयात्। यथा दीक्षणीयायां धाय्ये (आश्वौ ४, २, १) इति। पुष्टिमन्तौ। पुष्टिमन्तावाज्यभागौ भवतः। [6]वार्त्रघ्नौ प्राप्तौ। अग्निना रयिमश्नवद् (ऋ १, १, ३), गयस्फानो अमीवहा (ऋ १, ९१, १२) इति अनुवाक्ये। नित्ये याज्ये भवतः[6]। अग्नीषोमाविन्द्राग्नी विष्णुः इति एतानि त्रीणि हवींषि वैकल्पिकानि। विकल्पेन क्रियमाणानि वैकल्पिकानि[7]। क्रियन्ते वा न क्रियन्ते[8] वा इत्यर्थः। एतेषामुक्ता[9] याज्यानुवाक्या दर्शपौर्णमासयोः[10] ॥ २७ ॥

[अदितिनामिकेष्टिः तद्याज्यानुवाक्याविधानम्]

अदितिः ॥ २८ ॥ उत त्वामदिते महि महीमू षु मातरं सुव्रताना-मृतस्य पत्नीमवसे हुवेम। तुविक्षत्रामजरन्तीमुरूचीं सुशर्माणमदितिं सुप्रणीतिम् ॥ २९ ॥

अदितिः नित्या देवता ॥ २८ ॥

तस्याः[11] उत त्वामदिते महि (ऋ ८, ६७, १०) इत्यनुवाक्या। महीमू षु (तु. अथर्व ७, ६, २) इति यथासमाम्नाता याज्या ॥ २९ ॥

---

१. नास्ति ब[3'4]। २. इति ब[2-4] मै वा वि। ३-३. वचनान्त (°त वा) स्या ब[3'4] वा; द्विवचनानान्त (°त वि) स्या ब[1] वि। ४-४. नास्ति मूब[1]। ५-५. धाय्य इति यत्राह ब[2-4] मै वा वि। ६-६. नास्ति मै। ७. नास्ति ब[1] मै। ८. नास्ति मै। ९. तु. आश्वौ १, ६, १। १०. दर्शपूर्ण° ब[1'3'4] वा। ११. अस्याः ब[3'4]।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

आत्मालोचन
Digitized by Madhuban Trust

[तत्र संयाज्याधाय्यानिरूपणम्]

प्रेद्धो अग्न इमो अग्न इति संयाज्ये। विराजावित्युक्त एते प्रतीयादिति तिस्रः ॥ ३० ॥

प्रेद्धो अग्ने (ऋ ७, १, ३), इमो अग्ने (ऋ ७, १, १८) इति संयाज्ये स्विष्टकृतो याज्यानुवाक्ये । [१]शेषं पौर्णमासेन । व्याख्याता तृतीया इष्टिः । विराजावित्युक्ते †एते प्रतीयात्† । यत्र विराजावित्याह तत्र एते स्विष्टकृतो याज्यानुवाक्ये[१] प्रतीयात्[२] । यथा दीक्षणीयायां धाय्ये विराजौ (आश्रौ ४, २, १) । इति तिस्रः । एतास्तिस्र इष्टयो व्याख्याताः । तिस्र एवैताः किमर्थं पुनः तिस्र इत्युच्यते[३] । नियमार्थम् । तिस्र एव भवन्ति ॥ ३० ॥

[आद्योत्तमे इष्टी]

आद्योत्तमे वैव स्याताम् ॥ ३१ ॥

[४]आद्योत्तमे वा[४] इत्युक्ते द्वितीया इष्टिर्न लुप्यते । आद्यायामेव तस्या हविषी[५] क्रियेते । एवं तिस्रः । वेति विकल्पार्थम् । एव इत्यवधारणार्थम् । द्वे एव न तिस्रः । स्याताम् इति स्वतन्त्रे स्यातामित्यर्थः ॥ ३१ ॥

[आद्येष्टिविकल्पः]

आद्या वा ॥ ३२ ॥

[६]आद्या †वा इष्टिः अनुनिरुप्यते । तथा सत्यपि आद्याया यत्तन्त्रं तदेव भवति । ‡द्वितीयायास्तृतीयायाश्च‡ तन्त्रम्[६] आद्यायामेव[७] स्यात्[८] । [९]φन तिस्रः । आद्यायामेवφ सर्वाणि हवींषि¶ निरुप्यन्ते[९]⁂ ॥ ३२ ॥

[आद्यायां धाय्याविराजौ]

तथा सति तस्यामेव धाय्ये विराजौ ॥ ३३ ॥

१-१. नास्ति मैं । †-†. नास्ति ब[१,२] । २. प्रतीये (°य मैं) ते ब[१,२] मैं । ३. °च्यन्ते मैं वा वि । ४-४. नास्ति मैं । ५. हवींषि ब[१,३,४] वि । ६-६. नास्ति वा वि । †. वा द्वितीया वा ब[१-४] मैं । ‡-‡ द्वितीयायास्तन्त्रं ब[१,३,४] ; द्वितीयायां (°याः मैं) सूत्रम् ब[२] मैं । ७. नास्ति वि । ८. नास्ति ब[४] वि । ९-९. नास्ति ब[४] । φ-φ. मेव वि । ¶. हवींषीति वा । ⁂. विकल्पते वा वि ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

¹तथा सति¹ ²यथा† उक्तम् ‡आद्यायाम् एव तत्तथा‡ स्याविति। आद्यायामेव² सर्वेषु हविष्षु क्रियमाणेषु तथा सति समासे सति तस्यामेव प्रथमायामेव धाय्ये भवतः, ³वैराजे च संयाज्ये। आद्यायास्तन्त्रे† प्राप्ते वैराजं विधीयते। तथा सतीत्यनुच्यमाने‡ असमासेऽपि आद्यायां वैराजं नैयमिकं स्यात्। एते एव धाय्ये भवतः³। एवेति⁴ अवधारणे यत् तृतीयस्यामुक्तं तत् आद्यायामेव तन्त्रं समासे उक्तम्। यद्येतानि हवींषि नानातन्त्राणि भवन्ति तदा तस्यामिष्टौ यद्धविस्तस्यां तदेव ⁵तन्त्रं, साधारणत्वात्⁵। आग्नेयस्याऽग्नीषोमयो-रिन्द्राग्न्योर्विष्णोरित्येतेषां नानातन्त्राणां सतां पौर्णमासिकमेव, ⁶सामान्यविधानात्। सन्निधानं बलीयः⁶॥ ३३॥

[वैराजतन्त्राया इष्टेर्ज्ञानम्]

इतिमात्रे विकारे वैराजतन्त्रेति प्रतीयात् ॥ ३४॥

धाय्ये ⁷विराजौ इत्यधिकृतम्, तन्निर्दिशति⁷। इति एतावन्-मात्रे ⁸एतावत्-प्रमाणे विकारे⁸ पौर्णमासादन्यद्⁹ विकारो भवति। विकारे क्रियमाणे तस्यामिष्टौ धाय्ये भवतः। विराजौ संयाज्ये भवतः। सा इष्टिर्वैराजतन्त्रा भवतीति। यथा पशुतन्त्रे¹⁰ नित्ये धाय्ये, तथा¹¹ वैराजं वक्ष्यति¹²— धाय्ये त्वेवैके (आश्रौ २, १४, १७) इति। संयाज्यमात्रेऽपि¹³ भवति। यथा गृहमेधीये¹⁴। अश्वमुत्स्रक्ष्यन् इष्टिस्याम् (आश्रौ १०, ६, २) इत्यत्र च¹⁵॥ ३४॥

[आधानानन्तरमग्नेर्द्वादशरात्रिपर्यन्तमजस्रं धारणम्]

आधानाद् द्वादशरात्रमजस्राः ॥ ३५॥

१-१. नास्ति ब⁴। २-२. नास्ति ब³'⁴। †. वृथा वा वि। ‡-‡. आद्या वा एतत् वा वि; °एवं तत्तथा° मै। ३-३. नास्ति ब¹। †. °द्याया (°याः मै) स्वतन्त्रे ब² मै। ‡. °त्यनूच्य° ब²-⁴ वा। ४. नास्ति मूको। ५-५. तन्त्र (°न्त्रा वा) साधा° ब² मै वा; समाधा° वि; नास्ति ब⁴। ६-६. सामान्यविधिना संविधानं बलीयः ब² मै। ७-७. °जावित्यभिमतं निर्दि° मै; °कृतं निर्दि° ब¹'² । ८-८. °माणाधिकारात् ब¹'² मै। ९. °दन्येत्र वि ब¹। १०. पशुबन्धे ब³'⁴। ११. तथापि ब¹-⁴ मै वि। १२. वक्ष्यामीति ब³'⁴ वा वि। १३. संयाज्ये मात्रेऽपि ब¹'³'⁴ वा वि; संयाज्यमात्रोऽपि मै। १४. तु. आश्रौ २, १८, ५। १५. वा ब¹; तु. आश्रौ १०, ६, ४।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

उक्तमाधानं पूर्णाहुत्यन्तम्[१] इष्टयन्तं वा। तस्माद् आधानाद् द्वादशरात्रम् द्वादश रात्रीः अजस्राः नित्याः अनुपशान्ता अग्नयो[२] वा[३] ॥ ३५ ॥

[गतश्रीसंज्ञकस्य यजमानस्य यावज्जीवमग्निधारणम्]

अत्यन्तं तु गतश्रियः ॥ ३६ ॥

उत्तरविधिद्वयविवक्षार्थमिदमुच्यते। अनुच्यमाने तु आधानादेव[४] अजस्रः[५] उत्सर्गो[६] वा स्यात्। अत्यन्तम् अतिशयेन अन्तम् अत्यन्तम्। यावज्जीवं तु अजस्रा अग्नयो भवन्ति। तु-शब्दो द्वादशरात्राऽधिकारव्यावृत्त्यर्थः। गतश्रियः[७]। गतश्रीर्यो यजमानस्तस्य गतश्रियो यजमानस्य यावज्जीवम् अजस्रा भवन्ति। त्रयो वै गतश्रियः शुश्रुवान् ग्रामणी राजन्यः (तैसं २, ५, ४, ४) इति विज्ञायते[८]। शुश्रुवान् श्रुतवान् ब्राह्मणो वेदत्रयमधीतवान्। ग्रामणीः वैश्यः ग्रामे यः प्रधानः। राजन्यः राज्यं प्राप्तः। आयुष्कामस्याऽपि अत्यन्तमजस्राः (?) इत्यन्येषाम्[९] ॥ ३६ ॥

॥ [१०]इति प्रथमः खण्डः[१०] ॥

---

१. तु. आश्रौ २, १, १७। २. त्रेताग्नयः ब[१]। ३. नास्ति ब[२-४] वा वि। ४. आधानाद्येव मूको। ५. अजस्रः ॥ इति द्वितीये प्रथमा खण्डिका ॥ उत्सर्गेऽपराह्णे गार्हपत्यं ... ... ज्वलन्तमुद्धरेत् ॥ मै ; अजस्राः ब[१,३,४] वा वि। ६. उत्सर्गः ब[३,४] वा वि। ७. नास्ति ब[२-४] मै वा वि। ८. नास्ति ब[३,४]। ९. इत्येतेषाम् ब[३,४] ; इत्येषाम् वा वि। १०-१०. नास्ति मै।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ द्वितीयेऽध्याये द्वितीयः खण्डः

[गार्हपत्याज्ज्वलदाहवनीयोद्धरणम्]

[1]उत्सर्गेऽपराह्णे गार्हपत्यं प्रज्वल्य दक्षिणाग्निमानीय विट्कुलाद् वित्तवतो वैकयोनय इत्येके ध्रियमाणं वा प्रज्वल्यारणिमन्तं वा मथित्वा गार्हपत्यादाहवनीयं ज्वलन्तमुद्धरेत्[1] ॥ १ ॥

आधानाद् द्वादशरात्रमजस्राः, अत ऊर्ध्वमपि गतश्रियः अजस्रा एव। अतोऽन्यस्य उत्सर्गः। एकस्याऽग्नेर्द्वयोर्वा। तस्मिन् उत्सर्गे सति अग्न्युद्धरणविधानं वक्ष्यते। अपराह्णे अह्नश्चतुर्थभागे[2] गार्हपत्यं प्रज्वल्य गार्हपत्य एव अजस्रो भवति। तं प्रज्वल्य[3]। प्रज्वलनमिष्टम्[4]। अन्यथा [5]संबोध्येति ब्रूयात्। तत्-प्रज्वलनेन[5] दक्षिणाग्निं प्रज्वल्य। यद्यग्न्याधेये आहितो[6] भवति, तं दक्षिणाग्निम् आनीय, आहवनीयमुद्धरेद् इत्यध्याहर्तव्यं, साकाङ्क्षत्वाद् वाक्यस्य। आनयनात् तस्य दक्षिणाग्निरिति संज्ञा कृता। आनीयते[7] विट्कुलात्। विट्कुलं वैश्यकुलम्। वित्तवतो वा। वित्तमस्यास्तीति वित्तवान् तस्माद् वित्तवतः कुलाद् वा[8]। एकयोनय इत्येके। एका योनिर्येषां त इमे एकयोनयः। गार्हपत्यादाहवनीयं यतस्त्वानयेद् गार्हपत्याद् दक्षिणाग्निमाहवनीयं च। एके आचार्याः तथैवाऽऽहिता भवन्ति तेषाम् ध्रियमाणं वा। [9]आधानप्रभृति धार्य एव वा भवति[9]। ध्रियमाणं वा दक्षिणाग्निं प्रज्वल्य, प्रज्वलनमिष्टं विधीयते, प्रज्वल्याऽऽहवनीयमुद्धरेदित्यध्याहर्तव्यं[10] साकाङ्क्षत्वात्। अरणिमन्तं वा मथित्वा[11]। अरणी अस्य विद्येते सः अरणिमान् दक्षिणाग्निः, तम् अरणिमन्तं वा दक्षिणाग्निं मथित्वा आहवनीयमुद्धरेदित्यध्याहर्तव्यं साकाङ्क्षत्वात् यदि मथित्वाऽऽहितो भवति। तत्र एवमन्यतमेन[12] कल्पेनाग्निं[13] प्रज्वल्य[14] गार्हपत्यादाहवनीयसंज्ञम् अग्निं प्रज्वलन्तमेव[15] उद्धरेत् उद्गृह्य[16] हरेत् प्राचीं दिशम्। दक्षिणाग्न्यधिकारात् पुनर्गार्हपत्यग्रहणम्। इह

१-१. नास्ति मै। २. °र्थे भागे ब[3,4] वा वि; °श्चतुर्भागे ब[2]। ३. प्रज्वाल्य ब[3,4]। ४. प्रज्वाल° मै। ५-५. संबोध्यति वचनात् प्रज्व (°ज्वा ब[3]) ल° ब[3,4]; °प्रज्वाल° वि। ६. आहुतो ब[1] मै। ७. नास्ति ब[1]। ८. वापि ब[2]। ९-९. नास्ति ब[3,4]। १०. प्रज्वाल्याह° मूको। ११. नास्ति ब[1,2] मै वा। १२. एषमन्य° ब[1]। १३. कल्पेनाहवनीयं ब[3,4]। १४. प्रज्वाल्य मै वा। १५. ज्वलन्त° ब[2-4] मै वा वि; प्रज्वालन्त° ब[1]। १६. उद्धृत्य मै।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

अग्निहोत्रहोत:
Digitized by Madhuban Trust

[1]'ज्वलन्तम् उद्धरेद्'[1] इति उक्त्वा 'पुनरुद्धरेदिति (तु. आश्रौ २, २, २) वक्ष्यति। तस्मात्तूष्णीमुद्धरणं सर्वार्थं दर्शयति। प्रवत्स्यद्यजमानादिषु उत्तरत्र सर्वत्रा-होमार्थमेव[3] ॥ १ ॥

[आहवनीयं प्रति मन्त्रपूर्वकमग्निप्रणयनम्]

देवं त्वा देवेभ्यः श्रिया उद्धरामीत्युद्धरेत् ॥ २ ॥

देवं त्वा देवेभ्यः इत्येतेन[4] यथासमाम्नातेन मन्त्रेण होमार्थमाहवनीयम् उद्धरेत्। पूर्वमुद्धरणममन्त्रं[5] सर्वार्थम् इत्युक्तम्। अथोद्धराहवनीयमित्यपराह्ण आह (ऐब्रा ५, २६) इत्युक्तं ब्राह्मणे। तद्यजमान आह यदि सन्निहितो भवति। नोक्तमाचार्येण, तथापि वक्तव्यमविरोधात् सर्वशाखाप्रत्ययत्वाच्च यजमानस्य ॥ २ ॥

उद्ध्रियमाण उद्धर पाप्मनो मा यदविद्वान् यच्च विद्वांश्चकार। अह्ना यदेनः कृतमस्ति किंचित् सर्वस्मान्मोद्धृतः पाहि तस्मादिति प्रणयेत् ॥ ३ ॥

उद्ध्रियमाण इत्येतेन[6] यथासमाम्नातेन[7] मन्त्रेण [8]आहवनीयं प्रणयेत् नयेदा-हवनीयायतनसमीपे[8] ॥ ३ ॥

[आहवनीयायतनेऽग्निनिधानम्]

अमृताहुतिममृतायां जुहोम्यग्निं पृथिव्याममृतस्य योनौ। तयाऽनन्तं काममहं जयानि प्रजापतिः प्रथमोऽयं जिगायाग्नावग्निः स्वाहेति निदध्यादादित्यमभिमुखः ॥ ४ ॥

अमृताहुतिम् इति एतेन स्वाहाकारान्तेन आहवनीयायतने अग्निं निदध्यात् स्थापयेत् आदित्यमभिमुखः यस्यां दिशि आदित्यो भवति प्रतीच्याम् अवान्तरदिशि[9] वा। तमभिमुखो [10]निदध्यात्। तदभये† निधत्ते‡ (ऐब्रा ५, २६) इति श्रुतिः। यज्ञ एव तत्ϕ स्वर्गे¶ लोके स्वर्ग* लोकं निधत्ते (ऐब्रा ५, २६) इति च श्रुतिः। तस्मादादित्यमभिमुख[10] इत्याह। होमन्यायेन[11] निदध्यात्। अमृतायां[12] जुहोमि[13]

१-१. तरेदिति ब[1]; तमुच्चरेदिति मै; नास्ति ब[2]। २. तमुच्चारेदिति ब[2]। ३. सर्वत्र समन्त्रहोमा° ब[1]; समन्त्रहोमा° ब[2] मै; सर्वत्र होमा° वा। ४. इति तेन मूको। ५. °रणमन्त्रं ब[1,2] मै; °रणं मन्त्रं ब[3,4] वि; पूर्ववदुद्धरणमन्त्रं वा। ६. इत्यनेन मै वि। ७. यथाम्नातेन ब[3,4]। ८-८. आहवनीयायतनसमीपे ब[2]। ९. °न्तरायां दिशि ब[3,4]। १०-१०. नास्ति वा। †. तन्मुखे ब[1]; तमुभये ब[2]; तमभिमुखो ब[3,4]; मुखो वि। ‡. निवर्त्त ब[2]। ϕ. उत् ब[2]; नास्ति ब[3,4] वि। ¶. सर्गे ब[2] मै। *. उत्सर्गं ब[2]; ११. होमं न्या° ब[2] मै वा वि। १२. अमृताहुतिममृतायां ब[3,4]। १३. जुहोति ब[2] मै।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

इति मन्त्रे[1] दर्शनात्। एते त्रयो मन्त्राः। त्रीणि कर्माणि उद्धरणं प्रणयनं निधानमिति ॥ ४ ॥

[एवं प्रातर्व्युष्टायामग्निनिधानम्]

एवं प्रातर्व्युष्टायां तमेवाऽभिमुखः ॥ ५ ॥

गार्हपत्यं प्रज्वल्य (आश्रौ २, २, १) इत्येवमादि यद्[2] उक्तो विधिः। एवं तेनैव विधिना प्रातःकाले[3] होमार्थं विहरेत्। रात्रेश्चतुर्थकालादि[4] आऽऽदित्यस्य प्रथमकालात् प्रातःकालो[5] भवति। तस्मिन् प्रणयने[6] प्राप्ते इष्टकालनियमो विधीयते—व्युष्टायाम्। व्युष्टायामेव विहरेत्। व्युष्टायाम् उषसि उदितायाम् उषसि तमेवाऽभिमुखो निदध्यात् [7]प्राच्यां दिशि अवान्तरदिशायाम्। यस्यां दिश्यादित्यो भवति। तमेवाऽभिमुखो निदध्यात्[7]। एवं प्रातरिति प्राप्तेऽपि पुनरुच्यते। तदानीमादित्यस्याभावाद् आदित्याऽभिमुख इत्येतस्याऽर्थाल्लोपः स्यात् ॥ ५ ॥

[प्रातर्व्युष्टायामग्निप्रणयनमन्त्रकथनम्]

रात्र्या यदेन इति तु प्रणयेत् ॥ ६ ॥

एवं प्रातर् इति यथाम्नाते प्राप्ते इदमारभ्यते[8]। अह्ना यदेनः (आश्रौ २, २, ३) इत्येतस्य स्थाने रात्र्या यदेनः इति ऊह्य[9] प्रणयेत्। तु-शब्दो विशेषणाऽर्थः[10]। अयं तु विशेषः, अन्यत् समानमिति। तु-शब्देऽक्रियमाणे एतावानेव प्रणयनमन्त्रः स्यात्। प्रणयेत् इति वचनात् प्रणयनमन्त्रस्योहो भवति। अन्यथा निधानार्थं[11] तमेवाऽभिमुखो रात्र्या यदेनः इत्याम्नायेत्[12] ॥ ६ ॥

[आहिताग्नेर्व्रतचारित्वकालावधिकथनम्]

अत ऊर्ध्वमाहिताग्निर्व्रतचार्याहोमात् ॥ ७ ॥

अतः अस्मादुद्धरणाद् ऊर्ध्वम् आहिताग्निर्यजमानः व्रतचारी भवति। [13]व्रतचारी व्रतमिति[13] कर्मनामधेयम् (या २, १)। अग्निकर्मैव चरति नित्यवदाचरति

---

१. नास्ति ब[1]। २. य ब[1]। ३. प्राप्तः काले ब[2,3] वा; प्राप्तकाले मै वि। ४. प्राप्ते च° ब[3,4]। ५. प्राप्तकालो ब[1-4] मै वा; प्राप्ताकालो वि। ६. अन्नयने ब[2]; नयने ब[3,4] मै वा वि। ७-७. नास्ति ब[2]। ८. इहारभ्यते ब[1,2] मै; इहमाहरभ्यते ब[3,4]; इदमाहारभ्यते वा। ९. ऊहा ब[2]; ऊहः मै। १०. विशेषार्थः मै। ११. विधानार्थं ब[1]; निविधानार्थं मै। १२. इत्याम्नायात् ब[1,2] मै वा; इत्याम्नायः ब[3]; इत्याम्नातः ब[4]; इत्याम्नाये वि। १३-१३. व्रतचारीति ब[1]।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

अग्निहोत्रहोम:
Digitized by Madhuban Trust

आ होमसमाप्तेः । चातुर्मास्यादिषु व्रतान्यादिष्टानि, एवमिहानादिष्टानि[1]। तस्मात् कर्मैव व्रतमुपदिशति । एतदेव व्रतं पत्न्या अपि समानम् ॥ ७ ॥

[अनुदितहोमिनो व्रतचारित्वकालावधिकथनम्]

अनुदितहोमी चोदयात् ॥ ८ ॥

[2]अनुदितहोमी च[2] व्रतचारी[3] भवति [4]समाप्ते होमे आऽऽदित्योदयाद् अनुदितहोमी अनुदित आदित्ये जुहोति । अनुदितहोमी च व्रतचारी भवति[4]। आ होमात् (आश्रौ २, २, ७) इति प्राप्ते आ उदयाद् भवति[5] ॥ ८ ॥

[अस्तमिते सूर्ये होमविधानम्]

अस्तमिते होमः ॥ ९ ॥

[6]हुतेऽपि होमे[6] अस्तमिते आदित्ये होमकालः । उदितेषु नक्षत्रेषु सायमित्यन्येषाम्[7] (तु. आपश्रौ ६, ४, ८) ॥ ९ ॥

[आचमनस्य नित्यत्वकथनम्]

नित्यमाचमनम् ॥ १० ॥

नित्यं[8] नियतं होमकाले प्रयतस्याऽपि कर्माङ्गम् आचमनं[9] विधीयते कर्तुः ॥ १० ॥

[समन्त्रकस्य पर्युक्षणस्य विधानम्]

ऋतसत्याभ्यां त्वा पर्युक्षामीति जपित्वा पर्युक्षेत् त्रिस्त्रिरेकैकं पुनःपुनरुदकमादाय ॥ ११ ॥

ऋतसत्याभ्याम् इति एतं मन्त्रं जपित्वा परि समन्ततः उक्षेत्[10] सिञ्चेत् त्रिस्त्रिरेकैकम् अग्निं पुनः पुनरुदकमादाय गृहीत्वा । जपित्वा उक्त्वा इत्यर्थः । जपित्वा-वचनं प्रातर्होमार्थम् । सत्यऋताभ्यां त्वेति पर्युक्षणम् (आश्रौ २, ४, २५) इत्यत्र यथाम्नातं प्राप्नोति[11]। पर्युक्षामीति[12] न[13] प्राप्नोति । जपित्वा-वचनात्

---

१. एवमिह नादिष्टानि ब^{3,4} वा वि ; नास्ति मै । २-२. नास्ति ब^{3,4} । ३. °री च मै । ४-४. नास्ति ब^{2} । ५. भवति हुतेऽपि होमे मै । ६-६. नास्ति मै । ७. इत्येषाम् ब^{3,4} । ८. नास्ति ब^{1,4} मै ; तु. आश्रौ १, १, ४ । ९. नित्यमाच° वा । १०. पर्युक्षेत् मूको । ११. प्राप्नोति (प्राप्तम् ब^{2} मै) अनुक्रमे विकल्पः मूको । १२. पर्युक्ष(°क्षण मै) मिति ब^{2} मै । १३. नास्ति ब^{2} वि ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पर्युक्षामीति शब्दमुक्त्वा पर्युक्षेदिति सिद्धम् । सकृद्गृहीतेनाऽपि त्रिः पर्युक्षणं शस्यते[1] तस्मात् पुनःपुनरुदकमादायेत्युच्यते[2] ॥ ११ ॥

[आहवनीयाद्यग्नीनां पर्युक्षणक्रमे विकल्पकथनम्]

आनन्तर्ये विकल्पः ॥ १२ ॥

आनन्तर्ये अनुक्रमे । विकल्पः नानाकल्पो[3] विकल्पः । विहाराऽनुक्रमेण गार्हपत्याऽग्निम्[4] अथ दक्षिणाग्निमथाऽऽहवनीयम् । होमाऽनुक्रमेण वा आहवनीयमेवाग्रेऽथ गार्हपत्यमथ दक्षिणाग्निमिति[5] ॥ १२ ॥

[दक्षिणाग्निगार्हपत्याऽऽहवनीयपर्युक्षणे क्रमविधानम्]

दक्षिणं त्वेव प्रथमं विज्ञायते पिता वा एषोऽग्नीनां यद्दक्षिणः, पुत्रो गार्हपत्यः, पौत्र आहवनीयस्तस्मादेवं पर्युक्षेत् ॥ १३ ॥

दक्षिणाग्निं त्वेव प्रथमं[6] पर्युक्षेत्, अथ गार्हपत्यमथाहवनीयम् । तु-शब्दो विकल्पाऽधिकारव्यावृत्त्यर्थः । [7]एव-शब्दोऽवधारणार्थः । अवधारणात् पूर्वो विधिर्न क्रियते । दक्षिणं त्वेव प्रथमं कस्मात् । श्रुतिवचनात् । विज्ञायते[7] । श्रूयते[8]—पिता वा एषः । पिता किल भवति अग्नीनां सर्वेषां यो दक्षिणाग्निः । तस्य पुत्रो गार्हपत्योऽग्निः[9] । पौत्र आहवनीयः । तस्मादेवं **यथावृद्धानुक्रमेण**[10] पर्युक्षेत्[11] ॥ १३ ॥

[गार्हपत्यादविच्छिन्नोदकधाराहरणम्]

गार्हपत्यादविच्छिन्नामुदकधारां हरेत् तन्तुं तन्वन्रजसो भानुमन्विहीत्याऽऽहवनीयात् ॥ १४ ॥

[12]गार्हपत्याद् आरभ्य अविच्छिन्नां कमण्डलुनोदकधारां हरेत् नयेत् तन्तुं तन्वन् (ऋ १०, ५३, ६) इति एतेन मन्त्रेण[12] । आऽऽहवनीयाद् यावदाहवनीयं प्राप्नोति ॥ १४ ॥

---

१. प्रसज्ये ब[1] । २. पुनरुद° ब[1,2] । ३. नानाविकल्पो ब[1,4] मं ; न विकल्पे ब[2] । ४. गार्हपत्यम् मं । ५. आहवनीयं दक्षि° मं । ६. प्रथमं प्रथमं मूको । ७-७. नास्ति ब[2] । ८. पर्युक्षेत (°त् वा वि) श्रूयते ब[3,4] वा वि । ९. °पत्याग्निः ब[1,2] । १०. यथादेव वृद्धा° ब[1] । ११. नास्ति ब[3,4] वा वि । १२-१२. नास्ति ब[3,4] वा वि ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

अग्निहोत्रहोम:
Digitized by Madhuban Trust

[गार्हपत्यात् समन्त्रकमङ्गारापोहनम्]

पश्चाद् गार्हपत्यस्योपविश्योदगङ्गारानपोहेत् सुहुतकृतः स्थ सुहुतं करिष्यथेति ।। १५ ।।

पश्चात् अपरस्यां दिशि गार्हपत्यस्याग्नेः[1] पश्चाद् उपविश्य आध्वर्यवत्वान्निरसनोपवेशने[2] न[3] भवतः। उदग् उदीच्यां दिशि अङ्गारान् अपोहेद् अपनयेत्[4] सुहुतकृतः स्थ इति एतेन[5] मन्त्रेण ।। १५ ।।

[समन्त्रकमग्निहोत्रद्रव्याधिश्रयणकथनम्]

तेष्वग्निहोत्रमधिश्रयेदधिश्रितमध्यधिश्रितमधिश्रितं हिङ् इति ।। १६ ।।

तेषु अङ्गारेषु समिद्धेषु अग्निहोत्रद्रव्यम् अधिश्रयेत् अध्युपरि श्रयेत्[6] स्थापयेत् अधिश्रितम् इति अनेन मन्त्रेण ।। १६ ।।

[अधिश्रयणमन्त्रविकल्पकथनम्]

इळायास्पदं घृतवच्चराचरं जातवेदो हविरिदं जुषस्व । ये ग्राम्याः पशवो विश्वरूपास्तेषां सप्तानां मयि पुष्टिरस्त्विति वा ।। १७ ।।

इळायास्पदम् इति अनेन मन्त्रेण[7] वा विकल्पः ।। १७ ।।

न दध्यधिश्रयेदधिश्रयेदित्येके ।। १८ ।।

पय आदीनि दश द्रव्याणि । तेषां सर्वेषाम् अविशेषवचनादधिश्रयणे प्राप्ते प्रतिषेधः—न दध्यधिश्रयेत् दधि नाधिश्रयेत् । अधिश्रयेदित्येके । [8]दध्यधिश्रयेदित्येके शाखिनः। विकल्पः। न दध्यधिश्रयेदित्येके इति लघुना सिद्धे गुरुकरणप्रयोजनं तेष्वग्निहोत्रमधिश्रयेत् (आश्रौ २, २, १६) इति । अधिश्रयेद् इत्यधिश्रयणे[8] प्राप्ते न दध्यधिश्रयेदिति [9]प्रतिषेधे पुनः[9] दध्यधिश्रयेदित्येके इति वचनात् [10]प्राप्तादन्यदेवेदमधिश्रयणं धर्ममात्रं[10] विधीयते। यथा दधि द्रव्यान्तरं न सम्पद्यते तथाऽधिश्रयणं कर्तव्यं भवति ।। १८ ।।

।। [11]इति द्वितीयः खण्डः[11] ।।

---

१. गार्हपत्याग्नेः घा । २. तु. आश्रौ १, ३, ३२ । ३. नास्ति ब^{3,4} मं । ४. आयतनात् ब^{3} ; नास्ति ब^{4} मं । ५. इत्यनेन ब^{3,4} मं वा वि । ६. अध्युपश्रयेत् मूको । ७. नास्ति ब$^{2-4}$ मं वा वि । ८-८. दध्यधिश्रयेदित्यधिश्रयणे ब^{1} । ९-९. प्रतिषेधेषु न ब^{1,4} ; प्रतिषेधेषु ब^{2,3} मं घा वि । १०-१०. °यणधर्मं° ब^{3,4} वा वि । ११-११. नास्ति मूको ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ द्वितीयेऽध्याये तृतीयः खण्डः

[अकामेन पयसा नित्याग्निहोत्रहोमस्य कर्तव्यत्वम्]

पयसा नित्यहोमः ॥ १ ॥

दुग्धं[1] पयस्तेन पयसा नित्यहोमः। नित्यं सन्ततं होमः[2] नित्यहोमः। स[3] नित्यहोमः कामान्न भवति। पयसा पशुकामस्य (आपश्रौ ६, १५, १) इत्यन्येषामिति तु वचनान्नित्यम्। नित्यवचनात् कामाद् यवाग्वादिभिर्होमः[4]। उपरते[5] काम्ये[6] पुनरपि पयसैव जुहुयात्। पय आदीनि द्रव्याणि नित्यानि काम्यानि च। तत्र पयसा आहुतेन[7] होमः प्राप्तः। यस्याग्निहोत्र्युपावसृष्टा (आश्रौ ३, ११, १; ७) इति प्रायश्चित्तेषु[8] दर्शनाद् गां दुग्ध्वा जुहुयात्। [9]तूष्णीं वचनाभावान्न[9] शूद्रो दुह्याद्[10] दुह्याद् वा विकल्पः ॥ १ ॥

[ग्रामादिकामेन यवाग्वादिनाग्निहोत्रस्य कर्तव्यत्वम्]

यवागूरोदनो दधि सर्पिर्ग्रामकामान्नाद्यकामेन्द्रियकामतेजस्कामानाम् ॥ २ ॥

यवागूरोदनो दधि सर्पिः इत्येतानि चत्वारि द्रव्याणि। ग्रामकामश्च अन्नाद्यकामश्च इन्द्रियकामश्च तेजस्कामश्च। एतेषां चतुर्णां कामानां यवाग्वादि चतुर्णां द्रव्याणाम् आनन्तर्य्येण योगो भवति। यवाग्वा ग्रामकामस्य, ओदनेनाऽन्नाद्यकामस्य, दध्ना इन्द्रियकामस्य, सर्पिषा तेजस्कामस्य। तत्र प्रतिषेकं[11] यवागूं श्रपयति (आपश्रौ ६, १५, २) इत्युक्तमध्वर्यूणाम्। तस्याः श्रपणं भवति। ओदनः[12] सिद्ध[13] एवाऽऽनीयते, न तस्य श्रपणं चोदितमस्ति। क्वचिद्दध्यपि

---

१. नास्ति ब$^{2-4}$ मै वा वि। २. नास्ति मूको। ३. नास्ति ब^{2,4}; न ब^{3} वा वि। ४. यवागू (°गु ब^{2} मै) रादि° ब^{1,2} मै; तु. २, ३, २। ५. उपनते ब$^{2-4}$ वा वि; उपहृते मै। ६. कार्यं ब^{2}; कर्णमे ब^{3,4} वा; कर्मेषु मै; कर्मणे वि। ७. आ (अ ब^{2}) हुतेन ब$^{2-4}$ मै वा वि। ८. °त्ते ब^{3,4} वा वि। ९-९. तूष्णीं यं यवच° ब^{3,4}; तूष्णीं यं एव वच° वा; तूष्णीं यं वावच° वि; न तूष्णीमेत्र वच° मै। १०. नास्ति ब^{1,3,4} वा वि। ११. प्रतिषेधः ब$^{1-4}$ वा वि। १२. ओदनं ब^{2} मै; ओदन वि। १३. सिद्धम् ब$^{2-4}$ वा वि; सिद्धस्य मै।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

अग्निहोत्र होम:

Digitized by Madhuban Trust

सिद्धमेवाऽऽनीयते । सर्पिर्घृतं भवति । एतानि चत्वारि पयसा सह पञ्च आम्नातानि । [1]अथ पञ्च अन्यान्याम्नातानि†[1] । तण्डुलैरोजस्कामस्य[2] बलकामस्येत्येके [3]मांसेन यशस्कामस्य[3] वा । तत् पच्यते[4] यथा यवागू: । सोमेन ब्रह्मवर्चसकामस्य, [5]तैलेन श्रीकामस्य[5], अद्भिर्वृष्टिकामस्य[2] । एतान्यपि चोदितानि द्रव्याणि[6] । हौम्यं च मांसवर्जम् (आग् १, ९, ५) इति ब्रुवता च तानि दश द्रव्याणि ॥ २ ॥

[अधिश्रितस्य द्रव्यस्योल्मुकेनावज्वलनम्]

अधिश्रितमवज्वलयेत् ॥ ३ ॥

अधिश्रितं द्रव्यं ज्वलतोल्मुकेनाऽवज्वलयेत् । [7]अधिश्रितस्य‡ च द्रव्यस्य ϕयथाज्वलनं विधीयते[7] । [8]अधिश्रितमिति न वक्तव्यम् । अनुच्यमाने तु[8] [9]अवज्वलनस्य स्थानमनुपदिष्टं स्यात् । तस्मादधिश्रितमित्युच्यते । अधिश्रयणादनन्तरम् अवज्वलनं सिद्धं भवति[9] ॥ ३ ॥

[अनधिश्रितेऽपि दधिनि अवज्वलनं तन्मन्त्रकथनञ्च]

अनधिश्रयं[10] दध्यग्निष्टे तेजो मा हार्षीरिति ॥ ४ ॥

[11]अधिश्रितमवज्वलयेत् इत्युक्ते[11] दध्नोऽनधिश्रयणपक्षे[12] अवज्वलनं न प्राप्नोति, तस्मादिदमुच्यते । अनधिश्रयन्नपि दध्यवज्वलयेदिति अग्निष्टे तेज: इत्यनेन[13] मन्त्रेण । एवं चेन्, न दधिग्रहणं[14] कर्तव्यम् । अधिश्रितम् अवज्वलयेत् । अनधिश्रयम्[15] इति एतावता सिद्धे दधिग्रहणं दध्यादीनां प्राप्त्यर्थम् । कानि दध्यादीनि । तण्डुला: ओदन:[16] सोम इति एतानि दधिप्रभृतीनि । कथं दध्न: धर्मानुक्त्वा[17]

१-१. नास्ति वि । †. आम्नातानि ब[1-4] मै वा । २. तु. आपश्रौ ६, १५, १ ; वैताश्रौ ४३, ९-१८ । ३-३. मांसेन वा पशुकामस्य वा ; मांसेन वा यश° ब[2-4] मै ; नास्ति वि । ४. उच्यते मै । ५-५. तैलैरर्थकामस्य ब[3,4] ; तैलेन (°ले वि) रथीकामस्य वा वि । ६. द्रष्टव्यानि ब[3] वा वि ; द्रष्टव्याणि ब[1,2,4] । ७-७. नास्ति ब[1] । ‡. इति अधिश्रितस्यानधिश्रितस्य मै । ϕ. यज्ज्व (°ज्व ब[3,4] वि) लनं ब[3,4] मै वि ; ज्वलनं वा । ८-८. नास्ति ब[1] वा । ९-९. नास्ति वा । १०. °धिश्रितं मै ; °धिश्रियं वि । ११-११. नास्ति वा । १२. दध्नोऽधिश्रयण° ब[1,2,4] मै ; अधिश्रयण° वा । १३. इत्येतेन ब[2,3] ; इध्मानेन वि ; इध्यातेन वा । १४. दधिश्रयणं ब[1] । १५. अनधिश्रितम् ब[2-4] मै वा वि । १६. °ना: मै । १७. कर्मानुक्त्वा ब[3,4] वा वि ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

एवं [1]तण्डुलान् ओदनं सोमं च (आपश्रौ ६, १५, ७) इति[1] उक्तमध्वर्यूणाम् । तदेवाऽऽचार्येण दधिग्रहणेन प्रदर्शितम् । तस्माद् दध्नोऽधिश्रयणविकल्प उक्तः । स[2] ओदनस्याऽपि भवति । स तण्डुलानां सोमस्य च, तयोः पाकविरोधात् । अवद्योतनं तु सर्वेषां भवत्यविरोधात् । मा हार्षीः इति विसर्जनीयं पठन्ति । तकारान्तस्तु भवति मा हार्षीदिति ।। ४ ।।

[अग्निहोत्रद्रव्यस्य समन्त्रक उदकप्रतिषेकः]

स्रुवेण प्रतिषिञ्च्यान्न वा शान्तिरस्यमृतमसीति ।। ५ ।।

अवज्वलनाऽनन्तरं[3] स्रुवेण उदकं गृहीत्वा अग्निहोत्रं प्रतिषिञ्च्यात् । अपां स्तोकमित्युक्तम्[4] अध्वर्यूणाम्[5] । [6]न वा[6] प्रतिषिञ्च्याद् विकल्पः । शान्तिरस्यमृतमसि इति अनेन मन्त्रेण प्रतिषिञ्च्यात् । मन्त्रमुक्त्वा विभाषा कर्तव्या । यथा सति मन्त्रस्य विभाषा स्यात् । तत्प्रतिषेकस्यैव[7] विकल्पः इष्यते । तस्मादेवमुक्तम् ।। ५ ।।

[उपर्युक्तावद्योतनप्रतिषेकयोरव्यतिक्रमविधानम्]

तयोरव्यतिचारः ।। ६ ।।

तयोः अधिकृतयोः अवद्योतनप्रतिषेकयोः[8] अव्यतिचारः[9] अव्यतिक्रम्य[10] चारोऽव्यतिचारः । अवद्योतनं कृत्वा प्रतिषेको[11] न[12] क्रियते [13]यदा तदा व्यतिचारो भवति । न भवति व्यतिचारः अवद्योतनं कृत्वा प्रतिषेकोऽपि† क्रियते[13] । तयोः सहचारोऽव्यतिचार[14] इत्युच्यते । प्रतिषेकस्य विभाषा । तेन सहैव अवद्योतनस्यापि विभाषा भवति । दध्यादीन्यप्रतिषेक्याण्यध्वर्यूणां[15] सर्पिषि दर्भाग्रे प्रत्यस्यति न प्रतिषिञ्चति[16] । एषु[17] सर्वेषु अस्माकं प्रतिषेका विकल्पन्ते ।। ६ ।।

१-१. तण्डुलोदन (°नं ब^{3}) सोमं चेदिति ब$^{2-4}$ मै वि । २. नास्ति ब^{2} । ३. °लनादनन्तरं ब^{3} मै वि । ४. तु. आपश्रौ ६, ६, ७ । ५. अध्वर्युणा ब$^{2-4}$ मै वा वि । ६-६. ये न वा ब^{1,2} मै ; येन च ब^{3,4} वा ; ये च न वि । ७. °तिषेधस्यैव मै वि । ८. अवद्योतप्रति° ब^{1,2} मै ; अवद्योतप्रतिषेधकयोः वा वि । ९. नास्ति ब^{2} । १०. व्यतिक्रम्य ब$^{2-4}$ । ११. °षेधो ब^{1} ; °षेकोऽपि ब^{2} । १२. नास्ति ब^{2} । १३-१३. नास्ति ब^{2} । †. °षेधोऽपि ब^{3,4} । १४. °चार व्यति° ब^{2} ; °चारः व्यति° ब^{3} मै वा । १५. दध्यादीन्यत्र (°न्य ब^{1} ; °दीन ब^{4}) प्रतिषेच्यानि (°षेक्यानि ब^{3,4} वा वि ; °षेकस्यापि मै ; °षेधस्यापि ब^{1}) अध्व° मूको । १६. तु. आपश्रौ ६, १५, ५-८ ; माश्रौ १, ६, १, २४ । १७. एतेषु ब^{3,4} वा वि ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

अग्निहोत्र होम:

Digitized by Madhuban Trust

[ज्वलदुल्मुकेनाग्निहोत्रद्रव्यस्य परिहरणं तन्मन्त्रश्च]

पुनर्ज्वलता परिहरेत् त्रिरन्तरितं रक्षोऽन्तरिता अरातय इति ॥ ७ ॥

पूर्वम्[1] अवद्योतनं यथा ज्वलता उल्मुकेन [2]कृतम् एवं[2] पुनर् अपि ज्वलता एव[3] उल्मुकेनाऽग्निहोत्रं परिहरेत् । परि समन्ततः हरेत् नयेत् त्रिः अन्तरितम् (काण्वसं १, ८, ३) इत्यनेन मन्त्रेण । सकृन्मन्त्रेण द्विस्तूष्णीम् । पुनर्ग्रहणादवद्योतनमपि[4] ज्वलता उल्मुकेन सिद्धम् । अन्यथा न प्राप्नोति वचनाऽभावात् ॥ ७ ॥

[अग्निहोत्रद्रव्यस्योद्वासनविधिस्तन्मन्त्रश्च]

समुदन्तं कर्षन्निवोदगुद्वासयेद् दिवे त्वाऽन्तरिक्षाय त्वा पृथिव्यै त्वेति निदधत् ॥ ८ ॥

समन्तत उदन्तं समुदन्तम् । ऊर्ध्वम् उदन्तम् । कर्षन्निव[5] भूमिसन्निकृष्टं नीयते । उदगुद्वासयेद् उदीच्यां दिश्युद्वासयेत् स्थापयेत् दिवे त्वा (मासं ५, २६) इति एतैस्त्रिभिर्मन्त्रैः । त्रिर्भूमौ निदधत्[6] निदध्यात् । उद्वासयेत् इत्येतेनैव निधाने सिद्धे निदधदिति[7] न वक्तव्यम् । तस्यैतत् प्रयोजनम्—निदधदुद्वासयतीति[8] । तस्मात् त्रिर्भूमौ प्रतिष्ठापयति । [9]त्रय एवैते[9] मन्त्रास्त्रिर्भूमौ प्रतिष्ठापयतीति अन्येषाम्[10] ॥ ८ ॥

[अङ्गाराणां समन्त्रकमतिसर्जनं स्रुक्स्रुवयोः समन्त्रकं प्रतितपनञ्च]

सुहुतकृतः स्थ सुहुतमकार्ष्टेत्यङ्गारान् अतिसृज्य स्रुक्स्रुवं प्रतितपेत् प्रत्युष्टं रक्षः प्रत्युष्टा अरातयो निष्टप्तं रक्षो निष्टप्ता अरातय इति ॥ ९ ॥

---

१. पुनर्ज्वलनात् (°ना ब^{2}) पूर्वम् ब^{2} मै । २-२. कृतमिदं (°मिव वा) ब^{3,4} वा ; नास्ति वि । ३. एवम् ब^{4} ; नास्ति ब^{1,2} मै । ४. °द्योतनेऽपि ब$^{2-4}$ मै वा वि । ५. कर्षति व (कर्षनि वा ब^{3,4} ; वर्षन्ति ब^{2} मै ; कर्ष वा वा ; कर्षन्ति वा वि) कर्षन्निव कर्षेति कर्षन्निव (कर्षन्निव ब^{2} मै ; न कर्षन्ति कर्षन्ति च ⌊°न्ति ब^{4}⌋ ब^{3,4} ; न वर्षन्ति व ⌊°ति वा⌋ कर्षन्ति ⌊कर्षेति वा⌋ वा वा वि) मूको । ६. निदधीत मै । ७. निदध्यादिति मूको । ८. निदध्यादुद्वा° ब$^{2-4}$ । ९-९. नास्ति वि । १०. तु, आपश्रौ ६, ६, १० ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सुहुतकृतः स्थः इत्येतेन[1] मन्त्रेण अङ्गारान् अग्नावेव अतिसृजति गमयति[2]। अतिसृज्य स्थालीमुत्तरतः कुशेषूपसादयेत्। अतिसृज्येत्यत्र साकाङ्क्षत्वात् आसादयेदित्यध्याहर्तव्यम्। अन्यथा आसादनमनुपदिष्टं[3] स्यात्। वक्ष्यति च उत्तरतः स्थाल्याः स्रुचमासाद्य (आश्रौ २, ३, १०) इति स्थालीम् आसन्नां दर्शयति। स्रुक् च स्रुवश्च स्रुक्स्रुवम्। उभयं सह[4] प्रतितपेत्, प्रत्युष्टम् (तैसं १, १, २, १) इति एतेन, यथा उष्णाभिधा[5] भवति।। ९ ।।

[उत्तरतः स्थाल्याः स्रुच आसादनं तन्मन्त्रस्यातिसर्जनञ्च]

उत्तरतः स्थाल्याः स्रुचमासाद्यो३मुन्नयानीत्यतिसर्जयीत ।। १० ।।

[6]उत्तरतः। स्थाली प्रागासन्ना भवति। तस्या[6] उत्तरतः स्रुचमासाद्य[7] स्थापयित्वा[8] ओ३मुन्नयानि इति अतिसर्जयीत यजमानः। आसाद्येति वचनात् तत्र देशे कुशाः स्तीर्णा भवन्ति। ओ३मुन्नयानि इति त्रिमात्रं मकारान्तं कुर्यात्, अतिसर्जनत्वादुच्चैर्यथा शृणोति ।। १० ।।

[आहिताग्नेरितिकर्तव्यताविधानम्]

आहिताग्निराचम्यापरेण वेदिमतिव्रज्य दक्षिणत उपविश्यैतच्छ्रुत्वो-मुन्नयेत्यतिसृजेत् ।। ११ ।।

आहिताग्निः[9] यजमान आचम्य प्रयतोऽपि[10] कर्माङ्गत्वादाचामेत्[11]। बहिर्गार्हपत्यं[12] वेदिं च अपरेण अतिव्रज्य[13] गत्वा दक्षिणतः दक्षिणस्यां[14] दिश्युपविशति निरसनमकृत्वा। एतच्छ्रुत्वा कर्तुरतिसर्जनं श्रुत्वा। [15]ओ३मुन्नय इत्यतिसृजेत्[15] अनुज्ञां कुर्यात्। पूर्ववत् त्रिमात्रमेव कुर्यात्। आहिताग्निग्रहणं कर्तुरधिकारात्। आचमनं कर्माङ्गमेव। एतत्[16] श्रुत्वा इति वचनात् [17]प्रागेव प्रपन्नो[17] भवति।

---

१. इत्यनेन मै। २. यम° ब[2] मै। ३. °दनमुप° ब[1,2,4] पू। ४. सदा ब[2-4] मै वा वि। ५. उद्धरण ब[3,4]; उश्माभिधा ब[1]; उश्मा वा; उष्णा वि। ६-६. नास्ति ब[3,4]। ७. स्रुवमा° ब[2] मै। ८. नास्ति ब[3,4]। ९. नास्ति ब[3] वा वि। १०. प्रयतः ब[3,4] वा; प्रयतो ब[2] मै; प्रयत वि। ११. °दाचामयेत् (°त वा) ब[3] वा वि; °दाचमयेत् ब[4]। १२. वेदिं गार्ह° ब[1,2]; वेदिगार्ह° मै। १३. अतिसृज्य ब[1,4]। १४. दक्षिणायां ब[3,4]। १५-१५. °न्नयानीत्यति° ब; °न्नयतीति सृ° ब[2] मै। १६. ततः ब[1] मै; तद् ब[2]। १७-१७. प्रागेवासीनो (°सन्नो मै) ब[1] मै; प्रागेव इयान्नो ब[2]।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अधिकारे तु [1]प्रपदनं न विधीयते[1]। असति यजमाने स्वयमात्मानम् अनुजानीयात् (तु. आपश्रौ ६, ७, २) इत्यध्वर्यूणाम् ॥ ११ ॥

[अतिसृष्टेन कर्त्रा स्रुवस्योन्नयनम्]

अतिसृष्टो भूरिळा भुव इळा स्वरिळा वृध इळेति स्रुवपूर-मुन्नयेत् ॥ १२ ॥

यजमानेनाऽतिसृष्टः कर्ता। भूरिळा इत्येतैश्चतुर्भिर्मन्त्रैः स्रुवपूरं[2] स्थाल्याः स्रुवः पूर्यते। पूर्णं पूर्णं स्रुवम्[1] उन्नयेत् स्थाल्या उद्गृह्य[3] उन्नयेत्, चतुरुन्नयेत्। अतिसृष्टः इत्यनुच्यमाने[4] यजमानस्योन्नयनं प्राप्नोत्यधिकारात् ॥ १२ ॥

[पुत्राणामनुज्येष्ठमृद्धिमिच्छता यजमानेन पूर्णोनोनतरोनतमक्रमेण स्रुवपूरणम्]

अग्र्यमग्र्यं पूर्णतमं योऽनुज्येष्ठमृद्धिमिच्छेत् पुत्राणाम् ॥ १३ ॥

अग्रे भवम् अग्र्यम्। अग्र्यम् अग्र्यम् उन्नयन् पूर्णतमम् उन्नयेदाज्यम्। पूर्णं तत ऊनं तत ऊनतरं [5]तत ऊनतमम् इति। अनुज्येष्ठं यजमान आत्मनः† अनुज्येष्ठं ज्येष्ठानुपूर्व्येण‡ ऋद्धिमिच्छेत् पुत्राणाम्। ज्येष्ठस्य उत्तमा वृद्धिः, अनन्तरस्य ऊना तत ऊनतरा[5] तत ऊनतमा इत्येवम्। एतदेव विपरीतमध्वर्यूणां[6] योऽनुकनिष्ठ-मृद्धिमिच्छेत् पुत्राणाम् इति ॥ १३ ॥

[उपर्युक्तकाम्यकल्पस्य विशेषविधानम्]

योऽस्य पुत्रः प्रियः स्यात्तं प्रति पूर्णमुन्नयेत् ॥ १४ ॥

यो यजमानस्य पुत्रः इष्टः स्यात् तं पुत्रं[7] प्रति आदिश्य पूर्णं स्रुवमुन्नयेत्[8]। तस्मादुत्तराण्युन्नयनानि[9] ईषदूनानि[10] भवन्ति। प्रथमो नित्य उत्तरौ कामिकौ[11]। [12]पुत्रबहुत्वे तु[12] अधीतदक्षिणाविभागन्यायेन[13] चतुर्धा पुत्रान् विभज्य[14] यस्मिन्

१-१. प्रप (प्रव ब^{2}; प्रम मै) दनं विधी° ब^{1,2} मै; प्रपदेन विधी° ब^{3}; प्रतोदेन विधी° ब^{4}। २. नास्ति मूको। ३. उद्धृत्य ब^{1}। ४. इत्यनूच्यमाने ब^{3,4} वा; अनूच्यमाने ब^{2}; इति सूच्यमाने मै। ५-५. नास्ति ब^{1}। †. आत्मानम् ब$^{2-4}$ मै वा वि। ‡. °पूर्वेण ब$^{1-4}$ वा वि। ६. तु. आपश्रौ ६, ७, ८। ७. नास्ति ब^{2}। ८. स्रुचमु° ब^{1,2}। ९. तस्मादित्युत्तरा° ब$^{1-4}$ मै वा; तस्मादित्यापरान्वन्वादि वि। १०. ईषदुन्नतानि ब^{2}। ११. कनिष्ठौ ब^{2}; क्रमिकौ मै। १२-१२. पुत्रबहुत्वात् ब^{1}; नास्ति वि। १३. अधितृतीयद° ब^{1} मै। १४. नास्ति ब^{1}; विसृज्य मै।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

विभागे प्रियः[1] पुत्रः तं प्रति पूर्णमुन्नयेत्। अस्येति यजमानप्राप्त्यर्थम्। अन्यथा कर्तुः[2] स्यात् ॥ १४ ॥

[स्थाल्यभिमर्शनसमिद्धरणपूर्वकं समन्त्रकमुपधानम्]

स्थालीमभिमृश्य समिधं स्रुचं चाऽध्यधि गार्हपत्यं हृत्वा प्राणसंमितामाहवनीयसमीपे कुशेषूपसाद्य जान्वाच्य समिधमादध्याद्, रजतां त्वाग्निज्योतिषं रात्रिमिष्टकामुपदधे स्वाहेति ॥ १५ ॥

स्थालीं पाणिनाऽभिमृश्य समिधं पालाशीं स्रुचं च[2] गृहीत्वा। उपरि हि समिधं[3] देवेभ्यो धारयति अधस्तात् पितृभ्यः इति विज्ञायते (?)। अध्यधि उपर्युपरि गार्हपत्यम् गार्हपत्याग्निसमीपे[4] हृत्वा[5] नीत्वा[6] प्राणसम्मितां नासिकासम्मितां कृत्वा आहवनीयसमीपे, कुशाः स्तीर्णा भवन्ति, तेषु कुशेषु उपसाद्य स्थापयित्वा दक्षिणं जानु आच्य नीचं कृत्वा तां समिधम् आहवनीये निदध्यात् प्रक्षिपेत्—रजतां त्वा इत्येतेन[7] मन्त्रेण। अध्यधीति निपातः सामीप्यार्थे[8] वर्तते ॥ १५ ॥

[समिदाधानं कृत्वा समन्त्रकमाचम्य समन्त्रकं समिधमभिजुहोति]

समिधमाधाय विद्युदसि विद्य मे पाप्मानमग्नौ श्रद्धेत्यप उपस्पृश्य प्रदीप्तां द्व्यङ्गुलमात्रेऽभिजुहुयाद् भूर्भुवः स्वरोमग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति ॥ १६ ॥

[9]समिधमाधायेति पुनरुच्यते[9]। यदा यजमानः स्वयं जुहोति तदा समिधमाधायाऽनुमन्त्रयेत। [9]यजमानस्य स्थानमुपदिशति[9], [10]अत्र तन्न† प्राप्नोति[10] उत्तरकालम्—अप्सु श्रद्धेत्यप उपस्पृश्य (आश्रौ २, ३, २३), आहिताग्निरनुमन्त्रयेत[11] (आश्रौ २, ३, २४)। ततः[12] विद्युदसि[13] (तैब्रा ३, १०, ९२)

---

१. प्रत्ययः ब[3,4] वा वि। २. नास्ति मै। ३. नास्ति ब[2-4] मै वा वि।
४. अग्निसमये ब[1]; अग्निसमीपे ब[1-4] वा वि मै। ५. गृहीत्वा मूको।
६. माद्य (ऽऽसाद्य ?) ब[1]। ७. इत्यनेन ब[3,4] मै। ८. सामान्यार्थे ब[3,4]।
९-९. नास्ति वि। १०-१०. नास्ति मै। †. तत्र ब[1]; सर्वं न ब[3]; सर्वं ति ब[4]; चंन वा; व वि। ११. °न्त्रयते मूको। १२. नास्ति ब[3,4]।
१३. विद्युदसी० उपस्पृश्य विद्यु° ब[3,4]; विद्युद स्पर्श्य विद्यु° वा; विद्युदस्य विद्यु° वि।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

इत्यनेन अप उपस्पृश्य होमकाले उपस्पर्शनं निराकाङ्क्षत्वात् । [1]प्रदीप्तां...स्वाहेति[1] समिधं [2]तां प्रदीप्तां[2] द्व्यङ्गुलमात्रे द्व्यङ्गुलप्रमाणं दिशन्ति[3] । अभि समिधं जुहुयात्—भूर्भुवः स्वरोम् (ऐब्रा ५, ३१) इत्यनेन मन्त्रेण । द्रव्यं प्रसेकेन[4] जुहुयाद् अन्योऽन्यमुखेन[5] ॥ १६ ॥

[पूर्वाहुत्यनन्तरं कुशेषु स्रुक्सादनपूर्वकं गार्हपत्यावेक्षणम्]

पूर्वामाहुतिं हुत्वा कुशेषु सादयित्वा गार्हपत्यमवेक्षेत पशून्मे यच्छेति ॥ १७ ॥

तां पूर्वामाहुतिं हुत्वा । एतदपि पुनरुच्यते पूर्ववद् । यजमानस्य स्थानोपदेशार्थं हुत्वेति । [6]कुशेषु स्रुचं सादयित्वा[6] गार्हपत्यमवेक्षेत—पशून् मे यच्छ (काण्वसं ६, ४) इत्यनेन[7] मन्त्रेण । प्रत्यक्[8] व्यावृत्याऽवेक्षेत[9] ॥ १७ ॥

[पूर्वाहुतेः प्रागुदगुत्तरतो वा उत्तराहुत्यर्थं द्रव्योत्पादनम्]

अथोत्तरां तूष्णीं भूयसीमसंसृष्टां प्रागुदगुत्तरतो वा ॥ १८ ॥

अथ वीक्षणादनन्तरम् उत्तराम् आहुतिं जुहुयात् । [10]अधिकृते मन्त्रे प्राप्ते तूष्णीममन्त्रम् । भूयसीमुत्तरां पूर्वस्याः उत्तरतः एवां जुहुयात्[10] ॥ १८ ॥

[सर्वत्र प्रजापतिहोमे तूष्णीं मनसा ध्यानम्]

प्रजापतिं मनसा ध्यायात् तूष्णीं होमेषु सर्वत्र ॥ १९ ॥

[11]प्रजापतिदेवतां मनसा ध्यायात्†[11] । जुहुयात् चतुर्थ्या विभक्त्या स्वाहाकारेण च । प्रजापतये स्वाहेति मनसा जुहुयात् (?) इति बौधायनीये[12] । ध्यायात् [13]तूष्णीं होमेषु सर्वत्र प्रजापतिं ध्यायात् । सर्वत्र अस्मादन्यत्रापि तूष्णीं होमेषु यत्र यत्र तूष्णीं होमो विधीयते । यथा तूष्णीमाघारौ (आगृ १, १०, १३), यथा तूष्णीं चतुर्थम्‡ (आगृ १, ७, १४), तूष्णीं सर्वहुतंφ[13]

१-१. प्रदीप्तां ब[1,2] मै ।　२-२. नाप्रदीप्तां ब[1,2] मै वा वि ।
३. दिशन्त्यपि मूको ।　४. प्राशकेन ब[3,4] वा वि ।　५. अन्यान्यन्यमुखेन ब[1] मै वा ; अन्योन्यन्यमुखेन ब[2] ; अन्यान्यन्यमुखे वि ।　६-६. कुशेषूपसादयित्वा मूको ।
७. इति मै ।　८. प्रत्येकं ब[2,3] मै वा वि ।　९. °वेक्षते ब[3,4] मै वा वि ।
१०-१०. नास्ति ब[3,4] वा वि ।　†. एवं ब[1,2] मै ।　११-११. नास्ति ब[3,4] वा वि ।
†. नास्ति ब[2] मै ।　१२. बोधनीयं ब[3,4] ; बोधाय° मै ।　१३-१३. नास्ति ब[1] ।
‡. चतुर्थीम् ब[2] मै वा वि ।　φ. सर्वत्र हुतं ब[1-3] मै वा वि ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[1]जुहुयुः (आश्रौ ३, १०, १७)। होमग्रहणात् समिदाधाने न भवति[1]— [2]तूष्णीं समिधमाधाय (आश्रौ २, ४, ८) इति[2] ॥ १९ ॥

[भूयिष्ठद्रव्यं स्रुचि शिष्ट्वा त्रिरनुकम्पनं लेपमार्जनञ्च]

भूयिष्ठं स्रुचि शिष्ट्वा त्रिरनुप्रकम्प्याऽवमृज्य कुशमूलेषु निमार्ष्टि-पशुभ्यस्त्वेति ॥ २० ॥

[2]भूयिष्ठं बहुतमम्[2]। उत्तराहुतिर्बहुतरा[3], तस्या बहुतमं हविः शिष्ट्वा शेषं कृत्वा त्रिः [4]अमूम् आहुतिम्[4] अनुप्रकम्प्य[5] चालयित्वाऽवमृज्य[6] [7]अवाचा पाणिना[7] लेपं[8] परिमृज्य कुशमूलेषु निमार्ष्टि निःशेषेण लेपं मार्ष्टि— पशुभ्यस्त्वा (तैसं ३, ५, २, ४) इत्येतेन[9] मन्त्रेण ॥ २० ॥

[निमार्जन-कुशमूलानां दक्षिणत उत्तानाङ्गुलिविधानम्]

तेषां दक्षिणत उत्ताना अङ्गुलीः करोति प्राचीनावीती तूष्णीं स्वधा पितृभ्य इति वा ॥ २१ ॥

तेषां कुशमूलानां दक्षिणतः[10] दक्षिणस्यां दिशि उत्ताना अङ्गुलीः करोति प्राचीनावीती भूत्वा तूष्णीम्, स्वधा पितृभ्यः (मासं २, ७) इत्येतेन[11] मन्त्रेण वा[12] ॥ २१ ॥

[तत्र जलावनिनयनं जलोपस्पर्शनञ्च]

अपोऽवनिनीय ॥ २२ ॥

वृष्टिरसि वृश्च मे पाप्मानमप्सु श्रद्धेत्यप उपस्पृश्य ॥ २३ ॥

अङ्गुलीषु अपोऽवनिनीय अवसिच्य पुनः यज्ञोपवीतं कृत्वा वृष्टिरसि

१-१. नास्ति ब[1,4]। २-२. नास्ति ब[4]। ३. आहुतिर्बहु° ब[3]; नास्ति ब[4]। ४-४. अमु...आहु° ब[1]; अमुआहु° ब[2]; अमुष्याहुतीम् मै; आहवनीये आहु° ब[3,4]; अनु आहु° वा वि। ५. अनुप्रकल्प्य वा। ६. °वसृज्य ब[3,4] वा वि। ७-७. अवाचपा° ब[1]; अवां च पा° ब[2]; अवाच्यपा° ब[3,4]; अपां च पा° मै; अचां च प्राणिनां वा वि। ८ लेप्यग्रं ब[3,4] वा वि; लेप्य मै। ९. इत्यनेन ब[3,4] मै वि। १० नास्ति ब[1] वि। ११. इत्यनेन ब[1,3,4]। १२. नास्ति मूको।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

इत्यनेन[१] मन्त्रेण अप उपस्पृश्य [२]उदङ्ङावृत्य †भक्षयेत्[२] । तूष्णीं ग्रहणम[३]-मन्त्रविवक्षार्थम् । अक्रियमाणे वा-शब्दः क्रियाविकल्पार्थ[४] स्यात् । निनयनमपि होमवत्[५], तूष्णीं निनयते । प्रजापतिं न[६] ध्यायेत्[७] पैतृकत्वात् कर्मणः । अप्सु श्रद्धा इति अप उपस्पृश्य इति साकाङ्क्षत्वाद् वाक्यस्य उदङ्ङावृत्य भक्षयेदिति[८] । स हि प्राप्ताऽनुवादः । नित्यमप उपस्पृश्य[९] मन्त्रवदधिकृत्य[१०] तत्प्रतिपत्त्यर्थं परिभाषा-व्यवायात्[११] । अन्यथा स्पृष्ट्वोदकवचनम्[१२] अनर्थकम् अर्थाऽभावात् ॥ २२-२३ ॥

[आहिताग्निकर्तृकानुमन्त्रणं समन्त्रकं समिदनुमन्त्रणञ्च]

आहिताग्निरनुमन्त्रयेत ॥ २४ ॥

आधानमुक्त्वा तेन ऋषिणा तेन ब्रह्मणा तया देवतयाऽङ्गिरस्वद् ध्रुवासीदेति समिधम् ॥ २५ ॥

आधानमुक्त्वा समिदाधानमन्त्रमुक्त्वा सायं प्रातश्च यः प्रयुक्तः[१३], तमाह-[१४]स्वाहाकारमुक्त्वा[१४] तेन ऋषिणा इत्येतेन च उभाभ्यां समिधमनुमन्त्रयेत । आहिताग्निग्रहणं कर्तुरधिकाराद् । देशान्तरे उक्तं समिदाधानकाले तु भवति । [१५]मन्त्रे स्वाहाकारो †होमार्थः अनुमन्त्रणे न प्रयोक्तव्यः, तथा[१५] दृष्टत्वाद् उपस्थाने, एतैश्चैवास्वाहाकारैः (ऐआ ५, १, १) इति[१६] । नित्यमन्त्रस्यायमुपदेशो न तु नैमित्तिकस्य । मित्रो जनान् यातयति ब्रुवाणः (ऋ ३, ५९, १), इति समिदाधानम् (आश्रौ ३, ११, २२) इति । तत्रापि यजमानो नित्येनैवानुमन्त्रयते, इष्टकोपधान-लिङ्गत्वात् । श्रूयते तावत्योऽग्नेर्यजुष्मत्य इष्टकाः (ऐब्रा ५, २८) इति ॥ २४-२५ ॥

[समन्त्रकं पूर्वाहुत्यनुमन्त्रणम्]

ता अस्य सूद दोहस इति पूर्वामाहुतिम् ॥ २६ ॥

---

१. इत्येतेन ब^{१} । २-२, नास्ति मै ; उदङ्ङावृत्ति (°वृति ब^{२} ; वृ वा वि) ब^{१,२} वा वि । †. तु. आश्रौ २, ४, ५ । ३. °हणं मन्त्रं वि° ब^{१,३} मै वा वि ; °हणं मन्त्रवि° ब^{२,४} । ४. विकल्पार्थः मै । ५. होम एव ब$^{२-४}$ मै वा वि । ६. नास्ति ब^{१} । ७. ध्यायेत ब^{२} । ८. तु. आश्रौ २, ४, ५ । ९. उपस्पर्शनं ब$^{२-४}$ मै वा वि । १०. °कृतात् (°ता ब^{१,३}) ब$^{१-३}$ वा वि ; °कृतम् मै ; अकृत्वा ब^{४} । ११. °भाषया व्य° ब^{३,४} वा वि । १२. स्पृष्टोद° मै वा वि ; तु. आश्रौ २, ४, ५ । १३. तु. आश्रौ २, ३, १५ । १४-१४. स्वाहाकारान्तोक्त्वा (°रोन्नोक्त्वा मै) ब^{१} मै ; °रमु (°म ब^{२}) क्त्वा ब^{२} मै । १५-१५. नास्ति ब^{३,४} वा वि । †. होमार्थम् ब^{१,२} मै । १६-१६. नास्ति ब$^{३-४}$ वा वि ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ता अस्य सूद दोहसः (ऋ ८, ६९, ३) इत्येतयर्चा[1] पूर्वामाहुतिमनुमन्त्रयते। पूर्वामाहुतिमित्यनुच्यमाने उभयत्र प्राप्नोति ॥ २६ ॥

[उपोत्थायोत्तराहुत्यनुमन्त्रणम्]

उपोत्थायोत्तरां काङ्क्षेतेक्षमाणो भूर्भुवः स्वः सुप्रजाः प्रजाभिः स्यां सुवीरो वीरैः सुपोषः पोषैः ॥ २७ ॥

आग्नेयीभिश्च ॥ २८ ॥

[2]उत्तरामाहुतिं †हुत्वा ‡तामुपलक्ष्य[2] उत्थाय[3] स्थित्वा उपतिष्ठते सर्वान् [4]अग्नीन् अविशेषवचनात्[4]। व्याहृतयश्च[5] सर्वार्थाः[6], आग्नेय्यश्च[7]। अपि वा स्युर्न[8] सर्वार्थाः[9]। यथावत्सुप्रयोगात्तु[10] एकार्थाः [11]ता अपि[11] बह्वर्था भवन्ति। विभक्तास्तु नित्याः। तस्मात् सर्वान् अग्नीनुपतिष्ठते। कः[12] पुनरस्य[13] वैकल्पिको[14] विधिः[15]। वक्ष्यति—[16]अपि पन्थाम् (आश्रौ २, ५, ८-९) इति[16]। सोऽस्य स्थाने भवति[17]। [18]काङ्क्षेत इच्छेत् मन्त्रलिङ्गोपदेशेनार्थम्φ। भूर्भुवः स्वः सुप्रजाः प्रजाभिः स्यां सुवीरो सुवीरैः सुपोषः पोषैः इत्येताः[18] काङ्क्षेत इच्छेत्। ईक्षमाणः अग्नीनीक्षमाणः[19] उपतिष्ठते —भूर्भुवः स्वः इत्येतेन[20] मन्त्रेण। अनुमन्त्रणाधिकारात्[21] अनुमन्त्रणे प्राप्ते [22]उपोत्थायेति वचनाद् उपोत्थानं¶ भवति। उपस्थानं त्वग्नेरेव भवति, नाहुत्याःμ। यद्याहुत्याः स्याद् उपतिष्ठते* उत्तरामिति[22] ब्रूयात्। उपोत्थायोत्तरामिति वचनात्

---

१. इत्यनयर्चा ब[1]; नास्ति वि। २-२. नास्ति ब[3]। †. हुताम् वा; हुतिम् मै। ‡. उपलक्ष्य ब[2] मै वा वि। ३. उपोत्थाय ब[3]; नास्ति वि। ४-४. अग्निहविःशेष° ब[2-4] मै वा वि। ५. याहु- मै। ६. सर्वा याः ब[3,4] वा वि। ७. आग्नेयः ब[1,4] वि; अग्नियः ब[2]; आग्नेय्यः ब[3] वा; अग्नयः मै। ८-८. वास्या नु ब[1]; वास्या न मै। ९. समर्थाः ब[1]। १०. °वत्सप्र° ब[3,4] वा वि। ११-११. अपि ब[1] मै; तत्रापि वि। १२. कं ब[1,2] वा वि; किं ब[3,4]। १३. पुनस्य ब[3,4] वा वि; पुनरस्या मै। १४. °कं मूको। १५. विधि मै। १६-१६. अयं पन्था अपि वित्त ब[1]; अपि पन्था अपि ब[2] मै। १७. भवति श्रुतिः ब[1,2] मै। १८-१८. नास्ति वा। φ. °देशनार्थं ब[1,2]; °देशानर्थं मै। १९. अग्निमीक्ष्यमाणः ब[2]; °नीक्ष्यमाणः मै; नास्ति वि। २०. इत्यनेन मै। २१. अधिकारात् ब[1,2] मै। २२-२२. नास्ति ब[1]। ¶. उपस्थाने मै। μ. अनाहुत्याः ब[3,4] वा वि। *. °ष्ठेत ब[4]।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

अग्निहोत्रहोमः

Digitized by Madhuban Trust

उत्तरामुत्थानस्योपलक्षणं भवति। उत्तरामुपलक्ष्य उत्थाय मन्त्र उच्यमानः उपस्थानसंज्ञो भवति ईक्षमाण इति[1] वचनादाग्नेयीनामुपदेशाच्च[2] । अग्निर्देवता यासामृचां ता आग्नेय्यो भवन्ति ॥

आग्नेयीभिश्च अग्निमुपतिष्ठते । निर्देशाभावात् एतस्य समाम्नायस्य (आश्रौ १, १, १) इति [3]अग्निमीळादिभिः सर्वाभिः[3] समाम्नाताभिः क्रमेण अन्वहं यथोत्साहम् उपस्थानं कर्तव्यम् । च-शब्दः समुच्चयार्थः। भूर्भुवः स्वरित्येतेन[4] मन्त्रेण आग्नेयीभिश्चेति ॥ २७-२८ ॥

[अग्न्युपस्थानस्यान्यास्तिस्र ऋचः]

अग्न आयूंषि पवस इति तिसृभिः ॥ २९ ॥

अग्न आयूंषि पवसे (ऋ ९, ६६, १९-२१) इत्येताभिः आग्निपावमानीभिः[5] तिसृभिरुपतिष्ठते[6] ॥ २९ ॥

॥ इति तृतीयः खण्डः ॥

---

१. नास्ति ब[1] । २. °ग्नेयी उप° ब[3'4] वा वि ; °ग्नेयीनामपदे° ब[1] । ३-३. °मीळादिसर्वाभिः ब[1-4] वा वि । ४. °रित्यनेन ब[1] । ५. अग्निपा (°प वि वा) व° ब[3'4] वा वि । ६. °ष्ठन्ते ब[2] मं ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ द्वितीयेऽध्याये चतुर्थः खण्डः

[प्रतिसंवत्सरपूर्तौ पूर्वोक्तमन्त्रैरग्नेरुपस्थानविधानम्]

संवत्सरे संवत्सरे ॥ १ ॥

प्रतिसंवत्सरं यस्मिन्नहनि [1]आहिता अग्नयो[1] भवन्ति[2], एतस्मिन्नहनि[3] सायं प्रातः भूर्भुवः स्वरित्येतेन[4] मन्त्रेण एताभिश्च तिसृभिरुपतिष्ठते। [5]पुनर्नवा अग्नयो[5] भवन्ति (?) इति श्रुतिः[6]। पवमानहवींषि[7] वा[8] निरुप्यन्ते[9] इत्यन्येषाम्[10] ॥ १ ॥

[पर्वणि यवाग्वा पयसा वा यजमानस्य होमविधानम्]

यवाग्वा वा पयसा वा स्वयं पर्वणि जुहुयात् ॥ २ ॥

यवानां च तण्डुलैर्या[11] पच्यते सायं प्रातस्तया यवाग्वा, पयसा वा स्वयं यजमानः पर्वणि अमावास्यायां पौर्णमास्यां च[12] जुहुयात् । सायं प्रातर्यद्यपि काम्येन प्रक्रान्तं भवति, पर्वणि एताभ्यामेव जुहुयात् । काम्येनैव बौधायनीयेन[13], यवाग्वा पयसा वेति विकल्पः । अमावास्यायां चैन्द्रः पुरोळाशो न विद्यते यदा तदा[14] यवाग्वा एव होतव्यं तथाऽध्वर्यूणां[15] वचनम् ॥ २ ॥

[पूर्णसंवत्सरेतरकाले कश्चिदप्येकऋत्विग्घोमं कुर्यात्]

ऋत्विजामेक इतरं कालम् ॥ ३ ॥

ऋत्विजामेकः येऽस्य[16] ऋत्विजस्तेषामेकः इतरं कालं शेषं कालं जुहुयात् ।

१-१. आहिताग्न (°ताग्नि ब^{2} ; °ता आग्न ब^{4}) यो ब$^{1-4}$ वा वि। २ भवन्ति इति श्रुतिः ब^{1}। ३. यस्मिन्न° ब^{1,2} वा मै। ४. °रित्यनेन ब^{1}। ५-५. पुनर्न (°र्णं ब^{2} ; र्या मै) वाग्नयो ब^{2} मै वा ; एता वाग्नयो ब^{3,4}। ६. श्रुतेः वा। ७. पवमानस्य (°न ब^{2} मै वा वि) हविषि ब$^{2-4}$ मै वा वि। ८. चरुं ब^{1} ; व ब^{2} ; च ब^{3,4} वा वि। ९. निरुप्यन्ते ब^{1,4} मै ; निरूप्यते ब^{2,3} ; निरूप्यते वा वि। १०. तु. आपश्रौ ६, १६, ९। ११. °लैर्वा ब^{1} ; °लैर्यथा ब^{2} मै ; °लैश्च या ब^{3,4} वा वि। १२. च सायं ब^{1}। १३. वोधा° ब^{1,2} ; वौधा° वि ; नास्ति मै। १४. तदा वा मै। १५. यथाऽ° ब$^{2-4}$ वा। १६. येऽस्य यज्ञ ऋ° ब^{2}।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ऋत्विगितरं कालम् इति सिद्धे एकग्रहणाद् ब्रह्मणः प्रतिषेधः[1] नित्यः सर्वकर्मणाम् (आश्रौ १, १२, ३) इति प्राप्ते[2] ॥ ३ ॥

[पूर्णसंवत्सरेतरकाले शिष्यो वा जुहुयात्]

[3]अन्तेवासी वा[3] ॥ ४ ॥

अन्तेवासी शिष्यो भवति। स चेतरं[4] कालं जुहुयात्। विद्याऽन्ते[5] वेदग्रहणार्थं यो वसत्युपाध्याये सोऽन्तेवासी। यः कृत्स्नमधीते स शिष्यः। ब्रह्मचारी च[6] जुहुयात् (आपश्रौ ६, १५, १६) इत्यन्येषाम् ॥ ४ ॥

[उदकं स्पृष्ट्वोदङ्ङावृत्य हुतशेषं भक्षयेत्]

स्पृष्ट्वोदकम् उदङ्ङावृत्य भक्षयेत् ॥ ५ ॥

अथ उपस्पृश्य उदङ्ङावृत्य उदीचीं दिशम् आवृत्य हविर्यद् हुतशिष्टं तस्य गृहीत्वा भक्षयेत्। मन्त्रं वक्ष्यति[7] उदकस्पर्शने कारणाभावाद् अप्सु श्रद्धा इत्यप उपस्पृश्य (आश्रौ २, ३, २३) इति तमेवानुवदति[8] ॥ ५ ॥

[गार्हपत्यदक्षिणाग्न्योर्वा हुत्वा हुतशेषं भक्षयेत्]

अपरयोर्वा हुत्वा ॥ ६ ॥

अपरयोरग्न्योर्हुत्वा भक्षयेद्। विकल्पः ॥ ६ ॥

[हुतशेषभक्षणमन्त्रकथनम्]

आयुषे त्वा प्राश्नामीति प्रथमम्। अन्नाद्याय त्वेत्युत्तरम् ॥ ७ ॥

आयुषे त्वा प्राश्नामि इत्यनेन मन्त्रेण प्रथमं भक्षयेत्। प्रथमग्रहणे अक्रियमाणे उत्तरमित्यनर्थकं भवति। उत्तरशब्देऽनुच्यमाने उभाभ्यां मन्त्राभ्याम् एकं भक्षणं[9] प्राप्नोति। अन्नाद्याय त्वा (तैसं १, ७, ९, २) इत्यनेन मन्त्रेणोत्तरं भक्षयेत्। द्विर्भक्षणं भवति प्राश्नामीत्यनुवर्तमाने। अन्यथाऽपरिसमाप्तेऽर्थे मन्त्रः स्यात् ॥ ७ ॥

---

१. प्रतिषिद्धः ब[3,4] वा वि। २. प्राप्तः ब[3,7] वा। ३-३. वा अन्तेवासी ब[2]। ४. °तर° ब[1,2]; °तरं तं मै। ५. द्विष्यते ब[1]; द्वियांते ब[4]; नास्ति वि। ६. वा मुद्रितपाठः। ७. वक्ष्यते ब[3,4] वा वि। तु. आश्रौ २, ४, ७। ८. तमेकमनुवदसि मै। ९. भक्षणं न ब[1,2] मै वि।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[अमन्त्रकं समिधमाधाय समन्त्रकं गार्हपत्येऽग्नौ हवनम्]

तूष्णीं समिधमाधायाग्नये गृहपतये स्वाहेति गार्हपत्ये ॥ ८ ॥

अधिकृतेन[1] वचनेन मन्त्रे प्राप्ते तूष्णीमित्याह । तूष्णीम् अमन्त्रं समिधमाधाय[2] प्रदीप्तां †च तां† अग्नये गृहपतये स्वाहा (मासं १०, २३) इत्यनेन मन्त्रेण गार्हपत्येऽग्नौ स्थाल्याः स्रुवेणाऽऽदाय [अभि] जुहुयात्[2] । प्रदीप्तां द्व्य०[3] (आश्रौ २, ३, १६) इत्येवमादि सर्वमत्र वर्तते तूष्णीमिति वचनात् । आहवनीयाऽधिकाराद् गार्हपत्यवचनम् ॥ ८ ॥

[शेषविधेर्नित्यतावचनम्]

नित्योत्तरा ॥ ९ ॥

या नित्या[4] प्रागुक्ता प्रजापतिं मनसा (आश्रौ २, ३, १९) इति, सा अनन्तराया उत्तरा । अनेनैव[5] विधानं समानम् भूयसीमसंसृष्टाम् (आश्रौ २, ३, १८) इत्येतत्[6] ॥ ९ ॥

तूष्णीं समिधमाधायाग्नये संवेशपतये स्वाहेति दक्षिणे । अग्नयेऽन्नादायान्नपतये स्वाहेति वा ॥ १० ॥

तूष्णीं समिधमाधाय अग्नये संवेशपतये [7]स्वाहा (मासं २, २०) इत्यनेन दक्षिणाग्नौ जुहुयात् । अपवादो‡ नानुवर्तते । तस्मात् पुनस्तूष्णीमित्याह[7] । [8]अग्नयेऽन्नादायान्नपतये[8] स्वाहा (ऐब्रा ७, १२) इति वा । [9]एतेन वा जुहुयात्[9] । अयं मन्त्रो ब्राह्मणे दृष्टः । तस्मादेतामेव चरन्ति ॥ १० ॥

[उत्तरविधेर्नित्यतावचनम्]

नित्योत्तरा ॥ ११ ॥

प्रजापतये स्वाहा इति या[10] सा उत्तरा द्वितीया भवति ॥ ११ ॥

---

१. °कृतेन च ब[1] । २-२. नास्ति मै । †-†. चेति वर्तते ब[1-4] वा वि ; ३. च ब[1-4] मै वा ; वा वि । ४. नित्या या ब[2] वा वि ; नित्या त्यो या ब[1] ; नित्या त्यो ब[4] ; नित्यायाः मै । ५. तेनैव ब[1] ; असावेव मै । ६. इत्येते मै । ७-७. नास्ति वा । ‡. अयं वादो ब[3,4] वि । ८-८. नास्ति वा । ९-९. नास्ति ब[1] । १०. याया ब[1,4] वा वि ; नास्ति ब[1,2] मै ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

अग्निहोत्र होम:
Digitized by Madhuban Trust

[हुतशेषभक्षणं समन्त्रकमपो निनयनञ्च]

भक्षयित्वाऽभ्यात्ममपः स्रुचा निनयते त्रिः सर्पदेवजनेभ्यः स्वाहेति ॥ १२ ॥

[1]भक्षं कृत्वा[1] अनन्तरम् अभ्यात्मम् आत्मानमभि अभ्यात्मम् अपः उदकं स्रुक् वैकङ्कती[2] तया स्रुचा निनयते अवाङ्मुखेन ऊर्ध्वदण्डया त्रिर्निनयेत् सर्पदेवजनेभ्यः इत्येतेन[3] मन्त्रेण। भक्षयित्वेति वचनाद् [4]भक्षणेन निनयनस्य[4] सम्बन्धवचनादपरयोर्वा हुत्वा भक्षणे भक्षणादनन्तरं निनयनमेव। परिसमाप्ते निनयने प्राक् समिदाधानादपरयोर्होमकालः[5]। निनयन समनन्तरं[6] होम एव सम्प्रदानपदवत्वात्[7] स्वाहाकारदर्शनाच्च। होमत्वात् पुनःपुनरुदकमादीयते। न हि सकृद्गृहीतेन बहवो होमा दृश्यन्ते। अन्यत्र प्रवृताहुतिभ्यो[8] होमत्वाच्च मन्त्राऽऽवृत्तिः। उदङ्ङावृत्य (आश्वौ २, ४, ५) इत्यधिकाराद् उदीच्यां दिशि निनयनं[9] भवति। स्रुग्ग्रहणात् कमण्डलुना निनयनं न[10] भवति ॥ १२ ॥

[कुशैः स्रुचं प्रक्षाल्य उदकपूर्णानां चतसृणां स्रुचां समन्त्रकं प्रागुदीच्योर्निनयनम्]

अथैनां कुशैः प्रक्षाल्य चतस्रः पूर्णाः प्रागुदीच्योर्निनयेद् ऋतुभ्यः स्वाहा दिग्भ्यः स्वाहा सप्तऋषिभ्यः स्वाहेतरजनेभ्यः स्वाहेति ॥ १३ ॥

अथ निनयनादनन्तरम् एव एनां[11] स्रुचं कुशैरुदकेन च[12] प्रक्षाल्य निर्लेपं कृत्वा चतस्रः स्रुचः पूर्णाः[13] प्रागुदीच्योः[14] [15]प्राच्याम् उदीच्यां च[15] निनयेत्। अभ्यात्ममपः स्रुचा निनयते त्रिः (आश्वौ २, ४, १२) इत्येतत् सर्वमनुवर्तते। तस्मादेकैकेन[16] मन्त्रेणात्र[17] त्रिरिति प्राप्ते चतस्र इत्युच्यते। पूर्णाः कर्तव्या

१-१. भक्षयित्वा ब^{3,4} वा वि ; भक्षयित्वा भक्षणं कृत्वा मै। २. नास्ति मूको। ३. इत्यनेन ब^{3,4}। ४-४. भक्षणे निनयनेऽस्य मै। ५. °कालं ब^{1,2} मै। ६. निनयनमनन्तरं मै ; °समानन्तरं ब^{3,4}। ७. संप्रदान एवत्वात् (°त्वातस् मै) ब^{1,2} मै ; संप्रदानं पंच (पव वा वि) त्वात् ब^{3,4} वा वि। ८. प्रवृत्ताहुति (°ती मै) भ्यः ब^{3,4} मै वा वि। ९. निनयनाद् ब^{1,3,4} ; नियमनाद् ब^{2} मै वा वि। १०. नास्ति मूको। ११. एतां ब^{1,2} मै। १२. नास्ति ब^{3,4} वा वि। १३. सुपूर्णाः ब^{3,4} वा वि। १४. °च्यां ब^{2} वा। १५-१५. नास्ति वा ; प्रतीच्यां च ब^{2} ; प्रतीच्युदीच्यां मै। १६. °देकेन ब^{1} ; °केन च ब^{2}। १७. मन्त्रेण ब$^{1-4}$ वा वि।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

इत्यर्थः । याश्च उक्ता याश्च वक्ष्यमाणाः सर्वाः । उपदेशे[1] विशेष उक्तः सर्वाऽर्थो भवितुमर्हति अविरोधात्[2] । चतस्रः स्रुचः । दिशोरानन्तर्ययोगस्य[3] संभवाद् याज्यानुवाक्यान्यायेन द्वे द्वे स्रुचौ एकैकस्यां दिशि भवतः । अभ्यात्ममित्येतस्य दिगुपदेशस्य[4] प्राप्तस्य स्थाने प्राची च उदीची च भवतः । अपः स्रुचा[5] निनयते (आश्रौ २, ४, १२) इत्येतावदेव वर्तते । ऋतुभ्यः स्वाहा (मासं २२, २८) इत्येतैश्चतुर्भिमन्त्रैः ॥ १३ ॥

[पञ्चम्याः षष्ठ्याश्च स्रुचोर्निनयनम्]

पञ्चमीं कुशदेशे पृथिव्याममृतं जुहोम्यग्नये वैश्वानराय स्वाहेति । षष्ठीं पश्चाद् गार्हपत्यस्य प्राणममृते जुहोम्यमृतं प्राणे जुहोमि स्वाहा ॥ १४ ॥

पञ्चमीं स्रुचं कुशदेशे कुशेषूपसाद्य (आश्रौ २, ३, १५) इति येऽधिकृतास्तेषां देशे पृथिव्याम् (मासं ११, ६६) इत्येतेन[6] मन्त्रेण । पञ्चमीग्रहणं त्रिरित्येतस्यैव[7] निवृत्त्यर्थम् । कुशानां देश इत्यनेन[8] अभ्यात्मम् (आश्रौ २, ४, १२) इति निवृत्तम् । अपः स्रुचा निनयते (आश्रौ २, ४, १२) इत्येतदेव वर्तते ।

[9]षष्ठीं पश्चाद् गार्हपत्यस्य प्राणममृते जुहोम्यमृतं प्राणे जुहोमि स्वाहेति षष्ठीं स्रुचं पूर्णां पश्चादपरस्यां दिशि गार्हपत्याऽग्नेः प्राणममृते जुहोमि इत्यनेन मन्त्रेण । षष्ठीग्रहणं त्रिरित्येतस्यैव† निवृत्त्यर्थम् ।[9] [10]पश्चाद्-वचनेन अभ्यात्मनिवृत्तिः‡ । अपः स्रुचा निनयते (आश्रौ २, ४, १२) इत्यनुवर्तते[10] । शेषं पत्न्यञ्जलौ[11] (आपश्रौ ६, १२, ४) इत्युक्तम् अध्वर्यूणाम् । तदप्यविरुद्धम् ॥ १४ ॥

[स्रुचं प्रताप्यान्तर्वेदि निदधाति]

प्रताप्याऽन्तर्वेदि निदध्यात् ॥ १५ ॥

---

१. एकदेशे ब³ वा वि ; एकादेशे ब² ; एकदेश° मै । २. अतिविरो° ब² मै । ३. अनन्तरयो° मै । ४. दिश उप° ब¹˒⁴ वा ; उप° वि ; नास्ति ब¹ । ५. नास्ति मूको । ६. इत्यनेन ब¹ । ७. तु. आश्रौ २, ४, १२ । ८. इत्येतेन मै । ९-९. नास्ति ब⁴ मै । †. त्रिरेतस्यैव ब² वा वि । १०-१०. नास्ति ब⁴ । ‡. °त्मानि° ब¹˒² । ११. °ञ्जलिम् मूको ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[1]आहवनीये प्रताप्य[1] स्रुचम् अन्तर्वेदि निदध्यात् स्थापयेत्। अधिकाराद्[2] गार्हपत्ये प्रतपनं[3] [4]प्राप्तम्। षष्ठीवचनादनधिकृतम्[†] आहवनीय एव भवति। अनादेशे[4] आहवनीये भवति (?) इत्युक्तम्। अध्वर्यूणामपि आहवनीये प्रताप्येति[5] ॥ १५ ॥

[परिकर्मिणे स्रुग्दानविकल्पः]

परिकर्मिणे वा प्रयच्छेत् ॥ १६ ॥

योऽत्र परिकर्मी भवति तस्मै वा एनां[6] स्रुचं प्रताप्य प्रयच्छेत्। वा इति विकल्पार्थे ॥ १६ ॥

[अग्निषु समिदाधानविधिः]

[7]अग्रेणाऽऽहवनीयं परीत्य समिध आदध्यात् तिस्रस्तिस्र उदङ्मुखस्तिष्ठन् ॥ १७ ॥

प्रथमां समन्त्राम् ॥ १८ ॥

आहवनीये दीदिहीति, गार्हपत्ये दीदायेति, दक्षिणे दीदिदायेति ॥ १९ ॥

अग्रेण[8] पूर्वेणाऽऽहवनीयम् अग्निं परीत्य गत्वा समिध आदध्यात् अग्निषु प्रक्षिपेत्। अपरिमिताः प्राप्तास्तिस्रस्तिस्रः एकैकस्मिन्नग्नौ। उदङ्मुखस्तिष्ठन् ऊर्ध्वमासीनः ॥ १७ ॥

प्रथमां समन्त्राम्, उत्तरे तूष्णीम्। आहवनीये दीदिहि इत्यनेन[9] मन्त्रेण। आहवनीयग्रहणं वेद्यधिकारात्। अग्रहणे वेदिमिति स्यात्। समिध इत्युक्ते अपरिमिताः प्राप्ताः तिस्रस्तिस्र इत्युच्यते[10]। प्राङ्मुखत्वे प्राप्ते उदङ्मुखत्वम्[11]। तिष्ठन्निति वचनात् प्राङ्निनयनेष्वासीनो[12] भवति। तिसृणां सहाभ्याधाने[13] प्राप्ते

१-१. नास्ति ब[3]; प्रतप्याहवनीये प्रतप्य मै। २. अधिकरणात् ब[2]। ३. प्रतितपनं ब[1,4]; प्र वि। ४-४. नास्ति वि। †. षष्ठां ब[1,4]। ५. प्रतप्येति मै; तु. काश्रौ ४, १४, २९ स्रुक्स्रुवमाहवनीये प्रतप्य निदधाति इति। ६. एतां ब[1,2]। ७. देवत्रातः—१७-१९ सूत्राणि सह व्याख्याति। ८. अग्रेणाहवनीयं ब[1] मै। ९. इत्येतेन ब[2] सं वि। १०. इत्युच्यमाने ब[1-4] वा वि; इत्यनुच्यमाने मै। ११. °ङ्मुखः ब[1]; °ङ्मुखत्वे ब[2] मै। १२. निनयेष्वा° ब[1,4]। १३. समिधाभ्या° ब[1,4]; सदाभ्या° वा वि।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्रथमामित्येकैकस्या[1] आधानम् । प्रथमाया[2] एव [3]मन्त्रो† नोत्तरयोरिति च । पुनराहवनीयग्रहणं गार्हपत्यविवक्षार्थम् । अन्यथा दीदिहि ‡गार्हपत्ये इत्येतेन‡[3] मन्त्रेण दक्षिणेन दक्षिणाग्निं गत्वा गार्हपत्येऽभ्यादध्यात्[4] । उदङ्मुखवचनाद्ध्युत्तरेण[5] गार्हपत्यं गत्वा उदङ्मुखस्य होमो[6] न दृश्यते । अग्निहोत्रहोमप्रवत्स्यद्यजमान-प्रायश्चित्तादिषु[7] प्राङ्मुख एव । दक्षिणे दक्षिणाग्नौ दीदिदाय इत्येतेन[8] मन्त्रेण आदध्याद् होमक्रमेण[9] ।। १८-१९ ।।

[उक्तपर्युक्षणस्यात्रापि विधानम्]

उक्तं पर्युक्षणम् ।। २० ।।

यदुक्तं[10] व्याख्यातं पर्युक्षणं[11] तदिह पुनः कर्तव्यमित्यर्थः ।। २० ।।

[पर्युक्षणद्वयेन परिसमूहनद्वयकथनं परिसमूहनस्य पूर्वभावित्वञ्च]

ताभ्यां परिसमूहने ।। २१ ।।

पूर्वे तु पर्युक्षणात् ।। २२ ।।

ताभ्यां पर्युक्षणाभ्यां यच्चादौ[12] यच्चान्ते[13] उभाभ्याम् । पञ्चमी-द्विवचनम् । उभाभ्यां परिसमूहने भवतः । परि समन्तत ऊहनं परिसमूहनं भवति । पर्युक्षणादनन्तरे[14] प्राप्ते पूर्वे[15] [16]तु भवतः†[16] । तु-शब्दः प्राप्तव्यावृत्त्यर्थः । पर्युक्षणात् पर्युक्षणादेव पूर्वे[15] [17]परिस्तरणे प्रतिषेधः[17] कृतो भवति । प्राप्तं तु लिङ्गदर्शनात् कुशेपूपसाद्य (आश्रौ २, ३, १५) इति । न च कुशाश्चोदिताः । एवमचोद्येऽपि प्राप्नुवन्ति[18], शास्त्रान्तरे[19] दर्शनात् । प्राक् पर्युक्षणात् परिस्तरणानां

---

१. प्रथमामेके° ब¹'² मै । २. अथ प्र° ब¹ । ३-३. नास्ति ब¹ । †. मन्त्राः वा । ‡-‡. गार्हपत्येन ब² मै वा वि ; गार्हपत्ये तेन ब¹'⁴ । ४. °त्येऽप्याधानम् ब³'⁴ । ५. °चनान्नह्युत्त° ब¹'² मै ; °चनात् तत् (त ब³) ह्युत्त° ब³'⁴ । ६. होमे ब³'⁴ मै । ७. प्रवत्स्य° ब³'⁴ । ८. इत्यनेन ब¹ । ९. °क्रमेणैव ब³'⁴ । १०. एतदुक्तं ब¹'² मै; एता (°त वि) उक्तं वा वि । ११. नास्ति मूको । १२. यथादौ ब¹'² मै ; यद्यादौ वा । १३. यद्वान्ते ब¹'² मै । १४. °नन्तरं ब⁴ । १५. पूर्वं ब¹'⁴ । १६-१६. नास्ति ब¹ । †. भवति ब²-⁴ मै वि । १७-१७. °रणप्रति° ब¹'³'⁴ वा वि । १८. प्राप्ताः ब² । १९. 'शास्त्रान्तरे' इत्यारभ्य २, ५, १ व्याख्यास्य—'आगन्तुं न शक्नोति' इति पर्यन्तः पाठो नास्ति ब¹ ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

अग्निहोत्र होम-
Digitized by Madhuban Trust

स्थानम् । अन्वाधाय परिसमुह्य परिस्तीर्येति । तेषां[1] प्राप्तानां प्रतिषेधः क्रियते पर्युक्षणात् पूर्वं तु भवत इति ।। २१-२२ ।।

[यथा सायमुक्तं तथैव प्रातरपि कर्तव्यताविधानम्]

एवं प्रातः ।। २३ ।।

यथा सायं विहरणादूर्ध्वम्[2] उक्तं विधानं एवं तत्सर्वं प्रातरपि भवति ।। २३ ।।

[सूर्योदयादनन्तरं पूर्वं वा समीपकाले होमविधानम्]

उपोदयं व्युषित उदिते वा ।। २४ ।।

[3]प्रादुष्काले विशिष्टः[3] कालो नियम्यते । उपोदयम्[4], उप समीपे, उदयसमीपे[5] । होतव्यम्, [6]व्युषिते उपोदये उषसि उदितायां होतव्यम्, उदिते वा आदित्ये होतव्यम्[6] इत्येते त्रयः कालविकल्पाः होमकालस्य । अननुपूर्ववचनाद्[7] उपोदयमित्येतस्य पूर्वपक्षत्वम् । अत्र उदिते चेत्येतस्य प्रधानत्वम् । यथा उद्यन्तु खलु वा आदित्य आहवनीयेन रश्मीन् सन्दधाति (ऐब्रा ५, ३१) इति श्रुतिः । तस्मिन्नुदिते वा होतव्यमिति त्रयः कालाः ।। २४ ।।

ऋतसत्याभ्यां त्वा (आश्रौ २, २, ११) इति प्राप्ते [8]पर्युक्षणेऽस्य स्थानेऽन्यो[8] मन्त्र आदिश्यते—

सत्यऋताभ्यां त्वेति पर्युक्षणम् ओमुन्नेष्यामीत्यतिसर्जनं हरिणीं त्वा सूर्यज्योतिषमहरिष्टकामुप दधे स्वाहेति समिदाधानं भूर्भुवः स्वरों सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति होम उन्मार्जनं च ।। २५ ।।

सत्यऋताभ्यां त्वा पर्युक्षामीत्यनेन मन्त्रेण पर्युक्षणम् । जपित्वावचनात् पर्युक्षामीति प्राप्नोतीत्युक्तम्[9] । अन्यथा यथाम्नातं[10] प्राप्नोति मन्त्रः[11] ।

---

१. येषां वि । २. हरणा° ब[3,4] वा वि । ३-३. प्रादुष्कालोऽवशिष्टः ब[1] मै । ४. °दयः ब[3,4] मै वा वि । ५. उपोदयस° ब[3,4] वा वि । ६-६. नास्ति मै । ७. अनानु° ब[3,4] मै वि । ८-८. °क्षणस्था° ब[3,4] वा वि ; °क्षणस्य स्था° मै । ९. तु. आश्रौ देवत्रात° २, २, ११ । १०. यथागतं ब[3,4] । ११. नास्ति ब[3,4] ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[१]ओमुन्नेष्यामीत्यतिसर्जनम्[१]। ओमुन्नेष्यामीत्यतिसर्जनस्य[२] स्थाने भवति।

[१]हरिणीं त्वा सूर्यज्योतिषमहरिष्टकामुपदधे स्वाहेति समिदाधानम्[१]। हरिणीं त्वा इत्यनेन मन्त्रेण समिदाधानं भवति।

[१]भूर्भुवः स्वरों सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति होमः[१]। भूर्भुवः स्वरों सूर्यः इत्यनेन मन्त्रेण होमो भवति। उन्मार्जनं च। [३]अवमृज्य कुशमूलेषु[३] निमार्ष्टि (आश्रौ २, ३, २०) इति अवमार्जनम्। [४]अस्य कर्मणः स्थाने उन्मार्जनं भवति। पाणिना अग्निमूर्ध्वं निमार्ष्टि तदुन्मार्जनम्[४]। स एव मन्त्रः। अन्यत्तु कर्म। च-शब्दः समुच्चयार्थः। य उक्ता मन्त्रा इदं च कर्म एतदन्यद् भवति। अतोऽन्यत् समानं सायंहोमेन[५] यावत् स्यादग्निहोत्रहोमः। याजमानत्वाद् यजमानेनैव होतव्यम्। क्षीरहोता[६] वा जुहुयादेतेन[७] हि होता परिक्रीतो भवति[८]। [९]ब्रह्मचारी वा जुहुयात् ब्रह्मणा हि स परिक्रीतो भवति[९] (आपश्रौ ६, १५, १६)। परिक्रयणात् [१०]स्वयमेव हुतं[१०] भवति। तस्माद् याजमानम्। यजमानाधिकारात् इदमपि याजमानं प्रवसतो यजमानस्य यदुच्यते ॥ २५ ॥

॥ इति चतुर्थः खण्डः ॥

१-१. नास्ति ब[१] मं। २. °ष्यामीति सर्ज° मं; °सर्जनीयस्य वा; तु. आश्रौ २, ३, १०। ३-३. अवसृष्टकुश° ब[१] मं। ४-४. नास्ति ब[३,४]। ५. सायंप्रातर्होमेन ब[३,४]; सायंतनहोमेन वा वि। ६. क्षीरं होता ब[१]; क्षीरे होता मं। ७. °यादित्यनेन ब[१]। ८. तु. आपश्रौ ६, १५, १६ 'क्षीरहोता वा जुहुयाद् धनेन हि स परिक्रीतो भवति' इति। ९-९. नास्ति ब[१,४]। १०-१०. स्वयमहुतं मं।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ द्वितीयेऽध्याये पञ्चमः खण्डः

[प्रवत्स्यत आहिताग्नेरग्निप्रज्वलनाद्युपस्थानान्तकर्मकथनम्]

प्रवत्स्यन्नग्नीन् प्रज्वल्याऽऽचम्यातिक्रम्योपतिष्ठते ॥ १ ॥

आहवनीयं शंस्य पशून्मे पाहि इति। गार्हपत्यं नर्य प्रजां मे पाहि इति। दक्षिणम् अथर्व पितुं मे पाहि इति। गार्हपत्याहवनीया-वीक्षेतेमान् मे मित्रावरुणौ गृहान् गोपायतं युवम्। अविनष्टानविहृतान् पूषैनानभिरक्षत्वास्माकं पुनरायनादिति ॥ २ ॥

[1]प्रवत्स्यन् प्रव्रजिष्यन्[1] यजमानः इदं वक्ष्यमाणं कृत्वा प्रवसेत्। प्रकृष्टो वासः, यत्र गत्वा यो होमकाले आगन्तुं न शक्नोति[2] स तस्य[3] प्रवासः। प्रवत्स्यन्[4] प्रव्रजिष्यन्[5] प्रवासं गमिष्यन् यजमानः[3] इदं विधानं कुर्यात्। अधिकारसूत्रमेतत्। अग्नीन् प्रज्वल्य† अग्नीन् विहृत्य यद्युद्धार्या[6] भवन्ति[7]। [8]अजस्रान् वा प्रज्वल्य सुसमिद्धान् कृत्वा आचम्य प्रयतोऽपि पुनराचम्य अतिक्रम्य ‡ततः प्रविश्य‡ तत उपतिष्ठते[8] आहवनीयमग्निं शंस्य (मासं ३, ३७) इत्यनेन मन्त्रेण। प्रज्वल्येति[9] प्रज्वलनमिष्टं विधीयते। [10]आचमनं कर्माङ्गं प्रयतस्यापि विधीयते[10]। आचम्योपतिष्ठते इत्युक्ते यत्र[11] आचान्तः तत्र आचम्यैव उपस्थानं प्राप्तम् आरादुपकारित्वादुपस्थानस्य। तस्मादतिक्रम्योपतिष्ठत इत्युच्यते। आहवनीय-ग्रहणं गार्हपत्यविवक्षार्थम्। अन्यथा [12]गार्हपत्यस्यैवाऽयं मन्त्रः स्यात्[12]। [13]गार्हपत्यं नर्य प्रजां मे पाहीति[13], गार्हपत्यं गत्वोपतिष्ठते नर्य प्रजां मे पाहि (मासं ३, ३७)

१-१. प्रवसिष्यन् ब^{1,3,4} वा वि; प्रवस्यन् प्रवसिष्यन् मं।
२. शक्नोति इत्यारभ्य पूर्ववर्ति- २, ४, २२ -सूत्रव्याख्यास्य— 'शास्त्रान्तरे' इति पर्यन्तः पाठो नास्ति ब^{2}। ३. नास्ति मूको। ४. नास्ति ब^{1}।
५. प्रवसिष्यन् यजमानः ब^{1}; प्रवसिष्यन् ब$^{2-4}$ वा वि। ६. द्वे सु द्वार्या ब^{1}; यद्यनुद्धार्या ब^{2}; यद्युक्तद्वयोः ब^{3}; यद्युक्तयोः ब^{4}; यद्यमंद्वार्या मं; यद्युन्नः द्वार्यो वा; यद्युत्तद्वार्या वि। ७. भवति ब^{3,4} वा वि। ८-८. नास्ति ब^{3,4} वा वि।
†. प्रज्वाल्य मं। ‡-‡. नास्ति मं। ९. प्रज्वाल्येति ब^{1,2} मं।
१०-१०. नास्ति ब^{3,4}। ११. अयमत्र मं। १२-१२. त्रुटितम् पू।
१३-१३. नास्ति ब^{1} मं पू।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

इत्यनेन मन्त्रेण । 'दक्षिणामथर्व पितुं मे पाहीति[1] । दक्षिणाग्निमुपतिष्ठते अथर्व (तैब्रा १, १, १०, २) इत्यनेन मन्त्रेण[2] । 'गार्हपत्याहवनीयावीक्षेत, इमान्मे मित्रावरुणौ गृहान्गोपायतं युवम् । अविनष्टानविहृतान्पूषैनानभिरक्षत्वास्माकं पुनरायनादिति[3] । गार्हपत्याहवनीयौ अग्नी ईक्षते इमान् मे (तु. मैसं १, ५, १४) इति एतेन मन्त्रेण ।। १-२ ।।

[यथाऽऽगतं प्रत्येत्याऽऽहवनीयोपस्थानम्]

यथेतं प्रत्येत्य प्रदक्षिणं परियन्नाहवनीयमुपतिष्ठते । मम नाम प्रथमं जातवेदः पिता माता च दधतुर्यदग्रे । तत् त्वं बिभृहि पुनरा ममैतोस्तवाऽहं नाम बिभराण्यग्ने इति ।। ३ ।।

ईक्षणं कृत्वा यथेतं यथागतं प्रत्येत्य प्रतिनिर्गत्य[4] गार्हपत्यदेशं प्राप्य गार्हपत्यदेशात् प्रदक्षिणं दक्षिणतो विहारं कृत्वा परियन्[5] गच्छन् आहवनीयमुपतिष्ठते—मम नाम (तु. तैसं १, ५, १०, १) इत्येतेन[6] । मन्त्रस्थस्यैवोपस्थानं प्राप्तमारादुपकारित्वात् तस्माद् यथेतमित्युच्यते । प्रत्येत्य इत्यनुच्यमाने दक्षिणाग्निदेशादेव प्रत्यागच्छन्नुपस्थानं ब्रूयात् । प्रत्येत्येत्युक्ते समीपं गत्वोपस्थानं प्राप्तम् । कस्मादिदमुच्यते । प्रदक्षिणं परिगच्छन्नुपतिष्ठते[7] इति । तस्माद् गार्हपत्यदेशं प्राप्य तत एवोपस्थानमन्त्रं प्रतिपद्यते एवं ब्रुवतः दक्षिणतो विहारो भवति ततः[8] प्रदक्षिणमित्युच्यते । परियन्नेवोपतिष्ठते, न गत्वा । आहवनीयग्रहणं गार्हपत्याहवनीययोरधिकारात् ।। ३ ।।

[उपस्थानानन्तरं परिगमनमन्त्रविधानम्]

प्रव्रजेदनपेक्षमाणो मा प्रगामेति सूक्तं जपन् ।। ४ ।।

परियन्नुपतिष्ठते[9] इत्युक्तम् उपस्थानमन्त्रं समाप्य यावदाहवनीयं न[10] प्राप्नोति । तीर्थदेशादेव प्रव्रजेद् गच्छेद् अग्नीन्[11] अनवेक्षमाणः[12] । प्रव्रजेत्

१-१. नास्ति ब[1] मै पू । २. मन्त्रः ब[1] ; नास्ति ब[2-4] मै वा वि पू । ३-३. नास्ति ब[1,2] मै पू । ४. प्रतिगत्य ब[1,2] मै पू । ५. परियात् ब[1] ; परीयात् ब[2-4] मै वा वि ; त्रुटितम् पू । ६. इत्यनेन ब[1,4] । ७. परीत्य गच्छ° ब[3,4] । ८. तत् ब[2-4] मै वा वि पू । ९. °तिष्ठेत ब[3,4] वा वि । १०. नास्ति ब[2-4] मै पू । ११. अग्नीनां ब[3,4] । १२. अप्रेक्षमाणः वा वि ; प्रेक्षमाणः ब[1,4] ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अग्निहोत्र होम. उपस्थानम्

मा प्रगाम (ऋ १०, ५७) इत्येतत् सूक्तं जपन् गच्छेत् । सूक्तग्रहणं सकृत्सूक्तप्रयोगार्थम्[1] । जपन् गच्छेदित्युक्ते गमिक्रियाया[2] दीर्घत्वात् सूक्तस्याभ्यावृत्तिः प्राप्ता । ततः[3] सूक्तग्रहणात् सूक्तमेव भवति, न पुनरावर्तना[4] इति ॥ ४ ॥

[अग्निसमीपे वाग्विसर्जनं ततः वाग्यमनम्]

आरादग्निभ्यो वाचं विसृजेत् ॥ ५ ॥

आराद् दूराद् अग्निभ्यो देशे अग्नीनामसन्दर्शने वाचं विसृजेत् । विसृष्टवाग्भवति । यथाकामं भवतीत्यर्थः[5] । वाग्विसर्गमन्त्रो न विद्यते, उत्तरकालमुपदेशात् ॥ ५ ॥

[पन्थानं प्राप्य मन्त्रजपविधानम्]

सदा सुगः पितुमां अस्तु पन्था इति पन्थानमवरुह्य ॥ ६ ॥

सदा सुगः (ऋ ३, ५४, २१) इति एतामृचं पन्थानम् अवरुह्य प्राप्य[6] जपेत् ॥ ६ ॥

[अकृताग्न्युपस्थानस्य प्रवसतः प्रतिदिशमग्न्युपस्थानविधानम्]

अनुपस्थिताग्निश्चेत् प्रवासमापद्येत । इहैव सन् तत्र सन्तं त्वाऽग्ने हृदा वाचा मनसा वा बिभर्मि । तिरो मा सन्तं मा प्रहासीर्ज्योतिषा त्वा वैश्वानरेणोपतिष्ठते इति प्रतिदिशमग्नीनुपस्थाय ॥ ७ ॥

अनुपस्थिताग्निश्चेत् अनुपस्थिता अग्नयो येन सः अनुपस्थिताग्निः स चेत् प्रवासमापद्येत [7]प्राप्नुयाद्† ग्रामान्तरं ϕकस्मै चिदर्थाय गतः स्यात्ϕ । तत एव प्रवासमापद्यते‡[7] । स यदाग्नयो[8] विहृता इति मन्येत तदा तत्रस्थ एव विहारमभिमुखोऽग्नीनुपतिष्ठते—इहैव सन् तत्र सन्तम् (तु. तैब्रा २, ५, ८, ७) इत्येतेन[9] मन्त्रेण प्रतिदिशं दिशं दिशं [10]प्रति प्रतिदिशं[10] विहारं मनसा[11] ध्यात्वा या

---

१. °क्तग्रहणार्थं प्रयो° ब^{3,4} वि ; °क्तप्रहरणार्थं प्रयो° वा ; नास्ति मै । २. गमनक्रियायां ब^{1,4} ; °क्रियायां वा वि पू । ३. मतः ब^{3,4} ; इतः वा बि । ४. °वर्तमान ब^{1} ; °वर्तंत ब^{3,4} वा वि । ५. संभव° मै । ६. नास्ति मै । ७-७. नास्ति ब^{3,4} । †. प्राप्यैतद् ब^{1} ; प्राप्येतद् ब^{2} पू ; प्राथ (°प?) णाद् वा ; प्रथ (प्राप ?) णाद् वि ; प्राप्येत मै । ϕ-ϕ. कस्य चिदर्थायागतस्य मै ; °र्थायागतस्य ब$^{1-4}$ वा वि पू । ‡. °पद्येत ब^{1} मै । ८. चेदग्नयो ब^{1,4} मै ; चेदाग्नयो ब^{2} पू ; यदग्नयो वि । ९. इत्येनेन ब^{3} ; इत्यनेन ब^{4} । १०-१०. नास्ति ब^{1,2} पू ; प्रतिदिशं मै । ११. मनसि ब^{1} ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[1]यस्याग्नेर्दिक् तां तां† ‡दिशमभिमुखस्तस्य तस्याग्नेरुपस्थानं‡ कुर्याद् एतेनैव मन्त्रेण ϕपूर्वोक्तेनैवानुक्रमेणϕ आहवनीयमेवाग्रेऽथ गार्हपत्यमथ दक्षिणाग्निम् इति(?)। उपस्थाय, प्रव्रजेद् अनपेक्षमाणः (आश्रौ २, ५, ४) इत्येवमादि समानम्। एवमुपस्थाय गत्वा प्रत्यागत्य च अभयं वोऽभयं मेऽस्तु (ऐब्रा ७, १२), इत्येवोपतिष्ठेत[2] (आश्रौ २, ५, १९)। किमेते मन्त्रा लिङ्गतो युज्यन्ते ॥ ७ ॥

[प्रत्यागच्छतो मन्त्रपाठविधानम्]

अपि पन्थामगन्महीति प्रत्येत्य ॥ ८ ॥

अपि पन्थाम् (ऋ ६, ५१, १६) इत्यनेन[3] मन्त्रेण प्रत्येत्य[4] प्रत्यागच्छन् प्रत्येत्य सकाशं प्राप्य ॥ ८ ॥

[प्रवसत आहिताग्नेः प्रत्यागत्याऽऽहवनीयेक्षणविधानम्]

समित्पाणिर्वाग्यतोऽग्नीञ्ज्वलतः श्रुत्वाऽभिक्रम्याहवनीयमीक्षेत । विश्वदानीमा भरन्तोऽनातुरेण मनसा । अग्ने मा ते प्रतिवेशा रिषाम । नमस्ते अस्तु मीळ्हुषे नमस्त उपसद्वने । अग्ने शुम्भस्व तन्वः सं मा रय्या सृजेति ॥ ९ ॥

समिधः पाणौ यस्य सोऽयं समित्पाणिः। वाग्यतः[5] यदि ग्रामदर्शने वा [6]वाचं न यच्छतीत्यन्येषाम्[6] (तु. माश्रौ १, ६, ३, १२)। वाग्यतो भूत्वा आगत्य[7] [8]अग्नीन् प्रज्वलतः श्रुत्वा[8] अग्नयो ज्वलन्त इति कस्यचिद् वचनं श्रुत्वा। वचनादन्येन विहृता अग्नयो भवन्तीति[9] सिद्धम्। तत आचम्यातिक्रम्य प्रविश्य आरादुपकारित्वादभिक्रम्य [10]आहवनीयमीक्षेत— विश्वदानीमा इत्येताभ्यां मन्त्राभ्याम्[10] ॥ ९ ॥

१-१. °ग्नेर्दिक् क्रमेण ब[2]। †. ततो ब[1] मै पू ; तां वि। ‡-‡. °मुख (°खं मै) तस्याग्नेरुप° ब[1] मै पू। ϕ-ϕ. °क्तेनैव मन्त्रेण मै। २. °तिष्ठते ब[3,4]। ३. इत्येतेन मै। ४. नास्ति ब[1]। ५. वाग्यमः ब[1,2] मै पू। ६-६. वास्यतें ग° ब[1]; वाचं य° ब[3,4] वा वि ; वचनं य° पू। ७. आगत्या ब[1]; अन्या ब[2]; श्रुत्वा ब[3,4]; अत्या वा वि पू ; आप्त्या मै। ८-८. अग्नि प्रज्वलने कृत्वा ब[1]; अग्निप्रज्वलनं कृत्वा ब[2] मै वि पू ; अग्निप्रज्वलनं° वा ; अग्नीन् प्रज्वलनं ब[3,4]। ९. भवन्तीति तत् ब[3,4] वा वि। १०-१०. नास्ति मूको।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

उपस्थानम्
Digitized by Madhuban Trust

[प्रवासादागतस्य आहिताग्नेराहवनीयोपस्थानविधानम्]

अग्निषु समिध उपनिधायाऽऽहवनीयमुपतिष्ठते । मम नाम तव च जातवेदो वाससी इव विवसानौ ये चरावः । ते बिभृवो जीवसे दक्षसे च यथायथं नौ तन्वौ जातवेद इति ।। १० ।।

[1]अग्निषु समिध उप समीपे निधाय[1] आहवनीयमुपतिष्ठते—मम नाम (तु. तैसं १, ५, १०, १) इत्यनेन[2] मन्त्रेण । अग्निषु समिधः इति सर्वेषामधिकाराद् आहवनीयग्रहणम्[3] ।। १० ।।

[समिदाधानम्]

ततः समिधोऽभ्यादध्यात् ।। ११ ।।

ततः उपस्थानादनन्तरं[4] या उपनिहिताः समिधः ता अभ्यादध्याद् अभि उपरि आदध्यात् प्रक्षिपेत् ।। ११ ।।

[त्रिष्वग्निषु समन्त्रकं समिदाधानं गार्हपत्याऽऽहवनीयेक्षणञ्च]

आहवनीये । अगन्म विश्ववेदसमस्मभ्यं वसुवित्तमम् । अग्ने सम्राळभि द्युम्नमभि सह आयच्छस्व स्वाहेति । गार्हपत्येऽयमग्निर्गृहपतिर्गार्हपत्यः प्रजाया वसुवित्तमः । अग्ने गृहपतेऽभि द्युम्नमभि सह आयच्छस्व स्वाहेति । दक्षिणेऽयमग्निः पुरीष्यो रयिमान् पुष्टिवर्धनः । अग्ने पुरीष्याभि द्युम्नमभि सह आयच्छस्व स्वाहेति । गार्हपत्याहवनीयावीक्षेतेमान्मे मित्रावरुणौ गृहानजूगुपतं युवम् । अविनष्टान् विहृतान् पूषैनानभ्यराक्षीदास्माकं पुनरायनादिति ।। १२ ।।

आहवनीये अभ्यादध्यात्[5]—अगन्म विश्ववेदसम् इति मन्त्रेण । आहवनीयग्रहणं गार्हपत्यविवक्षार्थम् । अक्रियमाणे तु[6] गार्हपत्यार्थ एवाऽयं मन्त्रः स्यात्[7] ।

१-१. नास्ति मूको । २. इत्येतेन ब[2] वा पू । ३. °हणं स्वाहेति ब[1,4] ।
४. °स्थानानन्तरं ब[2] । ५. नास्ति ब[1,4] वा वि । ६. न ब[1,3] मे पू ।
७. स्यात् स्वाहेति ब[3,4] वा वि ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

गार्हपत्ये समिधोऽभ्यादध्यात्—अयमग्निः इत्येतेन मन्त्रेण[1]। [2]दक्षिणे† दक्षिणाग्नौ समिधोऽभ्यादध्यात्—अयमग्निः पुरीष्यः इत्येतेन†। गार्हपत्याऽऽहवनीयौ गार्हपत्यश्च आहवनीयश्च गार्हपत्याऽऽहवनीयौ अग्नी ईक्षते दक्षिणाग्निसमीपे एव स्थित्वा इमान् मे मित्रावरुणौ इत्येतेन[2] मन्त्रेण ॥ १२ ॥

[यथाऽऽगतं प्रतिनिवर्तनविधानम्]

यथेतं प्रत्येत्य ॥ १३ ॥

यथेतं यथागतेनैव मार्गेण प्रत्येत्य प्रतिनिवृत्य[3] ॥ १३ ॥

[दशरात्रं प्रोषितस्य समन्त्रकं हवनविधानम्]

प्रोष्य भूयो दशरात्राच्चतुर्गृहीतमाज्यं जुहुयात् । मनोज्योतिर्जुषतामाज्यं मे विच्छिन्नं यज्ञं समिमं दधातु । या इष्टा उषसो या अनिष्टास्ताः सन्तनोमि हविषा घृतेन स्वाहेति ॥ १४ ॥

प्रोष्य भूयो दशरात्रात्[4] बह्वी[5] रात्रीः[6] प्रोष्य प्रवस्य[7] गार्हपत्ये आज्यं विलाप्य तूष्णीमुत्पूय आहवनीयं गत्वाऽऽसीनः स्रुचि चतुर्गृहीतम् आज्यं कृत्वा जुहुयात् मनोज्योतिः इत्येतेन मन्त्रेण[8]। यथेतमित्यनुच्यमाने दक्षिणाग्नावेव प्राप्नोति। तत्र स्थित्वा प्रत्येत्य विषमोऽर्थः। प्रत्येत्य तदानीमेव जुहुयादिति। भूयो दशरात्रादिति वचनाद् [9]दश रात्रीः[9] प्रोष्य जुहोति। चतुर्गृहीतवचनात्[10] स्रुक् जुहूरेव भवत्यनादेशे। आज्यग्रहणं पय आदीनां[11] हौम्यद्रव्याणामधिकारात्[12]। आसीनो जुहुयाद् अग्निहोत्रम्। अधिकाराद् अस्या आहुतेः [13]अग्निहोत्रहोमार्थः स्यात्[13]। अग्निहोत्रहोमानां[14] समानार्थोऽयं[15] होमः ॥ १४ ॥

---

१. नास्ति ब[1,2] पू वि। २-२. दक्षिणे अग्निषु समिध उप समीपे निधायाहवनीयमुपतिष्ठते मम इति ब[3,4] वा वि। †-†. नास्ति ब[2]। ३. प्रतिनिवृत्य ब[1-4] वा वि पू। ४. नास्ति ब[2-4] पू वा वि। ५. बह्वो ब[1-4] वा वि पू; बह्वयो मै। ६. रात्रयः मूको। ७. प्रवत्स्य ब[1,2] वा; प्रवत्स्या पू वि, प्रवत्स्यात् ब[1-4]। प्रवस्य इति उत्सूत्रः प्रयोगः संपा०। ८. नास्ति ब[2-4] वा वि मै पू। ९-९. दशरात्रं ब[3,4] वा वि; त्रुटितम् पू। १०. इतोऽनन्तरं वा-कोशपाठो नास्ति। ११. पायसादीनां ब[2] वि; पयसादीनां ब[3,4] मै पू। १२. होम्य° ब[1] वि; होम° ब[2,4] पू। १३-१३. °होत्रमहोमार्थस्य ब[1]; °होत्रमहोमार्थे स्य पू; °होत्रमहोमार्थे स्या वि; °मार्थे स्यात् ब[1,4]; °मार्थेऽस्य मै। १४. नास्ति वि। १५. प्रतिस° वि।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

उपस्थानम्
Digitized by Madhuban Trust

[अग्निहोत्रविच्छेदे होमविधानम्]

अग्निहोत्राऽहोमे[1] च ॥ १५ ॥

[2]अग्निहोत्रस्य अहोमः अग्निहोत्राहोमः[2] तस्मिन् अग्निहोत्राहोमे[3] च एतामेवाहुतिं जुहुयात् । भूयो दशरात्रात् (आश्रौ २, ५, १४) इत्युक्तम् । दशरात्रं प्रवासे अविच्छिन्नो[4] भवति । तस्माद् दशरात्रम् अहुते एतामाहुतिं जुहुयात् । अत ऊर्ध्वं पुनराधेयमेव विच्छिन्नत्वात्[5] ॥ १५ ॥

[उक्ताहुतिहोमानन्तरं प्रतिहोमविधानम्]

प्रतिहोममेके ॥ १६ ॥

आहुतीनां प्रतिहोमम् एके मन्यन्ते । [6]प्रतिसंख्यं यावदिह[6] चतुर्गृहीतानि गृहीत्वा पक्षहोमन्यायेन जुहुयात् । प्रतिहोमं वा भवतीति विकल्पः । प्रतिहोमे सति [7]यत्प्रकृति ह्यग्निहोत्रद्रव्यं[7] तेनैव जुहुयात् ॥ १६ ॥

[परिसमूहनानन्तरं समन्त्रकवाग्विसर्गविधानम्]

परिसमुह्योदग्विहारादुपविश्य भूर्भुवः स्वरिति वाचं विसृजेत ॥ १७ ॥

परिसमुह्य[8] परिसमूहनं कृत्वा अग्नीनाम् उदग् विहारादुदीच्यां दिशि उपविश्य भूर्भुवः स्वरित्येता[9] व्याहृतीर्जपित्वा[10] वाचं विसृजेत यथाकामं वदेत् । तस्मिन् प्रदेशे निरसनं न विद्यते । अध्वर्युपदार्थत्वाद् यजमानस्य ॥ १७ ॥

[अनाहिताग्नेरपीक्षणप्रपदनयोः विधानम्]

गृहानीक्षेताऽप्यनाहिताग्निर्गृहा मा बिभीतोप वः स्वस्त्येवोऽस्मासु च प्रजायध्वं मा च वो गोपती रिषदिति । प्रपद्येत गृहानहं सुमनसः प्रपद्ये वीरघ्नो वीरवतः सुवीरान् । इरां वहन्तो घृतमुक्षमाणास्तेष्वहं सुमनाः संविशानीति । शिवं शग्मं शंयोरिति त्रिरनुवीक्षमाणः ॥ १८ ॥

---

१. °होत्रहोमे ब[3,4] मं ।　　२-२. अग्निहोत्रस्य होमः अग्निहोत्रहोमः मूको ।
३. °होत्रहोमे ब[3,4] मं वि ; °होत्रस्याहोमे ब[1] ।　　४. अव्युच्छिन्नो ब[1,2] मं वि पू ।
५. व्युच्छि° ब[1,2] वि पू ।　　६-६. °संख्या या° ब[2-4] मं पू ; °संस्था या° वि ।
७-७. °तिरग्नि° मूको ।　　८. °समूह्य मं ।　　९. °त्येतां ब[1] ।
१०. व्याहृतीर्जपित्वा इत्यारभ्य विंशतितमसूत्रव्याख्यास्थ- आग्नेयीनां च इति पर्यन्तः पाठो नास्ति ब[1] ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

विहारान्निष्क्रम्य गृहानीक्षेत। [1]अनाहिताग्निरपि प्रवासादेत्य[1] गृहानीक्षेत। तस्याप्युपस्थानमस्ति—गृहा मा बिभीत इत्यनेन मन्त्रेण। अत्र प्रेक्षणादनन्तरं गृहान् प्रपद्येत गृहानहम् इत्यनेन[2]। अनाहिताग्निरपीत्यनुवर्तते[3]। गृहान् प्रपद्य शिवं शग्मम् इत्येतं मन्त्रं त्रिर्जपति गृहान् अनुवीक्षमाणः अनुपूर्वेण विविधमीक्षमाणः। जपोऽयं न कर्मकरणः[4]॥ १८॥

[प्रवासादागतस्य तदहनि विदितस्याप्यलीकस्य न निवेदनीयत्वम्]

विदितमप्यलीकं न तदहर्ज्ञापयेयुः ॥ १९ ॥

विदितमपि विज्ञातमपि अलीकं व्यलीकम् अकुशलं नष्टं दग्धमपि न तदहर्ज्ञापयेयुः; अन्यस्मिन्नहनि ज्ञापयेयुः [5]गृहागतं गृहस्थाः[5]। अपि-शब्दः समुच्चयार्थः। अविदितमपि[6]। गृहस्थेन विज्ञातस्य संकीर्तनं न[7] कर्तव्यम्—इदं नष्टम् इदं दग्धमिति। अविज्ञातस्यापि संबोधनं न[8] कर्तव्यम्। सङ्कलेनैव युक्ता भवन्तीति विज्ञायते(?)। एको विधिः[9] परिसमाप्तः॥ १९॥

इदानीमुत्तरकल्पो वक्ष्यते—

[प्रवासादागतस्याहरहरग्निहोत्रहोमोपस्थानविधिकथनम्]

विज्ञायतेऽभयं वोऽभयं मेऽस्त्वित्यत्येवोपतिष्ठेत प्रवसन् प्रत्येत्याहरहर्वेति ॥ २० ॥

प्रवसन्। अभयं वोऽभयं मेऽस्तु (ऐब्रा ७, १२) इत्यनेनैव[10] मन्त्रेणोपतिष्ठेत प्रवसन् प्रवासं गमिष्यन् न[11] पूर्वेण[12] विधिना। श्रुतिदर्शनादयमेव[13] कल्पः कर्तव्यः। एव-शब्दोऽवधारणार्थः। एतेनैव मन्त्रेण, न पूर्वमन्त्रैरुपतिष्ठेत। ईक्षणाभ्याधानादि[14] अधिकारबहुत्वात् प्रवसन्नित्युच्यते। प्रत्यागमाधिकाराद् [15]अस्मिन् पक्षे[15]

१-१. °ताग्नेरपि शाला० प्रवासा° ब[4]। २. इत्येतेन ब[2] मै वि। ३. वर्तमाने (°नः मै) ब[3,4] मै वि पू। ४. कर्मणः ब[3,4] मै; कामाणा ब[2]; कमरणः वि। ५-५. गृहा न (नापि मै) गृहस्थः ब[1] मै वि पू; गृहीतं गृहस्थः ब[3,4]। ६. नास्ति मूको। ७. नास्ति ब[1,3,4] मै वि पू। ८. नास्ति मूको। ९. भवति ब[3,4] मै वि पू। १०. इत्येतेनैव मै। ११. नास्ति ब[3,4]। १२. पूर्व्येण ब[1]। १३. इति द° ब[2]; तु. ऐब्रा ७, १२। १४. °णाद्याधा° मूको; तु. आश्रौ २, ५, ९; ११। १५-१५. नास्ति ब[3,4]।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

उपस्थानम्
Digitized by Madhuban Trust

[1]अग्नीन् विहृत्य[1] प्रादुष्करणमपि न कर्तव्यम् । विहाराधिकारं समाप्य गृहप्रवेशनादि च विधाय विहारमधिकृत्य विधानादधिकृतेष्वेव भवति । कः श्रेयांसं सुपुप्तं[2] बोधयिष्यति[3] (हिश्रौ ६, ७, ८; आपश्रौ ६, २७, १) इति च श्रुतेः । [4]तस्मान्न बोधयितव्यः[4] । प्रत्येत्य[5] एवं प्रत्येत्य च एतेनैवोपतिष्ठेत । प्रत्यागते तु भूर्भुवः स्वरित्येतस्य स्थाने [6]आग्नेयीनां च[6] स्थाने समानजातिन्यायेन[7] आहुत्यनुमन्त्रणं[8] भवत्येव[9], [10]अथ कोऽहरहर्देवान्[10] याचिष्यति[11] (तु. तैसं १, ५, ९, ६) इति श्रुतेः । अहरहर्वा[12] । वा-शब्दः समुच्चयार्थे भवति । सायं प्रातः एतेनैवोपस्थानं कृत्वा आग्नेयीभिः पावमानीभिश्च । [13]वा-कारः शेषविनाशनार्थः[13] ॥ २० ॥

॥ इति पञ्चमः खण्डः ॥

१-१. अग्नीनवि° ब[2] मं वि ।　　२. विपुप्तम् इति मुद्रितः पाठः । ३. बोधयति मं ।　　४-४. तस्मात् प्रबोधयितव्यम् मं ।　　५. नास्ति ब[2] । ६-६. आग्नेयीनां च-इत्यतः पूर्वं सप्तदशसूत्रव्याख्यास्थ—व्याहृतीर्जपित्वा इति पर्यन्तः पाठो नास्ति ।　　७. समानं विज्ञायते ब[3,4] ।　　८. हुत्वानुमन्त्रणं ब[1]; तु. आश्रौ २, ५, १४; १७ ।　　९. न भ° ब[2] ।　　१०-१०. अतोऽह° मूको । ११, वाचयि° ब[1,2]; याचयि° ब[3,4] वि पू ।　　१२. नास्ति ब[1,2] ।　　१३-१३. °रशे° मूको ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ द्वितीयेऽध्याये षष्ठः खण्डः

[अमावास्यायामपराह्णे पिण्डपितृयज्ञविधानम्]

अमावास्यायामपराह्णे पिण्डपितृयज्ञः ।। १ ।।

यजमानाधिकारादिष्टोऽपि[1] प्रयोगः संज्ञया[2] विधीयते । 'याजमानत्वाद् अग्निहोत्रादनन्तरं[3] दर्शपूर्णमासयोरिज्याकालो[4] भवति । तौ व्याख्यातौ । तयोरिज्याकाले पितृयज्ञो विधीयते । तदङ्गत्वादमावास्यायां तिथौ अहश्चतुर्थभागं दर्शयति[5] । तस्माद्[6] दर्शाङ्गं भवति । अङ्गत्वाद् दृष्टचन्द्रायामपि क्रियते पितृयज्ञः । द्यावापृथिव्योरयने कुण्डपायिनामयने[7] च क्रियते । एवं बौधायनीयेऽपि[8] प्रवसने[9] । अन्येषां तुल्याङ्गम्[10] स्वकल्पविधानात्[11] चन्द्रदर्शने[12] । दृश्यमाने तु नाऽन्येषां क्रियते । अक्रियमाणेऽपि(ऽधि-?)दर्शे[13] क्रियते । [14]कुण्डपायिनामयनादिषु च† क्रियते[14] ।। १ ।।

[दक्षिणाग्नेरेकोल्मुकं गृहीत्वा प्राग्दक्षिणस्यां समन्त्रकं तत्प्रणयनम्]

दक्षिणाग्नेरेकोल्मुकं प्राग् दक्षिणा प्रणयेद् ये रूपाणि प्रतिमुञ्चमाना असुराः सन्तः स्वधया चरन्ति । परापुरो निपुरो ये भरन्त्यग्निष्टाल्लोकात् प्रणुदात्वस्मादिति ।। २ ।।

---

१. °कारादिहाद्य (°दिह ब[2] ; °दि मै पू), शब्दोऽपि (द्यष्टोपि ब[2] ; दृष्टोपि मै पू) ब[1,2] मै पू ; °कारादृ (°रा ब[3]) दृष्टोपि ब[3,4] ; °कारादिष्टोऽपि वि । २. संज्ञा मूको । ३-३. °नत्वादथावाग्नि° ब[1,4] ; °नत्वादथवाग्नि° ब[3] वि पू ; °नादपिवाग्नि° मै । ४. °पौर्ण° वि पू ; °योरिष्ट्वा कालो मै । ५. °यति दक्षिणाग्नेरेकोल्मुकम् ब[2-4] मै वि पू । ६. नास्ति ब[2] । ७. कुण्डपायिने ब[1] ; कुण्डपायने ब[2] ; कुण्डपायिनोऽप्ययने मै । ८. बौधायनोऽपि ब[1] ; बो (बौ पू) धायनीयोऽपि ब[2] मै वि पू । ९. प्रवसतो ब[1] ; प्रवसेन (°ने ब[2]) ब[2] मै ; अवसने ब[3,4] ; प्रसवने वि ; प्रवसेत पू (प्रवचने इति शोधोऽपि संभाव्यते) । १०. तुल्यङ्गत् ब[2] ; तुल्यङ्गं (°ङ्ग ब[3,4]) ब[1,3,4] वि पू । ११. स्वकाल्प (संकल्प ब[2] ; स्वकाल ब[3,4]) विधा (विश° मै) नात् मूको । १२. चन्द्राद° ब[1] । १३. दर्श ब[1-4] वि पू । १४-१४. नास्ति ब[3,4] । †. च न ब[1,2] पू ; न च मै ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

पिण्डपितृयज्ञ
Digitized by Madhuban Trust

[1]दक्षिणाग्निदर्शनार्थो† ‡विहारः क्रियते‡। एवं विहारे इयंϕ चोदना— दक्षिणाग्नेः। तस्माद्[1] दक्षिणाग्नेरेकोल्मुकम्। एकमुल्मुकम् एकोल्मुकम्। एकग्रहणाद् द्विशाखं[2] न[3] भवति। प्राग् दक्षिणस्यां दिशि प्रणयेत् नयेत् ये रूपाणि इत्यनेन मन्त्रेण कर्मादावतिप्रणयनोपदेशावतिप्रणीत[4] इह प्रधानः। प्रधानत्वादविशेषवचनाच्चातिप्रणीते होमः [5]उपसमाधानपरिस्तरणवचनाच्च¶, लेखायां ध्रुवायां स्थालीपाकस्य च सादनात्μ। येषां दक्षिणाग्निहोमः[5] तेषां हुत्वाऽतिप्रणयनम्। [6]न चोपसमाधानम्[6]। न च परिस्तरणम्। पश्चाद् दक्षिणाग्नेः स्थालीपाकस्य [7]सादनं ध्रुवायाश्च[7] ॥ २ ॥

[अनिर्दिष्टदिक्कानां कर्मणां प्राग्दक्षिणस्यामभिकर्तव्यत्वम्]

सर्वकर्माणि तां दिशम् ॥ ३ ॥

[8]सर्वकर्माणि सर्वाणि कर्माणि[8] [9]पात्रसादनावदानहोमनिपरणोपस्थानादीनि[9] तां दिशं प्राग्दक्षिणां दिशमभि कर्तव्यानि। तस्य[10] नित्याः (आश्रौ १, १, ८) इत्येतस्याऽपवादः। सर्वग्रहणाद् गार्हपत्यस्योपस्थानस्यापि प्राप्तिः ॥ ३ ॥

[उभयोरप्यग्न्योरुपसमाधानपरिस्तरणपूर्वकं पात्राणां सादनम्]

उपसमाधायोभौ परिस्तीर्य दक्षिणाग्नेः प्रागुदक् प्रत्यगुदग् वैकैकशः पात्राणि सादयेच्चरुस्थालिशूर्पस्फ्योलूखलमुसलस्रुवध्रुवकृष्णाजिनसकृदाच्छिन्नेध्ममेक्षणकमण्डलून् ॥ ४ ॥

१-१. नास्ति ब[3,4]। †. दशार्थं ब[1]; दशार्थो वि; °नार्थे ब[2]; नास्ति मै। ‡-‡. नास्ति मै। ϕ. एवं ब[1] पू। २. विशाखं ब[1,3,4] वि पू; विशेपं ब[2]। ३. नास्ति ब[3,4] मै वि। ४. °दावेवेति प्रण° ब[1,3,4] मै वि; °दावेति प्रण° ब[2]। ५-५. नास्ति ब[1]। ¶. स्तरणहोमाच्च मै; तु. आश्रौ २, ६, ४। μ. तु. आश्रौ २, ६, १०। ६-६. न उपसमाधानम् पू; उपस्थानम् मै वि; °पसंधानम् ब[1,2]। ७-७. नास्ति ब[1]। ८-८. नास्ति ब[1] पू। ९-९. पात्रसंसादनं (पात्रसादन ब[2]) परिस्तरणमवसादनहोम (°मा ब[2]) निपरणो (निप्राणो ब[3,4] मै वि) पस्थाना (°स्था मै) दीनि ब[2-4] मै वि; परिस्तरणमासादनहोम° ब[1]; नास्ति पू; तु. आश्रौ २, ६, ४; १२; १५; ७, ७। १०. नास्ति ब[1]।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

उपसमाधाय सुसमिद्धं[1] कृत्वा होमाय समर्थम्[2] । उभौ परिस्तीर्य उभावग्नी दक्षिणाग्न्यतिप्रणीतौ परिस्तीर्य[3] परिस्तरणं कृत्वा । परि समन्ततः स्तरणम् । तद् गृह्ये[4] वक्ष्यति । अतिप्रणीताधिकारादुभावित्युच्यते । तत्र [5]दक्षिणाग्नेः प्रथमं[5] परिस्तरणं विहाराङ्गानुक्रमात् । अतिप्रणीतस्य वा प्रथमं[6] प्रधानत्वात् । प्रधाने होमो भवति । दक्षिणायामग्निः दक्षिणाग्निः । तस्माद् दक्षिणाग्नेः प्रागुदीच्यां दिशि एकैकम् एकैकशः पात्राणि, यानि वक्ष्यामः, तानि सादयेत् स्थापयेत् । कानि[7] । चरुस्थालीत्येवमादीनि । उभयोरधिकाराद् दक्षिणाग्नेरित्याह । द्वन्द्वं पात्राणि प्रयुनक्ति[8] इति प्रकृतौ [9]तस्मादेकैकश इत्याह[9] । एकैकश इति वचनात् प्रोक्षणादिपात्रसंस्कारः[10] प्राप्तः । [11]चरुस्थालीप्रभृतीनि पात्राणि[11] वक्ष्यन्ते । चरोः स्थाली चरुस्थाली । चरुग्रहणादाज्यस्थाल्याः प्रतिषेधः[12] । शूर्पम् । स्फ्यो वज्रः उपग्रहणार्थः[13] । उलूखलं च मुसलं च स्रुवश्च ध्रुवा च कृष्णाजिनं च । समूलं बर्हिः सकृदाच्छिन्नं भवति सकृल्लूनम् । इध्मः[14] पञ्चदश समिधो[15] भवन्ति[16] । आघारसमिधौ[17] आनुयाजिकी[18] च अर्था[19] लुप्यन्ते । मेक्षणं होमार्थम् । कमण्डलुः उदकार्थम् । अर्थादीनि [20]दार्शपौर्णमासिकान्येव† भवन्ति । नाधिकानि । यद्यधिकानि स्युः पितृमेधेऽधिकानि[20] उपदिशेरन् । आहिताग्नेस्तु तत्संज्ञान्यधिक्रियन्ते[21] वचनात् । एवमनाहिताग्नेरपि[22] प्राप्नोति । [23]यथा गृहकर्मणि† अव्यक्तहोमेषु स्रुचः[23] ॥ ४ ॥

[अग्निसमीपस्थितं शकटं दक्षिणत आरुह्य व्रीहिपूर्णचरुस्थालीतः शूर्पे व्रीहिपातनम्]

दक्षिणतोऽग्निष्ठमारुह्य चरुस्थालीं व्रीहीणां पूर्णां निमृजेत् ॥ ५ ॥

---

१. समिद्धं ब[1,4] । २. समर्थं ब[1] ; समर्थे ब[2-4] । ३. नास्ति ब[1] । ४. तु. आगृ १, ३, १ । ५-५. प्रदक्षिणाग्न्यौ(?) तिप्रणीतौ यः ब[1] । ६. नास्ति ब[1,4] वि मै । ७. तानि ब[2]; कति मै । ८. तु. आपश्रौ १, ११, ४; १५, ६ । ९-९. °कैकमित्याह मूको । १०. प्रोक्ष(क्ष्य:?)मारणादि° मै वि । ११. °स्थाली-पात्राणि मूको । १२. प्रतिग्रहः ब[1] । १३. उपहरणार्थः ब[1,4] । १४. इध्मं ब[2] मै ; इध्मा ब[1,4] ; इध्म वि । १५. नास्ति ब[1] । १६. भवन्ति ब[1,4] वि पू । १७. आज्यस° ब[2] । १८. अनु° मूको । १९. अर्थात् ब[1,3,4] मै वि पू । २०-२०. नास्ति ब[1] । †. दर्शपूर्ण° ब[3,4] मै ; दर्शपौर्ण° ब[1] वि ; ...सिका° पू । २१. संज्ञान्य° ब[1] ; तत्संसान्य° ब[2] ; वत्स (वत्सं ब[4] मै पू) न्यधि° ब[1,4] मै वि पू । २२. एवमनाहिताग्निरिति ब[1,2] पू ; एव न न हिताग्निर्न ब[3]; एव न हिताग्निर्नं ब[4] ; नास्ति वि; अनाहिताग्निः मै । २३-२३. नास्ति मै वि । †. गृहकर्मिणः ब[3,4] ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[1]दक्षिणाग्न्यधिकारः[1]† । तस्माद् दक्षिणाग्नेः[1] दक्षिणतः दक्षिणस्यां दिशि अग्निष्ठं शकटं प्रागवस्थापितं भवति । तमारुह्य चरुस्थालीं, [2]व्रीहीणामेव न यवानां, पूर्णां सतीं निमृजेत्[2] । पाणिना निमार्ष्टि शिखामपनयति ।। ५ ।।

[शूर्पे पतितानां व्रीहीणां शकटे निधानम्]

परिसन्नान्निदध्यात् ।। ६ ।।

ये परिशीर्णाः तान् शकटे निदध्यात् । एवमनुच्यमाने[3] परिसन्नानामेवावहननसंस्कारः प्राप्नोति ।। ६ ।।

[कृष्णाजिन उलूखलं कृत्वा पत्न्या व्रीह्यवहननम्]

कृष्णाजिन उलूखलं कृत्वेतरान् पत्न्यवहन्यादविवेचम् ।। ७ ।।

दक्षिणत इत्यधिकारः । अग्नेर्दक्षिणतः प्रत्यगुदग्ग्रीवमुत्तरलोम कृष्णाजिनमास्तीर्य तस्मिन्नुलूखलं कृत्वा स्थापयित्वा इतरान्[4] एव स्थाल्यन्तर्गतान्[5] व्रीहीन् पत्न्यवहन्यात्[6] निस्तुषान् कुर्यात् । परिसन्नाधिकाराद् इतरान् इति[7] इतरग्रहणम् । कर्तुरधिकारात् पत्नीग्रहणम् । अविवेचम् अविविच्य अविविच्य[8] 'इमे व्रीहयः इमे तण्डुला' इति विवेकम् अकृत्वा अवहन्यात् ।। ७ ।।

[अवहतव्रीहीणां प्रक्षालनपूर्वकं दक्षिणाग्नौ श्रपणम्]

अवहतान् सकृत् प्रक्षाल्य दक्षिणाग्नौ श्रपयेत् ।। ८ ।।

अवहतान् । पुनरवहननग्रहणात् फलीकरणप्रतिषेधः । तस्मात् तथाऽवहन्यते यथा फलीकृता इव[9] भवन्ति । [10]"सकृत् प्रक्षाल्य"[10] सकृत् प्रक्षालनमुक्तम् अन्येषाम्— व्रीहिमिश्रानेव सकृत् [11]"प्रक्षालयेद् इति । ततः असकृत् प्रक्षालनमन्यत्र"[11] ।

१-१. नास्ति मै वि । †. दक्षिणा (ण° पू) एत्यधि° ब[1,2] पू । २-२. व्रीहीणां पूर्णां निमृजेत् अथ व्रीहीणां पूर्णां चरुस्थालीं ब[3,4] ; नास्ति मै । ३. एवमुच्य° ब[2-4] मै वि पू । ४. इतराणि मूको । ५. स्थाल्याः (°ल्य ब[1,2] ; °ल्यः वि पू) यवान् मूको । ६. अवहन्यात् मै । ७. नास्ति मूको । ८. अविवेचनम् (°च्यम् मै) मूको । ९. एव ब[1,2] ; इति ब[3] ; नास्ति ब[4] । १०-१०. नास्ति मूको । ११-११. प्रक्षाल्यलतः (°ल्यतः ब[2-4] मै वि पू) प्रक्षालनम् (प्रक्षा ब[4]) मूको । †. इत आरभ्य २, ११, १२ सूत्रस्थ—'अग्निः प्रथम इति' इति पर्यन्तः नास्ति ब[4] ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

दक्षिणाग्नौ स्थालीपाकं[1] श्रपयेत् । दक्षिणाग्न्यधिकारे पुनर्दक्षिणाग्निग्रहणं नियमार्थम् । ग्रहणेनैव[2] दक्षिणाग्नौ होमः, न अतिप्रणीते इति[3] ॥ ८ ॥

[दक्षिणाग्न्यतिप्रणीतयोरन्तराले स्फ्येनोल्लेखनम्]

अर्वागतिप्रणीतात् स्फ्येन लेखामुल्लिखेद् अपहता असुरा रक्षांसि वेदिषद इति ॥ ९ ॥

अतिप्रणीतादग्नेः अर्वाग्देशे स्फ्येन वज्रेण लेखाम् उल्लिखेत् अपहताः (मासं २, २९) इत्येतेन[4] मन्त्रेण । दक्षिणाग्न्यधिकाराद्[5] अतिप्रणीतग्रहणम् ॥ ९ ॥

[लेखाभ्युक्षणादिसाज्यध्रुवासादनान्तकर्मकथनम्]

तामभ्युक्ष्य सकृदाच्छिन्नैरवस्तीर्य आसादयेदभिघार्य स्थालीपाकमाज्यं सर्पिरनुत्पूतं नवनीतं वोत्पूतं ध्रुवायामाज्यं कृत्वा दक्षिणतः ॥ १० ॥

तां लेखाम् उदकेनाभ्युक्ष्य अनन्तरं सकृदाच्छिन्नैः तृणैः अवस्तीर्य आस्तरणं कृत्वा अनन्तरमस्यां[6] वेद्याम् आसादयेत्, तम् अभिघार्य स्थालीपाकमासादयेत् । लेखाधिकारे पुनस्तामित्याह—तां तामिति वीप्सार्थम् । यत्र लेखाद्वयं भवति । पितृभ्यो दद्यात् स्त्रीभ्यश्च (आगृ २, ५, ५-६) इत्यत्र । आज्यं सर्पिः[7] । सर्पिः घृतं तदाज्यसंज्ञं भवति । अनुत्पूतं सर्पिः अनुत्पूतं भवति । नास्योत्पवनं क्रियते । नवनीते उत्पवनं विधीयमानं सर्पिषोऽपि प्राप्नोति[8] तत् प्रतिषिध्यते । नवनीतं वा नवनीतं वा आज्यसंज्ञं भवति । तच्च उत्पूतं भवति । नवनीतस्योत्पवनं कर्तव्यम् । एकपवित्रेण सकृदुत्पवनं [9]तूष्णीकं मन्त्रोपदेशाभावात्[9] । गृह्योपदिष्टो विधिरिह न प्राप्नोति । [10]यदि प्राप्नोति[10] अवदानसंपदा जुहुयात् (आश्रौ २, ६, १२) इति न वक्तव्यम् । ध्रुवायामाज्यं कृत्वा तदाज्यम् अन्यस्मिन् पात्रे संस्कृत्योत्पूय अनुत्पूय वा ततः[11]

---

१. स्थाल्यां पाकं मै । २. नियमार्थग्रह° ब[3] । ३. नास्ति ब[1] पू । ४. इत्यनेन बि । ५. अग्न्यधि° ब[3] वि पू । ६. °न्तरस्यां ब[2] वि मै ; °न्तरं तस्यां ब[3] । ७. नास्ति ब[1,3] पू । ८. नास्ति मूको । ९-९. °कमथोपदे° मै । १०-१०. यदि प्राप्नुवन्ति ब[1] मै पू ; यदि प्राप्ता भवन्ति ब[2] ; यदि न प्राप्नुवन्ति ब[3] । ११. तत् ब[2,3] मै वि ; नास्ति पू ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

-पिण्डपितृयज्ञः
Digitized by Madhuban Trust

ध्रुवायाम् आज्यं कृत्वा ध्रुवामासादयेत् । पुनराज्यग्रहणाद्[1] [2]ध्रौवमिवाज्यमभिघारणार्थं[2] होमार्थं[3] च भवति। कृत्वेति साकाङ्क्षत्वाद् वाक्यस्य आसादयेदित्यध्याहारो भवति दक्षिणतः लेखायाः दक्षिणतः दक्षिणस्यां दिशि ॥ १० ॥

[अञ्जनाद्यासादनम्]

[4]अञ्जनाभ्यञ्जनकशिपूपबर्हणानि ॥ ११ ॥

अञ्जनादीनि स्थापयेत् । अञ्जनं त्रैककुदं श्रौताञ्जनं वाऽन्यत्र दक्षिणादिषु प्रयुक्तत्वाल्लौकिकं वा भवति, अविशेषवचनात् । अभ्यञ्जनं[5] जीर्णं घृतं भवति । [6]आयुतं पितृणाम् (ऐब्रा १, ३) इति श्रुतिः । कशिपुः कटैरका† भवति ‡दर्भव्युता विदलव्युता‡ वाϕ । उपबर्हणं शिरोपधानं भवति । एतानि[6] दक्षिणतः उपकल्पयेत् ॥ ११ ॥

[प्राचीनावीतिनेध्मोपसमाधानचरुग्रहणपूर्वकं समन्त्रकं हवनम्]

प्राचीनावीतीध्ममुपसमाधाय मेक्षणेनाऽऽदायावदानसंपदा जुहुयात् सोमाय पितृमते स्वधा नमोऽग्नये कव्यवाहनाय स्वधा नम इति ॥ १२ ॥

प्राचीनावीतम्[7] आचारशास्त्रे सिद्धम् । प्राचीनावीती भूत्वा[8] । इध्मम् इन्धनसिद्ध्यर्थम् । उपसन्नः सव्यं जानु आच्य समस्तं तूष्णीम् अग्नावाधाय प्रक्षिप्य मेक्षणेन चरोरादाय अवदानं गृहीत्वा । अवदानसंपत् । मध्यात् पूर्वार्धाच्च हविषोऽवद्यति (आगृ १, १०, १८) । प्रत्यभिघार्य हविः अवत्तं च । एषोऽवदानधर्मः (आगृ १, ७, १०-१२) इति । तया अवदानसंपदा जुहुयात्[9], एवंभूतः (आश्रौ १, ११, १२) इति । स्रुवेणावदाने[10] प्राप्ते मेक्षणेनादायेत्युच्यते । तत्र[11]

---

१. °ग्रहणं ब[1] ; °ग्रहणा ब[2] पू । २-२. द्रौपमपिवाद्याभि° ब[1] ; ज्यैवमिवाद्याभि° ब[2] ; द्रौवमिवा° पू ; गौचमिवाज्याभिघारणात् प्र° मै ; गौमिवा° वि ; ध्रौवमिज्याभि° ब[3] ; °णार्थे ब[3] मै वि पू । ३. नास्ति ब[1,3] मै वि पू । ४. आञ्जन° मुद्रितपाठः । ५. अव्यञ्जनं ब[1,2] वि पू ; अक्ष्यञ्जनं ब[3] ; अप्यञ्जनं मै । ६-६. नास्ति ब[1] मै वि । †. कद्देका ब[1,2] ; …का पू ('कटैरका' शब्दोऽन्वेष्यः ?) । ‡-‡. दर्भविता विदलविता ब[1,2] पू । ϕ. च ब[1] पू । ७. प्राचीनावीती । प्राची° ब[1,2] । ८. कृत्वा मै ; नास्ति पू । ९. आदाय जुहुयात् ब[1,2] वि ; आदाग्यजुर्जुहुयात् मै । १०. °णादाने ब[1] मै वि पू । ११. अत्र ब[2] ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अभिघारणप्रत्यभिघारणे स्रुवेण कर्तव्ये । परिशेषाद्[1] गृह्यविहितो विधिरिह न[2] प्राप्नोति । तस्मादवदानसम्पद् विधीयते । सोमाय पितृमते (अथर्व १८, ४, ७२-७३) इत्येताभ्यां मन्त्राभ्यां[3] द्वे आहुती भवतः । स्वाहाकारान्तैः (आश्रौ १, ११, १०) इति प्राप्ते स्वधा नम इति विधीयते । पित्र्यायामप्येष[4] एव वषट्कारः स्वाहाकारस्यायमपवादः उत्तरत्र [5]स्वाहाकारेण वा (आश्रौ २, ६, १३) इति वचनात्[5] ॥ १२ ॥

[स्वाहाकारेण होमे कर्तव्ये यज्ञोपवीती सन् पूर्वमग्नि ततः सोमं जुहुयात्]

स्वाहाकारेण वाऽग्नि पूर्वं यज्ञोपवीती ॥ १३ ॥

स्वाहाकारेण वा जुहुयात् । यदा स्वाहाकारेण तदाऽग्नि पूर्वं जुहुयात्, अनन्तरं सोमम् । इध्मोपसमाधानादि [6]यज्ञोपवीतित्वं च भवति[6] । अग्नये कव्यवाहनाय स्वाहा (तु. अथर्व १८, ४, ७१), सोमाय पितृमते स्वाहा (तु. अथर्व १८, ४, ७२) इति । विकल्पोऽयं व्यवस्थितः । यदाग्नि[7] जुहोति[8] यथोक्तं पुरस्तादिति प्राप्नोति[9] । आभ्युदयिके यज्ञोपवीती भवति । जुहुयाज्जीवेभ्यः (आश्रौ २, ६, २३) इत्येतस्मिन् पक्षे[10] स्वाहाकारेण होमो[11] भवति यज्ञोपवीती[12] च[13] ॥ १३ ॥

[मेक्षणस्यानुप्रहरणं प्राचीनावीतिना समन्त्रकं लेखोपनयनम्]

मेक्षणमनुप्रहृत्य प्राचीनावीती लेखां त्रिरुदकेनोपनयेच्छुन्धन्तां पितरः शुन्धन्तां पितामहाः शुन्धन्तां प्रपितामहा इति ॥ १४ ॥

[14]मेक्षणम् अनुप्रहृत्य मेक्षणम्[14] अग्नौ होमान्ते च प्रहृत्य प्रक्षिप्य अनन्तरं [15]यज्ञोपवीती पक्षेऽपि[16] प्राचीनावीती भूत्वा लेखां त्रिषु स्थानेषु उदकेन

---

१. परिशेषात् ब[1–3] वि पू । २. नु ब[2] ; नास्ति वि ; त्रुटितम् पू । ३. नास्ति ब[1] मै । ४. पित्र्याया (पित्र्या ब[2]) मप्येक (मरण्यक ब[3] ; मण्यक वि) ब[1–3] मै वि ; त्रुटितम् पू ; तु. आश्रौ २, १९, १९ । ५-५. नास्ति ब[1,2] पू । ६-६. °पवीती च भ° ब[1] ; °पवीती च न भ° ब[2,3] मै वि पू । ७. अथाग्नौ मूको । ८. जुहुयादिति ब[1] । ९. प्राप्ते ब[1,3] मै ; प्राप्तो ब[2] ; प्राप्नो वि पू । १०. यज्ञे ब[3] मै वि । ११. अहोमो ब[2] । १२. °वीति ब[1,2] वि पू । १३. वा ब[1] । १४-१४. मेक्षणमनुप्रहरणं समनुमेक्षणम् ब[1] ; मेक्षणं समुपेक्षणम् ब[2] ; मेक्षणसमनूप (°णमनुप्र ब[3] ; °णसमनुप्र पू ; °णसमनु वि) हृत्य मेक्षणम् ब[1–3] मै वि पू । १५. °वीत ब[1–3] वि । १६. पक्षेऽपि=स्वाहाकारपक्षेऽपि—द्र. नारायणव्याख्या ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

पिण्डपितृयज्ञः
Digitized by Madhuban Trust

उप समीपे नयेत्[1] सिञ्चेत्— शुन्धन्ताम् (नाश्रौ १, १, २, १६) इत्येतैस्त्रिभिर्मन्त्रैः । मेक्षणमनुप्रहृत्यैतस्मात् सम्बन्धवचनात् होमस्य पिण्डदानस्य च[2] यजमान एव कर्ता भवति । अन्येषां तु होमान्तमध्वर्युः कुर्यात् इत्युक्तम्[3] । नामान्यविद्वान् तत पितामह प्रपितामहेति (आश्रौ २, ६, २५), स्वं नाम (आश्रौ १, २, १) इति वचनाद् यजमानः कर्ता भवति ॥ १४ ॥

[यजमानेन समन्त्रकः पिण्डनिक्षेपः]

तस्यां पिण्डान्निपृणीयात् पराचीनपाणिः पित्रे पितामहाय प्रपितामहायैतत्तेऽसौ ये च त्वामत्रान्विति ॥ १५ ॥

तस्यां लेखायां चरोरूष्मणो[4] गृहीत्वा त्रिः[5] पिण्डान् निपृणीयात् निक्षिपेत्, पराचीनपाणिः [6]पराचीनः† पाणिर्यस्य सोऽयं‡ पराचीनपाणिः[6], पराचीनपाणिर्भूत्वा । अन्तरेणाङ्गुष्ठम् अङ्गुलीश्च पितृतीर्थं, तेन निपृणीयात् । पित्रे प्रथमं पिण्डं निपृणीयात्, पितामहाय द्वितीयं, प्रपितामहाय तृतीयम् एतत्ते (तैसं १, ८, ५, १; ३, २, ५, ५) इत्येतेन[7] मन्त्रेण । असौ इति अष्टम्या विभक्त्या नाम गृह्णीयात् । एतत् ते भवत्रात ये च त्वामत्रानु इति [8]एतत् ते भवत्रात[8] इत्येवं[9] गृह्णाति[10] । यदि द्विपिता स्यादेकैकस्मिन् पिण्डे द्वौ द्वावुपलक्षयेत् (आपश्रौ १, ९, ७) इत्युक्तम् अन्येषाम् । अस्माकमपि श्राद्धे वक्ष्यति । एवमविशेषेणोक्तं[11] पिण्डदानं जीवानां च प्रेतानां च[12] । एतं[13] पक्षं गौतमो मन्यते । सर्वेभ्य एव निपृणीयादिति गौतमः क्रिया ह्यर्थकारिता (आश्रौ २, ६, १६) इति । एवमविशेषेण पिण्डदानमुक्तम् ॥ १५ ॥

---

१. निनयेत् ब[1] । २. नास्ति ब[1] । ३. तु. आपश्रौ १, ८, ३; ४ । ४. चरोष्माना (°नां ब[2] वि पू ; चरोष्मणां ब[3] ; चरोप्रधानां मै ; तु. आपश्रौ १, ९, १० । ५. नास्ति ब[3] । ६-६. यस्य सोऽयं ब[1] । †. °चीनं ब[2,3] मै वि पू । ‡. सः पू । ७. इत्यनेन ब[3] । ८-८. एतत्ते शान्तिः शातः एतत्ते भवत्रातः ब[2] ; एतत्ते यान्निता तत्रे (ष्वान्निता तव् स्ते मै ; द्यान्नितातस्त्रे पू ; यान्निता तत् स्ते वि) भवत्रातः ब[3] मै वि पू । ९. इत्येव ब[1,2] । १०. नास्ति ब[3] मै वि ; इति ब[2] । ११. एवमिति शेषे° ब[1,3] मै वि ; एवं विशेषे° ब[2] । १२. वा ब[1,2] । १३. एवं वि ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आचार्या[1] विप्रतिपद्यन्ते[2]। यथा—

[गाणगारिमते प्रेतेभ्य एव निपरणं जीवद्भ्यश्च प्रत्यक्षमर्चनम्]

तस्मै तस्मै य एषां प्रेताः स्युरिति गाणगारिः प्रत्यक्षमितरानर्चयेत् तदर्थत्वात् ॥ १६ ॥

उक्ते[3] आचार्यपक्षे इयं विचारणा। तस्मै तस्मै निपृणीयादेषां त्रयाणां ये[4] प्रेताः स्युर्भवेयुरिति गाणगारिराचार्यो मन्यते। प्रत्यक्षमितरानर्चयेत्। [5]प्रेतेभ्यो निपृणीत, इतरेभ्यो† जीवेभ्यः‡ प्रत्यक्षमर्चयेत् पूजयेद्φ गन्धमाल्यधूपदीपाच्छादनभोजनैः¶। कस्माद्धेतोः। तदर्थत्वात् क्रियायाः। पित्रर्थे हि सा पितृप्रीणनार्था। न च जीवा निपरणेन प्रीयन्ते*, प्रत्यक्षार्चनेन तु[5] [6]प्रीयन्ते। तस्मात् तत्प्रीणनार्थत्वात्॥ १६ ॥

अविशेषेण[6] जीवानां च प्रेतानां च निपरणमुक्तं तत् प्रतिषेधयति तौल्वलिराचार्यः—

[तौल्वलिमते प्रेतेभ्य एव निपरणम्]

प्रेतेभ्य॰ एव निपृणीयादिति तौल्वलिः क्रियागुणत्वात् ॥ १७ ॥

प्रेतेभ्य एव निपृणीयात् न[8] जीवेभ्य इत्येवं तौल्वलिराचार्यो मन्यते। कस्माद्धेतोः। क्रियागुणत्वात् [9]क्रियायां कर्मणि[9] गुणभूताः प्रेताः, न[10] जीवा गुणभूताः। निपरणेन गुणभूताः प्रीयन्ते। तस्मात् क्रियागुणत्वात् [11]प्रेतेभ्य एव निपरणम् अस्तु†[11] ॥ १७ ॥

[तौल्वलिमते विकल्पेनानधिकृतेभ्योऽपि त्रिभ्यः प्रेतेभ्यो निपरणम्]

अपि [12]जीवान्तात् त्रिभ्यः[12] ॥ १८ ॥

---

१. °र्यः मै। २. °ते मै। ३. नास्ति ब[1]। ४. नास्ति मूको।
५-५. नास्ति ब[3] मै वि। †. इत्यपरे ब[1]; इतरे ब[2]; इत्यपरे पू।
‡. जीवद्भ्यः ब[2]। φ. नास्ति पू। ¶. °धूपाच्छा° ब[2]। *. नास्ति ब[1]।
६-६. तस्मात्त... णनार्थत्वात् ब[1] पू; तस्मात्तत्प्रणीतार्थत्वाज्जीवप्रत्यक्षमर्चयेदाचार्ये विशेषेण ब[1]; विशेषेण ब[3]; आर्यैविशेषेण मै; आचार्यैविशेषेण वि; तस्मात् तत्प्रीणनार्थत्वाविशेषेण अन्यत्र। ७. सर्वेभ्य B[1] आन। ८. नास्ति ब[2]। ९-९. क्रियाक° मूको।
१०. नास्ति मै। ११-११. नास्ति मै। †. नु ब[1]; तु ब[2]; उक्तम् पू।
१२-१२. जीवन्ता तृभ्यः ब[2]; जीवान्तर्हितेभ्यः ब[3]; जीवान्त आ त्रिभ्यः मै; जीवान्ते तृभ्यः वि।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अपि-शब्दः समुच्चयार्थः । त्रयोऽधिकृताः । [1]पित्रे पितामहाय प्रपितामहाय । अनधिकृतेभ्योऽपि तौल्वलिराचार्यो मन्यते । येषां जीवः अन्तो भवति । यस्मादन्यो[1] जीवो न विद्यते तस्माज्जीवान्तात् प्रभृति त्रिभ्यः प्रेतेभ्यः[2] । प्रेतेभ्य[3] एव निपृणीयादिति तौल्वलिः (आश्रौ २, ६, १७) इति वर्तते । त्रिग्रहणादनधिकृतेभ्योऽपि[4] भवति । [5]त्रिभ्यो दद्यादिति श्रुतिः[5] (?) । [6]सापिण्ड्यं सप्तपौरुषम् (श्रौस्मृ ६, ५३) इति[6] विज्ञायते[7] ॥ १८ ॥

[गौतममते प्रेतेभ्यो जीवद्भ्यश्च सर्वेभ्यो निपरणम्]

सर्वेभ्य[8] एव निपृणीयादिति गौतमः क्रिया ह्यर्थकारिता ॥ १९ ॥

आचार्यपक्षमेव गौतमो मन्यते । सर्वेभ्य एव प्रेतेभ्यो जीवेभ्यश्च[9] निपृणीयादिति [10]गौतम आचार्यो[10] मन्यते[11] । कस्माद्धेतोः । क्रिया ह्यर्थकारिता । हीति हेत्वर्थे । क्रिया हि [12]यस्मादर्थकारिता । वक्ष्यति—सर्वहुतं† सर्वजीविनाम्‡ (आश्रौ २, ६, २४) इतिϕ । सर्वहुतमित्युक्ते असर्वजीविनां पिण्डदानमित्यर्थादापन्नं भवति । असर्वजीविनां पिण्डदानक्रियाकारिता[12] ॥ १९ ॥

[प्रेतेभ्यो जीवेभ्यश्चोपायविशेषकथनम्]

[13]उपायविशेषो जीवमृतानाम्[13] ॥ २० ॥

य एते [14]उक्ताः पक्षाः सर्वे[14] सदोषाः । इदानीमन्य उपायो[15] विशिष्टो जीवानां च मृतानां च वक्ष्यते । प्रतिज्ञासूत्रमेतत् ॥ २० ॥

[निपरणविषये तौल्वलिगाणगारिगौतममतानां खण्डनम्]

न परेभ्योऽनधिकारात् न प्रत्यक्षम् । न जीवेभ्यो निपृणीयात् ॥ २१ ॥

---

१. नास्ति ब[1] ।　२. एतेभ्यः मूको ।　३. पितृभ्यः ब[1] ; नास्ति पू ।
४. °णमधि° ब[1] ; °णाधि° वि ।　५-५. पितृभ्यो दद्यादिति श्रुतेः भाष्यान्तरेषु ।
६-६. सप्तपुरुषामितो ब[1] ; सापिण्डः (°ण्ड्यं मै) सप्तपुरुषमिति ब[2,3] मै वि ; ···षमिति पू ।
७. तु. वाध ४, १७ 'सपिण्डत्वं साप्तपौरुषम्' इति ।　८. प्रेतेभ्यः B^1 आन ।
९. °भ्यो ब[1] ; °भ्य ब[2] ।　१०-१०. ॰माचार्यो (°र्या ब[1]) ब[2,3] मै वि पू ।
११. मन्यन्ते ब[1,2] ।　१२-१२. यस्मादर्थकाना ब[1] ।　†. °हुते पू ।
‡. सर्वजीवानाम् ब[2] ; सर्वजीवनम् (°नाम् वि) मै वि ; नास्ति पू, °विनः B^1 आन ।
ϕ. नास्ति मूको ।　१३-१३. नास्ति ब[1] ।　१४-१४. उक्तपक्षाः ब[1] ।
१५. °य ब[3] मै ; °या वि पू ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

न परेभ्योऽनधिकाराद् [१]उक्तानां विधीनामिमे दोषा वक्ष्यन्ते । यदुक्तं तौल्वलिना जीवान्तात् परेभ्यस्त्रिभ्यो दद्यादिति । तत् न† । कस्मात् । अनधिकारात् पित्रे[१] पितामहाय प्रपितामहाय (आश्रौ २, ६, १५) इति एते एवाधिकृताः, न परे। न प्रत्यक्षम् । यदुक्तं[२] गाणगारिणा—प्रत्यक्षमितरानर्चयेत् (आश्रौ २, ६, १६) इति। तदपि न[३] । कस्मात्। अनधिकारादेव। अनधिकृतं हि प्रत्यक्षमर्चनम्। होमोऽधिकृतो निपरणं च । न जीवेभ्यो निपृणीयात् । यदुक्तं[४] गौतमेन तत् सर्वेभ्य एव[५] निपृणीयात् (आश्रौ २, ६, १९) इति। [६]तस्मिन् पक्षे[६] जीवान्तर्हितेभ्यः। तदपि न[७]। कस्मात्। अनधिकारादेव। सर्वहुतं सर्वजीविनाम्[८] (आश्रौ २, ६, २४) इति [९]वचनान्न पित्रे[९] दानं जीवते[१०] ।। २१ ।।

[जीवेनान्तर्हितेभ्यो निपरणनिषेधः]

न जीवान्तर्हितेभ्यः ।। २२ ।।

तौल्वलिपक्ष एव विशिष्टः[११] अप्रतिषिद्धः[१२] प्रेतेभ्य[१३] एव निपृणीयात् (आश्रौ २, ६, १७) इति। तस्मिन् पक्षे जीवितान्तर्हितेभ्यः [१४]अनन्तर्हितेभ्यश्च प्रेतेभ्यो† निपरणे प्राप्ते प्रतिषेधः—न जीवान्तर्हितेभ्यः[१४] इति। जीवेन अन्तर्हिता जीवान्तर्हिताः प्रेतास्तेभ्यो न दद्यात्। कस्मात्। अनधिकारादेव। पितरि जीवति पुत्रोऽनधिकृतो भवति। पिता एव[१५] उत्तरेषां ददाति न पुत्रः । होमान्तं कृत्वा विरमति। [१६]अन्येषामप्युक्तम्—जीवपिता न ददाति होमान्तं कृत्वा विरमति† (तु. आपश्रौ १, ९, ८) इति[१६]। अन्येषां पुनरुक्तम्—येभ्य एव पिता ददाति तेभ्यः पुत्रो ददाति (तु. बौश्रौ २४, ३२ : २-३ ; शांश्रौ ४, ४, ६) इति । तदप्युक्तं तौल्वलिना। एवं सर्वे इमे पक्षाः आरभ्य प्रतिषेधाद्[१७] विकल्पा भवन्ति।। २२ ।।

१-१. नास्ति ब[१] । †. नास्ति मूको । २. नास्ति ब[१,२] । ३. तत् ब[३] । ४. इत्युक्तम् मै । ५. नास्ति मै । ६-६. तत्पक्षे ब[१,२] मै वि पू । ७. नास्ति ब[३] मै वि पू । ८. °विताम् ब[२] वि पू ; °वितम् मै ; °विनः B[1] आन । ९-९. °नात् अपित्रे मै । १०. जीवितः ब[१-३] पू ; जीवतः मै वि । ११. वै शिष्टः मै वि पू । १२. अप्रतिषेधः मूको । १३. एतेभ्यः ब[१,३] मै वि पू ; एते ब[२] । १४-१४. नास्ति ब[२] । †. एतेभ्यो ब[१,३] मै वि पू । १५. य एष ब[१] । १६-१६. नास्ति ब[१] । †. ददातीति मै वि । १७. प्रतिषेधो ब[१] मै वि पू ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

इदानीमुपायविशेषो जीवमृतानां वक्ष्यते—

[प्रेतेभ्यो निपरणं जीवेभ्यो होम इति सिद्धान्तकथनम्]

[1]प्रेतेभ्यो दद्याज्जुहुयाज्जीवेभ्यः[1] ॥ २३ ॥

तौल्वलिपक्षे [2]न जीवान्तर्हितेभ्यः (आश्वौ २, ६, २२) इति[2] प्रतिषेध उक्तः, जीवान्तर्हितेषु जीवपितृकस्य [3]आ तिभ्यो[3] दद्यात् (?) इति श्रुतिः। तस्मादिदमुच्यते—प्रेतेभ्यो दद्यात् जुहुयाज्जीवेभ्यः इति। प्रेतेभ्यो [4]येऽ†न्तरास्तत्र जीवा† ‡इह तेभ्यो‡ जुहुयात्ϕ प्रेतेभ्यो दद्यात्। जीवेभ्यो होमदर्शनात् सर्वहुतन्यायेन[5] च[5] जीवेभ्यः पाणिना तूष्णीमेवाग्नौ जुहुयात्। एवं [6]कृते त्वधिकृतेनैव[6] विधिना जीवानां च प्रेतानां च विधिः कृतो भवति। एष विधिः विशिष्ट उपाय[7] उक्तः। अन्यैः [8]सर्वे विधयो[8] [9]विशिष्ट उपाय उक्ताः[9] ॥ २३ ॥

[येषां पित्रादयस्त्रयोऽपि जीवन्ति ते सर्वं हविर्जुहुयुः]

सर्वहुतं सर्वजीविनः ॥ २४ ॥

सर्वहुतं [10]जुहुयात्। एवम्[10] आहुतिं हुत्वा सर्वमग्नावनुप्रहरेत्। होमान्तं सर्वजीविनः[11] इति सिद्धे सर्वहुतम् इति वचनात् जीवानां[12] होम उपदिष्टो भवति। [13]सर्वजीविनामेतद्[13] भवति। अन्येषामप्युक्तम्— जीवपितृकस्य[14] होमान्तम्, अनारम्भो वा (काश्रौ ४, १, २४ ; २५) इति[15] ॥ २४ ॥

१-१. जुहुयाज्जीवेभ्यः मूको। २. नास्ति मूको। ३-३. अत्रिभ्या ब[1]; अपि तृभ्यो मै। ४-४. येन ब[2]। †-†. °न्तरा मृतजीवा ब[1] पू। ‡-‡. इत्येतेभ्यो ब[1,1] वि पू। ϕ. दद्यात् ब[1]। ५. एव मै; व वि। ६-६. °कृतेषु वित्वदेतेन व तेनैव ब[1]; °कृतेषु विकृते (°ति) नैव ब[2,3] मै वि पू। ७. नास्ति ब[2]। ८-८. सर्वंवि° ब[2,3] मै वि पू। ९-९. विशिष्टो (°ष्ट उ ब[1,1] वि पू) पाय उक्तः (युक्ताः ब[2,1] मै पू; मुक्ताः वि) मूको। १०-१०. °यादेव ब[1-3] वि पू। ११. °विनाम् मै। १२. जीविनाम् ब[2,1] मै वि; जी... पू। १३-१३. °विनामेवमेतद् (°व तद् ब[2]) ब[2,1] मै वि पू। १४. जीवत्पि° ब[1-3] वि। १५. नास्ति ब[1]।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[पित्रादीनां नाम्नामज्ञाने ततपितामहेत्यादिमात्रोच्चारणविधानम्]

नामान्यविद्वांस्तत पितामह प्रपितामहेति ॥ २५ ॥

पितॄणामपि[1] नामानि[2] अविद्वान् भवतीति तत पितामह प्रपितामहेति इत्येतैर्नामभिः पिण्डान् दद्यात्[3] जुहुयाद् वा । एतत् ते तत ये च त्वामत्रान्विति[4] (आश्रौ २, ६, १५) । एतत् ते पितामहेति । एतत् ते प्रपितामहेति ॥ २५ ॥

॥ इति षष्ठः खण्डः ॥

---

१. °णामिति ब³ मै वि पू । २. नास्ति मूको । ३. नास्ति ब¹'² ।
४. द्र. आश्रौ २, ६, १५ ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

पिण्डपितृयज्ञः

Digitized by Madhuban Trust

अथ द्वितीयेऽध्याये सप्तमः खण्डः

[निपृतानां पिण्डानामनुमन्त्रणविधानम्]

निपृताननुमन्त्रयेताऽत्र पितरो मादयध्वं यथाभागमावृषायध्वमिति ॥ १ ॥

निपरणं येषां कृतं ते निपृताः, तान् निपृतान् पिण्डान्[1] अनुमन्त्रयेत[2]—अत्र पितरः (मासं २, ३१) इत्येतेन मन्त्रेण ॥ १ ॥

[पिण्डानुमन्त्रणविधिकथनम्]

सव्यावृदुदङ्ङावृत्य यथाशक्त्यप्राणन्नासित्वाऽभिपर्यावृत्याऽमीमदन्त पितरो यथाभागमावृषायीषतेति ॥ २ ॥

सव्यावृत् सव्यं बाहुमन्वावर्तते सव्यावृद् उदङ्[3] उदीचीं[4] दिशमावृत्य[5] [6]यथाशक्ति यावत्प्राणम्[6] अप्राणन्[7] अनुच्छ्वसन्[8] आसित्वा उच्छ्वस्य ततः पिण्डान् अभिपर्यावृत्य—अमीमदन्त पितरः (मासं २, ३१) इत्येतेन मन्त्रेण अनुमन्त्रयेत[9] पिण्डान्। सव्यावृद् इत्येतेनैव सिद्धे उदङ्ङिति वचनाद् या दिगुदीची, तां दिशमावृत्य [10]अनुच्छ्वसन् आसित्वा इति[10] ॥ २ ॥

[चरोर्गन्धभक्षणम्]

चरोः प्राणभक्षं भक्षयेत् ॥ ३ ॥

[11]चरोस्तस्यैकं देशं[11] गृहीत्वा[12] प्राणभक्षं भक्षयेत्। नासिकास्थानो[13] वायुः[14] प्राणः। तेन भक्ष्यते गन्धः। स प्राणभक्षः। गन्धोपादानं[15] प्राणभक्षः। प्राणभक्षं[16] भक्षयेत्। तेन विधिना भक्षं कुर्यादित्यर्थः ॥ ३ ॥

---

१. नास्ति ब[1]। २. °येत् मूको। ३. उदग् मूको। ४. उदीच्या ब[2,3]; त्रुटितम् पू। ५. दिशिमावृत्य ब[1-3] वि; ···वृत्या पू। ६-६. °शक्तिः तावत्प्राणा (°त्प्रमाणा ब[2]; लोवत् प्राण मै) म् मूको। ७. नास्ति मूको। ८. अनुगच्छन् सन् ब[1]। ९. °येत् ब[3] मै; °ये ब[1,2] वि; अनु... पू। १०-१०. °च्छ्वसन्नाति ब[1,2]; °च्छ्वसन्नास्ति मै वि पू; °च्छ्वसन्नासित्वा ब[3]। ११-११. °स्यैकदेशं ब[1,2]। १२. °त्वा एवं ब[1]। १३. °कस्थेन ब[1]; °कस्थाने ब[2,3] वि; °ने मै। १४. चक्षुः मूको। १५. गन्धाश (गन्धांशा?) दानं ब[3] मै वि पू। १६. न प्राणभक्षः प्राण° ब[2]; न प्राणभक्षः भक्षं मै पू; न प्राण° ब[3]; भक्षं वि।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[पुनर्निनयनविधानम्]

नित्यं निनयनम् ।। ४ ।।

नित्यम् उक्तं निनयनं लेखां त्रिरुदकेनोपनयेत् (आश्रौ २, ६, १४) इति। तदेवेह पुनः कर्तव्यमित्यर्थः। निनयनम् अन्यन् न विद्यते, तस्मादुपनयनमेव निनयनम्। अग्निहोत्रहोमे[1] निनयनमस्ति तत् प्रकरणान्तरत्वान्न गृह्यते ।। ४ ।।

[पिण्डेषु समन्त्रकमभ्यञ्जनाञ्जनविधानम्]

असावभ्यङ्क्ष्वासावङ्क्ष्वेति पिण्डेष्वभ्यञ्जनाञ्जने ।। ५ ।।

असावभ्यङ्क्ष्व असावङ्क्ष्व इत्येतौ मन्त्रौ[2]। [3]पिण्डेषु अभ्यञ्जनं च †अञ्जनं च† अभ्यञ्जनाञ्जने[3]। एताभ्यां [4]मन्त्राभ्यां नाम गृहीत्वा[4]। दद्यादिति वक्ष्यति[5]। अभ्यञ्जनाञ्जने[6] दद्यात्। असाविति अष्टम्या विभक्तया नाम गृह्णीयाद्—भवत्रात[7] अभ्यङ्क्ष्व भवत्रात अङ्क्ष्वेति ।। ५ ।।

[पिण्डेषु वासोदानविधानम्]

वासो दद्याद् दशामूर्णास्तुकां वा पञ्चाशद्वर्षताया ऊर्ध्वं स्वँल्लोमैतद् वः पितरो वासो मा नोऽतोऽन्यत् पितरो युङ्ध्वमिति ।। ६ ।।

पिण्डेषु वासो दद्यात्। वास इत्युक्ते वस्त्रप्रान्तदशा भवति। वस्त्रप्रान्तदशां[8] दद्यात्। [9]ऊर्णास्तुकां वा दद्यात्। ऊर्णास्तुका ऊर्णातन्तुः। एकामेव त्रिषु दद्यात्। पञ्चाशद् वर्षाणि यस्य‡ यजमानस्य भवन्ति, तस्यϕ पञ्चाशद्वर्षतायाः ऊर्ध्वमुपरि उत्तरे आयुषि ¶स्वं लोम¶ यजमानो[9] दद्यात्। ऊर्ध्वं नाभेः (बौश्रौ १८, ३८ : २) इत्युक्तम् अन्येषाम्। ऊर्ध्वं नाभेः श्मश्रुकेशेभ्यो [10]यदन्यत्, तद्[10] दद्यात्। [11]पूर्वं आयुषि[11] उक्तो विकल्पः, उत्तरे आयुषि

---

१. अग्निहोमे ब[1] पू। २. मन्त्रौ एताभ्यां ब[2,3] मै वि पू।
३-३. नास्ति ब[1]। †-†. °न एव ब[2,3] मै वि पू। ४-४. त्रुटितम् पू।
५. तु. आश्रौ २, ७, ६। ६. अभ्यञ्जनम् मूको। ७. भवदत्त ब[1]।
८. वस्त्रान्त° मूको। ९-९. नास्ति ब[2]। ‡. नास्ति वि पू।
ϕ. तस्याः ब[3] मै वि पू। ¶-¶. स्वलोम ब[1]। १०-१०. अन्यत्र ब[1]।
११-११. पूर्णं आयुषः मूको।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

पिण्डपितृयज्ञः

Digitized by Madhuban Trust

[1]अविकल्पेन लोम[1] भवति । स्वग्रहणे अक्रियमाणे[2] ऊर्णाधिकाराद् ऊर्णालोम[3] प्राप्नोति । एतद्वः इति मन्त्रः । एतेनैव सर्वाणि दशादीनि दद्यात् । [4]इह स्वग्रहणाद् यजमानः कर्ता[4] भवति, नाध्वर्युः ॥ ६ ॥

[पिण्डानामुपस्थानविधानम्]

अथैनानुपतिष्ठेत नमो वः पितर इषे नमो वः पितर ऊर्जे नमो वः पितरः शुष्माय नमो वः पितरोऽघोराय नमो वः पितरो जीवाय नमो वः पितरो रसाय । स्वधा वः पितरो नमो वः पितरो नम एता युष्माकं पितर इमा अस्माकं जीवा वो जीवन्त इह सन्तः स्याम ॥ ७ ॥

अथ[5] अनन्तरम् एनान्[6] पिण्डान् उपतिष्ठेत[7] उपस्थानं कुर्यात्—नमो वः पितरः (तु. मैसं १, १०, ३) इत्येतैर्मन्त्रैः । पिण्ड उपलक्षणम् । पितॄणामेवोपस्थानम्, येषां च निपरणम्, येषां च होमो[8], [9]येषां च दानम्[9], मन्त्रलिङ्गात् । अन्यथा अथैनान् [4]प्रवाहयेत् (आश्रौ २, ७, ९) इति प्रवाहणं नोपपद्यते[4] ॥ ७ ॥

[पिण्डोपस्थानमन्त्रविशेषकथनम्]

मनोऽन्वा हुवामह इति च तिसृभिः ॥ ८ ॥

[10]मनोऽन्वा हुवामहे (ऋ १०, ५७, ३-५) †इत्येताभिश्च तिसृभिरुपस्थानम्†[10] ॥ ८ ॥

[पितॄणां विसर्जनविधानम्]

अथैनान् प्रवाहयेत् परेतन पितरः सोम्यासो गम्भीरेभिः पथिभिः पूर्विणेभिः । दत्त्वायास्मभ्यं द्रविणेह भद्रं रयिं च नः सर्ववीरं नियच्छतेति ॥ ९ ॥

१-१. अवि (°धि ब^{2}) कल्पो (°ल्पेन ब^{2}) तल्लोम (लोम ब^{2}) ब^{1,2} ।
२. नास्ति ब^{1} । ३. ऊर्णालोम ब^{1} वि ; त्रुटितम् पू ; एतदूर्णालोम मै ।
४-४. नास्ति वि । ५. नास्ति मूको । ६. एतान् मूको । ७. °ष्ठेत् मूको ।
८. निपरणं ब^{1} । ९-९. नास्ति ब^{2,3} मै वि पू । १०-१०. नास्ति वि ।
†-†. °ताभिश्चतसृभि° ब$^{1-3}$; °ताभिश्चतरु° मै ; °ताभिश्चसे··· रु° पू ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ[1] अनन्तरम् उपस्थानादनन्तरम् एनान्[2] पिण्डान् उपलभ्य पितॄन्[3] प्रवाहयेत् विसर्जयेत्—परेतन (मैसं १, १०, ३) इत्येतेन मन्त्रेण । उपस्थानस्य प्रवाहणमिति विशेषसंज्ञा । अन्यथा[4] अग्न्युपस्थाने [5]उपस्थानसंज्ञा मन्त्रस्य[5] न प्राप्नोत्यधिकारव्यवायात् ।। ९ ।।

[दक्षिणाग्निं गत्वोपस्थानविधानम्]

अग्निं प्रत्येयादग्ने तमद्याश्वं न स्तोमैरिति ।। १० ।।

अग्निं दक्षिणाग्निं[6] प्रत्येयात् प्रतिनिवृत्यागच्छेत्[7] । आगत्योपतिष्ठेत[8]—अग्ने [9]तमद्या अश्वं न स्तोमैः[9] (ऋ ४, १०, १) इति । प्रत्येयादिति वचनाद् [10]दक्षिणाग्नेरुपस्थानं, नातिप्रणीतस्य । प्रत्येयादिति वचनाद् गमनार्थो मन्त्रः कर्मकरणः प्राप्तः, उपस्थानाधिकाराद्[10] आग्नेयत्वाच्च मन्त्रस्य उपस्थानत्वमेव[11] गमनार्थे[12] । सति गमनलिङ्गेन[13] भवितव्यम् । यथा मा प्रगाम (आश्वौ २, ५, ४), ऋतस्य [14]पन्थामन्वेमि होता[14] (आश्रौ १, ३, २५) इति वचनात् पञ्चाक्षरः पादो दशाक्षरो[15] वा भवति । वक्ष्यति—पञ्चाक्षरेण विग्रहो दशाक्षरेण वा (आश्रौ ८, १२, १६) इति विकल्पः । प्रत्येयादित्यनुच्यमाने गत्वोपस्थानं[16] न[17] प्राप्नोति । तत्रस्थ एव कुर्यादारादुपकारित्वात् ।। १० ।।

[गार्हपत्याग्निसमीपं गत्वोपस्थानम्]

गार्हपत्यं यदन्तरिक्षं पृथिवीमुत द्यां यन्मातरं पितरं वा जिहिंसिम । अग्निर्मा तस्मादेनसो गार्हपत्यः प्र मुञ्चतु करोतु मामनेनसमिति ।। ११ ।।

प्रत्येयादिति वर्तमाने अन्योऽन्याङ्गत्वाद्[18] गार्हपत्यमुपतिष्ठते—यदन्तरिक्षम् (तु. मैसं १, १०, ३) इत्येतया ऋचा । प्राचीनावीती एव भवत्यधिकारात् ।

---

१. नास्ति मूको । २. एतान् ब[1,2] मै वि पू । ३. पिण्डान् ब[1] ।
४. अन्यथा (यथा ब[1]) स्थितस्य प्राप्नोति मूको । ५-५. °न संज्ञा संज्ञाम° ब[2] ।
६. नास्ति ब[1] मै वि पू । ७. °त्य गच्छेत् ब[1,2] मै वि पू । ८. गत्वोप° मूको ।
९-९. तमद्य ब[1] । १०-१०. नास्ति ब[1] । ११. °नमेव मूको ।
१२. आगमनार्थो वि ; °नार्थः पू । १३. °ङ्गेन न ब[1,2] । १४-१४. नास्ति ब[1] ।
१५. °रोपि ब[3] मै वि पू । १६. उप° ब[1] ; त्वोप° मै वि । १७. नास्ति ब[1] मै वि ।
१८. अन्योन्यं गत्वा ब[1,2] मै वि पू ; अन्योन्यं गत्वाद् ब[1] ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

पिण्डपितृयज्ञः
Digitized by Madhuban Trust

'यावद् गमनान्तो न कृतः तावज्जप्य' [2]उत्तरो मन्त्रः[2] ॥ ११ ॥

[पिण्डानामुपस्थानम्]

वीरं मे दत्त पितर इति पिण्डानाम् ॥ १२ ॥

[3]वीरं मे दत्त पितरः† (तु. आपश्रौ १, ९, १२) इत्येतेन मन्त्रेण गत्वा‡' पिण्डान् उपतिष्ठते[4]। षष्ठीवचनमुत्तरसूत्रार्थम् ॥ १२ ॥

[मध्यमपिण्डस्य पत्न्या प्राशनम्]

मध्यमं पत्नीं प्राशयेत्—आधत्त पितरो गर्भं कुमारं पुष्करस्रजम् । यथाऽयमरपा असदिति ॥ १३ ॥

[5]मध्यमं पिण्डानां मध्यमं पिण्डं पत्नीϕ प्राश्नीयात्[5]—आधत्त पितरः (तु. मासं २, ३३) इत्येतेन मन्त्रेण प्राशयेत् प्रयोजयेत् । कर्ता वाचयति मन्त्रं मध्यमभावे । अर्थ[6] प्राशनं[7] भवति । यस्य[8] भस्मनो व्याधिः स प्राश्नीयाद् इतरौ पिण्डौ ॥ १३ ॥

[प्रथमतृतीयपिण्डयोरप्सु प्रक्षेपविधानम्]

अप्स्वितरौ ॥ १४ ॥

... ... ॥ १४ ॥

[प्रथमतृतीयपिण्डयोरतिप्रणीतेऽग्नौ वा दाह इति विकल्पः]

अतिप्रणीते वा ॥ १५ ॥

... ... ॥ १५ ॥

[यस्यान्नेच्छा-भावस्तेन वा पिण्डद्वयप्राशनम्]

यस्य वाऽऽगन्तुरन्नकाम्याभावः स प्राश्नीयात् ॥ १६ ॥

१-१. गत्वा तमत्रान्तो न क्षय जयः ब[1] ; गत्वा ब[2] ; गत्वा तमन्त्रान्तो न कृतो यज (यज्जय वि) मै वि ; गत्वा न मन्त्रान्तो कृत यज्जपः ब[3] ; गत्वा तं मन्त्रान्तो न कृतः यज्जु पू । २-२. नास्ति ब[2] । ३-३. नास्ति ब[2] । †. नास्ति ब[1] वि । ‡. गृहीत्वा ब[1] । ४. °ष्ठत इति मै । ५-५. मध्यमं पिण्डानां प्राश्नी° वि । ϕ. नास्ति मूको । ६. अर्थाद् ब[1,2] वि पू । ७. हि शनं ब[1] । ८. नास्ति मूको ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ यस्य[1] वा आगन्तुः अन्नकाम्याया [2]अन्नेच्छाया †भाव[2] आगन्तुर्भवति, स वा प्राश्नीयात्। यस्य वेति [3]वचनाद् यस्य कस्य चिद् भवति, न यजमानस्यैव[3] ॥ १६ ॥

[महारोगाभितप्तेन वा रोगमुक्त्यर्थं पिण्डद्वयप्राशनम्]

महारोगेण वाभितप्तः प्राश्नीयादन्यतरां गतिं गच्छति ॥ १७ ॥

[4]महान् रोगो[4] महारोगो[5] दुश्चिकित्सो भवति। तेन वा अभितप्तः अभिपीडितः प्राश्नीयाद् इतरौ पिण्डौ। महारोगः क्षयव्याधिः[6] कुष्ठव्याधिर्वा। अन्ये चैवंविधा व्याधयः[7]। अन्यतरां गतिं गच्छति। अत एवान्यतरा गतिः, अधिकृताया अन्या गतिः या सा[8] अन्यतरा। तामन्यतरां गतिं गच्छति। नीरुजो[9] भवतीत्यर्थः ॥ १७ ॥

[अनाहिताग्नेरप्येवमेव पिण्डपितृयज्ञ इति विधानम्]

एवमनाहिताग्निः ॥ १८ ॥

य उक्तः पिण्डपितृयज्ञ आहिताग्नेः, एवम् एतेनैव विधिना अनाहिताग्नेरपि औपासने अमावास्यायां पिण्डपितृयज्ञो भवति ॥ १८ ॥

[अनाहिताग्निरौपासने चरुं श्रपयित्वाऽतिप्रणीतेऽग्नौ जुहुयात्]

नित्ये श्रपयित्वाऽतिप्रणीय जुहुयात् ॥ १९ ॥

[10]गृह्ये श्रपयित्वेति वा पाठः। औपासनो गृह्यसंज्ञो भवति। पाणिग्रहणादि गृह्यम् (आगृ १, ९, १) इति वचनात्। नित्यो वा भवति। नित्यानुगृहीतं स्यात् (आगृ १, ९, २) इति वचनात्। नित्ये श्रपयित्वा[10]। नित्यो गृह्य औपासनः। नित्यादतिप्रणयनं कृत्वा नित्य एवाग्नौ श्रपयित्वा अतिप्रणीतेऽग्नौ जुहुयादिति सूत्रार्थः।

---

१. नास्ति मूको। २-२. अन्नेच्छाभावो (°वे वि) मै वि; भावे ब[1] पू। †. देवत्रातभाष्यीयकोशेषु सर्वत्र 'भाव' इत्युपलभ्यते। अस्मिन् पाठेऽपि ग्रन्थः संगच्छते, तदेवम्— अन्नकाम्याभावः अन्नकाम्याया अन्नेच्छाया भावः स्थितिः अहमन्नं भुञ्जीयेति रूपा यस्यागन्तुर्भवति स प्राश्नीयादितरौ पिण्डाविति। ३-३. नास्ति ब[2]। ४-४. भवतः रोगः ब[1]; महतः रोगः ब[3] वि पू; नास्ति ब[2] मै। ५. नास्ति वि; °गो महतो रोगो महारोगः मै। ६. काक्षय° ब[1,2]; कक्षय° वि पू। ७. यतयः ब[1]; गतयः ब[1] मै वि पू; मतयः ब[2]। ८. नास्ति मूको। ९. रुजो मूको। १०-१०. नास्ति ब[1]।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

पिण्डपितृयज्ञः

Digitized by Madhuban Trust

तत्र दक्षिणाग्नौ श्रपयेत् (आश्वौ २, ६, ८) इत्युक्तम् । अनाहिताग्नेस्तु दक्षिणाग्निर्न विद्यते । तस्मान्नित्ये श्रपणं विधीयते। दक्षिणाग्नेरेकोल्मुकम् (आश्वौ २, ६, २) इत्युक्तम् । दक्षिणाग्नेरभावान्नित्यादतिप्रणयनं[1] विधीयते। [2]नित्ये श्रपयित्वा नित्यादेव अतिप्रणीय जुहुयादिति श्रपणादनन्तरमतिप्रणयनं लाघवार्थं विधीयते[2]। अन्यथा गुरु[3] स्यात्। नित्यादतिप्रणीय नित्ये श्रपयित्वाऽतिप्रणीते [4]जुहुयादिति वक्तव्यं भवति । तद् गुरु† भवति । जुहुयादित्युक्ते अतिप्रणीते होमो विधीयते। ‡प्राक् सिद्धत्वाद्‡ इह विधीयतेϕ[4]। इह[5] विहितो[6] विधिस्तत्रापि भवतीति ॥ १९ ॥

[द्वयोर्द्वयोः पात्रयोरुत्सर्गविधानम्]

द्विवत्पात्राणामुत्सर्गः ॥ २० ॥

पात्राणां[7] स्थाल्यादीनां च द्वे द्वे पात्रे[8] गृहीत्वा उत्सर्गः कर्तव्यः[9] । उत्सर्गो नाम नयनं, देशान्तरे स्थापनम्। यथा, शेषं होतृचमस आनीयोत्सृजेत् (आश्वौ ५, ६, ३) इति ॥ २० ॥

[द्वितीयपात्ररहितानां तृणस्य तत्स्थाने प्रयोगः]

तृणं द्वितीयमुद्रिक्ते ॥ २१ ॥

[10]उद्रिक्तम्† अतिरिक्तम्। यस्य द्वितीयं पात्रं न विद्यते, तस्य अतिरिक्तस्य तृणं द्वितीयं[10] भवति तृणेन [11]सह तत्[11] पात्रम् उत्सृजति ॥ २१ ॥

॥ इति सप्तमः खण्डः ॥

१. °यनं लाघवार्थं ब[1] पू। २-२. नास्ति ब[1]। ३. गुरुः ब[1]। ४-४. नास्ति मै। †. गुरुः ब[1]। ‡-‡. प्रागसि° वि ; प्राग् सि° ब[3]। ϕ. विद्यते ब[1]; त्रुटितम् पू। ५. इति ब[1-3] मै वि ; त्रुटितम् पू। ६. विहितोऽपि ब[1] ; त्रुटितम् पू। ७. नास्ति ब[2]। ८. नास्ति मै। ९. नास्ति ब[1]। १०-१०. नास्ति ब[2]। †. उक्ताद्रिक्तम् उद्रिक्तम् ब[3] ; उक्तादन्यम् मै ; उक्ताद्रिक्तम् वि पू। ११-११. सहितत्वात् मै।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ द्वितीयेऽध्याये अष्टमः खण्डः

[दर्शपूर्णमासारम्भात् पूर्वमन्वारम्भणीयेष्ट्युपक्रमः]

दर्शपूर्णमासावारप्स्यमानोऽन्वारम्भणीयाम् ॥ १ ॥

व्याख्यातौ दर्शपूर्णमासौ[1]। तयोः अग्निहोत्रहोमावनन्तरम्[2] आरम्भकालः[3]। अस्मिन् काले तावारप्स्यमान आरम्भं करिष्यमाणः पूर्वेद्युः अन्वारम्भणीयेष्ट्या यजेत[4]। ताम् अन्वारम्भणीयां[5] वक्ष्यति[6] ॥ १ ॥

[अन्वारम्भणीयेष्टिदेवताकथनम्]

अग्नाविष्णू सरस्वती सरस्वानग्निर्भगी ॥ २ ॥

अग्नाविष्णू सरस्वती सरस्वान् अग्निर्भगी इत्येता देवता[7] भवन्ति। तासां याज्यानुवाक्या वक्ष्यन्ते ॥ २ ॥

[याज्यानुवाक्याकथनम्]

अग्नाविष्णू सजोषसेमा वर्धन्तु वां गिरः। द्युम्नैर्वाजेभिरागतम्। अग्नाविष्णू महि धाम प्रियं वां वीथो घृतस्य गुह्या जुषाणा। दमे दमे सुष्टुतिभिर्वावृधाना प्रति वां जिह्वा घृतमुच्चरण्यत्। पावका नः सरस्वती, पावीरवी कन्या चित्रायुः, पीपिवांसं सरस्वतः, दिव्यं सुपर्णं वायसं बृहन्तम्, आसवं सवितुर्यथा, स नो राधांस्या भरेति ॥ ३ ॥

अग्नाविष्णू सजोषसा (तु. मैसं ४, १०, १, १३-१४) इत्यग्नाविष्ण्वो-राम्नाते। पावका नः सरस्वती (ऋ १, ३, १०), पावीरवी कन्या चित्रायुः (ऋ ६, ४९, ७) इति सरस्वत्याः। पीपिवांसं सरस्वतः (ऋ ७, ९६, ६), दिव्यं

---

१. दर्शपौ° ब[2]। २. अग्निहोमा° ब[2] मै। ३. कालः ब[2]। ४. यजते ब[1,2] मै वि पू। ५. °णीं मै; °णी वि। ६. वक्ष्यमाणः ब[1]; वक्ष्यामः ब[2] पू; वक्ष्यते ब[3] मै वि। ७. नास्ति ब[1]।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

अन्वारम्भणीयेष्टि:
Digitized by Madhuban Trust

सुपर्णम् (ऋ १, १६४, ५२) इति सरस्वतः। आ सवं सवितुर्यथा (ऋ ८, १०२, ६), स नो राधांस्या भर (ऋ ७, १५, ११) इत्यग्नेर्भगिनः। अग्निर्भगी इत्यध्वर्युवशेन[1]। कृताकृता[2] [3]समानतन्त्रा वा[3] इत्येकेषाम्। शेषं[4] पौर्णमासेन। एतयेष्टया[5] इष्ट्वा[4] यजते पौर्णमासेन। यजते [6]त्रिंशतं वा[6] वर्षाणि (आपश्रौ ३, १४, १२), [7]जीर्णो वा[7] विरमेत् (आपश्रौ ३, १४, १३)। न [8]वा, अन्येन वा[8] आरभते। यद्यारभते एतयेष्टया आरभते। व्युच्छिन्ने[9] दर्शपौर्णमासे[10] पुनरेतयेष्टया आरभत इत्युपदिश्यते ॥ ३ ॥

[यजमाने रोगग्रस्ते विपद्ग्रस्ते वा पुनराधेयेष्टिविधानम्]

आधानाद्यद्यामयावी यदि वाऽर्था व्यथेरन् पुनराधेय इष्टिः ॥ ४ ॥

आधानाद्[11] आधाननिमित्ताद् यदि आमयावी यजमानो भवति। [12]आमयो रोगः[12]। यदि[13] रोगी भवति[14], [15]यदि वा अर्थाः भार्याः पुत्राः पशवो हिरण्यादयोऽर्था व्यथेरन् नश्येरन् प्रमीयेरन्, एतेषु निमित्तेषु पुनराधानं कर्तव्यं भवति[15]। तस्मिन् पुनराधाने या इष्टिर्भवति सा वक्ष्यते। एतस्मिन् संवत्सरे यो नर्ध्नुयात् (आपश्रौ ५, २६, ३) इत्युक्तम् अध्वर्यूणाम् ॥ ४ ॥

[पुनराधेयेष्टयां प्रयाजानुयाजानां व्यवस्थाकरणम्]

तस्यां प्रयाजानुयाजान् विभक्तिभिर्यजेत् ॥ ५ ॥

तस्याम् इष्टयां प्रयाजानुयाजान्[16] विभक्तिभिर्युक्तान् यजेत्। अष्टौ विभक्तयो व्याकरणे सिद्धाः। तस्यामिति पुनरुच्यते विकारार्थम्। प्रथमा[17] कर्मचोदनार्था[18] भवति। सप्तम्याऽधिकारः क्रियते ॥ ५ ॥

---

१. अध्वर्यु (°र्युः मै वि) वशेन ब[1,2] मै वि पू; तु. आपश्रौ ५, २३, ६। २. कृता ब[1] मै वि पू; तु. आपश्रौ ५, २७, ७। ३-३. °तन्त्राच्च पू; तु. शांश्रौ ३, १२, १३। ४. नास्ति ब[1]। ५. एतेनेष्टया मै। ६-६. तु शतं ब[1,2] मै वि पू। ७-७. जीर्णत्वा ब[2]। ८-८. चान्येन वा ब[1,2] पू; वानेन वा मै; चान्ये वा मै; वानेव वि। ९. विच्छिन्ने ब[3]; °न्न ब[2]। १०. दर्शपू° ब[3] मै। ११. आधानाद् यद्यामयावी ब[3]। १२-१२. आमया (°यावी मै पू) रोगाः (°गः ब[2]) ब[1,2] मै पू। १३. यदा ब[1]। १४. भव्यं भवति ब[3] वि। १५-१५. नास्ति ब[3] वि। १६. °जानूया° ब[3] मै। १७. °मं मै। १८. °र्थं मै।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

विभक्तयः कथं वा[1] कतिभिर्युज्यन्ते इति तदेतत् [2]सर्वम् आम्नायेनैव[2] दर्शयति—

[प्रयाजानुयाजानां विभक्तिकथनम्]

समिधः समिधोऽग्नेऽग्न आज्यस्य व्यन्तु । तनूनपादग्निमग्न आज्यस्य वेतु । इळो अग्निनाऽग्न आज्यस्य व्यन्तु । बर्हिरग्निरग्न आज्यस्य वेत्विति ॥ ६ ॥

आम्नायादेव सिद्धे सूत्रारम्भोऽनर्थकः प्रत्याम्नायो भवति[3] । विभक्त्यर्थोऽयं पाठो, न [4]प्रत्याम्नायार्थ इत्यर्थः । सति[4] प्रत्याम्नाये पञ्चमः प्रयाजो लुप्येत[5], तृतीयश्चानुयाजः[6] । [7]समिधः समिध[7] इत्येवमादयश्चत्वारः प्रयाजाः विभक्तिभिर्युक्ता[8] आम्नाताः । आदेशयतीत्यादिनान्तरा[9] विभक्तिर्भवति । प्रथमेऽष्टमी, द्वितीये[10] द्वितीया । नाराशंसोऽपि[11] तथैव प्रयोक्तव्यः । प्रयाजानुयाजान्[12] विभक्तिभिर्यजेत् (आश्रौ २, ८, ५) इति वचनात् । तृतीये[13] तृतीया चतुर्थे प्रथमा इत्येताश्चतस्रो विभक्तयः प्रयाजेषु । पञ्चमः प्राकृत एव ॥ ६ ॥

[आग्नेययोराज्यभागयोः कथनम्]

समिधाग्निं दुवस्यतेह्यू षु ब्रवाणि त इत्याग्नेयावाज्यभागौ ॥ ७ ॥

समिधाऽग्निं दुवस्यत (ऋ ८, ४४, १), एह्यू षु ब्रुवाणि ते (ऋ ६, १६, १६) इत्येतावाग्नेयावाज्यभागौ भवतः । आग्नेयावाज्यभागाविति वचनात् सौम्यौ[14] न विद्येते[15] । आवाहनादिषु[16] निगमेषु अन्यथा एते अनुवाक्ये भवतः ॥ ७ ॥

[आज्यभागयोर्गुणद्वयकथनम्]

बुद्धिमदिन्दुमन्तावित्याचक्षते ॥ ८ ॥

---

१. च वि । २-२. सवं (°वं ?) समाम्ना° ब[1] । ३. न भवति ब[1] मै वि । ४-४, प्रत्ययार्थं इत्यसति (इत्यर्थे सति पू) मूको । ५. लुप्यते मूको । ६. °श्चानू° मै । ७-७. समि ब[1] । ८. °क्तियु° ब[2] वि पू । ९. देशयतीत्या° ब[2] ; °त्यादीनान्तरा मै । १०. नास्ति ब[2] । ११. नाराशंसो (°शं... पू)ऽपि ब[1] मै पू ; नराशंसे (°सो ब[1])ऽपि ब[2,3] वि । १२. °जानूया° मै । १३. नास्ति ब[2] । १४. सौम्यो मूको । १५. विद्यते मूको । १६. आह्वना° ब[1] ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

अन्वारम्भणीयेष्टिः

Digitized by Madhuban Trust

प्रकृतैव देवता [1]निगमयोरग्निः, ययोः[1] बुद्धिमानेकः, इन्दुमान् द्वितीयः। एवंसंज्ञावेतौ भवत इत्याचक्षते ब्रुवते ब्रह्मवादिनः ॥ ८ ॥

[निगमेषु सगुणयोरेवानुवृत्तिकथनम्]

तथाऽनुवृत्तिः ॥ ९ ॥

तथाऽनुवृत्तिः आवाहनादिषु निगमेषु[2] अग्निं बुद्धिमन्तमावह अग्निमिन्दुमन्तम् आवहेति वचनमन्तरेण निगमनं न[3] प्राप्नोति, यथा पुष्टिमन्तादिषु ॥ ९ ॥

[इज्याकथनम्]

इज्या च ॥ १० ॥

इज्या च याज्या च[4] तथैवैतेनैव गुणेन युक्ता प्रयोक्तव्या। तथानुवृत्तिः (आश्रौ २, ८, ९) इत्येतेन[5] वचनेन आदेशः प्राप्तः। याज्यायामपि प्राप्त्यर्थोऽयमारम्भः[6]। तस्माद् ये३ यजामहेऽग्निं बुद्धिमन्तं जुषाणोऽग्निर्बुद्धिमानाज्यस्य वेतु। ये३ यजामहेऽग्निमिन्दुमन्तं जुषाणो अग्निरिन्दुमानाज्यस्य हविषो वेतु इत्येवमर्थे[7] याज्ये भवतः ॥ १० ॥

[अनुब्राह्मणिनां मते पूर्वस्योत्तरस्य चाज्यभागस्य नित्यत्वकथनम्]

नित्यं पूर्वमनुब्राह्मणिनः ॥ ११ ॥

अग्न आयूंषि पवस इत्युत्तरम् ॥ १२ ॥

नित्यं प्राकृतमेव पूर्वम् आज्यभागम् अनुब्राह्मणिन आचार्या मन्यन्ते—अग्निर्वृत्राणि (ऋ ६, १६, ३४ ; आश्रौ १, ५, २९) इति ॥ ११ ॥

अग्न आयूंषि पवसे (ऋ ९, ६६, १९) इति च उत्तरमाज्यभागम्। एते अनुवाक्ये। अस्मिन्[8] पक्षे[9] अग्नयेऽनुब्रूहि अग्नये पवमानायानुब्रूहि[10] इति

१-१. निगमस्यादिर्यो ब[1] ; निगमनास्याविर्यो ब[2] मै पू ; निगमे (°मने वि) स्याद्वयों ब[3] वि। २. निगमनेषु वि। ३. नास्ति ब[2] मै। ४. चेत् ब[3] वि ; नास्ति ब[2] ; त्रुटितम् पू। ५. इत्यनेन ब[3] वि। ६. प्राप्त्यर्थमपारम्भः ब[2]। ७. °वमर्थं ब[3] वि पू। ८. अन्यस्मिन् ब[1,2] मै ; यस्मिन् ब[3] ; त्रुटितम् पू। ९. यज्ञे ब[3] वि ; त्रुटितम् पू। १०. तु. शांश्रौ २, ५, १४-१५। द्र. शब्रा २, २, ३, २२।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

संप्रैषौ [1]भवतः । †तयाध्वर्युर्येन गुणेन सम्प्रैषमाह तथाऽनुवृत्तिरिज्या च प्रयोक्तव्या[1] ॥ १२ ॥

[उत्तरे आज्यभागे हविःशब्दस्य नित्यत्वम्]

नित्यस्तूत्तरे हविःशब्दः ॥ १३ ॥

उत्तरे[2] आज्यभागे आग्नेयेऽपि सति नित्यस्तु अच्युतो हविःशब्दः । तु-शब्दः प्राप्तव्यावृत्त्यर्थः । आग्नेये हविःशब्दो न प्राप्नोति । तस्मादिदम् उच्यते[3] ॥ १३ ॥

[याज्यामन्त्रकथनम्]

आग्नेयं हविरधा ह्यग्ने क्रतोर्भद्रस्याभिष्टे अद्य गीर्भिर्गृणन्त एभिर्नो अर्कैरग्ने तमद्याश्वं न स्तोमैरिति संयाज्ये देवं बर्हिरग्ने वसुवने वसुधेयस्य वेतु देवो नराशंसोऽग्नौ वसुवने वसुधेयस्य वेत्विति ॥ १४ ॥

आग्नेयं हविः । अस्यामिष्टौ आग्नेयं हविर्भवति । अग्निरिति वक्तव्ये हविर्ग्रहणाद् हविरेव आग्नेयं नाज्यभागाविति । प्राकृतावेवाज्यभागावित्ययमेकः[4] कल्पः । [5]अधा० गृणन्तः[5] । अधा ह्यग्ने (ऋ ४, १०, २), आभिष्टे (ऋ ४, १०, ४) इत्येते याज्यानुवाक्ये आग्नेयस्य । [5]एभिर्नो० रिति संयाज्ये[5] । एभिर्नो अर्कैः (ऋ ४, १०, ३), अग्ने तमद्य (ऋ ४, १०, १) इत्येते संयाज्ये भवतः । [5]देवं० त्विति[5] । देवं बर्हिः प्रथमेऽनुयाजे[6] षष्ठी विभक्तिर्भवति, द्वितीये सप्तमी । तृतीयः प्राकृत[7] एव[8] । शेषं पूर्णमासेन[9] ॥ १४ ॥

॥ इति अष्टमः खण्डः ॥

१-१. नास्ति ब[2] । †. यथाऽ° ब[1,3] मै पू । २. नास्ति मूको । ३. उच्यताम् मै । ४. तु. आश्रौ १, ५, २९ । ५-५. नास्ति ब[1,2] मै पू । ६. °मेनूया° ब[3] मै । ७. मारुत ब[2] । ८. एवं ब[3] मै पू । ९. पौर्णं° ब[1,2] मै पू ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ द्वितीयेऽध्याये नवमः खण्डः

[व्रीहिश्यामाकयवानामाग्रयणेष्ट्युपक्रमः]

आग्रयणं व्रीहिश्यामाकयवानाम् ॥ १ ॥

नित्यानि कर्माणि अग्न्याधेयादीनि अधिकृतानि । इदमपि नित्यं प्रतिसंवत्सरे नवसस्ये आग्रयणं[1] भवति । आग्रयणमिति कर्मणः संज्ञा[2] । संज्ञाधिकारः[3] क्रियते । यदित ऊर्ध्वमनुक्रमिष्यामः, तत्सर्वमाग्रयणस्य[4] विधानम् । आग्रयणकाले नवानां सवनीयान्[5] निर्वपेयुः (आश्रौ १२, ८, २६) इत्युक्ते एतस्य ग्रहणम् । सस्यं नाश्नीयादग्निहोत्रमहुत्वा (आश्रौ २, ९, २) इति वचनात् सर्वसस्यानाम् आग्रयणे प्राप्ते इष्टिनियमः क्रियते—[6]व्रीहीणां यवानां[6] श्यामाकानां च त्रयाणामेव आग्रयणं[1] भवति, नान्यस्येति । तत्र[7] फालकृष्टानां[8] व्रीहिभिराग्रयणम् । अफालकृष्टानाम्[9] आरण्यानां च श्यामाकैरित्यन्येषाम् (तु. आपश्रौ ६, २९, १०) ॥ १ ॥

[अनिष्ट्वा नवसस्यभक्षणे निषेधविधानम्]

सस्यं नाश्नीयादग्निहोत्रमहुत्वा ॥ २ ॥

व्रीह्यादि सस्यजातं सर्वं नाश्नीयाद् अग्निहोत्रम् अहुत्वा अनिष्ट्वेत्यर्थः । इष्ट्वा त्वश्नीयादित्यर्थापन्नम्[10] । सस्यग्रहणात् सर्वसस्यानां प्रतिषेधः । अन्यथाऽधिकृतानामेव स्यात् । अहुत्वेति[11] वक्तव्ये अग्निहोत्रग्रहणमिष्टपक्षप्रदर्शनार्थम् । अनिष्ट्वा प्राशने महान् दोषः श्रूयते । तस्मात् सूत्रारम्भः । [12]हरित-यव-शाक-शमी-धान्यानां[12] नवानां[13] फलानाम् अनिष्ट्वाऽपि[14] प्राशने याथाकामी[15] स्यात् (तु. आपश्रौ ६, ३१, ७) इत्युक्तमन्येषाम् ॥ २ ॥

---

१. आग्रायणं पू । २. नास्ति ब[1] । ३. °कारा ब[1,2] पू । ४. °माग्राय° ब[1] । ५. सवनीयानां मै वि । ६-६. नास्ति ब[1,2] मै पू । ७. तत् ब[2] । ८. फल° ब[2] पू ; फले° ब[1] मै । ९. अफले° ब[1] मै । १०. प्राश्नीयात् ब[3] । ११. अनिष्ट्वेति ब[1,2] मै पू । १२-१२. हरित यस्तीकशमीपान्यानां मै । १३. °नां च ब[2,3] वि पू ; वानां च मै । १४. इष्ट्वापि ब[2] ; अनिष्ट्वा ब[1] मै । १५. यथा° मूको ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[पर्याप्तवर्षणेन तृप्तस्य लोकस्याऽऽग्रयणेन यागविधानम्]

यदा वर्षस्य तृप्तः स्यादथाऽऽग्रयणेन यजेत ॥ ३ ॥

निष्पन्नेष्वेव इज्यायां प्राप्तायां यदा यस्मिन् काले वर्षस्य लोकस्तृप्तः स्यात् तृप्तिं प्राप्नोति, अलं वृष्टयेति । अथ तदानीमेव आग्रयणेन यजेत ॥ ३ ॥

कस्माद्धेतोः—

[आग्रयणाकरणे सस्यमग्निहोत्रीमाशयित्वा तस्याः पयसाऽग्निहोत्रविधानम्]

अपि हि देवा आहुस्तृप्तो नूनं वर्षस्याऽऽग्रयणेन यजत इति । अग्निहोत्रीं वैनानादयित्वा तस्याः पयसा जुहुयात् ॥ ४ ॥

'अप्येवं किल देवा† आहुः[1], तृप्तो लोको नूनं वर्षस्याग्रयणेन यस्माद् यजत इति तस्मात्[2] शरदि श्यामाकैर्व्रीहिभिश्च[3] यजेत । अन्येषां तु वर्षासु श्यामाकैः यजेत शरदि व्रीहिभिः (आपश्रौ ६, ३१, १४) इत्युक्तम् । व्रीहिभिरिष्ट्वा व्रीहिभिरेव यजेत आ व्रीहिभ्यः (तु. आपश्रौ ६, ३१, १३) इति च । अग्निहोत्रीं वा० जुहुयात् । उक्तं नाश्नीयात् अग्निहोत्रम् अहुत्वा (आश्रौ २, ९, २) इति । तस्मान्न यवाग्वादिभिः[4] [5]अग्निहोत्रं होतव्यं[5] भवति, कामादृतेऽपि[6] सर्वाणि हि[7] द्रव्याणि नित्यानि काम्यानि चेत्येतस्मात् । अथवा पयसा होम[8] इत्येतस्मिन् पक्षे इदमुच्यते । [9]अग्निहोत्री गौः, तां[9] वैनान् आदयित्वा तस्याः परिणतेषु[10] यत् पयस्तेन पयसा जुहुयात् सायंप्रातः । नित्यकल्पे[11] वर्षाणि होमे वा इदं भवति । वा-शब्दो विकल्पार्थः । यवाग्वादिभिः पयसा[8] वेति । एनानिति[12] वचनात् सस्यभूतानेव । अन्येषामप्युक्तम्[13]— व्रीहिस्तम्बं यवस्तम्बम् (आपश्रौ ६, ३०, १४) इति । तस्या इति वचनात् तस्या व्रीह्यादिषु विपरिणतेषु यत् प्रत्यय[14] इति[15] भवति ।

१-१. नास्ति ब[2] । †. देवता ब[1] मै पू । २. कस्मात् ब[1,2] मै पू । ३. व्रीहिभि ब[1,2] । ४. तु. आश्रौ २, ३, २ । ५-५. अग्निहोत्रद्रव्यं ब[1] । ६. कामादत्ते पि हि ब[1] ; कामाकृते पि हि ब[2] ; कर्मादृते पि ब[1] ; कामाकृत्ते पि हि मै ; कामाइत्ते पि वि ; कामातृण पि हि पू । ७. नास्ति मै । ८. तु. आश्रौ २, ३, १; ४, २ । ९-९. अग्निहोत्रीं मै । १०. परिस्तरणेषु ब[2] मै । ११. °कल्पो ब[1,2] मै वि पू । १२. एतानीति ब[1] ; एतानिति (°निस्त्व ब[3]) ब[2,1] मै वि पू । १३. °मपि मै । १४. प्रत्यय ब[1,3] मै पू ; यत्यय वि । १५. इव मै ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

आग्रयणम्
Digitized by Madhuban Trust

तत्र श्यामाकानामग्निहोत्रहोमो[1] न[2] भवति। श्यामाकेष्टया[3] नित्येष्टित्वेनाग्रहणाद्[4] व्रीहियवानामेव भवति। अध्वर्यूणामप्युक्तम्[5]—व्रीहिस्तम्बं यवस्तम्बम् (आपश्रौ ६, ३०, १४) इति॥ ४॥

[यवैराग्रयणस्य क्रियाऽक्रिया वेति विकल्पकथनम्]

अपि वा क्रिया यवेषु ॥ ५॥

आग्रयणस्याऽपि वा क्रिया अक्रिया[6] वा [7]विकल्पो यवेषु। यवेषु† क्रियावचनाद् यावन्त आग्रयणे कल्पाः‡ अग्निहोत्रहोमाविष्टि स्थालीपाकादयः। सर्वेषां यवेषु विकल्पः। अन्यथा यवेष्वित्युक्ते∅ अधिकारादग्निहोत्रस्यैव[7] विकल्पः स्यात्। यवानामिति वक्तव्ये यवेष्विति[8] सप्तमीवचनाद् यवेषु निष्पन्नेषु इति वेणुयवेष्वपि विकल्पं दर्शयति। कदाचित् ते निष्पद्यन्ते। तस्मान्निमित्तसप्तमी[9] प्रयुज्यते। वेणुयवेषु पक्वेषु वेणुयवानुद्धर्तवा इति (आपश्रौ ६, ३१, ९)॥ ५॥

[वर्णत्रयाणां मध्ये राज्ञ इष्टिरेवेति मतकथनम्]

इष्टिस्तु राज्ञः ॥ ६॥

इष्टिरेव राज्ञो[10] भवति, या[11] इष्टिरुत्तरत्र वक्ष्यते। तु-शब्दः अग्निहोत्रादिव्यावृत्त्यर्थः॥ ६॥

[त्रयाणामपि वर्णानामिष्टिरिति मतान्तरकथनम्]

सर्वेषां चैके ॥ ७॥

सर्ववर्णानां च एके इष्टिं मन्यन्ते। [12]अग्निहोत्रहोमम् अग्निहोत्रायणिनामेव मन्यन्ते[12], [13]स्थालीपाकं¶ वा। इष्टिरेवान्येषाम्[13]॥ ७॥

---

१. अग्निहोमो मै; त्रुटितम् पू। २. नास्ति ब[2] मै। ३. °ष्टयां ब[3]; °ष्टयो ब[2]। ४. नित्यत्वेष्टिग्र° मूको। ५. अध्वर्युणाऽप्युक्तम् ब[3]; °णामित्युक्तम् ब[2]। ६. नास्ति ब[2,3] वि। ७-७. नास्ति मै। †. पक्षेषु ब[1,2] पू; यचेषु ब[3] वि। ‡. विकल्पः ब[1,3]। ∅. यवेष्विष्टिरित्युक्ते ब[1,2] पू। ८. यवेष्विष्टिरिति ब[1] मै पू; यवेष्टिरिति ब[2,3] वि। ९. तस्यां निमित्ता (°त्तां मै पू) सप्तमी ब[1,2] मै पू। १०. राज्ञां ब[1,2] मै पू। ११. वा ब[1,3] मै पू। १२-१२. नास्ति मै। १३-१३. नास्ति वि। ¶. °पाको ब[3]।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[श्यामाकैरिष्टिरेवेति कथनं तद्देवताचरुकथनञ्च]

श्यामाकेष्टयां सौम्यश्चरुः ॥ ८ ॥

श्यामाकेष्टयां [1]श्यामाकानामिष्टिः†, तस्यां‡ विधिरुच्यते। अधिकारसूत्रमेतत्[1]। इष्टयधिकारे पुनरिष्टिग्रहणात् श्यामाकानामिष्टिरेव, [2]नान्यः कल्प[2] इति। सौम्यश्चरुः। सोमोऽस्य देवता सौम्यश्चरुः। [3]न पुरोडाशः, चरुर्विहित[3] इष्टयामेव चरुर्भवति नैकाग्निविधानेन आहिताग्नेराग्रयण स्थालीपाकः इति[4] ॥ ८ ॥

[अवान्तरेडाया जपानन्तरं सव्ये पाणौ कृत्वा तदभिमर्शनम्]

सोम यास्ते मयोभुवो, या ते धामानि दिवि या पृथिव्याम् इति। अवान्तरेळाया नित्यं जपमुक्त्वा सव्ये पाणौ कृत्वेतरेणाभिमृशेत् प्रजापतये त्वा ग्रहं गृह्णामि मह्यं श्रियै मह्यं यशसे मह्यमन्नाद्याय इति ॥ ९ ॥

सोम यास्ते मयोभुवः (ऋ १, ९१, ९), या ते धामानि दिवि या पृथिव्याम् (ऋ १, ९१, ४) इत्येते याज्यानुवाक्ये सोमस्य। शेषं पौर्णमासेन। [5]अवान्तरेळाया० द्याय[5] अवान्तरेळाया नित्यं जपं नित्यमन्त्रम्[6] इळे भागम् (आश्रौ १, ७, ८) इत्युक्त्वा ततः सव्ये पाणौ ताम् अवान्तरेळां कृत्वा इतरेण दक्षिणेन पाणिना तामवान्तरेळाम् अभिमृशेत्[7], प्रजापतये त्वा इत्येतेन[8] मन्त्रेण। जपमुक्त्वेति सिद्धे नित्यवचनाद् यो यत्र नित्यो मन्त्रः तं[9] तत्र जपित्वेति भवति। अग्निहोत्रहोमादिषु[10] सव्याधिकारादितरेणेत्युच्यते[11] ॥ ९ ॥

१-१. नास्ति वि। †. श्यामाको नामेष्टिः ब[2] पू। ‡. तस्या मूको।
२-२. नान्येभ्यः ब[1]। ३-३. विहितः ब[2]; °डाशचरु° मै; त्रुटितम् पू।
४. तु. आगृ २, २, ४। ५-५. नास्ति ब[1,2] मै पू। ६. नित्यं मन्त्रम् ब[2] मै वि पू। ७. °मर्शयेत् मूको। ८. इत्यनेन ब[1]। ९. नास्ति मूको।
१०. अग्निहोमादिषु ब[1]। ११. सर्वाधि° ब[1,2] मै वि पू।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[इडाप्राशनानन्तरमाचमनपूर्वको नाभ्यालम्भः]

[1]भद्रान्नः श्रेयः समनैष्ट देवास्त्वयावशेन समशीमहि त्वा । स नो मयोभूः पितवाविशे ह शं नो भव द्विपदे शं चतुष्पद इति[1] । प्राश्याचम्य नाभिमालभेतामोऽसि प्राण तदृतं ब्रवीम्यमासि सर्वानसि प्रविष्टः । स मे जरां रोगमपनुद्य शरीरादमा म एधि मामृथा म इन्द्रेति ॥ १० ॥

[2]भद्रान्नः श्रेयः स० चतुष्पदे इति अनेन प्राशनाति । प्राश्याचम्य० म इन्द्रे इति[2] । प्राश्य ताम् अवान्तरेळां प्राश्य ततः आचम्य नाभिमालभेत, अमोऽसि इत्येतेन[3] मन्त्रेण । अभिमर्शनादनन्तरं नाभिमालभेतेत्युच्यमाने प्राशनं न प्राप्नोति, तस्मात् प्राश्येत्युच्यते । सिद्धस्य प्राशनस्य[4] पुनरारम्भाद्[5] [6]आचमनलोपे प्राप्ते[6] आचम्येत्युच्यते ॥ १० ॥

[उक्तविधिना सर्वभक्षेषु सर्वेषां भक्षिणां सर्वभक्षणम्]

एतेन भक्षिणो भक्षान् सर्वत्र नवभोजने ॥ ११ ॥

एतेन होतुर्विधानेन[7] भक्षिणो ब्रह्मादयः श्यामाकानिळाभक्षान्[8] भक्षयेयुः सर्वत्र अग्निहोत्रहोमे एकाग्निविधाने च नवभोजने नवान्नप्राशने[9] । अवान्तरेळाया-मुक्तो विधिः[10] अन्यत्र[11] भक्षे[12] न प्राप्नोति । होतुरुक्तो विधिरन्यस्य[13] न प्राप्नोति, तस्मादतिदेशः क्रियते इष्टचधिकारात् । सर्वत्र-ग्रहणम् अग्निहोत्रादिष्वपि प्राप्त्यर्थम् । इळाधिकारादन्येष्वपि प्राशनेषु प्राप्त्यर्थं [14]नवभोजने इत्युच्यते[14] ॥ ११ ॥

[अथ व्रीहीणां यवानां चाग्रयणेष्टिकथनम्]

अथ व्रीहियवानां धाय्ये विराजौ ॥ १२ ॥

१-१. तु. तै ५, ७, २, ४ ; ५ । २-२. नास्ति ब[1,2] मै पू । ३. इत्यनेन ब[1] मै । ४. नास्ति ब[3] वि । ५. पुनरालम्भात् ब[1,2] । ६-६. °लोपो प्राप्तः ब[3] । ७. °धानेन भवति (°न्ति पू) ब[1] पू ; °धाने भवन्ति ब[2] । ८. श्यामाकानिळान् मै ; श्यामाकमिळा° ब[3] ; °भक्ष्यान् ब[1,2] वि । ९. °प्राशनेषु ब[1,2] मै पू । १०. तु. आश्रौ १, ७, ८ । ११. अत्र ब[1] पू । १२. भक्ष्ये मै पू । १३. °रप्यन्यस्य ब[1] ; °रप्यस्य ब[2] मै पू । १४-१४. °भोजनेष्वित्युच्यते मूको ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[1]आग्रयणं †व्रीहिश्यामाकयवानाम् (आश्वौ २, ९, १) इत्युक्तम्†[1]। तत्र[2] श्यामाकेष्टिरुक्ता। पूर्वं[3] हि ते पच्यन्ते। अथ व्रीहियवानामिष्टिर्वक्ष्यते। व्रीहीणां यवानां च वक्ष्यमाणा इष्टिर्भवति। शरदि व्रीहीणां वसन्ते यवानां समाना इष्टिः। [4]धाय्ये अस्यामिष्टौ धाय्ये भवतः। विराजौ तस्यामिष्ट्यां विराजौ संयाज्ये भवतः[4] ॥ १२ ॥

[तत्र देवताकथनम्]

अग्नीन्द्राविन्द्राग्नी वा विश्वे देवाः सोमो यदि तत्र श्यामाको द्यावापृथिवी ॥ १३ ॥

[4]तस्यामिष्ट्यां देवताः[4] अग्नीन्द्रौ देवता इन्द्राग्नी वा भवति विश्वेदेवा द्वितीया। सोमस्तृतीया देवता यदि तत्र[5] श्यामाकश्चरुः समानतन्त्रो भवति। द्यावापृथिवी च देवता चतुर्थी[6] भवति समानतन्त्रपक्षे। नानातन्त्रपक्षे[7] तृतीया भवति। द्यावापृथिव्योरनन्तरं[8] सौम्यमित्येके ॥ १३ ॥

[याज्यानुवाक्याकथनम्]

आ घा ये अग्निमिन्धते, सुकर्माणः सुरुचो देवयन्तो, विश्वे देवास आगत, ये के च ज्मा महि नो अहिमायाः, मही द्यौः पृथिवी च नः, प्र पूर्वजे पितरा नव्यसीभिरिति ॥ १४ ॥

आ घा ये (ऋ ८, ४५, १), सुकर्माणः (ऋ ४, २, १७) इत्यग्नीन्द्रयोर्याज्यानुवाक्ये। इन्द्राग्न्योरुक्ते[9]। विश्वे देवासः (ऋ २, ४१, १३), ये के च ज्मा (ऋ ६, ५२, १५) इति विश्वेषां देवानाम्। मही द्यौः पृथिवी च नः (ऋ १, २२, १३), प्र पूर्वजे (ऋ ७, ५३, २) इति द्यावापृथिव्योः। इति याज्यानुवाक्याः[10]। शेषं पौर्णमासेन ॥ १४ ॥

॥ इति नवमः खण्डः ॥

१-१. अथ व्रीहियवानामिष्टिग्रहणम्। श्यामाकयवानामित्युच्यते मै।
†-†. नास्ति ब[2]। २. नास्ति ब[2]। ३. पूर्वे मूको। ४-४. नास्ति ब[1] वि।
५. तत्र श्यामाकः ब[3] वि। ६. चतुर्थं ब[1,2] पू। ७. नानातन्त्रे ब[2,3] मै वि पू।
८. °व्योरन्ते पू। ९. तु. आश्वौ १, ६, १। १०. °वाक्ये ब[1]।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

काम्या इष्टयः

Digitized by Madhuban Trust

अथ द्वितीयेऽध्याये दशमः खण्डः

[काम्येष्ट्युपक्रमः]

अथ काम्याः[1] ॥ १ ॥

त्रिविधानि कर्माणि नित्यानि काम्यानि नैमित्तिकानीति । तत्र अग्न्याधेयम्, अग्निहोत्रं, दर्शपूर्णमासौ[2], आग्रयणमित्येतानि नित्यानि व्याख्यातानि[3] । इदानीं काम्यानि वक्तव्यानि । तदर्थमिदमुच्यते—अथ काम्याः । अथ अनन्तरं नित्येभ्योऽनन्तरम् इष्टयो वक्ष्यन्ते—काम्याः स्वर्ग आयुः स्वस्त्ययनं पुत्रा इत्येवमादयः कामाः[4] तेषु निमित्तेषु क्रियमाणा इष्टयः काम्याः । आयुष्कामेष्ट्यां स्वस्त्ययन्यां[5] पुत्रकामेष्ट्यामित्येवमाद्यादेशादेव[6] काम्या भवन्ति । तस्मादथ काम्या इति न वक्तव्यम् । [7]तत्रेदं प्रयोजनम्[7] । वक्ष्यति—काम्यानां स्थाने काम्याश्चरवः (आगृ ३, ६, १-२) इति । [8]काम्याश्च नित्येष्वपि[8] श्रूयन्ते । तस्मात् काम्या इत्यधिकृत्य उक्तानां स्थाने ते चरवो भवन्ति । न चातुर्मास्यादीनां स्थाने काम्या इति । इष्टिपरत्वात् काम्यस्य । तुरायणादीनामिष्ट्ययनादीनां[9] स्थाने ते [10]चरवो न भवन्ति[10] ॥ १ ॥

[आयुष्कामेष्टेराज्यभागकथनम्]

आयुष्कामेष्ट्यां जीवातुमन्तौ ॥ २ ॥

---

१. काम्यानि ब[1,2] मै पू । २. °पौर्णं° ब[2]; त्रुटितम् पू । ३. नास्ति मै । ४. नास्ति मूको । ५. °यनम् ब[1,2] मै पू; °यने ब[3]; °यनो वि । ६. पुत्रकाम्यानित्येवमादि आदेव ब[1]; पुत्रकाम्यामित्येवमादि आदेशादेव (°मादि... पू) ब[2] पू; पुत्रकाम्यमित्येवमादेरादेशादेव मै; °मादि आदे° ब[3] वि; तु. आश्रौ २, १०, २; ४; ८ । ७-७. तदप्रयो° ब[1,2] मै पू । ८-८. काम्याश्चेत्यपि ब[1]; काम्याश्चेन्नि(°नि ब[2] पू)त्येष्वपि ब[2] पू; °श्च नित्येपि वि । ९. तु आग्रयणा° ब[3]; तु. आश्रौ २, १४, ४ । १०-१०. °वो भ° ब[1,2]; त्रुटितम् पू ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

शतायुर्वै पुरुषः (ऐब्रा २, १७) इति श्रुतिः। यो यजमानः कृत्स्नमायुरिच्छति, स आयुष्कामः। आयुष्कामस्य इष्टिस्तस्याम् [1]आयुष्कामेष्टयां विधिरुच्यते[1]—जीवातुमन्तौ इति[2]। जीवातुमन्तौ आज्यभागौ भवतः ॥ २ ॥

[आयुष्कामेष्टेर्याज्यानुवाक्यादेवतानिर्देशः]

आ नो अग्ने सुचेतुना, त्वं सोम महे भगमिति। अग्निरायुष्मानिन्द्रस्त्राता ॥ ३ ॥

आ नो अग्ने सुचेतुना (ऋ १, ७९, ९), त्वं सोम महे भगम् (ऋ १, ९१, ७) इत्यनुवाक्ये। नित्ये याज्ये[3] (आश्रौ १, ५, ३४)। अग्निरायुष्मान् देवता इन्द्रस्त्राता द्वितीया देवता ॥ ३ ॥

[अग्नेरायुष्मतो याज्यानुवाक्याविकल्पः, इन्द्रस्य त्रातुर्याज्यानुवाक्यासंयाज्याकथनम्]

आयुष्टे विश्वतो दधदयमग्निर्वरेण्यः। पुनस्ते प्राण आ यातु परा यक्ष्मं सुवामि ते। आयुर्दा अग्ने हविषो जुषाणो घृतप्रतीको घृतयोनिरेधि। घृतं पीत्वा मधु चारु गव्यं पितेव पुत्रमभिरक्षतादिमम्। त्रातारमिन्द्रमवितारमिन्द्रं मा ते अस्यां सहसावन् परिष्टौ पाहि नो अग्ने पायुभिरजस्रैरग्ने त्वं पारया नव्यो अस्मानिति संयाज्ये ॥ ४ ॥

आयुष्टे (तै. तै १, ३, १४, ४) इति यथासमाम्नाते याज्यानुवाक्ये अग्नेरायुष्मतः। त्रातारमिन्द्रम् (ऋ ६, ४७, ११), मा ते अस्याम् (ऋ ७, १९, ७) [4]इतीन्द्रस्य त्रातुः[4]। पाहि नो अग्ने (ऋ १, १८९, ४), अग्ने त्वं पारय (ऋ १, १८९, २) इति संयाज्ये। शेषं पौर्णमासेन[5] ॥ ४ ॥

[स्वस्त्ययन्या इष्टेराज्यभागकथनम्]

स्वस्त्ययन्यां रक्षितवन्तौ ॥ ५ ॥

स्वस्तीत्यविनाशनाम (या ३, २१)। स्वस्ति अनया ईयते[6] प्राप्यते स्वस्त्ययनी। तस्यां स्वस्त्ययन्यां विधिरुच्यते—रक्षितवन्तौ इति[7]। रक्षितवन्तावाज्यभागौ भवतः ॥ ५ ॥

१-१. त्रुटितम् पू ; आयुषामिष्टयां° ब[2] मं ; आयुष्कामिष्टयां ब[1] वि। २. नास्ति ब[1,2] मं पू ; आज्यभागमिति ब[1]। ३. तु. आश्रौ १, ५, २९। ४-४. इतीन्द्रस्यागुणः ब[3]। ५. पूर्ण° ब[3] वि। ६. नास्ति मूको। ७. नास्ति ब[1,2] मं पू।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

काम्या इष्टयः
Digitized by Madhuban Trust

[स्वस्त्ययन्या इष्टेर्याज्यानुवाक्याकथनम्]

अग्ने रक्षा णो अंहसस्त्वं नः सोम विश्वतः इति ॥ ६ ॥

अग्ने रक्षा णः (ऋ ७, १५, १३), त्वं नः सोम (ऋ १, ९१, ८) इत्यनुवाक्ये। नित्ये याज्ये[1] ॥ ६ ॥

[देवतायाज्यानुवाक्यासंयाज्याकथनम्]

अग्निः स्वस्तिमान्। स्वस्ति नो दिवो अग्ने पृथिव्या, आरे अस्मदमतिमारे अंह इति। पूर्वयोक्ते संयाज्ये ॥ ७ ॥

अग्निः स्वस्तिमान् देवता। स्वस्ति नो दिवः (ऋ १०, ७, १), आरे अस्मत् (ऋ ४, ११, ६) इति याज्यानुवाक्ये। [2]पूर्वयोक्ते संयाज्ये[2]। पूर्वया इष्टचा आयुष्कामेष्टचां[3] संयाज्ये व्याख्याते पाहि नो अग्ने (ऋ १, १८९, ४) इत्येते[4]। शेषं पौर्णमासेन[5] ॥ ७ ॥

[पुत्रकामेष्टचुपक्रमस्तद्देवताकथनञ्च]

पुत्रकामेष्टचामग्निः पुत्री ॥ ८ ॥

पुत्रकामस्य इष्टिः पुत्रकामेष्टिः। तस्यां विधिरुच्यते [6]अग्निः पुत्री देवता[6] ॥ ८ ॥

[तत्र याज्यानुवाक्यासंयाज्याकथनम्]

यस्मै त्वं सुकृते जातवेदो, यस्त्वा हृदा कीरिणा मन्यमानः। अग्निस्तुविश्रवस्तममिति द्वे संयाज्ये ॥ ९ ॥

[7]यस्मै त्वम्[6] (ऋ ५, ४, ११), [7]यस्त्वा हृदा[7] (ऋ ५, ४, १०) इति याज्यानुवाक्ये। अग्निस्तुविश्रवस्तमम् (ऋ ५, २५, ५; ६) इति द्वे ऋचौ संयाज्ये भवतः। द्वे इत्यनुच्यमाने एका प्राप्नोति। सैव अनुवाक्या, सैव याज्या। शेषं पौर्णमासेन[8] ॥ ९ ॥

[आग्नेय्या इष्टेरुपक्रमः]

आग्नेय्या उत्तरे ॥ १० ॥

---

१. द्र. आश्रौ १, ५, ३४। २-२. नास्ति मं। ३. नास्ति ब[1,3] वि; त्रुटितम् पू। ४. तु. आश्रौ २, १०, ४। ५. पूर्णं° ब[3] वि। ६-६. त्रुटितम् पू। ७-७. नास्ति ब[1,2] मं पू। ८. पूर्णं° वि।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[1]अग्निर्देवता ययोरिष्टयोस्ते आग्नेय्यौ इष्टी उत्तरे[1] [2]पुत्रकामेष्टया उत्तरे[2]। ते[3] वक्ष्येते[4] ॥ १० ॥

[पूर्वस्या आग्नेय्या इष्टेर्देवतायाज्यानुवाक्यानिर्देशः]

नित्ये मूर्धन्वतः ॥ ११ ॥

तयोराद्यायाम् इष्टयाम् अग्निर्मूर्धन्वान् देवता। [5]तस्य मूर्धन्वतो[5] नित्ये दर्शपूर्णमासयोर्याज्यानुवाक्ये[6] भवतः अग्निर्मूर्धा (ऋ ८, ४४, १६; आश्रौ १, ६, १) इति। शुद्धस्याग्नेरुक्ते याज्यानुवाक्ये विशिष्टस्य न प्राप्नुतः। विशिष्टस्यापि ते[7] एव[8] भवतः इत्युच्यते द्विलिङ्गत्वात्[9]। अस्मादारम्भाद् विशिष्टाया[10] देवताया[11] विशिष्टलिङ्गे याज्यानुवाक्ये भवतः[12] इति दर्शितं भवति[13]। तस्यां यथा[14] [15]मृगारेष्टयाम्†। ‡प्रकृते तु‡ शुद्धस्याग्नेः विशिष्टलिङ्गे याज्यानुवाक्ये आदिष्टेϕ। ¶अस्मादारम्भादविशिष्टाया देवताया विशिष्टलिङ्गे अपि याज्यानुवाक्ये भवतः[15] [16]इति दर्शितं भवति। μयथा[16] वैश्वदेवे मरुतां स्वतवसां याज्यानुवाक्ये शुद्धानामपि मरुतां भवतः[17]। एवं[18] नित्ये मूर्धन्वतः। शेषं पूर्णमासेन[19]। कामोऽपि पूर्णमासेनैव[19] ॥ ११ ॥

अग्नये कामाय [20]द्वितीया इष्टिर्भवति। तस्यां विधिरुच्यते[20]—

[उत्तराग्नेय्या इष्टेर्देवतायाज्यानुवाक्यानिर्देशः]

तुभ्यं ता अङ्गिरस्तमाश्याम तं काममग्ने तवोतीति कामाय ॥ १२ ॥

१-१. नास्ति ब[२] मं वि। २-२. नास्ति ब[२] मं। ३. नास्ति ब[१,२]। ४. वक्ष्यन्ते मूको। ५-५. नास्ति ब[१]। ६. पौर्णमासे याज्या° ब[२] मं; पूर्णमासे याज्या° पू; °मासे याज्या° ब[३] वि। ७. एते ब[३] मं। ८. नास्ति ब[१]। ९. दि लिङ्ग° ब[१]; हि लिङ्ग° ब[२,३] मं वि पू। १०. विशिष्टयोः (°ष्ट्यो ब[२]; °यो ब[३] मं वि पू) ब[२,१] मं वि पू। ११. देवतयोः मं। १२. नास्ति ब। १३. भवतीति वि। १४. तस्यां यथा ब[२]। १५-१५. नास्ति वि। †. तु. आपश्रौ २०, २३, २-४। ‡-‡. प्राकृते तु ब[१,२] मं वि; प्राकृते ब[३]; त्रुटितम् पू। ϕ. नास्ति ब[१]। ¶. तस्मादा° मूको। १६-१६. नास्ति वि। μ. तस्यां यया ब[१-३] मं; ...यथा पू। १७. तु. आश्रौ २, १६, १०। १८. नास्ति मूको। १९. पौर्णं° ब[१,२] मं पू। २०-२०. नास्ति ब[२]।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[1]तुभ्यं ता (ऋ ८, ४३, १८), †अश्याम तम् (ऋ ६, ५, ७) इत्येते† याज्यानुवाक्ये भवतः। अग्नये कामाय[1] चतुर्थीवचनादाध्वर्यवे[2] य[3] आदिष्टः कामः स एव भवति। अग्नये कामाय पुरोळाशमष्टादशकपालं निर्वपेद् यं कामो नोपनमेत् (तैसं २, २, ३, १) इति। शेषं पूर्णमासेन[4] ॥ १२ ॥

[वैमृध्या इष्टेरुपक्रमः]

वैमृध्या उत्तरे ॥ १३ ॥

इन्द्रो विमृधो[5] देवता ययोरिष्टयोस्ते इष्टी वैमृध्यौ। आग्नेयीभ्या-मुत्तरे[6] ॥ १३ ॥

[तत्र पुष्टिकामस्य याज्यानुवाक्याकथनम्]

वि न इन्द्र मृधो जहि, मृगो न भीमः कुचरो गिरिष्ठाः। सद्युत्तिमिन्द्र सच्युतिं प्रच्युतिं जघनच्युतिम्। प्रनाकाफा न आभर प्रयप्स्यन्निव सक्थ्यौ। वि न इन्द्र मृधो जहि चनीखुदद्[7] यथा सपम्। अभि नः सुष्टुतिं नयेति ॥ १४ ॥

आद्यया शत्रुं जयति। [8]वि न इन्द्र मृधो[8] जहि, [9]विमृधो नुदस्व इति[9] लिङ्गात्। [10]वि न इन्द्र मृधो जहि नीचा यच्छ पृतन्यतः ϕ (तैसं १, ६, १२, ४), सृकं संशाय पविमिन्द्र तिग्मं वि शत्रून् ताढि विमृधो नुदस्व¶ (तैसं १, ६, १२, ५) इत्यध्वर्यूणाम्[10]। [11]तस्यां वि न इन्द्र मृधो जहि[11] (ऋ १०, १५२, ४), मृगो न भीमः (ऋ १०, १८०, २) इति याज्यानुवाक्ये। शेषं पूर्णमासेन[12] द्वितीयया राष्ट्राण्यभि-जयति। राष्ट्राणि वा अभिसमीयुः (तैसं २, २, ७, ४) इत्यध्वर्यूणाम्। तस्यां सद्युत्तिमिन्द्र इति याज्यानुवाक्ये। शेषं पूर्णमासेन[13] ॥ १४ ॥

१-१. नास्ति ब[2]। †-†. अङ्गिरस्तमा इति ब[1] मै पू। २. °नादध्व° ब[1] मै। ३. नास्ति ब[3]। ४. पौर्णं° ब[1,2] पू। ५. तु. तैब्रा ३, ७, ११, ४; विमृधी ब[1,3] मै वि पू। ६. °याभ्या° मूको। ७. जनीखुदद् आनन्दाश्रमपाठः। ८-८. विमृधो ब[1,3] मै वि पू। ९-९. नु सूति ब[1]; नुदयेति ब[2,3] वि पू; नुदेति मै। १०-१०. विमृधो जहि प्रतन्यसते (पृतन्यते ब[2]; तृतन्यते ब[3]; प्तृतन्यवे वि; प्रेतं न्यते पू) त्यध्वयूणाम् ब[1-3] वि पू; नास्ति मै। ϕ. पृतन्यतः। अधस्पदं तमीं कृधि यो अस्माँ अभिदासति इति पूर्णो मन्त्रपाठः। ¶. नुदस्व। वि मन्युमिन्द्र भामितोऽमित्रस्याभिदासतः इति पूर्णो मन्त्रपाठः। ११-११. विमृधो जहि मै। १२. पौर्णं° ब[1,2] मै पू। १३. पौर्णं° ब[1,2] मै वि; त्रुटितम् पू।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[धनकामेष्टेरिन्द्रो दाता इन्द्रः पुनर्दाता वेतिदेवताकथनम्]

इन्द्राय दात्रे पुनर्दात्रे वा ।। १५ ।।

इन्द्राय दात्रे । धनकामस्येष्टिः । यानि नो धनानि (आश्रौ २, १०, १६) इति लिङ्गम् । पुनर्दात्रे वा । देवताविकल्प उक्तः[1] । [2]यस्मै प्रत्तमिव सन् न प्रदीयेत[2] (तैसं २, २, ८, ४) इत्युक्तमध्वर्यूणाम् । पुनर्न इन्द्रो मघवा ददातु (आश्रौ २, १०, १६) इति च लिङ्गम् ।। १५ ।।

[याज्यानुवाक्याकथनम्]

यानि नो धनानि क्रुद्धो जिनासि मन्युना । इन्द्रानुविद्धि नस्तानि, अनेन हविषा पुनः, पुनर्न इन्द्रो मघवा ददातु धनानि शक्रो धनीः सुराधाः (तैब्रा २, ५, ३, १) । अस्मद्र्यक् कृणुतां याचितो मनः श्रुष्टी न इन्द्रो हविषा मृधातीति ।। १६ ।।

यानि नो धनानि इति याज्यानुवाक्ये । शेषं पूर्णमासेन[3] ।। १६ ।।

[आशानामाशापालानां वा देवतात्वम्]

आशानामाशापालेभ्यो वा ।। १७ ।।

आशानाम् आशापाला देवता [4]आशा वा[4] । आहवे एतया अपि शत्रूञ्जयति । अयं यजमानो मृधो व्यस्यतु (आश्रौ २, १०, १८) इति लिङ्गम् । मृधः शत्रवो भवन्ति ।। १७ ।।

[याज्यानुवाक्याकथनम्]

आशानामाशापालेभ्यश्चतुर्भ्यो अमृतेभ्यः । इदं भूतस्याध्यक्षेभ्यो विधेम हविषा वयम् । विश्वा आशा मधुना संसृजाम्यनमीवा आप ओषधयः सन्तु सर्वाः । अयं यजमानो मृधो व्यस्यत्वगृभीताः पशवः सन्तु सर्व इति ।। १८ ।।

---

१. नास्ति ब[2,3] मै वि पू । २-२. उत्तरमे (°म मै पू) व संपन्नं तत् प्रदी (°ती) यते मूको । ३. पौर्ण° ब[1,2] मै पू । ४-४. आशाया (आशा वा ब[3]) आशापालाः ब[3] वि ; आशापाला ब[1,2] मै पू ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आशानामाशापालेभ्यः[1] (तु. तैब्रा २, ५, ३, ३) इति याज्यानुवाक्ये। शेषं पूर्णमासेन[2] ॥ १८ ॥

[लोकेष्टयुपक्रमः]

लोकेष्टिः ॥ १९ ॥

लोकविजयार्था इष्टिः लोकेष्टिः। सा वक्ष्यते ॥ १९ ॥

[देवताकथनम्]

पृथिव्यन्तरिक्षं द्यौरिति देवताः ॥ २० ॥

पृथिवी अन्तरिक्षं द्यौः [3]इत्येतास्तिस्रो देवताः[3]। तासां याज्यानुवाक्या वक्ष्यन्ते। देवता इत्यनुच्यमाने का देवताः काश्च ऋच इति[4] सन्दिह्येत[5] सहाम्नातत्वात् ॥ २० ॥

[याज्यानुवाक्याकथनम्]

पृथिवीं मातरं महीमन्तरिक्षमुपब्रुवे। बृहतीमतये दिवम्। विश्वं बिभर्ति पृथिव्यन्तरिक्षं विपप्रथे। दुहे द्यौर्बृहती पयः। वर्म मे पृथिवी मह्यन्तरिक्षं स्वस्तये। द्यौर्मे शर्म महि श्रव इति तिस्रस्त्रयाणाम् ॥ २१ ॥

पृथिवीं मातरम् (तैब्रा २, ४, ६, ८-९) इत्येता यथाम्नातास्तिस्र ऋचः त्रयाणां लोकानां याज्यानुवाक्याः वक्ष्यमाणेन[6] न्यायेन भवन्ति। अप्राप्तमिदमारभ्यते तिस्रस्त्रयाणाम् इति। त्रयाणां षट् प्राप्ताः। कथं तिस्रस्त्रयाणां भवन्तीति उत्तरेण सूत्रेण विधीयते[7]। अस्मादारम्भाद् [8]वक्ष्यमाणो विभागः[8] त्रयाणां लोकानां तिसृणां च ऋचां सिद्धो भवति, तिस्रस्त्रयाणाम् इत्युक्तत्वात्।

यद्यनन्तरसूत्रमुच्यते[9], किमनेन सूत्रेण विभज्यत इति संशयः स्यात्। कथम्। देवता अधिकृताः[10]। [11]प्रथमे (आश्रौ २, १०, २२) इत्युक्ते[11] ता न संबध्यन्ते। तिस्र[12] ऋचोऽधिकृताः। पञ्चानां विभागमाह। तस्मादधिकृता न

---

१. आशापालेभ्यः ब[1]। २. पौर्ण° ब[1,2] मै पू। ३-३. इत्येताः मै। ४. नास्ति ब[2]। ५. संदिह्यते (°न्ते वि) ब[1-3] वि पू। ६. तु. आश्रौ २, १०, २२। ७. °यन्ते ब[1]। ८-८. °णवि° ब[2,3] मै पू। ९. यदनन्तर° ब[1] मै। १०. अपीरिताः ब[1]; अपिकृताः ब[2] मै पू। ११-११. प्रथमेत्युक्ते ब[1-3] मै वि; त्रुटितम् पू। १२. तिस्रो ब[1-3] मै वि; त्रुटितम् पू।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

संबध्यन्ते। कथम्। प्रथमे प्रथमस्येति प्रथमाद्वितीये[1] भवतः। उत्तरे मध्यमस्येति तृतीयाचतुर्थ्यौ[2] भवतः। उत्तमा[3] प्रथमा चोत्तमस्येति[4] पञ्चमी प्रथमा च[5] भवति[6]। तिस्रस्त्रयाणामित्यधिकारात् त्रयाणां लोकानां तिसृणां च ऋचां विभागः सिद्धो भवति[7] ॥ २१ ॥

कथं प्रयोग इति तदुच्यते[8]—

[त्रयाणां हविषां तिसृणाम् ऋचां विनिवेशनम्]

प्रथमे प्रथमस्य, उत्तरे[9] मध्यमस्य, उत्तमा प्रथमा चोत्तमस्य ॥ २२ ॥

प्रथमे[10] ऋचौ प्रथमस्य लोकस्य। [11]उत्तरे मध्यमस्य[11] उत्तरे द्वितीय-तृतीये[12] मध्यमस्य। उत्तमा प्रथमा च उत्तमस्य, एवं[13] सति जामिदोषश्च न[14] भवति। [15]या याज्या कृता[15] सा पुनर्याज्या न[16] भवति ॥ २२ ॥

॥ इति दशमः खण्डः ॥

---

१. °मद्वि° मूको। २. °यचतुर्थे ब$^{1-3}$ मै ; °यचतुर्थौ वि ; त्रुटितम् पू। ३. उत्तरा ब^{1,2} मै पू। ४. °त्तमस्य मूको। ५. नास्ति ब$^{1-3}$ मै पू ; स वि। ६. भवतः मै। ७. भवति तृतीये ब^{2}। ८. तत्क्रियते ब^{3}। ९. उत्तमे BI श्रान। १०. नास्ति ब^{1,2} पू ; प्रथमं मै। ११-११. नास्ति ब^{1,2} मै पू। १२. द्वितीये ब^{2} ; °ये तृ° ब^{3} वि। १३. प्रथमं ब^{1,2} मै पू। १४. नास्ति ब^{2}। १५-१५. याज्या या कृता ब^{1} वि ; त्रुटितम् पू। १६. नास्ति ब^{1,2} मै वि पू।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ द्वितीयेऽध्याये एकादशः खण्डः

[महावैराजीसंज्ञकमित्रविन्देष्टिकथनम्]

मित्रविन्दा महावैराजी ॥ १ ॥

मित्रविन्दा नाम इष्टिः । सा च वक्ष्यते । एतयेष्टया '[1]मित्रं विन्दते लभते[1]' । महावैराजीति विशेषसंज्ञा, यथा कारीरीति । महावैराजं तन्त्रम्[2] अस्यां[3] भवति । दश प्रयाजाः दश देवताः विराजौ संयाज्ये धाय्ये इत्येतन्महावैराजमित्ये-तस्यामाम्नातम्[4] ॥ १ ॥

[मित्रविन्देष्टेर्देवताकथनम्]

अग्निः सोमो वरुणो मित्र इन्द्रो बृहस्पतिः सविता पूषा सरस्वती त्वष्टेत्येकप्रदानाः ॥ २ ॥

अग्न्याद्या[5] दश देवता एकप्रदानाः '[6]एकं प्रदानं यासां ता एकप्रदानाः[6]' । उक्तम् एकप्रदानविधानम् सर्वा आदिश्य (आश्रौ १, ३, १८) इति ॥ २ ॥

[मित्रविन्देष्टेरनुवाक्याकथनम्]

अग्निः सोमो वरुणो मित्र इन्द्रो बृहस्पतिः सविता यः सहस्री । पूषा नो गोभिरवसा सरस्वती त्वष्टा रूपेण समनक्तु यज्ञम् ॥ ३ ॥

अग्निः सोमः (तु. शब्रा ११, ४, ३, ६) इति यथासमाम्नाता एका एवानुवाक्या एकप्रदानत्वात् ॥ ३ ॥

[याज्याकथनम्]

प्रतिलोममादिश्य यजेद् ये३ यजामहे, त्वष्टारं सरस्वतीं पूषणं सवितारं बृहस्पतिमिन्द्रं मित्रं वरुणं सोममग्निं, त्वष्टा रूपाणि दधती

१-१. मित्रा (त्रं ब[1] मै पू ; त्रां ब[2]) लभते विन्दते मूको । २. तं न ब[1] ; तं तं ब[1] ; त्रुटितम् । ३. अस्याः वि । ४. इत्यन्ये । तेन महा° ब[3] ; °राज इत्ये° ब[1,2] मै पू ; °म्नातः ब[3] वि । ५. आग्नेयाद्या ब[1] ; अग्ने याज्या ब[2] ; आग्नेया मै ; आग्न्या याज्या ब[3] वि ; अग्नेयाद्या पू । ६-६. नास्ति मै ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सरस्वती भगं पूषा सविता नो ददातु। बृहस्पतिर्ददविन्द्रः सहस्रं मित्रो दाता वरुणः सोमो अग्निर् (तु. शब्रा ११, ४, ३, ७) इति ॥ ४ ॥

अग्न्यादि[1] प्रथमान्तं प्रतिलोमं भवति। [2]प्रतिलोमं देवता[2] आदिश्य यजेत्[3]। यजेदिति वचनाद् अन्यत्र निगमेषु[4] प्रतिलोमे[5] प्राप्ते आरम्भः। ये [6]यजामह इत्यादि[6]। [7]यथासमाम्नाता देवता देवतादेशः[7]। याज्या [8]च तत्र[8] आगूर्यादिशम् (आश्रौ १, ५, २९) इति। आगुरा[9] सह सम्बन्धयस्याऽऽदेशस्य[10] समाम्नानाद्[11] आगुरो लोपः स्यादिति आगूः पठ्यते। आदेशो यदि न पठ्येत[12], याज्यायां[13] यः प्रतिलोमपाठः, स आदेशः स्यात् [14]प्रतिलोममादिश्य यजेदिति[14] वचनात् ॥ ४ ॥

[आग्नेय्याद्यष्टास्विष्टिसु वैराजतन्त्रं भवतीति कथनम्]

अष्टौ वैराजतन्त्राः ॥ ५ ॥

आग्नेय्याद्या[15] अष्टाविष्टयो [16]वैराजतन्त्राः, तासु वैराजतन्त्रं† भवति। अनारभ्यमाणं न प्राप्नोति[16] ॥ ५ ॥

[आग्नेय्याद्यासु षट्सु इष्टिषु एकं हविर्भवतीति कथनम्]

तासामाद्याः षडेकहविषः ॥ ६ ॥

[17]तासाम् इष्टीनाम् आद्याः षडिष्टयः[17] एकहविषो भवन्ति। एकं हविर्यासु ता एकहविषः। एकस्मिन्ननुच्यमाने आग्नेय्या उत्तरे (आश्रौ २, १०, १०), वैमृध्या उत्तरे (आश्रौ २, १०, १३) इत्येता द्विहविषः प्राप्नुवन्ति। कथम्। आग्नेय्या उत्तरे इत्युक्त्वा [18]द्वे द्वे देवते[18] उपदिशन्ति। तस्मादेकैकस्यामिष्टौ द्वे द्वे

---

१. इत्यादि ब[1] मै पू; अत्यादि ब[2]; अन्यादि ब[3]; मन्त्यादि वि। २-२. °मदे° ब[1,2] मै पू। ३. नास्ति मै। ४. नास्ति ब[1]। ५. अनुलोमे ब[2,1] मै वि पू। ६-६. यजामहादि ब[2,3] मै वि; त्रुटितम् पू। ७-७. समाम्नातादेशः ब[1] वि। ८-८. चतस्रः मूको। ९. आगूर्यं ब[1]। १०. संवन्धस्या° ब[2] पू। ११. °म्नातः ब[1]; °म्नातता ब[2]; °म्नातत्वात् मै; °म्नातात् पू। १२. पठ्यते मूको। १३. याज्यायाः मै। १४-१४. प्रतिलोमादिति ब[3] वि। १५. आग्नेयाद्या ब[1]; आग्नेयाज्या ब[2] मै; आग्नेयाया (°या वि) ब[1] वि; आग्ने... पू। १६-१६. नास्ति ब[3] वि। †. विरा° ब[1,2] मै पू। १७-१७ नास्ति ब[3] वि। १८-१८. द्वे द्वे च ते ब[1,2] मै; द्वे... पू।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

हविषी प्राप्नुतः । एवं वैमृध्योरपि[1] जामिदोषपरिहारार्थं[2] च याज्यान्यत्वं स्यात् । तथा इन्द्राय दात्रे पुनर्दात्रे वा (आश्रौ २, १०, १५) इति वा-शब्दः समुच्चयार्थः स्यात् । वचनाज्जामिदोषोऽपि[3] भवति, यथा वैमृध्योः[4] । एवम् [5]आशानामाशापालेभ्यो वा (आश्रौ २, १०, १७) इति[5] स्यात् । [6]तस्मात् तासामाद्याः[6] षडेकहविषः इत्युच्यते ॥ ६ ॥

[स्नुषाश्वशुरीयेष्टिविधानम्]

स्नुषाश्वशुरीययाऽभिचरन् यजेत ॥ ७ ॥

स्नुषाश्वशुरीया नाम इष्टिः, तया स्नुषाश्वशुरीयया इष्टचा । अभिचरन्[7] अभिचरितुमिच्छन् द्वेष्यमभिहन्तुमिच्छन् यः[7], स एतया यजेत । सा वक्ष्यते ॥ ७ ॥

[तस्या देवतायाज्यानुवाक्याकथनम्]

इन्द्रः सूरो अतरद्रजांसि स्नुषा सपत्नाश्श्वशुरोऽहमस्मि[8] । अहं शत्रूञ्जयामि जर्हृषाणोऽहं वाजं जयामि वाजसातौ । इन्द्रः सूरः प्रथमो विश्वकर्मा मरुत्वाँ अस्तु गणवान् सजातैः । मम स्नुषा श्वशुरस्य प्रशिष्टौ सपत्ना वाचं मनस उपासताम् (तु. तैब्रा २, ४, ६, १२) इति ॥ ८ ॥

तस्यामिन्द्रः सूरो देवता, मन्त्रे दर्शनात् । तस्यां यथासमाम्नाते याज्यानुवाक्ये ॥ ८ ॥

[संयाज्याकथनम्]

जुष्टो दमूना अग्ने शर्ध महते सौभगायेति संयाज्ये ॥ ९ ॥

जुष्टो दमूनाः (ऋ ५, ४, ५ ; ५, २८, ३) इति संयाज्ये । शेषं पूर्णमासेन[9] ॥ ९ ॥

[विमतानां संमतिकरणीष्टिः]

विमतानां संमत्यर्थे संज्ञानी ॥ १० ॥

---

१. वैमृध्ये अपि मै । २. °मित्रदो° ब[2] । ३. °मित्रदो° ब[2] ; °पो ब[3] वि । ४. °ध्ये मूको । ५-५. आशापालेभ्योऽपि ब[1] ; आशापालेभ्यो वेति ब[2,3] मै वि ; आशापालेभ्यो वे पू । ६-६. नास्ति मूको । ७. नास्ति मूको । ८. सपत्ना श्व° मूको । ९. पौर्ण° ब[1,2] मै पू ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

विमतानां ज्ञातिभ्रातृपुत्राणाम्[1] । संमत्यर्थे, संमतिः एका मतिः । विमतानां संमत्यर्थे[2] संज्ञानी नाम इष्टिः । [3]सा वक्ष्यते[3] । यः समानैर्मिथो विप्रियः स्यात् तमेतया संज्ञान्या याजयेत् (तैसं २, २, ११, ६) इति श्रुतिः ॥ १० ॥

[तत्र देवताकथनम्]

अग्निर्वसुमान् सोमो रुद्रवान् इन्द्रो मरुत्वान् वरुण आदित्यवान् इत्येकप्रदानाः ॥ ११ ॥

अग्निर्वसुमान् सोमो रुद्रवान् इन्द्रो मरुत्वान् वरुण आदित्यवान् इत्येते[4] देवताः एकप्रदानाः । एकं प्रदानमासां[5] भवति ॥ ११ ॥

[तत्र याज्यानुवाक्याकथनम्]

अग्निः प्रथमो वसुभिर्नो अव्यात् सोमो रुद्रैरभिरक्षतु त्मना । इन्द्रो मरुद्भिर्ऋतुथा कृणोत्वादित्यैर्नो वरुणः शर्म यंसत् । समग्निर्वसुभिर्नो अव्यात् सं सोमो रुद्रियाभिस्तनूभिः । समिन्द्रो रातहव्यो मरुद्भिः समादित्यैर्वरुणो विश्ववेदा इति ॥ १२ ॥

अग्निः प्रथमः (मैसं ४, १२, २) इति[6] याज्यानुवाक्ये । शेषं पूर्णमासेन[7] ॥ १२ ॥

[संमतानां विमतिकरणीष्टिः]

ऐन्द्रामारुतीं भेदकामाः ॥ १३ ॥

ऐन्द्रामारुतीम्[8] इन्द्रश्च मरुतश्च देवता यस्याः सा ऐन्द्रामारुती इष्टिः, तां भेदकामाः कुर्युः अन्येषां समानानाम् ॥ १३ ॥

---

१. भ्रातृपु° ब[1,2] मै पू । २. असम्मत्यर्थे ब[1,3] मै वि पू । ३-३. संवक्ष्यते ब[2] मै पू । ४. इत्येता मै । ५. °नमस्यां मै । ६. द्र. आश्रौ २, ६, ८ टि. ११-११† । ७. पौर्ण° ब[1,2] मै वि पू । ८. नास्ति ब[3,4] वि ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[तत्र मरुतां याज्यानुवाक्याकथनम्]

मरुतो यस्य हि क्षये प्र शर्धाय मारुताय स्वभानव इति ॥ १४ ॥

इन्द्रस्य नित्ये याज्यानुवाक्ये । मरुतो यस्य (ऋ १, ८६, १ ; ५, ५४, १) इति मरुताम् ॥ १४ ॥

तयोरिज्याविधिः—

[इन्द्रस्य मरुताञ्चेज्याविधानम्]

ऐन्द्रीमनूच्य मारुत्या यजेन्मारुतीमनूच्यैन्द्रचा यजेदिन्द्रं पूर्वं निगमेषु मरुतो वा ॥ १५ ॥

ऐन्द्रस्य हविष ऐन्द्रीमनुवाक्यामुक्त्वा मारुत्या यजेत् । मारुतीम् अनूच्य [1]ऐन्द्रचा यजेत्[1] । मारुतस्य हविषः मारुतीमनुवाक्यामुक्त्वा ऐन्द्रचा यजेत् । इन्द्रं पूर्वं [2]निगमेषु । आवाहनादिषु[2] निगमेषु इन्द्रं पूर्वं प्रथमं निगमयेत्, [2]अनन्तरं मरुतो निगमयेत्[2] । पूर्वमिति वचनाद् अनन्तरं मरुतां निगमनम् इष्टचधिकाराद्[3] निगमनग्रहणम्[4] । मरुतो वा [5]मरुतो वा[5] पूर्वं निगमेषु निगमयेत् ॥ १५ ॥

[अथवेन्द्रस्य पूर्वमिज्याहविःप्रदानं यावत्, ततो मरुताम् इति कथनम्]

इन्द्रं वाऽऽ प्रदानादूर्ध्वं[6] मरुतः॥ १६ ॥

पूर्वं निगमेष्विति वर्तते । इन्द्रं वा पूर्वं निगमेषु निगमयेत् अनन्तरं मरुतो निगमयेत् । पूर्वेषु निगमेषु[7] [8]आ प्रदानाद् यावत्प्रदानं[8] प्राप्नोति । आवाहने[9] पञ्चमे च[10] प्रयाजे अयं [11]वा कल्पो[11] भवति । ऊर्ध्वं मरुतः पूर्वं निगमयेदिन्द्रमुत्तरं स्विष्टकृति सूक्तवाके च ॥ १६ ॥

[सम्पत्तिकामानां प्रकृतीष्टेः संज्ञानीष्टेश्च विधानम्]

प्रकृत्या सम्पत्तिकामाः संज्ञानीं च ॥ १७ ॥

१-१. नास्ति ब^{1,3} मै पू । २-२. नास्ति ब^{2} । ३. इष्टचाधि° ब^{1} वि ; इष्टाधि° ब$^{2-4}$ मै पू । ४. °हणात् ब^{1,2} मै वि पू । ५-५. नास्ति ब^{1} । ६. वा प्रधाना° BI आन मै । ७. प्राप्तेपु ब^{3,4} ; निगमेषु प्राप्तेपु वि । ८-८. अप्राधान्याद् यावद् प्रधानं मै । ९. वाहने च ब^{1} ; वाहने ब^{2} ; त्रुटितम् पू । १०. नास्ति ब$^{2-4}$; त्रुटितम् पू । ११-११. विकल्पो मै ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्रकृत्या संपत्तिकामाः। एतयेष्ट्या[1] प्रकृत्या यजन्ते सम्पत्तिकामाः। परेषां नानामतानां सम्पत्तिः। संज्ञानीं च। [2]एतयेष्ट्वा संज्ञानीं च[2] अनन्तरमेव कुर्युः। सा व्याख्याता[3]। च-शब्दः समुच्चयार्थः ॥ १७ ॥

[परैर्बाध्यमानानामैन्द्राबार्हस्पत्येष्टेर्विधानम्]

ऐन्द्राबार्हस्पत्यां प्रधृष्यमाणाः ॥ १८ ॥

इन्द्राबृहस्पती देवता[4] यस्या इष्टेः सा ऐन्द्राबार्हस्पत्येष्टिः। तामिष्टिं[5] परैः[6] प्रधृष्यमाणाः[7] परैर्बाध्यमानाः[8] कुर्युः। बहुवचनं व्याख्यातम् ॥ १८ ॥

[तस्या इष्टेर्याज्यानुवाक्याकथनम्]

आ न इन्द्राबृहस्पती अस्मे इन्द्राबृहस्पती इति यद्यपीन्द्राय चोदयेयुः ॥ १९ ॥

आ न इन्द्राबृहस्पती (ऋ ४, ४६, ३), अस्मे इन्द्राबृहस्पती (ऋ ४, ४९, ४) इति इन्द्राबृहस्पत्योर्याज्यानुवाक्ये। [9]यद्यपीन्द्राय चोदयेयुः[9]। यद्यपि इन्द्राय अपि इन्द्राबृहस्पतिभ्याम् [10]एते एव याज्यानुवाक्ये भवतः[10] ॥ १९ ॥

॥ इति एकादशः खण्डः ॥

---

१. एतया ब[3,4]। २-२. एतयेष्ट्वा (तयेष्ट वि) संज्ञानीं (°नं ब[4]) च ब[1,2] वि पू ; नास्ति ब[3,4]। ३. आश्रौ २, ११, १०। ४. देवते (°त्ये वि) ब[3,4] वि। ५. नास्ति ब[2]। ६. एतैः ब[1-4] वि पू ; एते मै। ७. प्रक्रम्यमाणाः मै। ८. परैर्वध्य° ब[1]। ९-९. नास्ति मै। १०-१०. एते एव भवतः ब[1] ; एतैरेव भवतः ब[2] ; एते याज्यानुवाक्ये भवतः ब[3,4] वि।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust काण्वा इष्टयः

अथ द्वितीयेऽध्याये द्वादशः खण्डः[1]

पवित्रेष्टचाम् ॥ १ ॥

अपामिदं न्ययनं समुद्रस्य निवेशनम् । अन्यन्ते अस्मत्तपन्तु हेतयः पावको अस्मभ्यं शिवो भव । नमस्ते हरसे शोचिषे नमस्ते अस्त्वर्चिषे । अन्यन्ते अस्मत्तपन्तु हेतयः पावको अस्मभ्यं शिवो भव (तैसं ४, ६, १, ३) इति पावकवत्यौ धाय्ये ॥ २ ॥

पावकवन्तावाज्यभागौ ॥ ३ ॥

अग्नी रक्षांसि सेधति (ऋ ७, १५, १०), यो धारया पावकया (ऋ ९, १०१, २) इत्यृचौ याज्ये ॥ ४ ॥

यत्ते पवित्रमर्चिषि (ऋ ९, ६७, २३), आ कलशेषु धावति पवित्रे (ऋ ९, १७, ४) इत्येते ॥ ५ ॥

अग्निः पवमानः सरस्वती प्रिया अग्निः पावकः सविता सत्यप्रसवोऽग्निः शुचिर्वायुर्नियुत्वानग्निर्व्रतपतिर्दधिक्रावाऽग्निर्वैश्वानरो विष्णुः शिपिविष्टः ॥ ६ ॥

उत नः प्रिया प्रियासु (ऋ ६, ६१, १०), इमा जुह्वाना युष्मदा नमोभिः (ऋ ७, ९५, ५) ॥ ७ ॥

वायुरग्रेगा यज्ञप्रीर् (तैब्रा २, ४, ७, ६), वायो शुक्रो अयामि ते (ऋ ४, ४७, १), दधिक्राव्णो अकारिषम् (ऋ ४, ३९, ६), आ दधिक्राः शवसा पञ्च कृष्टीः (ऋ ४, ३८, १०) ॥ ८ ॥

---

१. प्रक्षिप्तोऽयं खण्डः, द्र. नारायणवृत्तिः । अत्र देवत्रातभाष्यं नोपलभ्यते ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

जुष्टो दमूनाः (ऋ ५, ४, ५), अग्ने शर्ध महते सौभगाय (ऋ ५, २८, ३) इति संयाज्ये ॥ ९ ॥

सैषा संवत्सरमतिप्रवसतः ॥ १० ॥

शुद्धिकामो वा ॥ ११ ॥

तदेषाऽभि यज्ञगाथा गीयते—
वैश्वानरीं व्रातपतिं पवित्रेष्टिं तथैव च ।
ऋतावृतौ प्रयुञ्जानः पुनाति दशपौरुषम्, इति ॥ १२ ॥

॥ इति द्वादशः खण्डः ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ द्वितीयेऽध्याये त्रयोदशः खण्डः

[वर्षकामेष्ट्युपक्रमः]

वर्षकामेष्टिः कारीरी ॥ १ ॥

[1]वर्षकामस्य इष्टिः[1] वर्षकामेष्टिः । सा वक्ष्यते । कारीरीति[2] [1]विशेषसंज्ञा । बह्वृचो वर्षकामेष्टयः । या† आग्नेयी सा एव कारारीत्येवमाद्या‡ । तस्माद् विशिष्टायाः परिग्रहः क्रियते कारीरीति । ϕकारीरी[3] एव वक्ष्यते[4] नान्या वर्षकामेष्टिरिति । खर्जूरजातिरेव[5] करीराणि भवन्ति । करीरपिण्डचो यस्या-मिज्यन्ते सा कारीरीति[6] भवति ॥ १ ॥

[तत्र धाय्यानिरूपणम्]

तस्यां प्रति त्यं चारुमध्वरमीळे अग्निं स्ववसं नमोभिरिति धाय्ये ॥ २ ॥

तस्यां कारीर्याम् प्रति त्यम् (ऋ १, १९, १), ईळे अग्निम् (ऋ ५, ६०, १) इति धाय्ये । तस्यां किमिति पुनरुच्यते । नियमार्थम् । कारीर्यामेव धाय्ये भवतो नाऽन्यस्यामिति । उत्तरसूत्रविवक्षार्थोऽयं नियमः । तस्याम् इत्यनुच्यमाने उत्तरसूत्राऽर्थे धाय्ये भवतः ॥ २ ॥

[तत्र सूत्रद्वयेन याज्यानुवाक्याविधानम्]

याः काश्च वर्षकामेष्टयोऽप्सुमन्तौ[7] ॥ ३ ॥

अप्स्वग्ने सधिष्टवाऽप्सु मे सोमो अब्रवीदिति ॥ ४ ॥

१-१. नास्ति ब^{1}; त्रुटितम् पू । २. कारीरी कारीरी ब^{1}; कारीरी कारी° ब^{2} पू वि । ३-३. नास्ति ब^{1} । †. आ मै ; नास्ति ब$^{1-4}$ वि पू । ‡. °माद्याः ब$^{2-4}$ वि पू । ϕ. नास्ति ब^{3,4} । ४. वक्ष्यति ब$^{1-4}$ वि पू । ५. खर्जुर° ब^{1} । ६. कारीरी ब^{3,4} । ७. °मन्तावाज्यभागौ इति ऋ ८, ४३-अवतरणे सायणः ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

याः काश्च वर्षकामेष्टयो भवन्ति, तासु[1] अप्सुमन्तौ [2]आज्यभागौ गायत्रौ भवतः[2]। अप्स्वग्ने (ऋ ८, ४३, ९), अप्सु मे (ऋ १, २३, २०) इति एतयोरनुवाक्ये[1] सर्वमुक्तं प्राप्तं सर्वासु प्राप्त्यर्थमिदमारभ्यते ।। ३-४ ।।

[तत्र देवतानिर्देशः पिण्डीसंज्ञकानामिष्टीनामुपक्रमश्च]

अग्निर्धामच्छन्मरुतः सूर्यः ।। ५ ।।

तिस्रश्च पिण्ड्य उत्तराः ।। ६ ।।

एताभ्यो देवताभ्य उत्तरा अनन्तरा भवन्ति, इत्येतास्तिस्रो देवतास्तिस्रश्च पिण्ड्यः मारुत्यः। उत्तरास्तिस्र इति [3]याज्यानुवाक्याविवक्षार्थम्। एकैकस्या द्वे द्वे याज्यानुवाक्ये भवतः†। च-शब्दः समुच्चयार्थः। देवताः पिण्ड्यश्च भवन्ति†। तस्माद् वक्ष्यमाणा[3] याज्यानुवाक्याः सर्वासां भवन्ति। उत्तरा इत्यनुक्रमार्थम्। यदि[4] वषट्कारप्रदाना[5] भवन्ति, तस्मिन् पक्षे इदमुच्यते। तथा सत्यावाहनादिनिगमेषु[6] निगमनं कर्तव्यं सकृदेव भवति। समाना हि देवताः ।। ५-६ ।।

इदानीं याज्यानुवाक्या वक्ष्यन्ते—

[याज्यानुवाक्याविधानम्]

हिरण्यकेशो रजसो विसारे इति द्वे त्वं त्या चिदच्युता धामन्ते विश्वं भुवनमधिश्रितमिति वा वाश्रेव विद्युन्मिमाति पर्वतश्चिन्महि वृद्धो बिभाय सृजन्ति रश्मिमोजसा, वहिष्ठेभिर्विहरन् यासि तन्तुमुदीरयथा मरुतः समुद्रतः प्र वो मरुतस्तविषा उदन्यव (ऋ ५, ५४, २), आ यं नरः सुदानवो ददाशुषे (ऋ ५, ५३, ६), विद्युन्महसो नरो अश्मदिद्यवः (ऋ ५, ५४, ३), कृष्णं नियानं हरयः सुपर्णा (ऋ १, १६४, ४७), नियुत्वन्तो ग्रामजितो यथा नरः (ऋ ५, ५४, ८) ।। ७ ।।

हिरण्यकेशः (ऋ १, ७९, १; २) इति द्वे अग्नेर्धामच्छदः। त्वं त्या चित् (ऋ ६, २, ९), धामन् ते (ऋ ४, ५८, ११) इति वा भवतः। वाश्रेव (ऋ १, ३८, ८), पर्वतश्चित् (ऋ ५, ६०, ३) इति मरुताम्। सृजन्ति

---

१. नास्ति मूको। २-२. नास्ति मूको। ३-३. नास्ति ब[3,4]।
†. तु. आश्रौ २, १, ७। ४. नास्ति ब[3,4]। ५. °राप्र° ब[1] पू;
°रप्रधाना मै। ६. सत्याहवनादिनि° ब[3,4]; °नादिषु नि° पू।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

(ऋ ८, ७, ८), वहिष्ठेभिः (ऋ ४, १३, ४) इति सूर्यस्य।

उदीरयथा मरुतः समुद्रतः (ऋ ५, ५५, ५) इति यथासमाम्नाताः षट् पिण्डीनाम्। एकैकस्यां द्वे द्वे ॥ ७ ॥

[संयाज्याविधानम्]

अग्ने बाधस्व वि मृधो वि दुर्गहा यं त्वा देवापिः शुशुचानो अग्न इति संयाज्ये ऋचोऽनच्य यजुर्भिरेके यजन्ति ॥ ८ ॥

अग्ने बाधस्व (ऋ १०, ९८, १२), यं त्वा देवापिः (ऋ १०, ९८, ८) इत्येते संयाज्ये। ऋचोऽनूच्य यजुर्भिरेके[1] यजन्ति[2]। ऋचः आम्नाताः। ता अनुवाक्या उक्त्वा[3] यजुर्भिरध्वर्युविषये आम्नातैर्यजन्ति[4]। तान्यनाम्नातान्यपि शाखान्तराद् वेदितव्यानि। पिण्डीनामेवैतद् वदन्ति। तासां दर्विहोमपक्षे[5] दिवा चित्तमः (तैसं २, ४, ८, १-२) इत्येताभिः[6] ह्वयन्ते[7]। यजुर्भिरेके[8] ह्वयन्ते[7], तैरेव यजन्ते। शेषं पौर्णमासेन ॥ ८ ॥

[चतसृणां दिशामुपस्थानम्]

संस्थितायां सर्वा दिश उपतिष्ठेताऽच्छा वद तवसं गीर्भिराभिरिति चतसृभिः प्रत्यृचं सूक्तेन सूक्तेन वा ॥ ९ ॥

संस्थितायामिष्टयां सर्वा दिशः चतस्रो दिशः। ता उपतिष्ठेत। [9]एकैकयर्चा एकैकां दिशमुपतिष्ठेत वक्ष्यमाणाभिर्ऋग्भिः। संस्थिते संस्थाजपो† भवति। तस्य पूर्वोक्तत्वात्‡। तस्मादनन्तरमिदंϕ प्राप्तं प्रागेव भवति[9] [10]उपस्थाय तीर्थेन निष्क्रम्य (आश्रौ १, ११, १४) इति[10] [11]संस्थाजपस्य निष्क्रमेण संबन्धवचनात्। सर्वग्रहणाद् अवान्तरदिशो हि प्राप्नुवन्ति। अन्यथा चतस्र एव स्युः। अच्छा वद (ऋ ५, ८३, १-४) इति चतसृभिः प्रत्यृचम्[11]।

---

१. नास्ति ब[1,2] मै वि पू; °भिरित्येके ब[3,4]। २. नास्ति ब[1,2] मै पू। ३. उक्ताः ब[1,2,4] मै वि पू। ४. आम्नाते तैर्य° मै। ५. सर्वहो° ब[1]; °मः पक्षे ब[2] वि; °हो... पू; देवीहोमः पक्षे मै। ६. तु. आपश्रौ १९, २६, १७; १८। ७. हूयन्ते मूको। ८. °भिरेषां मूको। ९-९. नास्ति ब[1]। †. संस्थाया जपो ब[3] वि। ‡. तु. आश्रौ १, ११, १५। ϕ. °न्तरं ब[2]। १०-१०. नास्ति ब[4]। ११-११. नास्ति ब[3,4] वि।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

'ऋचम् ऋचं प्रति प्रत्यृचम्'[1]। चतसृणां[2] [3]दिशामेकैकयर्चा एकैकां दिशमुपतिष्ठेत[3]। [4]पादग्रहणादेका प्राप्ता, तस्माच्चतसृभिरित्युच्यते[4]। [5]प्रत्यृचग्रहणात्[†] प्रत्यृचं दिश उपस्थानम्। एकैकयर्चा एकैकां दिशम् उपतिष्ठेत[5]। प्रत्यृचग्रहणे[6] अक्रियमाणे प्राङ्मुख एव सर्वाभिर्ऋग्भिः सर्वा दिश उपतिष्ठेत। सूक्तेन। प्रत्यृचमिति वर्तते। प्रत्यृचं सूक्तेन दशर्चेन[7] दश[8] दिश[9] उपतिष्ठेत। [10]आर्चः कल्पः[10]। सर्वा दिश इति सर्वग्रहणाद् दश दिशो भवन्ति। दिशं दिशं प्रत्युपतिष्ठेत। सूक्तेन वा। प्रत्यृचाधिकारव्यावृत्त्यर्थोऽयमारम्भः। सूक्तेनैव समस्तेन प्राङ्मुखः सर्वा दिश उपतिष्ठेत[11]। प्रत्यृचमित्ययं वा कल्पो भवति ॥ ९ ॥

॥ इति त्रयोदशः खण्डः ॥

१-१. नास्ति ब[४]। २. चतुर्थी चतुर्था चतुर्णा ब[१]; चतुर्थी चतुर्णा ब[२] मै पू; चतुर्णा वि; नास्ति ब[३,४]। ३-३. नास्ति ब[४]; दिश इति उपस्थानम् एकैकं यथर्चो एकैकां दिशमु° ब[१]; दिशमेकैकां दिशमु° वि। ४-४. नास्ति ब[३,४]। ५-५. नास्ति ब[३,४] वि। †. नास्ति ब[१]। ६. पादग्रहणे ब[१]; इष्टचयनानां न भवति प्रत्यृच° ब[४]। ७. दशार्धेन ब[३,४]। ८. नास्ति ब[३,४]। ९. नास्ति वि। १०-१०. अर्या कल्पः ब[१]; अर्च्चा कल्पः ब[२] मै पू; अर्चाः कल्पः ब[३]; उपर्चाः कलपाः ब[४]; आर्चाः कल्पः वि। ११. °ष्ठते ब[२-४] मै वि पू।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ द्वितीयेऽध्याये चतुर्दशः खण्डः

[सांवत्सरिकेष्टचयनोपक्रमः]

अत ऊर्ध्वमिष्टचयनानि ॥ १ ॥

सांवत्सरिकाणि ॥ २ ॥

अतः काम्याभ्य ऊर्ध्वम् उपरिष्टाद् इष्टचयनानि। इष्टिनिर्गमनम् इष्टचयनम् येषु। तानि च[1] सांवत्सरिकाणि संवत्सरं क्रियन्ते। सांवत्सरिकाणि तुरायणादीनि चातुर्मास्यपर्यन्तानि। तानि च वक्ष्यन्ते। अधिकारसूत्रमेतत्। अत ऊर्ध्वमिति वचनात् काम्याधिकारो निवृत्तः। तस्मात् काम्यानां स्थाने काम्याश्चरव इति इष्टचयनानां न[2] भवन्ति। इष्टचयनानीति संज्ञासंज्ञा-व्यवहाराभावाद्[3] ज्ञाने[4] धर्मो भवति। सांवत्सरिकाणीति कालनियमः ॥ १-२ ॥

अपरिमिते प्राप्ते आह[5]—

[इष्टचयनाऽऽरम्भकालकथनम्]

तेषां फाल्गुन्यां पौर्णमास्यां चैत्र्यां वा प्रयोगः ॥ ३ ॥

तेषाम् इष्टचयनानां फाल्गुन्यां पौर्णमास्यां चैत्र्यां वा पौर्णमास्यां प्रयोगः प्रारम्भः। तत्र आरभ्य संवत्सरं क्रियन्ते। तेषामित्यनुच्यमाने अनन्तरस्य तुरायणस्यैवायं कालः स्यात् ॥ ३ ॥

[तुरायणनामेष्टयुपक्रमः]

तुरायणम् ॥ ४ ॥

तुरायणं नाम इष्टचयनम्। तद् वक्ष्यते ॥ ४ ॥

[देवतानिर्देशोऽनुसवनं तिस्र इष्टय इति विधानम्]

अग्निरिन्द्रो विश्वे देवा इति पृथगिष्टयोऽनुसवनमहरहः ॥ ५ ॥

---

१. नास्ति ब[3,4]। २. नास्ति मै। ३. संज्ञासंव्य° वि; नास्ति ब[1,2] मै पू।
४. संज्ञाने ब[1,2] मै पू। ५. नास्ति मूको।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अग्निरिन्द्रो विश्वेदेवा इति देवताः। एकैकस्या देवतायास्तत्र इष्टयोऽनुसवनम्[1], पूर्वाह्णे आग्नेयी, मध्यन्दिने ऐन्द्री, अपराह्णे वैश्वदेवी[2] अहरहः एता अहन्यहनि संवत्सरं प्रयोक्तव्याः। पृथग्ग्रहणे अक्रियमाणे च[3] [4]सर्वा इष्टयस्त्रिहविष्का एव स्युः[4]। पुनरिष्टिग्रहणे अक्रियमाणे[5] एकैव त्रिहविष्का इष्टिः[6] पृथगेकैकेन हविषा अनुसवनम् इज्या स्यात्। अहरहरित्यनुच्यमाने तैरमावास्यायां पौर्णमास्यां वा यजेत (आश्रौ २, १, २) इति वचनात् पर्वण्योः[7] संवत्सरम् इज्या स्यात् ॥ ५ ॥

[पूर्वाह्ण एव त्रिहविष्केष्टिरिति विकल्पविधानम्]

एका वा त्रिहविः ॥ ६ ॥

एका वा इष्टिस्त्रिहविष्का भवति अहरहः। ता एव देवताः। अयं वा-कल्पः[8] पूर्वाह्ण एव[9] भवति मुख्यत्वात्। अनुसवनमित्यधिकाराद्[10] अनुसवनं वा हवींषि इज्यन्ते ॥ ६ ॥

[दाक्षायणयज्ञनामेष्टचयनविधानम्]

दाक्षायणयज्ञे द्वे पौर्णमास्यौ द्वे अमावास्ये यजेत ॥ ७ ॥

[11]दाक्षायणयज्ञो नामेष्टचयनम्। तस्मिन् दाक्षायणयज्ञे[11] द्वे पौर्णमास्यौ[12] यजेत पौर्णमास्यां[13] प्रतिपदि च यजेत। [14]द्वे अमावास्ये यजेत[14] अमावास्यायां प्रतिपदि च यजेत ॥ ७ ॥

तयोर्विधानं वक्ष्यते—

[पौर्णमास्यां प्रकृतिवदमावास्यायाञ्चासंनयतो यजमानस्येव विधिः]

नित्ये पूर्वे यथाऽसंनयतोऽमावास्यायाम् ॥ ८ ॥

तयोः पूर्वे नित्ये भवतः। प्रकृतिवदेव[15] पौर्णमास्यां[16] क्रियते। यथा०[17] अमावास्यायाम्। यथा असन्नयतो यजमानस्य अमावास्यायां[18] भवति अग्निश्च इन्द्राग्नी च। इन्द्रो वा महेन्द्रो वा न[19] भवतीत्यर्थः[20] ॥ ८ ॥

---

१. °सवनम् सवनं सवनम् अनुसवनम् वि। २. वैश्वदेवी ब$^{1-4}$ पू; विश्वेदेवी मै वि; त्रुटितम् पू। ३. नास्ति ब^{1,4} वि। ४-४. नास्ति ब^{3,4}। ५. नास्ति ब^{2}; त्रुटितम् पू। ६. नास्ति ब^{2}। ७. पर्वण्या ब^{1,2} मै; त्रुटितम् पू। ८. कल्पः ब^{4}। ९. नास्ति ब^{1} पू। १०. नास्ति ब^{1}। ११-११. नास्ति ब^{3,4}। १२. पौर्णमास्ये ब^{1,2} मै पू; पूर्ण° वि। १३. पूर्ण° वि; °मास्यां च ब^{1,2} मै; पौर्ण... पू। १४-१४. नास्ति ब^{1}। १५. प्रकृतिरेव ब$^{2-4}$ मै। १६. पूर्ण° वि; पौ... पू। १७. यच्च सूको। १८. °यां यथा मूको। १९. नास्ति ब^{1} वि पू। २०. तु. आश्रौ १, ३, १०; ११।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[उत्तरायां पौर्णमास्यामैन्द्रं द्वितीयं हविरुत्तरायाममावास्यायां च मैत्रावरुणमिति विधानम्]

उत्तरयोरैन्द्रं पौर्णमास्यां द्वितीयम् ॥ ९ ॥

मैत्रावरुणममावास्यायाम् ॥ १० ॥

पौर्णमास्यां[1] प्रतिपदि, [2]अमावास्यायां च प्रतिपदि[2] तयोर्विधिरुच्यते। ऐन्द्रं सान्नाय्यं पौर्णमास्यां प्रतिपदि द्वितीयं भवति। आग्नेयं नित्यम्। सत्यपि सान्नाय्ये वार्त्रघ्नावेवाज्यभागौ भवतः प्रकृत्या। द्वितीयग्रहणादाग्नेयं नित्यम्। मैत्रावरुणं सान्नाय्यम् अमावास्यायां प्रतिपदि द्वितीयं भवति। आग्नेयं नित्यम् ॥ ९-१० ॥

[मित्रावरुणयोर्याज्यानुवाक्याविधानं प्राजापत्यमिडादधो नामेष्टचयनम्]

आ नो मित्रावरुणा यद् बंहिष्ठं नातिविधे सुदानू इति प्राजापत्य इळादधः ॥ ११ ॥

आ नो मित्रावरुणा (ऋ ३, ६२, १६), यद् बंहिष्ठम् (ऋ ५, ६२, ९) इति याज्यानुवाक्ये मित्रावरुणयोः। एवमेतत् संचरत्[3] संवत्सरं[4] भवति। पञ्चदश संवत्सराणि (तु. आपश्रौ ३, १७, १०) इत्यन्येषाम्। प्राजापत्य इळादधः[5]। प्रजापतिर्देवता यस्य सोऽयं प्राजापत्यः। [6]इळादधो नाम यज्ञक्रतुस्तं दध्ना चरन्ति (ऐब्रा ३, ४०) इति श्रुतिः। स पौर्णमास्याममावास्यायां च भवत्यधिकारात्। अध्वर्यूणामप्युक्तम्[6]— [7]एतेनैळादधः (आपश्रौ ३, १७, १२) इति[7] ॥ ११ ॥

तस्य याज्यानुवाक्ये—

[याज्यानुवाक्याविधानम्]

प्रजापते न त्वदेतान्यन्यस्तवेमे लोकाः प्रदिशो दिशश्च परावतो निवत उद्वतश्च। प्रजापते विश्वसृज्जीव धन्य इदं नो देव प्रतिहर्य हव्यमिति ॥ १२ ॥

प्रजापते न त्वदेतान्यन्यः (ऋ १०, १२१, १०), तवेमे (तु. मै ४, १४, १; तैब्रा २, ८, १, ४) इति प्रजापतेः ॥ १२ ॥

---

१. पूर्ण° वि; ...मास्यां पू। २-२. नास्ति मै। ३. संवत्सरं ब[3]; नास्ति ब[1,2,4] वि पू। ४. संचरं मै वि। ५. नास्ति ब[1,3] मै पू। ६-६. नास्ति ब[4]। ७-७. एतेनेडादधीति (°ध इति ब[1]) मूको।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[द्यावापृथिव्योरयनं नामेष्टचयनं तद्विधानं च]

द्यावापृथिव्योरयनम् । पौर्णमासेनाऽऽमावास्यादामावास्येनाऽऽपौर्णमासात् ॥ १३ ॥

[१]पौर्णमासेन[†] कर्मणा पूर्वपक्षम् अहरहर्यजेद्[१] आऽऽमावस्यात्[२] । उत्तरं[३] पक्षम् आमावास्येन कर्मणा अहरहर्यजेद्[४] आ पौर्णमासात्[५] । अतोऽङ्गपक्षे[६] अहरहः पिण्डपितृयज्ञः कर्तव्यः । अनङ्गपक्षे न कर्तव्यः ॥ १३ ॥

[अत्रासमाम्नातास्विष्टिषु पौर्णमासात् तन्त्रान्यत्वविधानम्]

असमाम्नातास्वर्थात्तन्त्रविकारः ॥ १४ ॥

लाघवार्थः सूत्रारम्भः । यदि सर्वा इष्टयः प्रत्यक्षं कल्प्यन्ते[७], महान् ग्रन्थः स्यात् । तस्मात् सामान्यलक्षणं वक्ष्यते । अधिकारसूत्रमेतत् । यदित ऊर्ध्वमनुक्रमिष्यामः, तदसमाम्नातासु अविहितासु सामान्यलक्षणं भवति । असमाम्नातास्विति वचनात् समाम्नाता अधिक्रियन्ते । तस्मात् समाम्नातासु ये तन्त्रविकाराः आम्नातास्त एवाऽसमाम्नातासु विधीयन्ते । अन्यथा पौर्णमासेन प्राप्तम्[८] । यथा एकाहाहीनसत्राणां समाम्नातानि[९] सिद्धानि यान्यहानि पञ्चविंशतिः[१०] तेषामेव विधिरसमाम्नातेषु[११] स्तोमपृष्ठसामान्यात्[१२] संस्थासामान्याच्च[१३] । अह्नामेव स्थानं[१४] वक्ष्यति[१५] । तासामेवैतत्[१६] । असमाम्नातास्विष्टिषु समाम्नातासु ये तन्त्रविकारास्त एव किंचित्सामान्यात् प्रयोक्तव्याः । तथा वक्ष्यते[१७]— अर्थात् तन्त्रविकारः । असमाम्नातास्विष्टिषु अर्थात् तन्त्रविकारः[१८] । [१९]अर्थसामान्याद् अर्थसादृश्यात्[१९]

१-१. नास्ति ब[१,२] मै पू । †. पूर्ण° ब[३,४] वि । २. आमावास्यायां न तत ब[१] ; आ (अ मै पू) मावास्यां तत (न तत मै पू) ; न त वि । ३. अमावास्येन उत्तरं ब[१,४] । ४. °जेत ब[१] पू । ५. पूर्ण° ब[१,४] वि । ६. अत अङ्ग° ब[१-४] वि पू । ७. कल्पन्ते ब[२-४] पू ; कल्पोते वि । ८. नास्ति ब[१,४] । ९. अस° ब[३,४] मै वि पू ; अथ स° ब[२] । १०. तु. आश्रौ ८, १३, ३१ ; पञ्चविंशतिः पञ्चविंशतिः वि । ११. नास्ति मूको । १२. स्तोमपृष्ठं सामान्याः ब[१,२] मै पू ; स्तोम इष्टि (एष्ट वि) सामान्यान्यात् (°न्या ब[३]) ब[३,४] वि । १३. संस्थाः सामान्याश्च मै । १४, स्थाने वि । १५. तु. आश्रौ ७, १, ३ ; ९, १, १; २ । १६. तासामेव तत् मै । १७. वक्ष्यामः ब[१-४] मै पू । १८. तन्त्राधिकारः मै । १९-१९. °मान्यात् सादृश्यात् ब[१,२] मै ; ···श्यात् पू ; अर्थसादृश्यात् वि ; °मान्यात् अर्थे सादृ° ब[३,४] ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तन्त्रविकारो ज्ञेयः। काम्यानां कर्मणां कामोऽर्थः[१]। तदर्थं[२] हि[३] प्रवृत्तिः[४] तेषाम्। नैमित्तिकानां [५]निमित्तमर्थः। कामसामान्यान्निमित्तसामान्याद्[५] वा तन्त्रविकारः प्रयोक्तव्यः। तन्त्रस्य विकारस्तन्त्रविकारः। धाय्ये आज्यभागौ संयाज्ये[६] इत्येतावदेव तन्त्रं पौर्णमासेन प्राप्तम्। विकार एव सामान्यतो[७] ज्ञेयः। कथम् असमाम्नाता[८] इष्टिः यदि आयुष्कामेष्टिर्भवति[९], [१०]कामसामान्यादायुष्कामेष्ट्यां य उक्तस्तन्त्रविकारः, स एव प्रयोक्तव्यः[१०]। [११]आज्यभागौ संयाज्ये च। असमाम्नाता पुत्रकामेष्टिर्यदि भवति[११] [१२]कामसामान्यात् पुत्रकामेष्ट्यां† ‡य उक्तस्तन्त्रविकारः‡, स एव⌀ प्रयोक्तव्यः¶[१२], [१३]आज्यभागौ संयाज्ये च[१३]। असमाम्नाता इष्टिर्यदि वर्षकामेष्टिर्भवति [१४]कामसामान्यात् कारीर्यां य उक्तस्तन्त्रविकारः स एव प्रयोक्तव्यः[१४]। [१५]एवमेतेन न्यायेन यत्र यथा युज्यते[१५], [१६]यथा तन्त्रविकारः स एव प्रयोक्तव्यः। यत्र त्वर्थसामान्यं µन लक्ष्यतेµ तत्र* पौर्णमासमेव तन्त्रम्∧। यत्र त्वनेकार्थानि कर्माणि भवन्ति[१६] अग्न्याधेयवत्[१७] साकमेधवद्[१८] वा तत्र आद्यायाम्[१९] इष्टौ पौर्णमासं तन्त्रम्। उत्तरस्यां वृधन्वन्तौ आज्यभागौ भवतः, तथा[२०] दृष्टत्वाद् अग्न्याधेये साकमेधे च ॥ १४ ॥

[अत्रासमाम्नातास्विष्टिषु अध्वर्युवेदवत् प्रयोगो विधेय इति विधानम्]

अध्वर्युर्वा यथा स्मरेत् ॥ १५ ॥

यथा वाऽध्वर्युः स्वशास्त्रे तन्त्रविकारमाम्नातं स्मरति, तथा[२१] वा प्रयोक्तव्यः, यथा पवित्रेष्टिर्जातेष्टिश्चैवमादिषु, तेषां [२२]च ये[२२] आम्नाते धाय्ये,

---

१. कामार्थे ब¹ ; कामार्था ब² मै वि पू ; कामार्थं ब³'⁴। २. एतदर्थं ब² मै पू। ३. नास्ति ब¹ मै पू ; तु ब²। ४. वृत्तिः ब² मै। ५-५. °त्तमर्थनामसा° ब¹'² मै पू ; °त्तमित्यर्थः ब³'⁴ वि। ६. प्रयुज्येते ब¹ पू ; संप्रयुज्यन्ते (°ज्यम् ब³) ब² मै। ७. सामान्यो (°न्य मै) ब²⁻⁴ मै वि ; त्रुटितम् पू। ८. समाम्नाता ब²⁻⁴। ९. वर्षका° ब¹'² मै पू। १०-१०. नास्ति ब¹'⁴ वि पू। ११-११. नास्ति ब¹'⁴ मै वि पू। १२-१२. नास्ति मै। †. आयुष्का° ब⁴ वि पू। ‡-‡. यस्तन्त्रविकार ब¹'² ; यदुक्तं तन्त्रविकारः वि ; °कार आम्नातः ब¹⁻³। ⌀. नास्ति ब²'³। ¶. कर्तव्यः ब¹⁻³। १३-१३. नास्ति ब²'³ ; अन्यभागौ संयाज्या च मै ; त्रुटितम् पू। १४-१४. नास्ति ब¹'² मै पू। १५-१५. नास्ति ब¹'²'⁴ मै पू। १६-१६. नास्ति ब¹'² मै पू। µ-µ. तल्लक्ष्यते ब³'⁴ ; त लतै वि। *. यत्र ब⁴। ∧. नास्ति वि। १७. °धेयम् मै। १८. साकमेधेनव° ब¹ ; साकामव° ब²। १९. आज्यायाम् ब² मै। २०. तदा ब³'⁴। २१. यथा ब¹'³'⁴ वि ; त्रुटितम् पू। २२-२२. च ये ये ब¹ वि ; रवये ब² ; चाद्ये ब¹'⁴ मै।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आज्यभागौ[1], संयाज्ये च। याज्यानुवाक्या अपि ता एव वक्तव्याः[2]। यथा जातेष्टचां तल्लिङ्गत्वात्॥ १५॥

[अग्निमन्थनसंयुक्तायामिष्टौ वैराजतन्त्रस्य कर्तव्यत्वम्]

वैराजं त्वग्निमन्थने ॥ १६ ॥

अग्निमन्थने[3] विद्यमाने तस्यामिष्टौ वैराजं[4] तन्त्रं कर्तव्यम्। धाय्ये विराजौ[5], विराजौ[6] संयाज्ये च, यथा[7] चातुर्मास्येषु[8]। तु-शब्दः [9]समुच्चयार्थः। अर्थादमावास्यायां[9] पौर्णमास्यां[10] वा भवति, [11]वैराजं च भवति[11]॥ १६॥

[अग्निमन्थनसंयुक्तायामिष्टौ केवलं धाय्ये कर्तव्ये इति मतान्तरकथनम्]

धाय्ये त्वेवैके ॥ १७ ॥

अग्निमन्थने विद्यमाने धाय्ये त्वेव कर्तव्ये न विराजौ संयाज्ये इत्येवमेके आचार्या मन्यन्ते, यथा [12]पशौ आतिथ्यायां[12] च। तु-शब्दः संयाज्यानिवृत्त्यर्थः[13]॥ १७॥

[असमाम्नातास्विष्टिषु देवतालक्षणा याज्यानुवाक्याः प्रयोक्तव्याः]

देवतलक्षणा[14] याज्यानुवाक्याः ॥ १८ ॥

देवतानाम् अग्निः सोम इति देवता लक्षणमित्युच्यते[15] [16]तल्लक्षणं† ‡यासु याज्यासु अनुवाक्यासु‡ विद्यते ϕतास्तल्लक्षणा[16] याज्यानुवाक्याः [17]असमाम्नातासु ग्राह्याः[17]। अग्निर्वृत्राणि (ऋ ६, १६, ३४), त्वं सोमासि (ऋ १, ९१, ५)

---

१. °गौ च ब^{2} मे पू। २. कर्तव्याः ब$^{2-4}$ मे पू। ३. नास्ति ब^{1,2} मे पू। ४. तु. आश्रौ २, १, ३३ ; ३४। ५. वैराज्ये ब$^{1-4}$ वि पू; विराज्ये मे। ६. वैराज्यं वि। ७. तथा ब^{3,4}। ८. तु. आश्रौ २, १६, ९ ; १८, ५। ९-९. °याथदिामावा° ब^{2} ; °दामावास्ये (°स्य वि) ब^{3,4} वि ; °वास्यां ब^{1} मे ; त्रुटितम् पू। १०. °मासे ब^{3,4} वि ; °मासं ब^{2} ; ...मासं पू। ११-११. नास्ति ब^{3,4} वि। १२-१२. त्रुटितम् पू ; तु. आश्रौ ३, १, १२ ; ४, ५, ३। १३. °ज्याविनिवृ° ब^{1,2} मे पू। १४. देवताल° ब^{3}। १५. नास्ति ब^{1} ; लक्षणमि वि। १६-१६. नास्ति ब^{1} वि। †. तत लक्षणां ब^{2} ; तत्र तल्लक्षणं ब^{3,4} ; तत्तल्लक्षणं पू ; ततो लक्षणं मे। ‡-‡. यास्तु याज्यानुवाक्यास्तत्र न विद्यते ब^{3,4} ; या......सु पू। ϕ. तावल्लक्षणा ब^{2} मे पू ; तावदेतल्लक्षणा ब^{1,4}। १७-१७. °म्नाताः सुग्राह्याः ब^{1,2} वि ; °म्नातास्ते ग्राह्याः ब^{3,4}।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

इति[1] अविशेषवचनात्। अन्यदेवत्यास्वपि[2] यदि 'निपातभूतं लक्षणमस्ति' तदा[3] ता[4] भवन्त्येव। यथा यो नः पिता जनिता (ऋ १०, ८२, ३) इति वैश्वकर्मणे[5] याज्या भवति[6]। एवमाचार्येणाऽपि कल्पितम्[7]। नाम्ना [8]तद्धितनाम्ना गृहीतं वा[8] [9]ऐन्द्र्यादि तस्य[9] क्लृप्तदेवतात्वेन[10] वचनात् तद्देवत्या[11]। एवमपि लक्षणं यदि न [12]विद्यते सा न[12] क्रियते। यथा गर्भे मातुः पितुष्पिता (ऋ ६, १६, ३५) इत्याग्नेयी लक्षणाभावान्न[13] प्रयुज्यते। [14]एवमविशेषे प्राप्ते[14] विशेषं[15] च[16] वक्ष्यति[17], पुरस्ताल्लक्षणोपरिष्टाल्लक्षणेति[18] व्यक्तमव्यक्तमिति[19]॥ १८॥

[पुरस्ताल्लक्षणानुवाक्याविधानम्]

गायत्र्यावती हूतवत्युपोत्तवती पुरस्ताल्लक्षणानुवाक्या ॥ १९ ॥

गायत्र्यावती[20]। [21]छन्दो गायत्री भवति। आ इति यस्यामृचि पदं विद्यते सा आवती भवति। यथा—एन्द्र सानसिं रयिम् (ऋ १, ८, १) इति। †हूतवती[21]। हूतशब्दो[22] यस्यां भवति सा हूतवती भवति। अग्ने देवाँ इहा वह (ऋ १, १२, १०)। उपोत्तवती। उप उत् त इत्येतानि पदानि यस्यां विद्यन्ते सा उपोत्तवती। यथा—उप त्वाऽग्ने दिवे दिवे (ऋ १,१,७), उदग्ने शुचयस्तव (ऋ ८, ४४, १७), आ प्यायस्व समेतु ते (ऋ १, ९१, १६)। पुरस्ताल्लक्षणानुवाक्या[23]।

---

१. नास्ति मूको। २. °वतास्वपि ब[1] मै। ३-३. निपातलक्षणमिति मै; °त उक्तं ल° ब[3,4]; ...क्षण° पू। ४. वा ब[3,4]। ५. विश्वकर्मणि ब[2] मै; °कर्माणि ब[3,4] वि पू; °कर्मणि ब[1]। ६. भवन्ति मूको। ७. विकल्पितम् ब[3,4]। ८-८. तुरं तं नामा (°म्ना ब[3,4]; म मै) गृहीत त (गहीति ब[2]; महीति ब[3,4]; गाहीति मै; महीत त वि; त्रुटितम् पू) मूको। ९-९. ए आदित्यस्य ब[1]; ऐ आदित्यस्य वि; त्रुटितम् पू। १०. क्लृप्ते देव° मूको। ११. तद्दैवत्या मै। १२-१२. नास्ति ब[1-3] मै पू। १३. °भावात् ब[1] वि; °भावान् ब[2] पू। १४-१४. एवमेव शेषे ब[1]; एवमविशेषप्राप्ते ब[3,4]; ...मविशेषं पू। १५. नास्ति पू; अतिशेष ब[3,4]। १६. नास्ति ब[1,3,4] वि पू। १७. वक्ष्यते (°न्ते पू) ब[1-4] वि पू। १८. विशेषाल्लक्षणोप° ब[2]; °परिष्टाल्लक्षणत्वेति (°त्वेऽपि वि) ब[1,4] वि; तु. आश्रौ २, १४, १९; २०। १९. तु. आश्रौ २, १४, २४; २५। २०. गायत्र्या वहुतवती ब[3,4]; हूतिवती वि। २१-२१. नास्ति ब[3,4] वि। †. भूतवती ब[1,2] मै पू। २२. आहुति (ज्याहूती मै) शब्दो मूको। २३. पुरस्ताल्लक्षणा ब[1,2] मै पू।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[1]पूर्वं देवतालक्षणं यस्यां[1] भवति सा पुरस्ताल्लक्षणा । एवं गुणसम्पन्ना अनुवाक्या[2] भवति[3] । उक्तानि रूपाणि[4] ॥ १९ ॥

[उपरिष्टाल्लक्षणानुवाक्याविधानम्]

त्रिष्टुप्प्रवती[5] वीतवती जुष्टवत्युपरिष्टाल्लक्षणा याज्या । अपि वाऽन्यस्य च्छन्दसः ॥ २० ॥

[6]त्रिष्टुब् या[6] भवति । प्रवती । प्रेति पदं यस्यां विद्यते सा प्रवती भवति[7] । गीर्भिर्विप्रः (ऋ ७, ९३, ४) इति[7] । वीतवती[8] । वेतु[9] वीतां व्यन्तु यस्यां विद्यते[10] सा वीतवती भवति । उत ग्ना व्यन्तु देवपत्नीः (ऋ ५, ४६, ८) । तप्तो वां घर्मः (अथर्व ७, ७३, ५ ; आश्रौ ४, ७, ४) इति[7] । जुष्टवती । जुष्टशब्दो यस्यां विद्यते सा जुष्टवती । जुषस्व नः समिधमग्ने अद्य (ऋ ७, २, १), जुषेथां यज्ञं बोधतं हवस्य मे (ऋ २, ३६, ६ ; ८, ३५, ४) इति[7] । उपरिष्टाल्लक्षणा याज्या[11] [12]उपरि अन्ते[12] देवतालक्षणं[13] यदि भवति [14]सा एवंलक्षणा[14] याज्या ग्राह्या[15] । उक्तान्युदाहरणानि । अपि वाऽन्यस्य छन्दसः । गायत्री अनुवाक्या त्रिष्टुब् याज्या[16] इत्युक्तम् । अन्यस्यापि वा छन्दसो[17] यद्येतानि[18] लक्षणानि भवन्ति साऽनुवाक्या याज्या वा[19] भवति । सर्वच्छन्दसां परिग्रहः कृतो भवति । उष्णिग् अनुष्टुब् बृहती पङ्क्तिः[20] जगती विराड्[21] वा । पुरु त्वा दाश्वान् (ऋ १, १५०, १), श्रुष्टीवानो हि दाशुषे (ऋ १, ४५, २), एना वो अग्निम् (ऋ ७, १६, १), अग्निं तं मन्ये (ऋ ५, ६, १), तुभ्येदमग्ने मधुमत्तमम् (ऋ ५, ११, ५) ॥ २० ॥

१-१. पूर्वे देवता यस्यां (यस्या ब[1]) लक्षणं ब[1'2] मै ; पूर्वे दे... पू । २. अनुवृत्त्या मै । ३. भवन्ति ब[3'4] । ४. नास्ति ब[1] । ५. त्रिष्टुब्वती BI आन । ६-६. त्रिष्टुब्वती त्रिष्टुप् या ब[3'4] वि ; त्रिष्टुब्वती मै । ७. नास्ति मूको । ८. °वती भवति (°न्ति ब[3'4]) मूको । ९. वेति ब[2] पू ; चतुर् ब[3'4] ; अनु वि । १०. °न्ते ब[2] पू । ११. नास्ति ब[1'2] मै पू । १२-१२. उपचयं द्वे ब[1] ; उपचर्यं द्वे (द्व मै) ब[2-4] मै पू ; उपचर्यं व द्वे वि । १३. दैवतालक्षणा मै । १४-१४. ए एतल्लक्षणा ब[1] ; स एव लक्षणा ब[2] मै ; स... पू ; सा एवल (एवं ल वि ; °ल्ल ब[4]) क्षणा (°णया वि) ब[3'4] वि । १५. नास्ति वि । १६. नास्ति ब[3'4] वि । १७. छन्दसा ब[1'2] मै पू । १८. याज्या तानि ब[3] ; छन्दसो याज्या तानि ब[4] । १९. नास्ति ब[2] । २०. पङ्क्ती ब[3] । २१. तु. ऋअ १, ९, ५ ; ६ ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust ३८८ यचनानि

[अनुवाक्यापेक्षया याज्याया न ह्लसीयस्त्वम्]

न तु याज्या ह्लसीयसी ॥ २१ ॥

अपि वाऽन्यस्य छन्दसः अनियमे प्राप्ते इदमुच्यते। अत्र याज्या ह्लसीयसी तु न भवति। तु-शब्दो नियमनिवृत्त्यर्थः। त्रिष्टुबनुवाक्या चेज्जगती याज्या[1] कर्तव्या, न गायत्री इत्यर्थः[2] ॥ २१ ॥

[उष्णिग्बृहत्योश्छन्दसोर्न याज्यात्वम्]

नोष्णिङ्न बृहती ॥ २२ ॥

उष्णिग् [3]बृहती च[3] याज्या[4] न भवति। याज्याऽधिकाराद् [5]याज्यैव बृहती[5] न भवति, अनुवाक्या तु भवति। अपि वाऽन्यस्य छन्दसः (आश्रौ २, १४, २०) प्राप्तनिषेधः ॥ २२ ॥

[क्षामनष्टहतदग्धवतीर्ऋचो याज्यायामनुवाक्यायां च न प्रयोजयेत्]

क्षामनष्टहतदग्धवतीस्तु वर्जयेत् ॥ २३ ॥

क्षामनष्टहतदग्धेत्येते शब्दा यासु ऋक्षु विद्यन्ते ता वर्जयेत्। अक्षोदयच्छवसा क्षाम (ऋ ४, १९, ४), विदद् यत् पूर्व्यं नष्टम् (ऋ ८, ७९, ६), हतो वृत्राण्यार्या (ऋ ६, ६०, ६), अया ते अग्ने समिधा विधेम (ऋ ४, ४, १५), [6]त्वेषासो अग्नेः[6] (ऋ १, ३६, २०)। याज्याधिकाराद्[7] याज्यानामेव प्राप्ते[8] बहुवचनादनुवाक्यास्वपि[9] भवति प्रतिषेधः। तु-शब्दः [10]लक्षणसम्पन्नानामपि व्यावृत्त्यर्थः[10] ॥ २३ ॥

[देवताबोधके व्यक्ते शब्दे प्राप्ते लक्षणान्तरं न मृग्यम्]

व्यक्ते तु दैवते तथैव लक्षणम् ॥ २४ ॥

---

१. नास्ति मै। २. न इत्यर्थः ब^{1,2} मै वि पू। ३-३. नास्ति मूको। ४. याज्ये ब^{1,4}। ५-५. याज्याः ब^{1}; आज्या च ब^{2} मै; याज्या च पू; ये च बृहती ब^{3,4}; याज्येव बृहती वि। ६-६. त्वैर्थवणा पाग्नेः ब^{1}; न्वे (त्वे ब^{3,4}) पाणा (°ण मै) आग्नया (आग्ने ब^{1,3,4} वि; अग्ने मै पू) मूको। ७. इज्याधि° ब^{2}। ८. प्राप्तेः ब^{1} वि; प्राप्तं मै पू। ९. °क्या अपि ब^{1,2} मै पू। १०-१०. °नाम (°मा मै) विद्यावित्यर्थः मूको।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

देवतलक्षणा[1] याज्यानुवाक्या[2] (आश्रौ २, १४, १८) इत्यविशेषेणोक्तत्वात् ततो विशेष उच्यते व्यक्ते तु दैवते। व्यक्तं व्यञ्जितं विशिष्टं केनचिद् गुणेन भवति। अग्निः पवमानः, अग्निः शुचिः, अग्निर्गृहपतिरिति। यस्य हविष एवं व्यक्तं दैवतं भवति, तस्मिन् व्यक्ते तु दैवते सति[3] तथैव लक्षणमपि तद्गुणयुक्तं ग्राह्यम्। देवतलक्षणा (आश्रौ २, १४, १८) इति वचनात्। अग्निशब्द[4] एकं[5] [6]शुद्धलक्षणं प्राप्तम्[6]। तस्मादिदमुच्यते[7]। व्यक्तदैवते व्यक्तमेव लक्षणं कथं स्यादिति। तु-शब्दः अविशेषव्यावृत्त्यर्थः[8]। एव-शब्दोऽवधारणार्थः ॥ २४ ॥

[अव्यक्ते देवतापदेऽपि गायत्र्यादिच्छन्दस्रादिलक्षणं मृग्यम्]

अपि वाऽव्यक्ते ॥ २५ ॥

व्यक्ते तु दैवते व्यक्तम् इत्युक्तम्। अव्यक्तेऽपि दैवते व्यक्तलक्षणं वा भवति। [9]अव्यक्तं यस्य[9] हविषः शुद्धो[10] अग्निर्देवता [11]भवति। गुणवर्जितस्य अव्यक्ते एव याज्यानुवाक्ये प्राप्नुतः, व्यक्ते अपि वा† ‡भवत इति‡[11] विकल्पार्थमिदमुच्यते। दर्शितं चाचार्येण[12] शुद्धस्याग्नेर्मूर्धन्वतः[13] इति। तेनैव दर्शनेन सिद्धिः[14] स्यात्। इदं सूत्रद्वयं न वक्तव्यमिति[15] चेत्, [16]न, तद्धि वचनात्[16] तत्रैव[17] भवति, [18]न सर्वत्र[18]। तस्मादुक्तम् एते एव भुवद्वद्भ्यो भुवनपतिभ्यो वा (आश्रौ ४, २, ५) इति। अपि-शब्दः समुच्चयार्थः। वेति विकल्पार्थः[19] ॥ २५ ॥

[स्वशाखाऽनधिगमे शाखान्तरेण यजेत, सर्वथाऽनधिगमे आग्नेयीभ्यामृग्भ्यां यजेतेति विधानम्]

अनधिगच्छन् सर्वशः ॥ २६ ॥

अनधिगम आग्नेयीभ्याम् ॥ २७ ॥

---

१. °लक्षणे ब[3,4] वि। २. °वाक्ये मूको। ३. सति तथैव लक्षणम् ब[3,4] वि। ४. अग्निशब्दः ब[1] मै वि ; अग्निः शब्द ब[2] पू। ५. एवं ब[1,2] मै वि पू ; एव ब[1,4]। ६-६. °णं प्रा ब[1] ; °णंः प्राप्तः ब[1,4] वि। ७. कस्मा° ब[1,2] मै वि पू। ८. अपि व्या° ब[2]। ९-९. °क्तस्य ब[1] ; त्रुटितम् पू। १०. शुद्धम् ब[1,2] मै वि पू। ११-११. भवतीति मै। †. वा न ब[1] पू। ‡-‡. भवतीति ब[1-4] वि ; भवति पू। १२. वाचा° ब[2-4]। १३. तु. आश्रौ २, १०, ९। १४. सिद्धः ब[1-4] वि पू। १५. व्यक्तं ब[3,4]। १६-१६. न द्विवच° ब[1] ; तत्तद्विवच° ब[4] पू ; तद्धिस्तद्विवच° ब[1,4] ; तन्नस्तद्विवत्त्वानात् वि; नास्ति मै। १७. तस्यैव ब[1]। १८-१८. नास्ति ब[1,4] वि ; त्रुटितम् पू। १९. °र्थे ब[1,2] मै पू।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

कृत्स्ने समाम्नाये एवंगुणविशिष्टे वा[1] अपि, एवंगुणसम्पन्नानामनधिगम एव। तथा सति अनधिगमे[2] आग्नेयीभ्यामृग्भ्यां यजेत अनिरुक्ताभ्याम्। तथा[3] वक्ष्यति—आग्नेय्यावनिरुक्ते (आश्रौ २, १४, ३२) इति। असमाम्नातासु (आश्रौ २, १४, १४) इति वचनादन्यसमाम्नाया[4] अधिकृताः[5], अनधिगमो[6] यदि सर्वथा। अग्निः सर्वा देवताः (ऐब्रा २, ३) इति ब्राह्मणम्[7]। अनधिगमग्रहणात् सर्वशाखास्वनधिगमे आग्नेयीभ्यां यजेत। अन्यथा स्वशाखाया[8] अनधिगमेऽयं कल्पः स्यात्। एकदेवत्यस्यैव[9] हविषः[10] आग्नेय्यावनिरुक्ते भवतः एकवदाम्नायात्। द्विदेवत्ये [11]बहुदेवत्ये च[11] हविषि[12] [13]व्याहृतिभिर्यजनं[13] युज्यते[14]। ऊहश्च प्रतिषिद्धः तस्माद् ऋचं नोहेत् (आश्रौ ५, ४, ८) इति। तस्माद् द्विदेवत्ये बहुदेवत्ये च[15] व्याहृतिभिर्यजनं प्राप्तम्। [16]एवं स्थिते तूक्तम्[16]—एकदेवत्ये आग्नेयीभ्याम्, द्विदेवत्ये अग्नीषोमीयाभ्याम्, बहुदेवत्ये वैश्वदेवीभ्यामिति। तेषामनिरुक्ताभिरेव[17] इज्या[18] ॥ २७ ॥

[सर्वथा स्ववेदानधिगमे व्याहृतिभिर्यजेतेति विकल्पः]

व्याहृतिभिर्वा ॥ २८ ॥

व्याहृतयः सर्वप्रायश्चित्तप्रकरणे व्यस्ताः[19] समस्ताश्चाम्नाताः, ताभिः[20]। व्याहृतिभिश्च पृथग् हुत्वा (आश्रौ ८, १४, ४; ५) इति पृथग्ग्रहणाद्[21] होमे[22] व्यस्ताश्च समस्ताश्च भवन्ति। होमादन्यत्र समस्तानामेव प्रयोगः। तस्माद्

---

१. च ब[3,4]। २. °गते ब[1,2] मै पू। ३. यथा वि। ४. °दन्ये समा° ब[1,2] मै। ५. °ता ग्राह्याः ब[3,4] वि। ६. °गमे मूको। ७. नास्ति मै। ८. °शाखेया ब[3,4] वि; °शाखया ब[2] पू। ९. °देवतस्यैव ब[1]; °देवस्येव ब[2]; देवत्ये (त्यै मै) व ब[3,4] मै; °देवतस्यै वि; °देवस्त्यस्यैव पू। १०. हवो वेषः ब[1,4]। ११-११. नास्ति वि। १२. नास्ति ब[1]; त्रुटितम् पू; हविष ब[3,4] वि। १३-१३. नास्ति ब[2-4] मै वि; त्रुटितम् पू। १४. न युज्यते ब[1,4]। १५. वा ब[1,4] वि। १६-१६. वासिन्ये (वा सत्ये ब[2]; असन्ये ब[3]; असन्ने ब[4]; वासन्ये मै पू; असत्यें वि) सूक्तम् मूको। १७. तेषामति (°मिति मै) भक्ताभिरेव ब[1,2] मै वि पू; तेषामनिरुक्तानिरेव (नि देव ब[4]) ब[1,4]। १८. यज्या ब[4]। १९. व्यक्तः ब[1,2] मै वि पू। २०-२०. °स्ताश्चाम्नाताभिः ब[1,2] मै वि; सम...ताभिः पू; तु. आश्रौ १, ११, १३। २१. पृथग्घरणा (ण मै) ब[2] मै; पृथग्धरणा पू; °हण ब[3,4]। २२. होमः ब[1,4]।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

व्याहृतिभिः सर्वसमानाभिर्यजेत्[१]। कथं प्रयोग इति तदुच्यते व्यवस्थितविषये एव[२]। एकदेवत्यस्य आग्नेयीभ्याम् उक्तं[३] तद् द्विदेवत्ये बहुदेवत्ये [४]च न[४] भवति एकवदाम्नातत्वात्। तस्मिन् द्विदेवत-बहुदेवतार्थोऽयमारम्भः[५]। कथं प्रयोग इति तदुच्यते उत्तरेण ॥ २८ ॥

[द्वितीयया विभक्त्या देवतामादिश्य प्रणवनं यजनञ्च]

देवतामादिश्य प्रणुयाद् यजेच्च ॥ २९ ॥

द्वितीयया विभक्त्या देवतादेशं व्याहृतीरुक्त्वा प्रणुयाद्—मरुतो भूर्भुवः स्वरो३म्[६] इति प्रणुयात्। अनुवाक्यां[७] ब्रूयादित्यर्थः। यथा उत्तरत्र[८] आदिश्य यजेदिति। आदेशानन्तरम् अनुवाक्या याज्या च भवति। यजेच्च। देवतामादिश्य व्याहृतिभिर्यजेत्। च-शब्दः समुच्चयार्थः[९]। आदेशाधिकारं समुच्चिनोति। ये३यजामहे[१०] मरुतो मरुतो[११] भूर्भुवः [१२]स्वा३र्वौषड् इति[१२] याज्याया द्वौ देवतादेशौ भवतः। याज्यालक्षणार्थं एकः, आदिश्य यजेदिति वचनात्, आगूर्यादिशम् (आश्रौ १, ५, २९) इति वचनादेक आदेशः। ये३यजामहे[१०] अग्निम्[१३], अग्निमीळे पुरोहितम् (ऋ १, १, १) इति ॥ २९ ॥

[नक्राभ्यामृग्भ्यां यजेदिति विकल्पः]

[१४]नक्राभ्यां वा[१४] ॥ ३० ॥

नक्रे इति वक्ष्यति[१५]। ताभ्यां नक्राभ्याम् ऋग्भ्यां[१६] वा यजत्[१७]। आग्नेयीभ्यामित्येतेनैव[१८] सिद्धे नक्राभ्यामिति ऊहार्थं[१९] आरम्भः। संज्ञायामन्वर्थ-

---

१. °समाभि° मै। २. नास्ति मै पू। ३. तु. आश्रौ २, १४, २७। ४-४. च ब[१,२] मै पू; न ब[३,४] वि। ५. द्विदेव (°वत पू) बहुदेव आग्नेयीभ्यातार्थोऽयमा° मै पू। ६. स्वरोम् मूको। ७. °क्या ब[२] मै पू; °क्ये ब[३,४]। ८. उत्तर ब[३,४]। ९. °र्थे मै। १०. ये मूको। ११. नास्ति ब[१,२] पू। १२-१२. स्वा३र्वौ ब[१]; स्वर्षो इति ब[२]; स्वरोमिति ब[३,४]; स्वर्घा (स्व३र्घा पू) रिति मै पू; स्वा३र्षो वि। १३. नास्ति ब[२-४]। १४-१४. तत्र वाच्यमिति ब[१]; त्रुटितम् पू। १५. तु. आश्रौ २, १४, ३१। १६. नास्ति ब[१] वि। १७. यजेत ब[१] मै पू। १८. तु. आश्रौ २, १४, २७। १९. °र्थम् ब[३,४]।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

त्वादूहप्राप्तिः । नमनशीले नम्रे । [1]या या[1] देवता भवति, [2]तां तां[2] संनमति । तस्मादूहः कर्तव्यः । अन्यथा नम्राभ्यामित्यारम्भोऽनर्थकः । आग्नेयीभ्यामित्येतेनैव सिद्धत्वात् ।। ३० ।।

[नम्रसंज्ञकयोर्ऋचोः कथनम्]

इममा शृणुधी हवं यं त्वा गीर्भिर्हवामहे । एवं बर्हिर्निषीद नः । स्तीर्णं बर्हिरानुषगासदेत । उपेळाना इह नो अद्य गच्छ । अहेळता मनसेदं जुषस्व वीहि हव्यं प्रयतमाहुतं न इति नम्रे ।। ३१ ।।

इममा शृणुधी हवम् इत्येते यथासमाम्नाते नम्रे भवतः । तयोरूहस्थानानि त्रीणि । अनुवाक्यायां शृणुधि त्वा सीदेति । त्रीण्येव याज्यायां गच्छ जुषस्व वीहीति । शृणुधि शृणुतं शृणुत । त्वा वां वः । सीद[3] सीदतं[4] सीदत । गच्छ गच्छतं [5]गच्छत । जुषस्व जुषेथां[5] जुषध्वम् । वीहि वीतं वीत । इति नम्रे । इति एते[6] ऋचौ नम्रे इति वेदितव्ये[7] । नम्राभ्यां वा (आश्रौ २, १४, ३०) इत्युक्तम् । के नम्रे इति न जानीमः, तस्मादिदमुच्यते इत्येते नम्रे । या या देवता, तां तामेव नमतः । तस्मादूह्येते[8] अप्येते यथार्थमाम्नाते ।। ३१ ।।

[अनिरुक्तदेवताके स्थले आग्नेय्यावृचौ भवतः]

आग्नेय्यावनिरुक्ते ।। ३२ ।।

एते नम्रे आग्नेय्यौ भवतः । आग्नेय्यौ यस्मात् तस्मात् सर्वार्थे भवतः । अग्निः सर्वा देवताः (ऐब्रा २, ३) इति हि[9] ब्राह्मणम् । अनिरुक्ते नाऽत्र देवता निरुच्यते, तस्मादेते अनिरुक्ते । अनिरुक्तत्वात् सर्वार्थे भवतः । तस्माद् यथार्थमूह्येते[10] । अनुच्यमाने[11] अपि अनिरुक्ते एवैते भवतः । किमर्थमनिरुक्ते इत्युच्यते । इदं प्रयोजनं पूर्वमुक्तम् आग्नेयीभ्याम् (आश्रौ २, १४, २७) इति । तत्राऽनुक्तम् इहाऽऽगत्योच्यते—[12]उभयत्र विशेषणार्थम्[12], अनिरुक्ते आग्नेय्यौ भवत इति । तस्मात् [13]पूर्वोक्ते अपि[13] अनिरुक्ते एव भवतः ।। ३२ ।।

।। इति चतुर्दशः खण्डः ।।

१-१. या ब[1,2] पू । २-२. तां वा ब[1,2] मै ; तां वां पू ; तां तां ता वि । ३. नास्ति वि । ४. नास्ति ब[3] पू । ५-५. नास्ति ब[2] । ६. एतौ ब[1-4] मै वि ; त्रुटितम् पू । ७. °तव्यौ ब[3,4] मै वि ; त्रुटितम् पू । ८. °दूह्यते ब[1-4] मै वि; °दू... पू । ९. नास्ति ब[2] । १०. °मूह्यते ब[1,3] मै वि पू । ११. अनूच्य° मूको । १२-१२. °यत्रावि° मूको । १३-१३. °क्ते ब[1-4] मै वि ; त्रुटितम् पू ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ द्वितीयेऽध्याये पञ्चदशः खण्डः

[चातुर्मास्येष्टचयनाऽऽरम्भात् पूर्वेद्युर्वैश्वानरपार्जन्येष्टिविधानम्]

चातुर्मास्यानि प्रयोक्ष्यमाणः पूर्वेद्युर्वैश्वानरपार्जन्याम् ॥ १ ॥

चातुर्मास्यानीति [1]इष्टचयनस्य संज्ञा[1] । [2]चतुर्षु चतुर्षु[2] मासेषु क्रियमाणानि [3]चातुर्मास्यानि कर्माणि । उक्तानि चातुर्मास्यानि (आश्रौ ९, २, १) इत्युक्ते[3] एतेषां ग्रहणम् । कामे श्रूयमाणेऽपि नित्यान्येव[4] दर्शपूर्णमासवत्[5] । तस्माद् इष्टचयनप्रकरणे उक्तानि । रहस्यब्राह्मणे नित्यानि कर्माणि प्रदर्शितानि । स एष यज्ञः पञ्चविधः (ऐब्रा २, ३, ३) इति । तथा आचार्येणापि—दर्शपौर्णमासाभ्यामिष्ट्वा[6] (आश्रौ ४, १, १) इति । तथा धर्मशास्त्रे—अवश्यं च[7] ब्राह्मणोऽग्नीनादधीत (वाध ११, ४५) इत्येवमादि नैयमिकं ह्येतदृणं[8] संस्तुतम् (वाध ११, ४७) इति । चातुर्मास्यानीति[9] । तानि प्रयोक्ष्यमाणो यजमानः फाल्गुन्यां पौर्णमास्यां चैत्र्यां वा[10] पूर्वेद्युरारम्भात् पूर्वस्मिन्नहनि चतुर्दश्याम् । यदि प्रतिपद्यारम्भस्तदा पौर्णमास्यां वैश्वानरपार्जन्यामिष्टिं कुर्यात् । अग्निर्वैश्वानरः पर्जन्यश्च देवते यस्याः सा वैश्वानरपार्जन्या, तां पूर्वेद्युः कुर्यात् ॥ १ ॥

[वैश्वानरपर्जन्ययोर्याज्यानुवाक्याकथनम् अग्न्याधेयप्रभृत्येतत्पर्यन्तानामिष्टीनामुपांशुहविष्ट्वविधानं च]

वैश्वानरो अजीजनदग्निर्नो नव्यसीं मतिम् । क्षमया वृधान ओजसा । पृष्टो दिवि पृष्टो अग्निः पृथिव्याम् । पर्जन्याय प्र गायत । प्र वाता वान्ति पतयन्ति विद्युत इति । अग्न्याधेयप्रभृत्याऽत उपांशुहविषः ॥ २ ॥

वैश्वानरो अजीजनत् (ऐब्रा ५, १७) इति समाम्नाताऽनुवाक्या । पृष्टो दिवि (ऋ १, ९८, २) इति याज्या वैश्वानरस्याग्नेः । वैश्वानरस्याऽप्येते ।

१-१. °यनसंज्ञा ब^{1,4} । २-२. चतुर्षु ब^{3,4} वि । ३-३. उक्ते वि ।
४. नित्यानित्ये च ब^{3,6} वि । ५. °पौर्ण° ब^{2} । ६. °पूर्णमा° ब^{3} वि ।
७. नास्ति वि । ८. ऋण° वाध. ११, ४७ । ९. °स्यानि ब^{1,2} मै पू ।
१०. तु. आश्रौ २, १४, ३ ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[1]यथा अग्नेः[1] शुद्धस्य मूर्धन्वत्यौ[2] मूर्धन्वतश्चाप्येते[3] एव। [4]वैश्वानरीये तन्त्रे। अग्निः प्रधानो[4] न भवति, तस्मात् प्रातरनुवाके वैश्वानरीयान्युद्धृतानि।

पर्जन्याय प्र गायत (ऋ ७, १०२, १), प्र वाता वान्ति[5] (ऋ ५, ८३, ४) इति पर्जन्यस्य याज्यानुवाक्ये। शेषं पौर्णमासेन। अग्न्याधेयप्रभृति [6]आऽन्त उपांशुहविषः[6]। व्याख्यातम् अग्न्याधेयम्[7]। अग्न्याधेयप्रभृति एतदन्तमिति[8]। आतः आ एतस्मादावैश्वानरपार्जन्याया या[9] इष्टय अनुक्रान्तास्ता उपांशुहविषो[10] भवन्ति[11]। उपांशुहवींषि यानि[12] आज्यभागौ स्विष्टकृतं च अन्तरा तानि हवींषि इत्युच्यन्ते। उक्तं च अन्तरेण हविषी विष्णुम् (आश्रौ १, ३, १२) इति। प्रभृति-ग्रहणस्य प्रकारवाचित्वादसमाम्नाता अप्युपांशु भवन्ति। हविर्ग्रहणे अक्रियमाणे[13] सतन्त्रा उपांशु स्युः॥ २॥

[सौमिकीनामिष्टीनामुपांशुहविष्ट्वविधानम्]

सौमिक्यः॥ ३॥

सोमे भवाः सौमिक्यः दीक्षणीयाद्युदवसानीयान्ता उपांशुहविषो भवन्ति॥ ३॥

[प्रायश्चित्तेषु प्रयुक्तानामिष्टीनामुपांशुहविष्ट्वम्]

प्रायश्चित्तिक्यः॥ ४॥

प्रायश्चित्तेषु[14] भवा इष्टयः प्रायश्चित्तिक्यः अधिकृताः[15], अथाऽऽग्नेय्यः[16] (आश्रौ ३, १३, १) इत्येवमाद्याश्च[17] ता[18] उपांशुहविषो भवन्ति॥ ४॥

१-१. यथात्राग्नेः ब[2] मै पू ; यथा प्राग्नेः ब[1]। २. मूर्धंचत्यो ब[1] ; मूर्धंत्वन्यौ ब[2] मै पू ; मूर्धन्यो ब[3,4] वि। ३. मूर्धचतस्याप्येके ब[1] ; मूर्धस्वस्याप्येते ब[2] ; मूर्धंत्वतस्याप्येते ब[4] मै पू ; मूर्धन्वतस्या (°स्या वि) प्येते ब[3] वि। ४-४. °रीये तयाग्निः प्रधाने ब[1] ; °रीये तन्त्रे अग्नि (°ग्निः ब[1,4] मै) प्रधानो ब[2-4] मै ; °यतन्त्रे अग्निः प्रधानो वि ; °री......प्रधाने पू। ५. वान्ति पतयन्ति विद्युतः ब[3,4]। ६-६. नास्ति ब[1,2] मै पू। ७. नास्ति ब[1,2] मै पू। ८. एतदन्तानि ब[1,3,4] वि ; एतदन्तति ब[2] पू ; एतदन्तेति मै। ९. नास्ति ब[1,2] मै पू। १०. °षां ब[1]। ११. त्रुटितम् पू। १२. यावता (°त ब[1]) उपांशु हविषी (हवींषि ब[4] ; °षि मै) मूको। १३. नास्ति वि। १४. °श्चित्ते ब[1]। १५. एष्टिकृती ब[3,4] ; एधि (°धी मै) कृत्य (°ती वि) मै वि पू। १६. अग्न्याधेयः ब[3,4]। १७. °द्यश्च ब[2] ; °द्या ब[3,4]। १८. स्ता ब[2] पू ; तासा ब[3,4] वि।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[अन्वायात्यानां हविषामेककपालानां पुरोडाशानां चोपांशुप्रयोज्यत्वम्]

'अन्वायात्यैककपालाः[1] ॥ ५ ॥

[1]अन्वायात्यानि च† हवींषि एककपालाश्च‡ पुरोळाशाः अन्वायात्यैककपालाः उपांशु भवन्ति[1]। यथा [2]देवसुवां ह्येतानि[2] देविकाहवींषि[3] सर्वपृष्ठानि[4]। एककपाला [5]द्यावापृथिवीयसौर्या[5] इति। समासवचनं लाघवार्थम् ॥ ५ ॥

[सर्वत्र वारुणहविष उच्चैःप्रयोज्यत्वम्]

सर्वत्र वारुणवर्जम् ॥ ६ ॥

सर्वत्र यत्र उपांशुत्वं[6] विहितं तत्र वारुणं हविः उपांशु न भवति। यथा सौमिक्यः (आश्रौ २, १५, ३) इत्युक्तम्। [7]तत्र अवभृथेष्ट्यां[7] [8]वारुणमुच्चैर्भवति[8]। प्रायश्चित्तिक्यः (आश्रौ २, १५, ४) इत्युक्तम्। [9]इष्टिश्च वारुणी (आश्रौ ३, १२, ५), अग्निर्ज्योतिष्मान् वरुणः (आश्रौ ३, १२, २८) इति च† वारुणमुच्चैर्भवति‡। अन्वायात्यैककपालाः (आश्रौ २, १५, ५)[9]। वरुणो धर्मपतिरुच्चैर्भवति[10]। सर्वत्र-ग्रहणे अक्रियमाणे[11] अधिकृतेषु[12] अन्वायात्येषु एककपालेषु च[13] यो वरुणः[14] स एव उच्चैः स्यादन्यत्र प्रायश्चित्तविषयादिषु उच्चैर्न स्यात्। तस्मात् सर्वत्र-ग्रहणम् ॥ ६ ॥

[चातुर्मास्येषु सावित्रपुरोडाशस्योपांशुप्रयोज्यत्वम्]

सावित्रश्चातुर्मास्येषु ॥ ७ ॥

[15]सावित्रः पुरोळाशश्चातुर्मास्येषु[15] उपांशु भवति। चातुर्मास्येष्विति

१-१. नास्ति ब[3,4]। †. नास्ति ब[1] वि। ‡. °पाला द्यावापृथिवीयसौर्यं इति वि। २-२. देवसूनामान (°नि ब[2] मै वि) ब[1,2] मै वि; देवसूवा (°सुव ब[4]) ह्येतानि ब[3,4]। ३. तु. आश्रौ ४, ११, ५; ६, १४, १५। ४. तु. आश्रौ ४, १२, १। ५-५. °थिवीसौ (°सू ब[2] मै पू)र्यं ब[1,2] मै पू; °थिवीय (°यं ब[3,4])सौर्यं ब[3,4] वि। ६. उपांशुवर्जत्वं ब[3,4]; उपांशुर्न वर्जत्वं वि। ७-७. तन्त्रावभृथेष्ट्यां ब[1,2] मै वि पू; तन्त्र वारुणेष्ट्यां ब[3,4]। ८-८. °ण एव उच्चै° ब[1]; °ण एवमुच्चै° ब[2-4] मै वि पू। ९-९. नास्ति ब[2]। †. वचने ब[1]; नास्ति मै पू। ‡. उच्चैर्भ° मै पू। १०. तु. आश्रौ ४, ११, ५। ११. नास्ति वि। १२. °कृते मूको। १३. नास्ति मै पू। १४. वारुणः ब[1,4]। १५-१५. °त्र पु° ब[1,3,4] वि।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वचनादन्यत्र उच्चैः। संसृपेष्टिषु[1] सविता सत्यप्रसवः प्रसविता (आश्रौ १०, ६, ८) इत्येवमाद्युच्चैः ॥ ७ ॥

[चातुर्मास्येषु प्रधानहविषामुपांशुप्रयोज्यत्वमिति मतान्तरकथनम्]

प्रधानहवींषि चैके ॥ ८ ॥

चातुर्मास्येषु यानि प्रधानानि हवींषि तानि च उपांशु भवन्तीत्येके मन्यन्ते। कानि प्रधानानि। येन हविषा यत् कर्म व्यपदिश्यते [2]तत् तत्र प्रधानम्। विश्वे देवाः[2] अत्र प्रधाना[3] वैश्वदेवे। [4]वरुणोऽत्र प्रधानो[4] वरुणप्रघासे[5]। महेन्द्रोऽत्र प्रधानो माहेन्द्रीष्टिः। [6]शुनासीरावत्र प्रधानौ[6] शुनासीरीयेष्टिः। एतानि[7] [8]प्रधानानि भवन्तीत्येके[8]। च-शब्दश्चातुर्मास्याधिकारसमुच्चयार्थः ॥ ८ ॥

[सतन्त्राणां पित्र्योपसदामुपांशुप्रयोज्यत्वम्]

पित्र्योपसदः सतन्त्राः[9] ॥ ९ ॥

पित्र्या च उपसदश्च पित्र्योपसदः, सह[10] तन्त्रेण उपांशु भवन्ति ॥ ९ ॥

[सतन्त्रायाः पौनराधेयिक्या उत्तमादनुयाजात् प्रागुपांशुप्रयोज्यत्वम्]

पौनराधेयिकी च प्रागुत्तमादनुयाजात् ॥ १० ॥

पुनराधेये भवा पौनराधेयिकी इष्टिः। सा च सतन्त्रा उपांशु भवति। [11]प्रागुत्तमादनुयाजात्। उत्तमादनुयाजात् प्राक् तदुपांशु भवति[11]। देवो अग्निः (आश्रौ १, ८, ७) इत्येवमादि यत् परं, तदुच्चैः। तत्रापि सूक्तवाके[12] प्रधाननिगमनम् उपांश्वेव[13] अग्न्याधेयप्रभृत्याऽत उपांशुहविषः (आश्रौ २, १५, २) इति वचनात्। च-शब्दः सतन्त्रसमुच्चयार्थः ॥ १० ॥

---

१. संसयेषु ब[1] पू ; संसृष्टेपु ब[2] ; त्रुटितम् पू। २-२. तत्तव (तत्रैव मै) प्रधानविश्वे° ब[2] मै पू ; तत्र प्रधान (°नं ब[3]) विश्वे° ब[3,4]। ३. °नं ब[1]। ४-४. वरुणप्र° ब[1] ; वरुणोप्र° पू। ५. वरुणप्रयाप्ते ब[1] ; वरुणः प्रधानः (°नसोम वि) ब[3,4] वि ; वरुण… पू। ६-६. °सीरप्रधानः ब[1] ; °सीरावप्रधानौ ब[2] मै पू। ७. इत्येतानि ब[1]। ८-८. प्रधानानीत्येके ब[1] वि पू। ९. सहतन्त्रा ब[1,4] ; सातन्त्रा मै। १०. नास्ति ब[1,2] पू वि। ११-११. नास्ति ब[1]। १२. तु. आश्रौ १, ९, १। १३. उपांशुश्चैव ब[1] वि ; त्रुटितम् मै।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[पित्र्योपसदां पौनराधेयिक्याश्च सुमन्द्रतन्त्रत्वमिति विकल्पः]

अपि वा सुमन्द्रतन्त्राः ॥ ११ ॥

पित्र्योपसदः पौनराधेयिकी च उपांशुतन्त्रा अपि वा सुमन्द्रतन्त्रा[1] भवन्ति[2]। [3]सुमन्द्रं तन्त्रं यासां, ताः[3] सुमन्द्रतन्त्राः। सुष्ठु मन्द्रं सुमन्द्रम्। पर्वसु न्यूनः[4] स्वरः। मन्द्रस्वरस्य[5] प्रथमेन प्रयोगो भवति। दर्शयति च उत्तरत्र इदं प्रभृति कर्मणां शनैस्तरामुत्तरोत्तरम् (आश्वौ ४, १, २३) इति। अत्र कथम्। 'पौर्णमासे षष्ठेन[6] प्रयोगः, सप्तमेन वषट्कारः, पञ्चमेन उखासंभरणीया, चतुर्थेन दीक्षणीया, तृतीयेन प्रायणीया[7], प्रायणीयावत् सोमप्रवहणम्, द्वितीयेनातिथ्या[8], प्रथमेनोपसत्[9]। स एवं[10] मन्द्रो भवति। [11]तस्य मन्द्रस्य[11] प्राप्तस्य पुनर्वचनं सुमन्द्रसंज्ञाप्रदर्शनार्थं[12] विकल्पप्रदर्शनार्थं च। उपांशुतन्त्राः सुमन्द्रतन्त्रा वा[13] इति पित्र्यायां पौनराधेयिक्यां च प्राप्त्यर्थम्[14]। अपि-शब्दः समुच्चयार्थः। अप्युपांशु[15] अपि सुमन्द्रम्। [16]वेति विकल्पार्थे। अपि वा सुमन्द्राः इति सिद्धे तन्त्रग्रहणात्[16] [17]तन्त्रमेव सुमन्द्रं† न प्रधानम्[17]। प्रधानं तु[18] उपांश्वेव। नैमित्तिकं[19] तन्त्रं[20] पित्र्यायाम्। अध्वर्यूणां तथा वा[21] भवति तत्प्रत्ययत्वात् स्वरस्य ॥ ११ ॥

[आगूःप्रणववषट्काराणां सर्वत्रोच्चैः प्रयोज्यत्वम्]

आगूःप्रणववषट्कारा उच्चैः सर्वत्र ॥ १२ ॥

[22]आगूश्च प्रणवश्च वषट्कारश्च[22] आगूःप्रणववषट्कारा उच्चैः सर्वत्र

---

१. °तन्त्रा वा ब[1-4] मै ; त्रुटितम् पू। २. भवति ब[1] ; नास्ति वि ; त्रुटितम् पू। ३-३. सुमन्द्रतन्त्रा यासां ताः ब[1] मै पू ; सुमन्द्र एव तन्त्रा यासां ताः वि ; नास्ति ब[3,4]। ४. न्यूनं ब[1] वि ; न्यून ब[3,4]। ५. मन्द्रस्य ब[1] वि। ६. °मासेन षष्ठेन ब[1] वि ; °मासेष्टघेन ब[3,4] ; °मासपृष्ठेन मै। ७. नास्ति ब[1,2] मै पू। ८. °तिथ्यं ब[1] मै ; °तिथ्यां ब[2] पू। ९. °सदः ब[1]। १०. एव ब[1,4] पू। ११-११. तस्याम° ब[1,4] ; तस्यामन्त्रस्य वि ; °मन्त्रस्य ब[2] मै पू। १२. सुमन्त्र ब[1,2] मै वि पू। १३. वापि वि। १४. नास्ति ब[3,4]। १५. अप्युक्तम् उपांशु ब[3,4] वि। १६-१६. नास्ति ब[1]। १७-१७. नास्ति ब[1] ; व सुमन्द्रं न वि। †. मन्द्रमेव ब[2] पू। १८. नास्ति ब[1]। १९. निमित्तं (°त्तिकं ब[2] पू ; °त्तकं ब[3,4] वि) ब[1-4] वि पू। २०. मन्द्रं ब[1] ; मन्त्रा ब[2] ; मन्त्रं मै पू। २१. नास्ति ब[1,4] वि। २२-२२. नास्ति ब[2]।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

चातुर्मास्यानि
Digitized by Madhuban Trust

यत्र यत्र[1] उपांशिवति। आहार्यत्वात् [2]तद्वचनाद् येऽन्ये[2] तद्वचनाः[3] ते[4] उच्चैर्भवन्ति। [5]यथा आवहादयः षट्†। सर्वत्र-ग्रहणादधिकृतादन्यत्रापि‡ दर्श-पूर्णमासादिषु उपांशुयाजेषु आगुरादयφ उच्चैर्भवन्ति[5], [6]अनुवाक्यास्वेवं† प्रणव उच्चैर्भवति[6]। [7]नानुवचनेषु† ‡न च‡ शस्त्रेषुφ[7]। अनुवाक्यासु[8] प्रणवस्तद्वचनो[9] भवति आहार्यत्वात्[10]। तस्मात् स उच्चैर्भवति[11]। अनुवचनेषु च[12] शस्त्रेषु[13] च अतद्वचनः प्रणव ऋगन्तलक्षणत्वात्। तस्मात् स उपांश्वेव। दर्शयति च प्रथमामन्वाहोपांशु सप्रणवाम् (आश्रौ २, १७, ३) इति। एतस्माद् दर्शनात्[14] तद्वचनान्ताश्च[15] सामिधेनीषु मानसे च प्रणवा उपांश्वेव भवन्ति। यथा दशमेऽहनि अनुष्टुभामुद्धारः प्रदर्शितः[16]। अन्यत्रापि उद्ध्रियन्ते[17] ग्रावस्तोत्रादिषु[18] ॥ १२ ॥

[आग्रयणे प्रथमहविष उच्चैःप्रयोज्यत्वम्]

तथाऽऽग्रयणेऽग्रचम्[19] ॥ १३ ॥

यथा आगुरादय[20] [21]उच्चैस्तथाऽऽग्रयणेऽग्रचम्। अग्रचमिति[21] [22]वचनाद् अबहुत्वे तु[22] तदुपपद्यते एकस्मिन्[23] श्यामाकाग्रयणे ॥ १३ ॥

[आहार्यस्य पुरोऽनुवाक्याप्रणवस्योच्चैः प्रयुक्तस्य प्राणसन्ततत्वम्]

आहार्यस्तु प्राणसन्ततः प्रणवः पुरोऽनुवाक्यायाः ॥ १४ ॥

---

१. नास्ति ब[2] मै। २-२. °चनाद्योत्ये ब[1] वि ; °चनाद्यान्ये ब[2] ; °चनाद्यन्ये ब[3,4] ; °चनाद्योऽन्ये मै ; °चनाद्यो० पू। ३. अतस्तद्वचनात् ब[1] ; अतद्वचनात् मै ; अतस्तद्वचनाः वि ; अतद्वचनाः ब[3,4] ; त्तद्वचनात् ब[2] ; ...... नात् पू। ४. ताः ब[1,2] मै वि पू। ५-५. नास्ति ब[2] मै पू। †. तु. आश्रौ १, ३, १५। ‡. °ग्रहणाधिकृताः (°तात् ब[3]) ब[1,3] वि। φ. °शुयज्ञेषु ब[1] ; °शुयागेषु ब[3,4] वि। ६-६. नास्ति ब[1,2] पू। †. °वाक्यासु (°सु व वि) ब[1,4] वि। ७-७. नास्ति ब[2] पू। †. °चनेन मै। ‡-‡. नास्ति मै ; न वि। φ. शास्त्रेषु ब[1,3,4] वि। ८. न चानु° मै। ९. प्रधानस्त॰ मै। १०. अन्वाहार्य कृत्वा ब[1] ; आहार्य कृत्वा ब[2] मै पू। ११. उच्चैः ब[2-4] मै वि ; त्रुटितम् पू। १२. नास्ति मै। १३. शास्त्रेषु मूको। १४. वर्तमानात् ब[1] ; वर्तनात् ब[2] मै ; त्रुटितम् पू। १५. °न्ताच्च ब[1,2] मै पू। १६. दर्शितः ब[2] मै पू ; नास्ति वि ; तु. आश्रौ ८, १२, १-२। १७. उद्वहन्ति ब[1] ; उद्वयन्ति ब[2] मै वि पू। १८. स्तोत्रियादिषु ब[1] ; तु. आश्रौ ५, १२, ८। १९. °णेऽग्रियम् ब[1,3,4] वि। २०. आगूरा° ब[1-3] मै वि पू। २१-२१. °णेऽग्रमिति ब[1,2] मै पू ; °णेऽग्रियम्। अग्रियमिति ब[3,4] वि। २२-२२. °नाद बहुत्वेषु ब[1-4] ; °नादबहुत्वेषु मै पू ; बहुत्वेषु वि। २३. नैक° ब[1,4] मै वि पू।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सर्वत्र ऋगन्तो वर्णः प्रणवो भवति। अनुवाक्यायां यथाम्नातम् ऋगन्तं परिसमाप्य अनुच्छ्वस्य[1] [2]अपूर्वमृगन्तादन्यः प्रणव आह्रियते†, स आहार्यस्तु‡ भवति, न ऋगन्तलक्षणः। ऋगन्तं परिसमाप्य[2] आम्नायवदवसाने प्राप्ते प्राणसन्ततो विधीयते। प्रणवं[3] वक्ष्यति [4]प्राणसंततम्—अनुच्छ्वस्योत्तरां प्रतिपद्यते[4] (आश्रौ २, १७, ४), प्राणसन्ततं भवतीति विज्ञायते (आश्रौ २, १७, ५) इति। उपांशूच्चयोर्वर्णः[5] आहार्यः प्राणसन्तानश्च विधीयते। तु-शब्द ऋगन्तलक्षणस्य प्रणवस्य[6] व्यावृत्त्यर्थः। [7]प्राणसन्ततः अवसाननिवृत्त्यर्थः[7]। आम्नायवदवसानं न[8] प्राप्नोति। अन्यत्राऽनुवचनेषु[9] वर्णसन्तानस्य[10] तावदुपांशु प्रणवो भवति ॥ १४ ॥

[याज्याया आगूर्वषट्कारयोः प्राणसन्ततत्वम्]

तथाऽऽगूर्वषट्कारौ याज्यायाः ॥ १५ ॥

यथा पुरोऽनुवाक्यायाः आहार्यः [11]प्रणवः प्राणसन्ततश्च[11] [12]तथा आगूश्च वषट्कारश्च[12] आहार्यौ[13] भवतः, प्राणसंततौ[14] च भवतः याज्यायाः। प्रकृतावप्येतावाहार्यविव। प्राणसन्तानस्तु[15] विधीयते वर्णसन्तानप्रतिषेधार्थम्[16]। याज्याग्रहणम् अनुवाक्याधिकारात्। याज्याग्रहणे अक्रियमाणे अनुवाक्याया एव याज्याभूतायाः प्राणसन्ततौ स्याताम् [17]उपसत्सु उदवसानीयायां[17] च। तस्मात् सर्वयाज्यासु प्राप्त्यर्थं याज्याग्रहणम्। ये यजामहे प्रजापतिम् (?) इत्यत्र। संयोगादिर्वा (ऋप्रा १, २५) इति। [18]पूर्वाङ्गत्वाद् †विकार उच्चैः† प्राप्नोति, ‡काका३र्वौ३ इति। एतेन‡ प्रक्रमस्यϕ[18] [19]पूर्वाङ्गत्वाद् वषट्कारस्य† उपांशु(°त्वं) प्राप्नोति[19]। तस्मादागूर्वषट्कारावाहार्यौ [20]प्राणसन्ततौ च[20] भवतः ॥ १५ ॥

---

१. नास्ति ब[3,4]। २-२. नास्ति ब[2-4]। †. आह्वयते ब[1]; आहूयते मै वि पू। ‡. आहावस्तु ब[1]। ३. नास्ति ब[2-4] मै वि पू। ४-४. नास्ति ब[1,4]। ५. उपांशुश्चयो वर्णः (°र्णं मै) सन्तानस्यानुवर्णः ब[2] मै वि पू; उपांशुश्च यो वर्णः ब[1]; उपांश्व (°श्वे ब[4])च्चयो वर्णः ब[3,4]। ६. वर्णस्य ब[3,4] वि। ७-७. °सन्ततमव° ब[1,2] मै पू। ८. नास्ति ब[3,4] वि। ९. अन्यच्चानु° ब[1]; अन्यवानु° ब[2] पू; अन्यत्राव° ब[3,4] वि; अन्यानुव° मै। १०. °नश्च ब[1]। ११-११. प्राणसन्ततश्च ब[1]; त्रुटितम् पू। १२-१२. तथागूर्वंष° ब[1]; तथागूर्यं वष° ब[2] पू; नास्ति मै वि। १३. °र्यें मै। १४. °तते मै। १५. °संततासु ब[3,4]; °सन्ततस्तु वि। १६. °धार्थः ब[3,4]। १७-१७. °त्सु उदयनीयायां ब[2-4] मै वि; त्रुटितम् पू। १८-१८. नास्ति ब[2-4] वि। †-†. °रमुच्चैः ब[1] पू; वषट्कारमुच्चैरिति मै। ‡-‡. कार्थो इत्येतेन मै; त्रुटितम् पू। ϕ. पराक्रमस्य मै; त्रुटितम् पू। १९-१९. नास्ति ब[3,4] वि। †. वकारस्य ब[1,2]। २०-२०. नास्ति मूको।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

चातुर्मास्यानि
Digitized by Madhuban Trust

[उपांशोस्तन्त्रस्वराणामुच्चैस्त्वम्]

तन्त्रस्वराण्युपांशोरुच्चानि ॥ १६ ॥

तन्त्रस्य[1] स्वराः। आऽतो मन्द्रेण (आश्रौ १, ५, २५) इति ये[2] उक्ताः, तन्त्रस्वरास्ते[3] भवन्ति[4]। उपांशुदेवताया यानि उच्चानि पदानि प्रणवादीनि आगूरादीनि च, तानि[5] उच्चैरेव। अविशेषवचनाद् यः कश्चित् स्वर इति अनियमे प्राप्ते तन्त्रस्वराण्युच्यन्ते। नित्यानुवादो वा उत्तरसूत्रविवक्षार्थः[6]। उपांशु-ग्रहणम् उच्चानामधिकारात् ॥ १६ ॥

[उपांशुतन्त्राणामिष्टीनामुच्चानां मन्द्रस्वरप्रयोज्यत्वम्]

मन्द्राण्युपांशुतन्त्राणाम् ॥ १७ ॥

उपांशुतन्त्रा या इष्टयः पित्र्याद्याः[7] तासां यानि उच्चानि तानि मन्द्रस्वराणि[8] भवन्ति। तन्त्रस्वराणि प्राप्तानि पूर्वसूत्रवचनात्[9] ॥ १७ ॥

॥ इति पञ्चदशः खण्डः ॥

---

१. प्राणसन्तती च तन्त्रस्य मूको। २. नास्ति मै। ३. ते तन्त्रस्वरा मै।
४. भवन्ति ते ब[3,4] वि। ५. नास्ति मूको। ६. °क्षार्थम् ब[3,4] वि।
७. नास्ति ब[1]; त्रुटितम् पू; पितृद्याः ब[2]; पितृव्याः मै। ८. मन्द्राणि ब[3,4]।
९. एवं सूत्र° ब[3,4]।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ द्वितीयेऽध्याये षोडशः खण्डः

[अपरेद्युः प्रातर्वैश्वदेव्यां प्रेषितस्याग्निमन्थनीयाया ऋचोऽनुवचनम्]

प्रातर्वैश्वदेव्यां प्रेषितोऽग्निमन्थनीया अन्वाह ॥ १ ॥

चातुर्मास्यानां पूर्वेद्युः[1]क्रिया परिसमाप्ता[1] । इदानीं प्रातरुत्तरेद्युः क्रिया वक्ष्यते[2] । वैश्वदेव्यां[3] [4]विश्वे देवाः[4] प्रधाना यस्यामिष्टौ सा वैश्वदेवी, तस्यां वैश्वदेव्याम् । अधिकारसूत्रमेतत् । यदित ऊर्ध्वं वक्ष्यामस्तद् [5]वैश्वदेव्या विधानम्[5] । संज्ञा चेयम् । वैश्वदेव्याः स्थाने प्रथमं पृष्ठ्याहः (आश्रौ ९, २, ५) इत्युक्ते तस्या ग्रहणम् । प्रेषितोऽग्निमन्थनीया [6]अन्वाह । अध्वर्युणा प्रेषितो होता अग्निमन्थनीया[6] ऋचः[7] अन्वाह, प्रैषमनु आह । ता वक्ष्यन्ते । प्रेषित इति वचनाद् अप्रेषितो न ब्रवीति ॥ १ ॥

[सामिधेनीस्थानस्य पश्चादवस्थाय संप्रैषपर्यन्तमारामविधानम्]

पश्चात् सामिधेनीस्थानस्य [8]पदमात्रेऽवस्थायाऽभिहिंकृत्य अभि त्वा देव सवितर्मही द्यौः पृथिवी च नस्त्वामग्ने पुष्करादधीति तिसृणामर्धर्चं शिष्ट्वाऽऽरमेदा संप्रैषात्[8] ॥ २ ॥

उक्तं सामिधेनीस्थानं वेदिश्रोण्योत्तरया (आश्रौ १, १, २३) इति । तस्य पश्चाद् अपरस्यां दिशि पदमात्रे पदप्रमाणे देशे अवस्थाय स्थित्वा अभिहिङ्कृत्य[9] अभिहिङ्कारं कृत्वा अभि त्वा देव सवितः इत्येवमाद्यग्निमन्थनीयाः प्रतिपद्यते । अवस्थाय अभि त्वा देव सवितः (ऋ १, २४, ३) इत्येवमुच्यमाने[10] ऋचां संबन्धे क्रियमाणेऽभिहिङ्कारलोपः स्यात्, तस्माद्[11] अभिहिङ्कृत्येत्युच्यते । अन्यत्राऽ-

---

१-१. क्रियापरिसमाप्तेः मै ; त्रुटितम् पू । २. वक्ष्यति ब[3,4] वि । ३. नास्ति ब[3,4] वि । ४-४. वैश्वदेवाः ब[1-4] मै वि पू । ५-५. °देव्यार्थवि° ब[3,4] वि । ६-६. नास्ति ब[1,3,4] वि । ७. नास्ति ब[3,4] वि । ८-८. नास्ति ब[1,2] मै पू । ९. नास्ति ब[3,4] वि । १०. °मानेन ब[3,4] वि । ११. नास्ति ब[1] ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

चातुर्मास्यानि
Digitized by Madhuban Trust

नुपूर्ववचने च एतदेव कारणं स्यात्। नियमार्थमेके। अभिहिङ्कारप्रतिषेधेऽपि अग्निमन्थने अभिहिङ्कारो नियम्यते। प्रातरनभ्यासमनभिहिंकृतानि[1] (आश्रौ ६, १०, १२) इत्यत्र। तदन्याय्यम्[2]। कृत्स्नेऽहनि प्रतिषिद्धस्य एतस्मिन्नियमे कारणं न[3] पश्यामः। अभि त्वा देव सवितः इति यथापरिभाषोक्तास्त्रयोदश[4] ऋचः। तत्र त्वामग्ने पुष्करादधि (ऋ ६, १६, १३-१५) इति तिसृणामृचाम् अन्त्यमर्धर्चं शिष्ट्वा आरमेत्। कियन्तं कालम्? आ सम्प्रैषात्। [5]यावदध्वर्युः संप्रैषमाह—जातायानुब्रूहि (तैसं ६, ३, ५, ३) इति[5] ॥ २॥

[अन्यत्राऽप्यन्तर्ऋचोऽवसाने आरमणविधानम्]

[5]अन्यत्राऽप्यन्तर्ऋचोऽवसाने[5] ॥ ३ ॥

अन्येषु अपि अनुवचनेषु[6] यत्र अन्तर्ऋचः ऋङ्मध्ये वचनादवसानं भवति, तत्राप्या संप्रैषादारमणं भवति। अपि-शब्दः समुच्चयार्थः। यथा[7] यूपाञ्जनादिषु[8] [9]पुनन्ति धीरा अपसो मनीषा (ऋ ३, ८, ५) इत्येतत्[9]। अन्तर्ऋचोऽवसाने इति वचनाद् ऋगन्तावसाने आ संप्रैषादारमणं न भवति। [10]यथा प्रवर्ग्ये[10] ॥ ३ ॥

[मथ्यमानोऽग्निश्चेन्न जायते तदाऽग्नेराजन्मनः पुनःपुनरग्ने अग्ने हंसीति सूक्तावपनम्]

[11]अजायमाने त्वेतस्मिन्नेवाऽवसाने अग्ने हंसि न्यत्त्रिणम् इति सूक्तमावपेत पुनःपुनरा जन्मनः[11] ॥ ४ ॥

अजायमाने[12] तु[13] अग्नौ एतस्मिन्नेवावसाने [14]अग्ने हंसि न्यत्त्रिणम् (ऋ १०, ११८, १) इति एतत् सूक्तम् आवपेत पुनः† पुनः अभ्यावर्तेत। कियन्तं कालम्? आ जन्मनः यावदग्निर्जायते। तु-शब्द आरमणाऽधिकारव्यावृत्त्यर्थः। शिष्टेन अर्धर्चेन सूक्तस्य सन्ताने प्राप्ते एतस्मिन्नेवाऽवसाने इत्युच्यते। एवशब्दोऽवधारणार्थः[14]। अग्ने हंसि न्यत्त्रिणम् इति पादग्रहणाद् ऋक्

---

१. °कृत्यानि मूको। २. तदन्या ब[1]; तदन्याव्यं ब[2] पू; तदन्यायं ब[3] वि; तदभ्याय्यं ब[4]। ३. नास्ति मूको। ४. तु. ऐब्रा १, १६ ता एतास्त्रयोदशान्वाह इति। ५-५. नास्ति ब[1]। ६. य वचनेषु ब[1]। ७. यद् ब[1,2] मै पू। ८. तु. आश्रौ ३, १, ८; ९। ९-९. नास्ति मूको। १०-१०. नास्ति ब[3,4] वि; तु. आश्रौ ४, ६, १। ११-११. नास्ति ब[1,2] मै पू। १२. अजायमाने तु अग्नौ प्रेषित उत्तरामृचं ब्रूयात् अजायमाने (यजमाने मै) मूको। १३. नास्ति ब[3,4] वि। १४-१४. नास्ति ब[1]। †. ततः ब[3,4] वि; नास्ति ब[1,2] मै पू।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्राप्नोति । ऋक्त्वे च सति 'प्रणवेनेत्युक्ते अनन्तरेण† ‡ऋगन्तेनैव'[1] प्रणवेन शिष्टमर्धर्चम् उपसन्तनुयात्[2]। सूक्तधर्मे सति[3] अनन्तरेणेति[4] वचनात् सूक्त-प्रयोगात् सूक्तेनैव प्रणवेनोपसन्तानं कुर्यात्। पादग्रहणाद् ऋक् प्राप्ता, तस्मात्[5] सूक्तग्रहणम्[6]। सूक्तस्य सकृदावापे प्राप्ते पुनः पुनरित्युच्यते। [7]कियन्तं कालमावाप इति। उच्यते[7]। आ जन्मनः यावदग्निर्जायते तावदावापः[8] ॥ ४ ॥

[अग्निं जातं श्रुत्वा प्रणवेन शिष्टार्धर्चोपसन्तानम्]

जातं श्रुत्वाऽनन्तरेण प्रणवेन शिष्टमुपसन्तनुयात् ॥ ५ ॥

[9]जातायानुब्रूहि (तैसं ६, ३, ५, ३) इत्येतं संप्रैषं श्रुत्वा यस्यामृचि श्रूयते †तस्यामनन्तरेण प्रणवेन शिष्टमर्धर्चमुपसन्तनुयात्[9]। [10]जायमाने तु अग्नौ प्रेषित उत्तरामृचं† ब्रूयात्[10]। आ जन्मनः (आश्रौ २, १६, ४) इति वचनाज् जातमात्र एवोपसन्तानः प्राप्तः। तस्मादाह जातं श्रुत्वेति। सत्यपि ऋग्धर्मे सूक्तग्रहणस्याऽपि सार्थकत्वाय[11] [12]सूक्तं समाप्य प्रणवेन[12] [13]संतानं कुर्यात्[13]। तस्मादनन्तरेणे-त्युच्यते[14]। प्रणवेन ऋगादिः संधीयते, नार्धर्चः। तस्मात् प्रणवेनेत्युच्यते। यथैव[15] सूक्तादिः पूर्वेण सह संहित[16] एवमुत्तरेणापि सह सन्तानः प्राप्तः। तस्मादाह— शिष्टमुपसन्तनुयादिति ॥ ५ ॥

[शिष्टेनार्धर्चेनोत्तराया ऋच उपसन्तानम्]

शिष्टेनोत्तराम् ॥ ६ ॥

शिष्टेन अर्धर्चेन उत्तरामृचम् उपसन्तनुयात्। धनञ्जयम् (ऋ ६, १६, १५) इत्येतेनावसाने प्राप्ते उपसन्तानो विधीयते। उपसन्तानादनन्तरमवसानमिति[17] ॥६॥

१-१. प्रणवेत्युक्तेनैव ब[1]। †. अन्तरेण वि। ‡. ऋचान्तेनैव ब[1] मै पू। २. तु. आश्रौ १, २, १३। ३. नास्ति मै। ४. तु. आश्रौ २, १६, ५। ५. अतः ब[2]। ६. नास्ति ब[1]; सवनसूक्त° ब[2]। ७-७. नास्ति ब[1] वि। ८. तावदेवार्थः ब[3,4]; च दान्वार्थः वि। ९-९. नास्ति ब[1]। †. तस्यानन्त° ब[2-4] मै वि पू। १०-१०. इत्येतद् ब[1]; पुनन्ति धीरा अपसो मनीषा इत्येतद् ब[2-4] मै वि पू। †. तु. ऐब्रा १, १६ 'अथोत ब्रुवन्तु जन्तव इति'। ११. सामर्थ्यत्वाय ब[1] वि पू। १२-१२. सूक्तसमाप्तप्रणवेनेत्युच्यते मै; सूक्तसमाप्य (°प्तं ब[2]; °प्तः ब[3,4]; °प्त वि पू) प्रणवेन ब[2-4] वि पू। १३-१३. नास्ति मै। १४. नास्ति मै। १५. तथैव ब[3,4]। १६. सहिता मूको। १७. °रमसन्तान° ब[2] पू; °रमवसन्तान° मै।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[आरमणविधानं समन्वकपरिधानञ्च]

उत ब्रुवन्तु जन्तव, आ यं हस्ते न खादिनमित्यर्धर्चे आरमेत्, प्र देवं देववीतय इति द्वे, अग्निनाऽग्निः समिध्यते, त्वं ह्यग्ने अग्निना (ऋ ८, ४३, १४), तं मर्जयन्त सुक्रतुं (ऋ ८, ८४, ८), यज्ञेन यज्ञमयजन्त देवा इति परिदध्यात् ॥ ७ ॥

उत ब्रुवन्तु जन्तवः (ऋ १, ७४, ३) इत्येका। आ यं हस्ते न खादिनम् (ऋ ६, १६, ४०) इत्येतस्य अर्धर्चे आरमेत् विरमेत् आ संप्रैषात्। प्रह्रियमाणायानु ब्रूहि (तैसं ६, ३, ५, ४) इति सम्प्रैषः[1]। प्र देवं देववीतये (ऋ ६, १६, ४१-४२) इति द्वे ऋचौ अनुब्रूयात्। अग्निनाऽग्निः समिध्यते (ऋ १, १२, ६) इत्येवमादीनि त्रीणि प्रतीकानि इति[2] तिस्र एता ऋचो भवन्ति। यज्ञेन यज्ञमयजन्त देवाः (ऋ १, १६४, ५०) इति परिदध्यात् एतयर्चा परिधानं कुर्यात् ॥ ७ ॥

[सर्वत्रोत्तमाया ऋचः परिधानीयात्वम्]

[3]सर्वत्रोत्तमां परिधानीयेति विद्यात्[3] ॥ ८ ॥

सर्वत्रोत्तमाः परिदध्याद् इत्युक्ते का परिधानीयेति न [4]जानीमस्तस्मादिदमुच्यते। सर्वत्र सर्वकर्मसु अनुवचनाऽभिष्टवन-शस्त्रादिषु उत्तमा ऋचः परिधानीया इत्येवं विद्यात्[4]। परिधाय[5] तस्मिन्नेवासने[6] उपविश्य (आश्रौ २, १७, १०) इति, परिधानीयाया उत्तमे वचने (आश्रौ ७, १, १२), अक्षिणी मृजानः परिदध्यात् (आश्रौ ५, १४, २४), पुरस्तात् परिधानीयाया आवपेत (आश्रौ ९, ६, २)। सर्वत्र-ग्रहणमनुवचनाऽधिकारादनुवचनेष्वेव स्यात्, शस्त्रादिषु न स्यात्। यथा— नेदमादिषु मार्जनम् (आश्रौ ४, २, ६) इत्युक्ते इष्टिष्वेव प्रतिषेधो न पशौ ॥ ८ ॥

[धाय्यासंयाज्याप्रयाजान्तरादीनामावपनम्]

धाय्ये विराजौ नव प्रयाजाः प्रागुत्तमाच्चतुर आवपेत दुरो अग्न आज्यस्य व्यन्तू(न्तु-उ)षासानक्ताऽग्न आज्यस्य वीतां दैव्या होताराऽग्न आज्यस्य वीतां तिस्रो देवीरग्न आज्यस्य व्यन्त्विति ॥ ९ ॥

---

१. संप्रेषितः ब$^{2-4}$ मै वि ; त्रुटितम् पू। २. नास्ति ब$^{2-4}$ वि। ३-३. नास्ति ब^{1,2} मै वि पू। वेदव्रातव्याख्यादर्शनात् प्रतीयते यत् तन्मते सर्वत्रोत्तमाः परिधानीया इति विद्यात् इति सूत्रपाठः। ४-४. जानीयादित्येवं विद्याम ब^{1} वि। ५. परिधाय्य ब^{2} मै पू ; नास्ति ब^{1}। ६. तस्मात्तेवावसाने ब^{1} ; °वावसाने ब$^{2-4}$ मै वि पू।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

धाय्ये सामिधेनीषु धाय्ये भवतस्ते व्याख्याते[1]। [2]विराजौ विराजौ संयाज्ये[2] भवतस्ते अपि व्याख्याते[3]। नव प्रयाजाः। अस्यामिष्टौ नव[4] प्रयाजा भवन्ति। पञ्च प्राप्ताः। प्रागुत्तमाच्[5] चतुर आवपेत[5]। प्रकृतेषु[6] पञ्चसु प्रयाजेषु [7]उत्तमात् प्रयाजात् प्राक् चतुरः प्रयाजान् आवपेत्[7]। एवं ते नव भवन्ति। ते[8] वक्ष्यन्ते—[9]दुरो अग्ने[9] (मैसं ४, १०, ३) इत्येवमादयो यथा समाम्नाताश्चत्वारः। तेषां देवतायाः प्रविभागः[10]। तस्मात् पञ्चमः षष्ठ इति चोद्यते ॥ ९ ॥

[देवतानिर्देशः]

अग्निः सोमः सविता सरस्वती पूषा मरुतः स्वतवसो विश्वेदेवा द्यावापृथिवी ॥ १० ॥

अग्निःसोमः इत्येवमादियथासमाम्नाता[11] अष्टौ देवताः। तत्र सोमस्य अदृष्टादेशे नित्ये (आश्रौ २, १, ८) इति [12]वचनादाज्यभागयोर्नित्ये[12] प्राप्ते अङ्गत्वान्न भवतः। तस्मात् श्यामाकेष्टचां सोमस्य ये उक्ते[13] ते भवतः प्रधानत्वात्॥ १० ॥

[सवितुः पूष्णो मरुतां च धाय्याद्वयकथनम्]

आ विश्वदेवं सत्पतिं, वाममद्य सवितर्वाममु श्वः, पूषन्तव व्रते वयं, शुक्रं ते अन्यद् यजतं ते अन्यदिहेह वः स्वतवसः, प्र चित्रमर्कं गृणते तुरायेति ॥ ११ ॥

आ विश्वदेवं सत्पतिम् (ऋ ५, ८२, ७), [14]वाममद्य सवितर्वाममु श्वः[14] (ऋ ६, ७१, ६) [15]इति सवितुः[15], पूषन् तव [16]व्रते वयम्[16] (ऋ ६, ५४, ९), शुक्रं ते अन्यद् [16]यजतं ते अन्यद्[16] (ऋ ६, ५८, १) इति पूष्णः। इहेह वः स्वतवसः (ऋ ७, ५९, ११), प्रचित्रमर्कम्[17] (ऋ ६, ६६, ९) इति मरुतां स्वतवसाम्। आग्नेयस्य प्रकृतावुक्ते[18]। सरस्वत्या अन्वारम्भणीयायाम्[19]। विश्वेषां देवानाम्

---

१. तु. आश्रौ २, १, २६। २-२. मैवा संवाज्ये ब[1]; विराजौ (वैराजौ ब[2] पू) संयाज्ये (°ज्यौ ब[2]) ब[2] मै पू; विराजौ संयाज्ये विराजौ संयाज्ये ब[3,4]; विराजौ संयाज्ये विराजौ वि। ३. तु. आश्रौ २, १, ३०। ४. नास्ति ब[1]; त्रुटितम् पू। ५-५. नास्ति ब[1,2] मै पू। ६. °तेषु च ब[1]। ७-७. उत्तमा प्रयाजानावपेत् ब[1,4]; उत्तमात् (°न् पू) प्रयाजानावपेत् ब[3] वि पू। ८. ते एव ब[1]। ९-९. 'दुरो अग्ने' इत्यारभ्य 'व्यन्त्विति' इति पर्यन्तः सूत्रपाठः ब[3,4]। १०. विभागः ब[3,4]। ११. °मादियथाम्नाताः ब[1]; त्रुटितम् पू। १२-१२. °भागान्ते ब[1,2] मै पू; °भागयोः ब[3,4] वि; तु. आश्रौ १, ५, २९। १३. तु. आश्रौ २, ९, ९। १४-१४. नास्ति ब[1,2] मै पू। १५-१५. नास्ति मूको। १६-१६. नास्ति ब[1]। १७. चित्रम् ब[1] पू। १८. तु. आश्रौ १, ६, १। १९. आरम्भ° ब[1] पू; तु. आश्रौ २, ८, ३।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

चातुर्मास्यानि

Digitized by Madhuban Trust

आग्रयणे[1] द्यावापृथिव्योश्च। मरुतां शुद्धानामप्येते[2] एव, यथा प्रकृतावाग्नेयस्य दृष्टत्वात्[3] ॥ ११ ॥

[नवानामनुयाजानां कथनम्]

नवाऽनुयाजाः षळूर्ध्वं प्रथमाद् देवीर्द्वारो वसुवने वसुधेयस्य व्यन्तु। देवी उषासानक्ता वसुवने वसुधेयस्य वीताम्। देवी जोष्ट्री वसुवने वसुधेयस्य वीताम्। देवी ऊर्जाहुती वसुवने वसुधेयस्य वीताम्। देवा दैव्या होतारा वसुवने वसुधेयस्य वीताम्। देवीस्तिस्रस्तिस्रो देवीर्वसुवने वसुधेयस्य व्यन्त्विति ॥ १२ ॥

अस्यामिष्टौ नवाऽनुयाजा भवन्ति। [4]त्रयः [†]प्राप्ताः। षडूर्ध्वं प्रथमात्। प्रकृतास्त्रयस्तेषु[‡] प्रथमादूर्ध्वं षळुच्यन्ते। ते नव भवन्ति[4]। ते वक्ष्यन्ते—देवीर्द्वार इत्येवमादयो यथासमाम्नाताः[5] षळावापाः। देवादयोऽनुयाजाः[6] (आश्रौ १, ८, ३), वीतवत्पदान्ताः (आश्रौ १, ८, ४) इत्युक्तम्। [7]देवीर्द्वारो वसुवने वसुधेयस्य व्यन्तु, देवी उषासानक्ता वसुवने वसुधेयस्य वीताम्, देवी जोष्ट्री वसुवने वसुधेयस्य वीताम्, देवी ऊर्जाहुती वसुवने वसुधेयस्य वीताम्, देवा दैव्या होतारा वसुवने वसुधेयस्य वीताम्, देवीस्तिस्रस्तिस्रो देवी वसुवने वसुधेयस्य व्यन्तु (मैसं ४, १०, ३) इति[7] ॥ १२ ॥

[वाजिभ्यो यागः]

अनुयाजानां सूक्तवाकस्य शंयुवाकस्य वोपरिष्टाद् वाजिभ्यो वाजिनमनावाह्याऽऽदेशम् ॥ १३ ॥

अनुयाजानां[8] सूक्तवाकस्य शंयुवाकस्य वोपरिष्टात् त्रीणि स्थानानि वाजिनेज्यायाः। वाजिनो देवताः। तेभ्यो वाजिभ्यः वाजिनं नाम हविर्भवति। तस्य

---

१. आग्रहयणे ब[२] मै वि पू ; तु. आश्रौ २, ९, १३। २. तु. आश्रौ २, १४, २५। ३. अदृष्टत्वात् ब[३,४] ; इष्टत्वात् मै। ४-४. नास्ति मै। †. प्राप्तास्ते वक्ष्यन्ते ब[१-४] वि पू। ‡. प्राकृता ब[२-४] पू। ५. °मादिर्यथा (°यथा ब[१]) म्नाताः ब[१,२] मै पू। ६. °नूयाजाः ब[३] मै। ७-७. नास्ति ब[१,२] मै पू। ८. अनूया° ब[३,४] मै।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

इज्याविधानं[1] वक्ष्यते। तस्य शंयुवाकादुपरि क्रियमाणस्य उत्तमः स्वर एव भवति न मन्द्रः, अध्वर्युवशाद् आचार्योऽपि दर्शयति हारियोजने—तस्यान्तं श्रुत्वा (आश्रौ ६, ११, १६) इति। यदि[2] मन्द्रेण स्यात् तस्यान्तं श्रुत्वा इत्यनर्थकं स्यात्। अनावाह्याऽऽदेशम्। अनावाह्य वाजिनामावाहनमकृत्वा देवताऽऽदेशं च[3] कृत्वा यजन्ति[4]। इह वैश्वदेवी आमिक्षा भवति। तस्याः शेषो वाजिनम्। यथा आमिक्षा-देवतानामावाहनम्, एवं वाजिनदेवतानामप्यावाहनं प्राप्तम्, तत् प्रतिषिध्यते—अनावाह्येति। अथ वै खलु वाजिनो नावाहयेत् (आपश्रौ २४, १२, ३) इत्युक्तम् अन्येषाम्[5]। अन्येषामपि आवाहने प्रतिषिद्धे अन्ये[6] निगमाः प्राप्ताः, यथाचोदित-मनावाहिताः (आश्रौ १, ५, २४) इति वचनात् तेषामपि प्रतिषेधार्थमिदमुच्यते—आदेशमिति। सर्वाश्चाऽनुवाक्यावत्यः[7] (आश्रौ १, ५, ३०) इति प्राप्ते नियमः[8] क्रियते—आदेश एव भवति नाऽन्ये निगमा इति। केचित् सौमिकीभ्यश्च (आश्रौ १, ५, ३१) इति प्रतिषेधेऽपि वाजिनस्याऽऽदेशार्थं नियम इति। तस्य कारणं न पश्यामः। तस्मात् पूर्वोक्तमेव ॥ १३ ॥

[ऊर्ध्वज्ञुनाऽनवानं याज्याकरणम्]

शं नो भवन्तु वाजिनो हवेषु, वाजेवाजेऽवत वाजिनो न इत्यूर्ध्व-ज्ञुरनवानं याज्याम् ॥ १४ ॥

शं नो भवन्तु, [9]वाजेवाजे[9] (ऋ ७, ३८, ७ ; ८) इति याज्यानुवाक्ये। ऊर्ध्वे[10] जानुनी यस्य सोऽयम् ऊर्ध्वज्ञुर्भूत्वा[11] अनवानम् अनुच्छ्वासं[12] याज्यामाह। याज्याग्रहणाद् याज्यायामेव एष धर्मः, नाऽनुवाक्यायामिति ॥ १४ ॥

[सविकल्पमनुवषट्कारकथनं यत्र क्व चैकसम्प्रैषे द्वयोर्वषट्कारयोः समस्तयोर्द्विरनुमन्त्रणम्]

अग्ने वीहीत्यनुवषट्कारो वाजिनस्याग्ने वीहीति वा। यत्र क्व चैकसम्प्रैषे द्वौ वषट्कारौ समस्तावेव तत्र द्विरनुमन्त्रयेत ॥ १५ ॥

अग्ने वीहीत्यनुवषट्कारः। अग्ने वीहि (ऐब्रा १, २२) इत्ययं शब्दो अनुवषट्कार [13]इत्युच्यते। अनुवषट्कार[13] इति वचनाद् वषट्कारादनन्तरो भवति।

---

१. विद्याया विधानं वि। २. यदिदं ब^{1} वि पू। ३. नास्ति ब^{3,4}। ४. यजति ब^{2,3} मं। ५. नास्ति ब$^{1-4}$ वि पू। ६. अन्येपाम् ब^{1,2} मं पू। ७. पूर्वाश्चा° ब$^{1-4}$ मं वि ; त्रुटितम् पू। ८. निगमः ब^{2} ; त्रुटितम् पू। ९-९. वाजिन ब^{2} मं पू। १०. ऊर्ध्वंज्ञुः ऊर्ध्वे ब^{3,4} वि। ११. ऊर्ध्वंजानुर्भूत्वा मं। १२. अनुच्छ्वसन् ब^{1,3,4} ; त्रुटितम् पू। १३-१३. नास्ति ब^{1}।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

चातुर्मास्यानि

अप्रेषितश्च प्रतिपद्यते[1], याज्यासंज्ञश्च[2] भवति । [3]आगूः प्रतिषिद्धा[3] । तस्माद् वषट्कारे अन्ते च [4]प्लुतिः प्रथमं† ह्युक्तैव‡ । वाजिनस्याग्ने वीहीत्यनुवषट्कारो[4] भवति । विकल्पोऽयम्[5] । [6]यत्र क्व चैकसंप्रैषे द्वौ वषट्कारौ समस्तावेव तत्र द्विरनुमन्त्रयेत[6] । [7]यत्र क्व च[7] कर्मणि घर्मे सोमे सौत्रामण्यां च[8] एकस्मिन् संप्रैषे सति द्वौ वषट्कारौ भवतः । द्वे याज्ये भवत इत्यर्थः । समस्तावेव[9] । एवं हि सति द्वावेव[10] । उभावप्युक्तावेव[11] । तत्र तस्मिन् कर्मणि द्विरनुमन्त्रयेत द्विः वागोजो (आश्रौ १, ५, १७) ब्रूयात् । यत्र क्व चेत्युच्यते । अन्यथा वाजिने एव स्यात् । एकसंप्रैष इति वचनाद् नानासम्प्रैषे न[12] भवति । यथा द्वावनुयाजौ, पित्र्यायाम् । यदा एका[13] घृतयाज्या सौम्यस्य[14] भवति । तत्र [15]वषट्काराग्रहणे† याज्याग्रहणं येन ‡विवक्षितं तस्येति‡ नϕ वषट्कारस्य संप्रैषो विद्यते । याज्याया एव संप्रैषः । तस्माद्[15] [16]वषट्कारावित्युक्ते द्वे याज्ये[16] भवतः । तस्मादागूःप्रतिषेधो युज्यते । समस्तावेवेति । वषट्कारमुक्त्वोक्त्वाऽनुमन्त्रयते (आश्रौ १, ५, १७) इति वचनात् पृथगनुमन्त्रणे प्राप्ते समस्तावेवेत्युच्यते । एव-शब्दोऽवधारणार्थः । यत्रेत्युक्ते[17] तत्रेत्यवश्यं वक्तव्यम्[18] । समस्तावेव [19]तत्र । अनुमन्त्रयेतेत्युक्तेऽसकृदनुमन्त्रणे प्राप्ते द्विरनुमन्त्रयेतेत्युच्यते[19] ॥ १५ ॥

[उत्तरवषट्कारे आगूःप्रतिषेधः]

न चाऽऽगूरुत्तरस्मिन् ॥ १६ ॥

---

१. प्रपद्यन्ते (°न्त ब[2]) ब[1,2] ; प्रपद्यान्त पू ; प्रतिपद्यान्त मै । २. °संज्ञितश्च ब[1] मै ; °संज्ञतश्च ब[2] वि पू । ३-३. आगूःप्रतिषेधात् ब[2,3] मै वि पू ; तु. आश्रौ २, १६, १६ । ४-४. नास्ति मै । †. प्रथमे ब[1] ; त्रुटितम् पू । ‡. नास्ति ब[1,2] मै ; त्रुटितम् पू ; तु. आश्रौ १, ५, ८ । ५. विकल्पो ब[2] मै पू । ६-६. नास्ति ब[1,2] मै पू । ७-७. यत्र क्व चिद् यत्र ब[2-4] मै वि पू । ८. वा ब[2-4] मै वि पू । ९. समस्तौ ब[1,2] मै वि पू । १०. तावेव ब[1,2] मै पू । ११. उभावप्युक्तमेव ब[1] ; उभावप्युक्तैव ब[3,4] वि ; उभावनुक्तावेव मै । १२. नास्ति ब[1,3,4] वि । १३. एकं ब[1,2] मै वि पू ; एकां ब[3,4] । १४. सौम्यश्च ब[2-4] मै वि पू । १५-१५. नास्ति ब[1] । †. वषट्कारग्रहणं ब[3,4] ; ग्रहण वि ; त्रुटितम् मै । ‡-‡. विवस्तदस्येति ब[2] ; विवस्वदेतस्येळिति मै ; विवस्वदत्तस्येति पू । ϕ. न च ब[2] मै पू । १६-१६. °कारावित्युच्यते याज्या ब[1,2] मै पू ; °कारावित्युक्ते ते याज्या ब[3,4] वि । १७. °त्युक्ते च ब[1] । १८. कर्तव्यम् ब[1,3,4] पू । १९-१९. तन्त्रानुमन्त्रयेतेत्युक्ते सकृद° ब[3,4] वि ; तत्र द्विरनुमन्त्रयेतेत्युक्ते असकृद° ब[1,2] ; तत्र द्विरनुमन्त्रयेतेत्युक्तेऽसकृदनुमन्त्रयेतेत्युच्यते मै ; तत्र द्विरनुमन्त्रयेतेत्युक्ते असकृदनुमन्त्रतेत्युच्यते पू ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

उत्क्रमनुमन्त्रणम्[1]। आगूश्च उत्तरस्मिन् वषट्कारे न[2] भवति। याज्याधर्मे प्राप्ते प्रतिषेधः। च-शब्दः समुच्चयार्थः। यत्रैकः सम्प्रैषो द्वौ वषट्कारौ [3]तत्रैवोत्तरस्मिन्नागूर्न भवति[3]। [4]अनेकसंप्रैषे तु भवति[4] प्रस्थितयाज्यासु[5]। [न] उत्तरस्मिन्निति वचनात् पूर्वस्मिन्[6] भवति ॥ १६ ॥

[इष्टशिष्टं वाजिनमिडामिवाञ्जलौ प्रतिगृह्योपहवयाचनम्]

वाजिनभक्षमिळामिव प्रतिगृह्योपहवमिच्छेत ॥ १७ ॥

[7]वाजिनस्य भक्षो वाजिनभक्षस्तं[7] वाजिनभक्षम् इळामिव प्रतिगृह्य [8]एवमञ्जलिना प्रतिगृह्य[8] [9]उपहवमिच्छेत †वक्ष्यमाणेन विधानेन†। वाजिनाग्रहणे‡ अस्यामिष्टौ ϕसर्वभक्षेष्वयं न्यायः स्यात् ॥ १७ ॥

ϕकथमुपहवमिच्छेत्[9], तदुच्यते—

[अध्वर्युब्रह्माऽऽग्नीध्राणां समीपे उपहवयाचनम्]

अध्वर्य उपह्वयस्व ब्रह्मन्नुपह्वयस्वाग्नीदुपह्वयस्वेति ॥ १८ ॥

अध्वर्य उपह्वयस्वेत्यध्वर्युम्, ब्रह्मन्नुपह्वयस्वेति ब्रह्माणम्, अग्नीदुपह्वयस्वेत्याग्नीध्रम्। एवमेतत् प्रदर्शितम्। अनेन विधिना सर्वत्र वाजिनभक्षे समानभक्षिषूपहवमिच्छेत्[10] न[11] [12]प्रदर्शनमिति। कथं ज्ञायते। यजमानोपह्वयस्वेति[12] नोक्तत्वात्। यजमानः प्रत्यक्षम् (आश्रौ २, १६, २१) इति चोपहवक्रमश्च[13] प्रदर्श्यते[14]। मुख्यानामङ्गकर्तॄणां[15] च मध्ये अनुक्रमेणोपहवमिच्छेत्। एवं द्वितीयतृतीयचतुर्थेषु च[16] ज्ञापयति[17] प्रतिप्रस्थाता वाजिने तृतीयः (आश्रौ २, १७, १५) इति ब्रुवन् अन्ततो[18] यजमानोपह्वयस्वेति। तज्[19] ज्ञापयति यजमानः प्रत्यक्षम् इत्येतद्[20] ब्रुवन् ॥ १८ ॥

---

१. तु. आश्रौ १, ५, १७। २. नास्ति ब[2] मै। ३-३. °गूर्भ° ब[3,4] मै। ४-४. नास्ति ब[3,4]; त्रुटितम् पू; °षे न भ° ब[1]। ५. तु. आश्रौ ५, ५, २०। ६. °स्मिन्न मै। ७-७. नास्ति ब[1]। ८-८. नास्ति ब[1,4]। ९-९. नास्ति ब[1]। †-†. °णवि° ब[1,4] वि। ‡. वाजिनग्रहणे (°णं ब[1,4] वि) ब[2-4] मै वि पू। ϕ-ϕ. सर्वभक्षे समानं भक्षेषु ब[3,4]। १०. समानं भक्षेषू° ब[3,4]। ११. ननु ब[3]; ननुति ब[4]; ननुं वि। १२-१२. नास्ति ब[4]। १३. वाहक्रमेश्च ब[1] वि; वाहक्रमश्च ब[2] पू; वोहक्रमे (°म ब[4]) श्च ब[3,4]; वा आह। क्रमश्च मै। १४. प्रदर्शिते ब[1]; प्रदृश्यते ब[3,4]। १५. °कर्तृकाणां ब[3,4]; त्रुटितम् पू। १६. नास्ति ब[3,4]। १७. ज्ञप° वि। १८. अतो ब[3]; अतो यजमानोपदर्शनमिति कथं ज्ञायते ब[4]। १९. न ब[1]; तं ब[2] मै; एतत् ब[3,4]; त्रुटितम् पू। २०. इत्यतो ब[1-4] मै वि पू।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

चातुर्मास्यानि

Digitized by Madhuban Trust

[होतुः समन्त्रकं वाजिनगन्धग्रहणम्]

यन्मे रेतः प्रसिच्यते यद्वा मे अपि गच्छति यद्वा जायते पुनः। तेन मा वाजिनं कुरु। तस्य ते वाजिपीतस्योपहूतस्योपहूतो भक्षयामीति प्राणभक्षं भक्षयेत् ॥ १९ ॥

यन्मे रेतः इति समाम्नातेन मन्त्रेण प्राणभक्षं[1] भक्षयेद्धोता। प्राणो नासिकास्थानो वायुः, तेन भक्ष्यते। गन्धः प्राणभक्षः[2]। [3]पाणिनाऽन्तर्हिते उपहवादुपाकृते[3]। तत् प्राणेनाजिघृक्षत् (ऐब्रा २, ४, ३) इति श्रुतिः। अभिप्राण्योपह्वयस्वेदं वानुमन्त्रयेद् इति च प्राणभक्षं भक्षयेद्धोता ॥ १९ ॥

[अध्वर्युब्रह्माऽऽग्नीध्राणां वाजिनगन्धग्रहणम्]

एवमध्वर्युर्ब्रह्माऽऽग्नीध्रः ॥ २० ॥

[4]यथा होता प्राणभक्षं भक्षयेदेवमध्वर्युरपि† प्राणभक्षं‡ भक्षयेत्[4]। अध्वर्योः भक्षविधानं ब्रह्माऽऽग्नीध्रयोर्विवक्षार्थम्। ब्रह्माऽऽग्नीध्रः[5]। ब्रह्मा च एवं प्राणभक्षं [6]भक्षयेत्, आग्नीध्रश्च प्राणभक्षं भक्षयेत्[6] ॥ २० ॥

[यजमानस्यान्येषां च दीक्षितानां मुखेन वाजिनभक्षणम्]

यजमानः प्रत्यक्षमितरे च दीक्षिताः ॥ २१ ॥

[6]यजमानः प्रत्यक्षं[6] भक्षयेन्मुखेनैव। इतरे च दीक्षिताः। यजमानादितरे होत्रादयः। ते च प्रत्यक्षं भक्षयेयुः, यदि दीक्षिता भवन्ति ॥ २१ ॥

[पौर्णमासेष्टिप्रयोगादनन्तरं चातुर्मास्यप्रयोगविधानम्]

पौर्णमासेनेष्ट्वा चातुर्मास्यव्रतान्युपेयात् ॥ २२ ॥

प्रतिपदि पौर्णमासेनेष्ट्वा अनन्तरं [7]चातुर्मास्यानां व्रतानि[7] वक्ष्यमाणानि उपेयाद् उपगच्छेत्। यानि वक्ष्यामः[8]। चातुर्मास्यग्रहणाच्चातुर्मास्यं[9] संवत्सरे व्रतं[10] भवति[11], न तावत्कालमेव[12] ॥ २२ ॥

---

१. प्रत्यक्षं ब[1,4]। २. नास्ति ब[1,4]। ३-३. पाणिनाङ्कितमुपहवादन्यत् (°वादत् ब[2]; °वादयः मै; °वाद पू) प्राकृते (प्रकृते मै) ब[1,2] मै वि पू। ४-४. यथा होता प्राण भक्षयेत् ब[1]। †. °रधि ब[3]। ‡. नास्ति ब[1]। ५. नास्ति ब[1,2] मै पू। ६-६. नास्ति ब[1]। ७-७. °र्मास्यव्रतानि ब[1]। ८. वक्ष्यामि ब[1,4] वि। ९. °र्मास्य मै। १०. नास्ति ब[1-4]; त्रुटितम् पू। ११. भवन्ति ब[1,2] वि; त्रुटितम् पू। १२. तावत्कस्येमेव ब[1,2] वि; तावत्कल्पमेव मै; °°त्कल्पमेव वि।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[चातुर्मास्यप्रयोगात् पूर्वं केशनिवर्तनविधानम्]

केशान्निवर्तयीत ।। २३ ।।

केशान् निवर्तयीत[1] वापयीत[2] । अथवा निवर्तनं नाम केशसंस्कारः । संस्कारयीत ।। २३ ।।

[श्मश्रुवापनाधःशयनमधुमांसलवणस्त्रीसेवनदन्तधावननिषेधविधानम्]

श्मश्रूणि वापयीताधः शयीत मधुमांसलवणस्त्र्यवलेखनानि वर्जयेत् ।। २४ ।।

मुखे कक्षायां[3] च रोमाणि तानि श्मश्रूणि वापयीत अपनयीत[4] । अथवा सर्वाणि श्मश्रूणीत्युच्यन्ते[5] । एवकारोऽपि दृश्यते । अध्वर्यूणामप्युक्तम्—[6]निवर्तनेनोपवाप्य श्मश्रूण्येव वापयीत[6] (बौश्रौ २१, २ : ९)। अधः शयीत । [7]अधो भूमौ शयीत[7] । [8]मधुमांसलवणस्त्र्यवलेखनानि वर्जयेत्[8] । मधु च मांसं च लवणं च स्त्री च अवलेखनं च दन्तधावनम्, एतानि वर्जयेत् ।। २४ ।।

ऋतौ भार्यामुपेयात् ।। २५ ।।

प्रजार्थम् । अजातपुत्रश्चेदित्यृतौ[9] । ऋतावुपेयात् इत्येतावता[10] सिद्धे भार्यावचनं सवर्णाप्राप्त्यर्थम् । सवर्णामिवोपेयान्नाऽसवर्णामिति । चतुर्थीप्रभृत्या षोडश्या युग्मा युग्मा[11] इति ऋतुकालः[12] ।। २५ ।।

[सर्वेषु पर्वसु केशानां श्मश्रूणां च वापनमेव कार्यं न संस्कारमात्रमिति विकल्पः]

वापनं[13] [14]सर्वेषु पर्वसु[14] ।। २६ ।।

---

१. निवर्तयति (°ते ब^{1}) ब^{1,2} मै पू । २. नास्ति ब^{1,2} मै पू । ३. कक्षायाः ब^{1,2} वि पू । ४. अवनीयते ब^{1,2} मै ; अवपनीयन्ते ब^{3,4} वि ; त्रुटितम् पू । ५. इत्युच्यन्ते ब^{1} । ६-६. निवर्तनेनैव (°र्तनैव ब^{1}) श्मश्रूण्येव (°ण्यव ब^{2} ; °ण्ये पू) वाप (प ब^{3}) यन्ति (°ति ब^{1}) मूको । ७-७. नास्ति ब^{3,4} ; त्रुटितम् पू । ८-८. नास्ति ब^{1,2} मै पू । ९. °दित्यतो ब^{2} ; °दित्यनेन ब^{1,4} ; °दित्येतौ (°तो पू) मै पू । १०. इत्येव मै ; अपि तावता ब^{1,4} । ११. युग्मान् युग्मान् ब^{1,2} मै पू ; युग्मायुग्माम् ब^{1} ; युग्मामिव ब^{4} । १२. °कालं ब^{3} वि ; नास्ति ब^{4} ; तु. बौगृ ३, ७, ४५ । १३. वपनं ब^{2} मै पू ; नास्ति ब^{4} । १४-१४. सर्वे सु ब^{2} ; सर्वेषां प° मै ; नास्ति ब^{4} ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[1]अयमपरः कल्पः†। वापनमेव वा भवति केशानां श्मश्रूणां ‡चेति[1]। [2]अध्वर्यूणामप्युक्तम्— निवर्तनेनोपवाप्योभयं केशश्मश्रु† वापयीत‡ (बौश्रौ २१, २) इति। सर्वेषु पर्वस्विति पुनरुच्यते उत्तरसूत्रविवक्षार्थम्[2]॥ २६॥

[आद्यन्तयोः पर्वणोर्वा केशश्मश्रुवापनमिति विकल्पः]

[3]आद्योत्तमयोर्वा[3] ॥ २७॥

[4]आद्योत्तमयोर्वा पर्वणोर्वपनं†, न मध्ये इति[4]। अध्वर्यूणामप्युक्तम्—निवर्तनेनोपवाप्य नैव श्मश्रूणि वापयीत[5] न केशान् (बौश्रौ २१, २) इति॥ २७॥

॥ इति षोडशः खण्डः ॥

१-१. नास्ति ब[4]। †. कालः ब[1-4] वि; त्रुटितम् पू। ‡. वेति ब[4]।
२-२. नास्ति ब[1]। †. केशश्मश्रू ब[2-4] मै वि पू। ‡. वापयेत ब[2-4] मै वि पू।
३-३. नास्ति ब[1,2] मै; त्रुटितम् पू। ४-४. नास्ति ब[1]। †. पर्वणोः मै।
५. वापयति मूको।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ द्वितीयेऽध्याये सप्तदशः खण्डः

[वैश्वदेवीष्टितः पञ्चम्यां पौर्णमास्यां वरुणप्रघासैर्यागविधानम्]

पञ्चम्यां पौर्णमास्यां वरुणप्रघासैः ॥ १ ॥

आरम्भात् प्रभृति पञ्चमी पौर्णमासी, तस्यां वरुणप्रघासैर्यजेत[1]। वरुण-प्रघासा[2] इति पर्वणः[3] संज्ञा। वरुणप्रघासस्थाने द्व्यहः (आश्रौ ९, २, ८) इत्युक्ते एतस्य ग्रहणम्। पञ्चम्याम् इति संज्ञावचनादधिकमासे सति षष्ठ्यां न क्रियते ॥ १ ॥

[दार्शपौर्णमासिकाया वेदेः पश्चादुपविश्याध्वर्युणा प्रेषितोऽग्निप्रणयनीया ऋच आरभते]

पश्चाद्दार्शपौर्णमासिकाया वेदेरुपविश्य प्रेषितोऽग्निप्रणयनीयाः प्रतिपद्यते ॥ २ ॥

पश्चादपरस्यां दिशि। दर्शपौर्णमासयोर्भवा[4] दार्शपौर्णमासिका[5] वेदिः। तस्याः पश्चादुपविश्य अध्वर्युणा प्रेषितः। अग्निः प्रणीयते याभिर्ऋग्भिस्ता अग्नि-प्रणयनीया ऋचः। ताः प्रतिपद्यते प्रारभते[6]। वेदिबहुत्वाद् दार्शपौर्णमासिकायाः[7] इति विशेषवचनम्[8] ॥ २ ॥

अग्निप्रणयनीया वक्ष्यन्ते—

[आसीनस्य सप्रणवायाः प्रथमाया ऋच उपांश्वनुवचनम्]

प्र देवं देव्या धियेति तिस्रः, इळायास्त्वा पदे वयम्, अग्ने विश्वेभिः स्वनीक देवैरित्यर्धर्चं आरभेत्। आसीनः प्रथमामन्वाहोपांशु सप्रणवाम् ॥ ३ ॥

---

१. यजेति ब^{3}; यजति ब^{4}; यजते वि। २. °घासा ब^{3,4} वि।
३. °णोः ब^{1,2,3,4}। ४. °पूर्णमा° ब^{3,4} मै। ५. °पूर्णमा° ब^{3,4}; दर्श° मै पू।
६. प्रारभेतेति ब^{3,4}। ७. दर्शपूर्ण° ब^{3,4}; दर्शपौर्ण° ब^{2}; त्रुटितम् पू।
८. विशेषणं ब^{1}; विशेपोक्तवचनं ब^{3,4}।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्र देवं देव्या धिया (ऋ १०, १७६, २-४) इति तिस्रः ऋचः। इळायास्त्वा पदे वयम् (ऋ ३, २९, ४), अग्ने विश्वेभिः स्वनीक देवैः (ऋ ६, १५, १६) इति। एतस्या अर्धर्चमुक्त्वा आरमेद्, यावदग्निर्निधीयते। आसीनः प्रथमामन्वाहोपांशु सप्रणवाम्। अस्यानुवचनस्य [1]या प्रथम[1] ऋक् प्र देवं देव्या धिया इति तामासीनो ब्रूयात् सप्रणवाम् उपांशु। [2]उपविश्य (आश्रौ २, १७, २) इत्यासने प्राप्ते[2] आसीन[3] इति[4] पुनरुच्यते अनुव्रजन्नुत्तराः (आश्रौ २, १७, ६) इति[4] विवक्षार्थम्। अनुच्यमाने [5]प्रथमाया अपि अनुव्रजनं[5] प्राप्नोति। आगूःप्रणववषट्कारा उच्चैः[6] (आश्रौ २, १५, १२) इति प्राप्ते सप्रणवामित्याह ॥ ३ ॥

[उपांशुस्वरस्थानां स्वरान्तरस्थानसङ्क्रमणे प्रणवेनावसाय अनुच्छ्वस्य उत्तराया ऋच आरम्भः प्राणसन्ततत्वकथनञ्च]

तत्र स्थानात् स्थानसंक्रमणे प्रणवेनाऽवसायाऽनुच्छ्वस्योत्तरां प्रतिपद्यते ॥ ४ ॥ प्राणसन्ततं भवतीति विज्ञायते ॥ ५ ॥

तत्र यत्र स्थानात् [7]स्थानसंक्रमणे क्रियमाणे[7] [8]उपांशुस्थानादुच्चैः स्थानसंक्रमणे उच्चैःस्थानाद् वा† उपांशुस्थानसंक्रमणे‡ ϕक्रियमाणे[8] प्रणवेनाऽवसानं कृत्वा अनुच्छ्वस्योत्तराम् ऋचं[9] प्रतिपद्यते। प्राणसन्ततं भवतीति विज्ञायते श्रूयते। अग्निप्रणयनाऽधिकारात्[10] तत्रेत्युच्यते, [11]अन्यत्राऽपि प्राप्त्यर्थम्[11]। तत्र यत्र स्थानात् स्थानसंक्रमणं भवति [12]आज्ये† मानसे च† स्थानात् स्थानसंक्रमणं भवति[12]। अविशेषवचनादत्रापि[13] स्थानसंक्रमणं[14] भवति। उपांशूच्चयोः[15] वर्णसन्तानस्याऽसंभवात्[16] प्राणसंतानो विधीयते। स्थानात् स्थानसंक्रमणे इति वचनाद् उत्तमे एव वचने भवति। अन्यथा त्रिष्वपि[17] वचनेषु स्यात्। प्राणसंततं भवति इत्युक्ते कीदृशं प्राणसन्ततमिति[18] न ज्ञायते। तस्मादिदमुच्यते—

१-१. यत् (य ब[1]) प्रथमा (°म ब[1]) मूको। २-२. स्थानेन ब[1,2] मै वि पू; स्थाने ब[3,4]। ३. अन्वाह ब[3,4]। ४. नास्ति मै। ५-५. प्रथमापि अनुव्रजन्नेव ब[1,2] मै पू; प्रथमाया अनुव्रजेनं ब[3,4]; प्रथमापि तुर्जनेव वि। ६. नास्ति ब[1]। ७-७. °मणं क्रियते ब[1,2] मै वि पू। ८-८. नास्ति ब[3,4]। †. नास्ति मै। ‡. °णं ब[2]; °ण वि। ϕ. क्रियते ब[2]। ९. ऋ १०, १७६, ३। १०. °कारे ब[3,4] वि। ११-११. °ऽभिप्रा° ब[1,4]। १२-१२. नास्ति ब[1,4] मै। †-†. आद्या मानसेन च ब[1]; आद्ये मानसे व वि। १३. °दपि ब[1,2] मै पू। १४. °मणे मूको। १५. उपांश्वध्वर्यो (°र्योः वि) ब[1] वि पू; उपांशुमध्वर्योः मै; उपांशूर्ध्वयोः ब[2]। १६. °नस्याभावात् मै। १७. तेष्वपि ब[3,4]। १८. परमासन्त° ब[3,4] वि।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्रणवेनाऽवसायाऽनुच्छ्वस्योत्तरां[1] प्रतिपद्यते इति[2]। अवसायेति वचनादुच्छ्वसने[3] प्राप्ते अनुच्छ्वस्येत्याह [4]प्राणसन्ततं भवतीति[4] [5]श्रुतिवचनम्। तस्मात्[5] प्राणसन्तानः श्रौत एव न्यायात्[6] प्राप्नोति ॥ ४-५ ॥

[उत्तरमग्निमनुव्रजत उत्तराया ऋचोऽनुवचनम्]

उत्तरमग्निमनुव्रजन्नुत्तराः ॥ ६ ॥

दक्षिणश्चाऽग्निरुत्तरश्च[7]। तयोरुत्तरमेवाऽनुव्रजेद् अनुगच्छेत्। उत्तरा ऋचोऽन्वाह। [8]प्रथमाया उत्तरा याः†। उत्तरमग्निमिति‡ वचनाद् दक्षिणमग्निंϕ नाऽनुव्रजन्ति। आसीनः इत्यधिकाराद् अनुव्रजन् इत्याह[8]। [9]प्रथमाया अधिकारादुत्तरा[9] इत्याह[10]। उत्तरग्रहणे अक्रियमाणे प्रथमाया एव विकल्पः स्याद् आसीनः प्रथमामन्वाह अनुव्रजन् वा ॥ ६ ॥

[राजन्यवैश्ययोराद्ययोर्ऋचोऽनुवचनम्]

इमं महे विदथ्याय शूषम्, अयमिह प्रथमो धायि धातृभिरिति तु राजन्यवैश्ययोराद्ये ॥ ७ ॥

[11]इमं महे (ऋ ३, ५४, १), अयमिह† (ऋ ४, ७, १) इति तु‡ ϕइत्येते तुϕ। राजन्यवैश्ययोराद्ये¶ एते भवतः। आनन्तर्येण इमं महे इति राजन्यस्य, अयमिह इति वैश्यस्य[11]। तुकार-करणाद्[12] आद्यायाः[13] स्थाने भवतः। तुकारे व्यावर्तनार्थे अक्रियमाणे समीपे भवतः। यथा आगूर्वषट्कारौ। राजन्यवैश्ययोरिति वचनादितरा[14] ब्राह्मणस्य भवति। [15]शेषं समानम्[15] ॥ ७ ॥

[उत्तरस्या वेदेः पश्चादवस्थाय शिष्टाया ऋचोऽनुवचनम्]

पश्चादुत्तरस्या वेदेरवस्थाय ॥ ८ ॥

---

१. °सायोच्छ्वस्यो° ब[2] मं; त्रुटितम् पू। २. नास्ति मूको। ३. °नाच्छ्वसानेव ब[2]; °नाच्छ्वसनैव मं; °नाच्छ्वसनेव पू। ४-४. नास्ति मूको। ५-५. °चना ब[1]। ६. न्यायः ब[1] मं पू; न्यायाः ब[2]; न्यायात् ब[3,4]। ७. उत्तरस्य ब[1]। ८-८. नास्ति ब[4]। †. तु. ऋ १०, १७६, २; ३; ३, २९, ४; ६, १५, १६। ‡. उत्तरमिति मं पू। ϕ. °णाग्नि ब[2]। ९-९. नास्ति ब[1,2,4] वि। १०. नास्ति ब[1,2,4] वि। ११-११. इमं महे इति वैश्यस्य ब[1]। †. नास्ति वि। ‡. च ब[2-4] मं वि पू। ϕ-ϕ. नास्ति मं। ¶. °वैश्ययोर्यजमानयोराज्ये ब[2] पू; °वैश्ययोर्यजमानयोः मं। १२. तुभावकारणात् ब[1]; तुभावकरणात् ब[2]; तुभाव... पू; तुवकारकरणात् ब[1,4] वि। १३. आज्यायाः ब[2] पू; आस्यायाः मं। १४. तु. ऋ १०, १७६, १। १५-१५. नास्ति वि; त्रुटितम् पू।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

चातुर्मास्यानि
Digitized by Madhuban Trust

दक्षिणा च वेदिरुत्तरा च। तयोर्या उत्तरा वेदिस्तस्या उत्तरस्या[1] वेदेः पश्चादपरस्यां दिशि अवस्थाय शिष्टा ऋचो ब्रूयात्। उत्तरस्या इति वचनाद् दक्षिणस्या न भवति ॥ ८ ॥

[सोमेषु उत्तरवेदेः पश्चादवस्थाय शिष्टाया ऋचोऽनुवचनम्]

उत्तरवेदेस्तु सोमेषु ॥ ९ ॥

उत्तरवेदेस्तु आहवनीयस्याऽऽयतनम् उत्तरवेदिरित्युच्यते[2]। तस्या उत्तरवेदेः पश्चादवस्थाय शिष्टा ऋचोऽनुब्रूयात्[3], सोमेषु ज्योतिष्टोमादिषु औपवसथ्येऽहनि यदाऽग्निप्रणयनं[4] भवति। तु-शब्दो वेद्यधिकारव्यावृत्त्यर्थः। सोमग्रहणात् सोमेष्वेवोत्तरवेदेः पश्चादवस्थानम्। सोमादन्यत्र [5]वेदेरेव पश्चादवस्थानम्[5] ॥ ९ ॥

[यस्मिन्नेवासने पूर्वमनुवचनमारब्धं तस्मिन्नेवासन उपविश्य व्याहृतित्रयेण वाग्विसर्जनम्]

निहितेऽग्नौ सीद होतः स्व उ लोके चिकित्वान्नि होता होतृषदने विदान इति द्वे परिधाय तस्मिन्नेवाऽऽसन उपविश्य भूर्भुवः स्वरिति वाचं[6] विसृजेत ॥ १० ॥

[7]निहितेऽग्नौ सीद होतः (ऋ ३, २९, ८) इति ऋक्[7]। [8]नि होता (ऋ २, ९, १-२) इति द्वे[8] ऋचौ भवतः। परिधाय[9] उत्तमया[10] परिधानं कृत्वा तस्मिन्नेवाऽऽसने उपविश्य यस्मिन्नेवाऽऽसने अनुवचनं प्रारब्धम्, तत्र गत्वोपविश्य भूर्भुवः [11]स्वरित्येतेन मन्त्रेण[11] वाचं[12] विसृजेत। एतं मन्त्रं जपित्वा यथार्थं‡ यातिϕ। परिधायेति† वचनात् तदानीमेव वाग्विसर्गः[12]। एव-शब्दोऽवधारणार्थः[13]। तस्मिन्नेव नाऽन्यत्रेति। अत्र आसनस्य समानत्वात् पुनर्निरसनोपवेशने[14] न[15] भवतः ॥ १० ॥

[अन्यत्राप्यनुवचनानुव्रजनयोरेवं वाग्विसर्गः]

अन्यत्राऽपि यत्राऽनुब्रुवन्ननुव्रजेत् ॥ ११ ॥

---

१. नास्ति ब^{3,4} वि। २. °वेदिरुच्यते ब^{1} वि। ३. ऋचो ब्रूयात् ब^{1,4}; ऋचो न ब्रूयात् वि। ४. यदग्निप्र° ब^{1,2} मै पू; प्रणयनं ब^{3,4}। ५-५. वेदेरेव स्थानात् ब^{1,3,4}; °वस्थानात् ब^{2} मं; त्रुटितम् पू। ६. वचनं वि। ७-७. नास्ति ब^{1,2} मै पू; निहितोतरिति ऋक् वि। ८-८. निहिते सिद्धे ब^{3,4}; द्वे वि। ९. परिधाय्य मै। १०. उत्तमाया ब^{3,4}। ११-११. स्वरिति ब^{1,4}। १२-१२. नास्ति ब^{4}। ‡. यथा [य] थं ब^{1}। ϕ. जपति ब^{3}। †. °धाय्येति मै। १३. वधारणार्थः ब^{4}; त्रुटितम् पू। १४. तु. आश्रौ १, ३, ३२। १५. नास्ति ब^{3,4} मै वि।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अन्यत्राऽपि अन्येष्वप्यनुवचनेषु[1] यत्राऽनुब्रुवन् अनुव्रजेद् [2]अनुवचनं ब्रुवन् अनुव्रजेद्[2] अनुगच्छेत् सोमप्रवहणाऽग्नीषोमप्रणयनादिषु । तत्राऽपि परिधाय[3] तस्मिन्नेवाऽऽसने उपविश्य भूर्भुवः स्वरिति वाचं विसृजेत् । अपि-शब्दः[4] समुच्चयाऽर्थः । अग्नीषोमप्रणयनादिषु च[5] । अन्यत्रापि इत्येतावता प्राप्ते यत्राऽनुब्रुवन्ननुव्रजेद् इति न वक्तव्यम्, परिधाय[3] तस्मिन्नेवासन उपविश्य इत्येतेनैवाऽयमर्थः सिद्धः । एवं[6] सति तत्र अनुब्रुवन्ननुव्रजेद् इति वचनादनुवचनेभ्योऽन्यत्रापि अभिष्टवने घर्मेऽपि[7] परिधाय[8] वाचं विसृजेत् । यत्रानुब्रुवन्ननुव्रजेदिति तत्र वाचं विसृजेद् आञ्जनाग्निमन्थनादिषु ॥ ११ ॥

[तिष्ठतः संप्रैषे तिष्ठत एव वाग्विसर्गः]

[9]तिष्ठत्संप्रैषे तु[9] तथैव वाग्विसर्गः ॥ १२ ॥

[10]तिष्ठत्संप्रैषे तु[10] अनुवचने आसनाभावाद् वाग्विसर्गो न प्राप्नोति । तस्मादप्राप्तेऽयमारम्भः[11] तिष्ठत्संप्रैषे त्विति[12] । तु-शब्दो [13]विशेषविधेः समर्थः[13] । तिष्ठत्संप्रैष इति विशेषः । उपविश्य [14]भूर्भुवः स्वरिति[14] वाचं विसृजेत (आश्रौ २, १७, १०) इति प्राप्ते [15]तथैव वाग्विसर्ग इत्युच्यते[15] ॥ १२ ॥

[अग्निमन्थनादीष्टिः वैश्वदेवीष्टिवत् कार्या]

[16]अग्निमन्थनादि समाना वैश्वदेव्या[16] ॥ १३ ॥

[17]अग्निमन्थनादि† वैश्वदेव्या इष्ट्या वरुणप्रघासेष्टिः समाना तुल्या । अग्निमन्थनादि इत्यनुच्यमाने अग्निमन्थनं न‡ प्राप्नोति । यथा शुनासीरीये । अग्निमन्थनमन्यत्रϕ वैश्वदेवी स्यात् । अस्मात्¶ समाना वैश्वदेव्या इति वचनाद्[17]

---

१. अन्येष्वनुवचनेषु ब[1] ; अन्येष्वपि वचनेषु ब[3] । २-२. नास्ति ब[1] । ३. °धाय्य मै । ४. तु-शब्दः ब[1,2] मै ; त्रुटितम् पू । ५. वा वि । ६. नास्ति ब[1,2] मै पू । ७. घर्मेऽपि ब[1,4] वि पू ; घर्मे ब[2] मै । ८. °धाय्य मै । ९-९. °प्रैषेषु ब[1,4] BI आन. । १०-१०. °प्रैषेषु ब[1,4] । ११. °प्राप्तोऽयमा° ब[1-4] ; तस्मादप्रत्ययोऽयमा° मै । १२. तु तथैव वाग्विसर्गः ब[3,4] वि । १३-१३. विशेषविध्यर्थः आन. टिप्पण्याम् । १४-१४. नास्ति मूको । १५-१५. नास्ति ब[1] । १६-१६. नास्ति ब[1] मै । १७-१७. नास्ति ब[1] । †. °नादि कृत्वा ब[2] मै ; त्रुटितम् पू । ‡. नास्ति मै । ϕ. °नमन्या ब[2] मै ; °नमन्य वि ; नम०० पू । ¶. यस्माद् ब[2-4] मै वि पू ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

चातुर्मास्यानि

'धाय्ये[μ] विराजौ नव प्रयाजाः[⊛]। ता एव देवताः[⊛]। नवानुयाजाः[*]। विधानमेतत्[A] समानम्' ॥ १३ ॥

[वैश्वदेव्याः षष्ठ्यादीनां तिसृणां देवतानां हविषां स्थाने चतसृणां देवतानां हविषां विधानम्]

[२]हविषां तु स्थाने षष्ठप्रभृतीनामिन्द्राग्नी मरुतो वरुणः कः[२] ॥ १४ ॥

[३]वैश्वदेव्यां यानि[†] हवींषि[‡] तेषां षष्ठप्रभृतीनां[३] मरुतः प्रभृतीनां स्थाने इन्द्राग्न्यादीनि[४] चत्वारि आदिश्यन्ते। इन्द्राग्नी मरुतः वरुणः क इत्येतानि हवींषि भवन्ति। तु-शब्दो विशेषविधिसमर्थः[५]। हविःष्वेव[६] विशेषः, नान्यत्रेति[७] ॥ १४ ॥

उक्ता[८] देवतास्तासां याज्यानुवाक्याः—

[देवतानां याज्यानुवाक्याविधानम् प्रतिप्रस्थातुर्वाजिनभक्षणं च]

इन्द्राग्नी अवसा गतं, श्नथद् वृत्रमुत सनोति वाजं, मरुतो यस्य हि क्षये, अरा इवेद चरमा अहेव, इमं मे वरुण श्रुधि, तत्त्वा यामि ब्रह्मणा वन्दमानः, कया नश्चित्र आभुवद्, हिरण्यगर्भः समवर्तताग्र इति, प्रतिप्रस्थाता वाजिने तृतीयः ॥ १५ ॥

इन्द्राग्नी अवसा गतम् (ऋ ७, ९४, ७), श्नथत् (ऋ ६, ६०, १) इति इन्द्राग्न्योः। नित्ययोरपवादः। मरुतो यस्य (ऋ १, ८६, १), अरा इव (ऋ ५, ५८, ५) इत्येते मरुताम्। ऐन्द्रामारुत्यौ[९] ये उक्ते तयोरपवादः। इमं मे वरुण श्रुधि[१०] (ऋ १, २५, १९), तत्त्वा यामि (ऋ १, २४, ११) इति वरुणस्य। कया नश्चित्र [११]आ भुवद्[११] (ऋ ४, ३१, १), हिरण्यगर्भः (ऋ १०, १२१, १) इति कस्य। [१२]प्रतिप्रस्थाता वाजिने तृतीयः[१२]। प्रतिप्रस्थाता नामाऽध्वर्युपुरुषः। स वाजिने भक्षे तृतीयो भूत्वा भक्षयति। आग्नीध्रश्चतुर्थो भवति। तस्मादारम्भात् समानभक्षेषु[१३] मुख्येषूपहवमिष्ट्वा[१४] [१५]तेनैवानुक्रमेण द्वितीयतृतीयचतुर्थेषु[१५] उपहवः प्रदर्शितो भवति ॥ १५ ॥

१-१. नास्ति ब[१]। μ. वाद्ये ब[२] पू; बाधे मै। *. तु. आश्रौ २, १६, ९; १०; १२। A. वाजिना (°न मै) मेतद् ब[२] मै पू। २-२. नास्ति ब[१]। ३-३. नास्ति ब[१]। †. यानि यानि ब[३/४] मै वि। ‡. तु. आश्रौ २, १६, १०। ४. ऐन्द्रा (ऐन्द्रघा ब[४]) ग्ना (ग्न्या ब[१,३,४] मै वि) दीनि मूको। ५. विशेषसमर्थः वि; °विधिः समर्थः ब[१,२] पू। ६. हविष्ये (°ष्वे ब[१-१] मै पू) व मूको। ७. नान्यत्र ब[१,२] मै पू। ८. नास्ति ब[१]। ९. °त्याः ब[१,२] मै पू। १०. नास्ति ब[१]। ११-११. नास्ति ब[१]। १२-१२. नास्ति मै। १३. °नं भ° मूको। १४. मुखेषू° ब[१]; मुख्येषु मै। १५-१५. नास्ति मै।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[समाप्तायामिष्ट्यामृत्विजामवभृथं प्रतिगमनम्]

संस्थितायामवभृथं व्रजन्ति ॥ १६ ॥

संस्थितायां परिसमाप्तायाम् इष्ट्याम् अवभृथं व्रजन्ति गच्छन्ति सर्वे ऋत्विजः। अवभृथमिति [1]कर्मणो नामधेयम्[1]। तत् सोमप्रकरणे वक्ष्यते। संस्थितायामिति कर्मणोऽनुक्रममात्रम् इदमुच्यते। तत्रैष्टिकानि प्रायश्चित्तानि हुत्वा[2] संस्थाजपम्[3] [4]अकृत्वाऽवभृथं वक्तव्यम्[4], आसंस्थाजपात् (आश्रौ ६, १३, १६) इत्युत्तरत्र चोदितत्वात् ॥ १६ ॥

[अवभृथेष्ट्याः करणाकरणे विकल्पकथनम्]

तत्राऽवभृथेष्टिः कृताऽकृता ॥ १७ ॥

तत्र एतस्मिन् अवभृथकर्मणि[5] क्रियमाणा[6] इष्टिः अवभृथेष्टिः। सा कृताऽकृता भवति। क्रियते न क्रियते वा। यदन्यदवभृथकर्म[7], तत् सर्वं विद्यते एव[8] संस्थितायां पादानुदकान्तेऽवदध्युः (आश्रौ ६, १३, ८) इत्येवमादि संस्थाजपान्तम्[9]। [10]तत्रेति अवभृथं[10] निर्दिशति। अथासौमिकेष्ववभृथेष्टिः[11] कृताऽकृता स्यात्। अवभृथेष्टिरिति पुनरवभृथग्रहणे अक्रियमाणे वरुणप्रघासेष्टिरपि कृताऽकृता स्यात् ॥ १७ ॥

[अवभृथेष्टेरुपरिष्टाद् वक्तव्यत्वं चातुर्मास्याङ्गत्वेन द्वयोर्मासयोरैन्द्राग्नपशुनामकेष्टिविधानम्]

तामुपरिष्टाद् व्याख्यास्यामो द्वयोर्मासयोरैन्द्राग्नः पशुः ॥ १८ ॥

ताम् अवभृथेष्टिम् उपरिष्टाज्ज्योतिष्टोमान्ते[12] व्याख्यास्यामः। सोमप्रकरण एव श्रुतावाम्नाता यस्मात् तस्मादिह न[13] वक्ष्यते। द्वयोर्मासयोरैन्द्राग्नः पशुः। ततः[14] [15]वरुणप्रघासादूर्ध्वं द्वयोर्मासयोरैन्द्राग्नः[15] पशुर्भवति। चातुर्मास्य-संवत्सरस्य षण्मासेषु चोदितत्वान्नित्योऽयं षण्मास्य इति। एवं चेद् द्वयोः पशुरिति वक्तव्यम्।

१-१. कर्मनाम° ब^{1,4}। २. नास्ति ब^{1,2} मै पू। ३. आसंस्था° ब^{1,2} मै पू। ४-४. °भृथगतस्य ब^{3,6} वि। ५. °कर्मणि अवभृथे ब^{1,2} मै वि पू। ६. °माणे ब^{1} मै वि। ७. अभृथे ब^{1}। ८. नास्ति ब$^{2-4}$ मै वि पू। ९. तु. आश्रौ ६, १३, १७। १०-१०. तत्राप्यवभृथं मै। ११. अवभृथात्सोमेष्ववभृ° ब^{1}; अथासोमि° ब^{2} वि; अथ सौमिकेत्यव° ब^{1,4}; ...थात्सौमि° पू। १२. °ष्टोमावेव ब^{2} मै पू। तु. आश्रौ ६, १३। १३. नास्ति ब^{2}। १४. नास्ति ब^{3,4}। १५-१५. °सादूर्ध्वयोर्मा° ब^{3,4} वि; त्रुटितम् पू।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

चातुर्मास्यानि
Digitized by Madhuban Trust

यथा अशक्तौ पशुना (आश्रौ २, २०, ५) इति, [1]निर्मित ऐन्द्राग्नः (आश्रौ ३, ८, ४) इति वचनादैन्द्राग्न एव भवति[1] । [2]नित्यनिर्मित ऐन्द्राग्न आह इति । तस्मात् षण्मास्यो† ‡न भवति‡[2] । अपूर्व एवाऽयं चातुर्मास्येष्टिवत् । अपूर्वत्वादेव अस्य[3] स्थाने सोमे[4] वक्ष्यति— अग्निष्टोम ऐन्द्राग्नस्थाने (आश्रौ ९, २, १२) इति ॥ १८ ॥

॥ इति सप्तदशः खण्डः ॥

१-१. नास्ति ब[2] । २. नास्ति ब[1] । †. षाण्मास्यो ब[3,4] ; षाण्मासो वि ; षण्मासो मै । ‡-‡. नास्ति वि । ३. अस्या ब[1,2] वि । ४. सोमो ब[1] मै ; सोमं वि ; सोम ब[2] पू ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ द्वितीयेऽध्याये अष्टादशः खण्डः

[ऐन्द्राग्नपश्विष्टयनन्तरं द्वयोर्मासयोः साकमेधप्रयोगविधानम्]

तथा ततः साकमेधाः ॥ १ ॥

यथा वरुणप्रघासेभ्य ऊर्ध्वं द्वयोर्मासयोः [1]पशुस्तथा ततः तस्मात्[1] पशोरूर्ध्वं द्वयोरेव मासयोः साकमेधाः भवन्ति अधिकमासेऽपि सति। साकमेध[2] इत्येषा पर्वणः संज्ञा[3]। साकमेधस्थाने त्र्यहः (आश्रौ ९, २, १३) इत्युक्ते एतस्य[4] ग्रहणम् ॥ १ ॥

[साकमेधतः पूर्वेद्युरनुसवनमेकैकेष्टिविधानम्]

पूर्वेद्युस्तिस्र इष्टयोऽनुसवनम् ॥ २ ॥

[5]पूर्णमास्यां† प्रतिपदि वा ‡साकमेधा भवन्ति‡। यस्मिन्नहनि ϕभवन्ति, तस्मात् पूर्वेद्युःϕ[5] पूर्वस्मिन्नहनि[6] तिस्र इष्टयो वक्ष्यमाणाः क्रियन्ते अनुसवनम्। सवनं[7] सवनमनु[8] अनुसवनम्। प्रातः[9] प्रथमा, मध्यन्दिने द्वितीया, अपराह्णे तृतीया। ता[10] वक्ष्यति[11]। तिस्र इति संख्यानम् आनन्तर्ययोगे[12] भवति[13]। असंख्याने आनन्तर्यं न[14] प्राप्नोति। यथा पृष्ठ्याहान्यादितः (आश्रौ १०, १, ७) इति। तस्मादाह—पृथक्कामैः (आश्रौ १०, १, ७) इति ॥ २ ॥

[अनुसवनमिष्टीनां याज्यानुवाक्यादेवतानां कथनम्]

प्रथमायामग्निरनीकवाननीकवन्तमूतयेऽग्निं गीर्भिर्हवामहे। स नः पर्षदति द्विषः, सैनानीकेन सुविदत्रो अस्मे इति। उत्तरस्यां वृधन्वन्तौ मरुतः सांतपनाः सांतपना इदं हविः, यो नो मरुतो अभिदुर्हृणायुरिति। मरुद्भ्यो गृहमेधेभ्य उत्तराऽऽज्यभागप्रभृतीळान्ता ॥ ३ ॥

१-१. पशुष्वप्यतः तस्मात् ब[1]; पशुस्तथा एतस्मात् ब[3,4] वि; पशु... पू। २. °मेधा ब[1]। ३. नास्ति ब[2]। ४. एतस्याः ब[1]; त्रुटितम् पू। ५-५. नास्ति ब[1]। †. पौर्ण° ब[2] पू। ‡-‡. °मेधो भवति ब[2] मै वि पू। ϕ-ϕ. नास्ति मै। ६. नास्ति मै। ७. नास्ति ब[1,2] वि पू। ८. सवनम् ब[1] मै वि पू। ९. नास्ति ब[2] मै पू। १०. नास्ति ब[1,2] मै पू। ११. वक्ष्यन्ति (°न्ते मै) ब[1,2] मै पू। १२. °योगः ब[1,2] मै पू; अनन्तर्यागो ब[1,4]; तु. आश्रौ २, १, ६। १३. नास्ति ब[1,3] मै पू। १४. नास्ति वि।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

चातुर्मास्यानि

प्रथमायामग्निरनीकवान्[1]। प्रथमायाम् इष्टयां [2]विधानं वक्ष्यते†। प्रथमायामित्यनुच्यमाने सर्वासां विधानं स्यात्। अग्निरनीकवान् देवता। अनीकवन्तम् (खि ४, १४, १) इति समाम्नाताऽनुवाक्या। सैनानीकेन (ऋ २, ९, ६) इति याज्या। शेषं पौर्णमासेन। ‡उत्तरस्यां वृधन्वन्तौ‡। उत्तरस्यामिष्टयां[2] वृधन्वन्तावाज्यभागौ व्याख्यातौ। मरुतः सान्तपना देवताः[3]। सान्तपना इदम् (ऋ ७, ५९, ९), यो नो मरुतो अभि[4] दुर्हृणायुः[4] (ऋ ७, ५९, ८) इति याज्यानुवाक्ये। शेषं पौर्णमासिकम्। मरुद्भ्यो गृहमेधेभ्य[5] उत्तरा आज्यभागप्रभृतीळान्ता[6]। मरुतो गृहमेधा देवता। तेभ्य उत्तरा इष्टिरपराह्णे भवति, अस्तमिते वा[7]। सा वक्ष्यते। आज्यभागप्रभृति आज्यभागादिर्भवति[8]। इळान्ता सन्तिष्ठते। इळा अन्तो यस्याः सा इळान्ता ॥ ३ ॥

[गृहमेधानां मरुतां याज्यानुवाक्याकथनम्]

गृहमेधास आ गत, प्र बुध्न्या व ईरते महांसीति ॥ ४ ॥

गृहमेधास आ गत (ऋ ७, ५९, १०), प्र बुध्न्या वः (ऋ ७, ५६, १४) इति याज्यानुवाक्ये। मरुद्भ्यो गृहमेधेभ्यो[9] देवताभ्य इष्टिश्चोदिता। तस्या[10] देवताया [11]एव पूर्वे[11] याज्यानुवाक्ये आह ॥ ४ ॥

अनन्तरमाहाऽऽज्यभागौ[12]—

[पुष्टिमतोर्विराजयोर्निगदरहितसंयाज्यात्वम्]

पुष्टिमन्तौ विराजौ संयाज्ये अनिगदे ॥ ५ ॥

पुष्टिमन्तावाज्यभागौ। तौ [13]व्याख्यातौ†। विराजौ संयाज्ये अनिगदे[13]। विराजौ भवतो निगदवर्जिते। व्याख्याते[14]। [15]आगूरादेशयोरूर्ध्वं यो निगदः स न विद्यते[15]। [16]आगूर्याऽऽदिश्य ऋचा[16] यजति[17]। संयाज्याग्रहणमुत्तरसूत्रार्थम्

१. प्रथमायाम् ब[2] मै पू ; नास्ति ब[1]। २-२. नास्ति ब[1]। †. °ति मै। ‡-‡. नास्ति मै। ३. देवता मरुतः ब[1]। ४. नास्ति ब[1,2] मै पू। ५. °मेधिभ्य ब[1,3,4] ; °मेध्येभ्य ब[2] ; त्रुटितम् पू। ६. नास्ति ब[1,2] मै पू। ७. नास्ति ब[1]। ८. °दि भ° ब[1-4] मै वि ; त्रुटितम् पू। ९. °मेधिभ्य इति ब[1,3,4] वि ; °मध्येभ्य इति ब[2] ; °मेधेभ्य इति मै पू। १०. तस्माद् ब[2] मै ; तस्मा वि पू। ११-११. एवं पूर्वे ब[2] वि ; त्रुटितम् पू। १२. °रमाज्य° ब[1,2] मै पू। १३-१३. नास्ति ब[1,2] मै पू। †. तु. आश्रौ २, १, २७। १४. तु. आश्रौ १, ६, ३-५ ; २, १, ३०। १५-१५. नास्ति मै। १६-१६. आगूरा (आगूर्वा ब[3] मै) दिश्च ऋचौ च ब[2] मै पू। १७. तु. आश्रौ १, ५, २९।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अन्यत्राप्यनावाहने इति । तत्राप्यनिगदे एव[1] संयाज्ये भवतः । [2]अन्यथा विराजावेवाऽनिगदे भवतः इत्ययमर्थः† स्यात् । ‡संयाज्याग्रहणे सति यत्र ये[2] संयाज्ये भवतः ते तत्राऽनिगदे भवत इत्ययमर्थः सिध्यति ॥ ५ ॥

[आवाहनवर्जितासु सर्वास्विष्टिषु अनिगदे एव संयाज्ये प्रयोज्ये]

अन्यत्राऽप्यनावाहने[3] ॥ ६ ॥

अन्यास्वपीष्टिषु यत्राऽऽवाहनं न विद्यते तत्राप्यनिगदे एव[4] संयाज्ये भवतः । यथाऽवभृथेष्टचां पयस्यायां च । अपि-शब्दः समुच्चयार्थः । [5]इह च[5] अन्यत्र चेति ॥ ६ ॥

[पित्र्यायां पशौ च आवाहने सत्यपि अनिगदे एव संयाज्ये प्रयोज्ये]

आवाहनेऽपि पित्र्यायां पशौ च ॥ ७ ॥

[6]आवाहनेऽपि विद्यमाने पित्र्यायां पशौ च अनिगदे एव च संयाज्ये भवतः । अपि-शब्दः समुच्चयार्थः[6] । एवं[7] पशौ प्रैषेणोक्तत्वात् प्रतिषेधः पित्र्यायाञ्चेति[8] । एवं च-शब्दः समुच्चयार्थ एव[9] ॥ ७ ॥

[यस्यां रात्रौ गृहमेधीया कृता तत्र प्रभूतमन्नं देयमिति विधानम्]

बहु चैतस्यां रात्र्यामन्नं प्रसुवीरन् ॥ ८ ॥

बहु च [10]बहुतरं च एतस्यां रात्र्यां यस्यां† रात्रौ[10] [11]गृहमेधीया कृता[11] एतस्यामेव[12] रात्र्यां बहुतरमन्नं ब्राह्मणेभ्यः प्रसुवीरन् दद्युः । च-शब्दप्रयोगाद् बहु[13] बहुतरं चेति भवति । [14]†बहुशब्दः सर्वबहुत्वविषयः† । एतस्यां रात्र्यामिति वचनाद् रात्रौ गृहमेधीया‡ भवति[14] । अस्तमिते [15]गृहमेधीया(?) इत्यन्येषाम्[15] ॥ ८ ॥

[रात्रेः पश्चाद्भागे पौर्णदर्वसंज्ञकस्य हवनकर्मणो विधानम्]

तस्या विवासे पौर्णदर्वं जुहुयुः[16] ॥ ९ ॥

---

१. एवं ब[1] वि । २-२. नास्ति ब[1] । †. इत्यर्थः ब[1,4] । ‡. संयाज्ये प्र° ब[4] । ३. °ने इति ब[2] मै पू । ४. एवं ब[1] वि । ५-५. नास्ति ब[3,4] वि ; इह वा ब[1] । ६-६. नास्ति ब[3,4] वि । ७. तस्यां ब[1] । ८. °याश्चेति ब[1,2] मै वि पू । ९. एवं ब[1] मै पू ; नास्ति ब[1,4] वि । १०-१०. नास्ति वि । †. नास्ति ब[1] । ११-११. नास्ति वि । १२. एतस्यां ब[1] ; त्रुटितम् पू । १३. नास्ति ब[1,2] वि । १४-१४. नास्ति ब[1] । †-†. बहुशब्दस्य बहुत्वं विषयः मै । ‡. °धीयो मै । १५-१५. °धीय इत्य° ब[1] ; °धीयेत्यर्थः मै । १६. तस्या विवासे ब[1,2] पू मै ; पूर्णदर्व्यं (पौर्णदर्वं वि) जुहुयातस्तस्या (°त तस्या ब[4] ; जुहु तस्या वि) विवासे कुर्युः ब[1,4] वि ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

चातुर्मास्यानि

Digitized by Madhuban Trust

यस्यां[1] रात्रौ गृहमेधीयं तस्या एव रात्रेर्विवासकाले[2], विवसन्ति प्रबुध्यन्ते[3] भूतानि यस्मिन् अस्मिन्[4] काले[5] पौर्णदर्वं[6] जुहुयुः। विवासकाल एव एतानि निमित्तानि ॥ ९ ॥

[वृषभरवे श्रूयमाणे पौर्णदर्वहोमकालविधानम्]

ऋषभे रवाणे ॥ १० ॥

ऋषभे रवाणे[7] पौर्णदर्वं[8] जुहुयुः ॥ १० ॥

[मेघगर्जने श्रूयमाणे पौर्णदर्वहोमविधानम्]

स्तनयित्नौ वा ॥ ११ ॥

स्तनयित्नुर्मेघः। स्तनयित्नौ रवाणे पौर्णदर्वं[8] जुहुयुः। वेति विकल्पार्थे[9] ॥ ११ ॥

[ब्रह्मपुत्रशब्देनाऽऽग्नीध्रस्य सम्बोधने रवप्रवर्तने उक्तहोमकालविधानम्]

आग्नीध्रं हैके[10] रावयन्ति ब्रह्मपुत्रं वदन्तः ॥ १२ ॥

आग्नीध्रम् एके आचार्या रावयन्ति [11]शब्दं कारयन्ति[11]। [12]जुहुधीत्याहाऽऽग्नीध्रः। तस्मिन्निमित्ते पौर्णदर्वं† जुहुयुः। कस्मादाग्नीध्रं ‡रावयन्ति[12]। तस्य हेतुरुच्यते। ब्रह्मपुत्रं वदन्तः। ब्रह्मणः पुत्रो ब्रह्मपुत्रः[13]। ब्रह्मपुरुष इत्यर्थः। ब्रह्मपुरुष इति वदन्तः। ब्रह्मणः पुरुषः[14] (?) इति हि[15] श्रुतिः। ब्रह्मपुरुषो ब्रह्मण एव[16] पुत्रः[17]। ब्रह्मा जुहुधि (काश्रौ ५, ६, ३३) इत्यन्येषाम्[18] ॥ १२ ॥

[अध्वर्युभिः प्रेरिते होतरि याज्यानुवाक्याविधानम्]

यदि होतारं चोदयेयुस्तस्य याज्यानुवाक्ये। पूर्णादर्वि परापत

---

१. यस्याः ब[१,२] मै वि पू। २. रात्री वि° ब[१,२] मै पू। ३. °ध्यन्ति मूको। ४. नास्ति ब[२-४] मै वि। ५. नास्ति ब[१]। ६. पूर्णदर्वीं (°र्व्यं ब[३,४]; °र्वं वि) ब[१,३,४] वि; पौर्णदर्वीं ब[२]। ७. रुवाणे वि पू। ८. पूर्णदर्व्यं (°र्वं वि) ब[१,४] वि। ९. °र्थः ब[३,४] वि। १०. एके ब[१,२] पू। ११-११. नास्ति मै। १२-१२. नास्ति मै। †. पूर्णदर्वं (°र्व्यं ब[३,४]) ब[३,४] वि; त्रुटितम् पू। ‡. °यन्ति शब्दं कारयन्ति ब[४]। १३. नास्ति ब[१,२]। १४. शब्दः ब[१,३,४] मै वि; त्रुटितम् पू। १५. नास्ति ब[१,४]; त्रुटितम् पू। १६. एवं ब[३,४]। १७. नास्ति मूको। १८. तु. आपश्रौ ८, ११, २०।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सुपूर्णा पुनरापत । वस्नेव विक्रीणावहा इषमूर्जं शतक्रतो । देहि मे ददामि ते नि मे धेहि नि ते दधे (वासं ३, ४९-५०) । अपामित्यमिव संभरकोऽम्बा ददते ददिति ।। १३ ।।

[1]पौर्णदर्वं दर्वीहोमो[1] भवति । यदि वषट्कारप्रदानं[2] भवति तदर्थमिदमुच्यते । यदि होतारमध्वर्यवश्चोदयेयुः [3]अनुब्रूहीत्याहुः । तस्य[3] पौर्णदर्वस्य[4] याज्यानुवाक्ये वक्ष्येते[5] पूर्णादर्वि इति यथासमाम्नाते ।। १३ ।।

[मरुतां क्रीडिनामिष्टिप्रक्रमः]

मरुद्भ्यः क्रीळिभ्य उत्तरा ।। १४ ।।

मरुतः क्रीळिनो देवताः । तेभ्यो मरुद्भ्यः[6] उत्तरा पौर्णदर्वादुत्तरा[7] इष्टिर्भवति । सा[8] वक्ष्यते ।। १४ ।।

[मरुतां क्रीडिनामाज्यभागकथनम्]

उत ब्रुवन्तु जन्तवोऽयं कृत्नुरगृभीत इति परोक्षवार्त्रघ्नौ ।। १५ ।।

उत ब्रुवन्तु जन्तवः (ऋ १, ७४, ३), अयं कृत्नुरगृभीतः (ऋ ८, ७९, १) इति परोक्षवार्त्रघ्नसंज्ञौ आज्यभागौ भवतः ।। १५ ।।

[मरुतां क्रीडिनां याज्यानुवाक्याकथनम्]

क्रीळं वः शर्धो मारुतमत्यासो न ये मरुतः स्वञ्चः ।। १६ ।।

क्रीळं वः (ऋ १, ३७, १), अत्यासः (ऋ ७, ५६, १६) इति मरुतां क्रीळिनां याज्यानुवाक्ये भवतः ।। १६ ।।

१-१. पू (पौ वि) र्णदर्वि (°र्वी वि) होमो ब[3,4] वि ; °होमे ब[1,2] पू । २. °रः प्र° ब[1,2] वि पू ; °रं प्र° ब[4] ; °रप्रधनं मै । ३-३. अनुब्रू याज्याहुतं स्यात् ब[1] ; अनुब्रूत्याज्या (°त्या ब[2] मै) हुवस्य ब[2] मै पू ; अनेन याज्याहुतस्य वि । ४. °दर्व्यस्य ब[3,4] पू । ५. वक्ष्यन्ति (°न्तः मै ; न्तो ब[2] ; °न्ते वि पू) ब[1] ; तक्ष्यते ब[3,4] । ६. मरुद्भ्यः क्रीळिभ्यः ब[1] । ७. नास्ति मूको । ८. पौ (पू वि) र्णदर्वादुत्तरा सा ब[1,2] मै वि पू ; पूर्णादर्वी उत्तरा सा ब[3,4] ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

चातुर्मास्यानि

[मरुतां क्रीडिनां संयाज्याकथनम् माहेन्द्रीष्टिविधानञ्च]

जुष्टो दमूना, अग्ने शर्ध महते सौभगाय इति संयाज्ये । वाजिनावभृथवर्जं माहेन्द्रयुक्ता वरुणप्रघासैः ॥ १७ ॥

जुष्टो दमूनाः (ऋ ५, ४, ५), अग्ने शर्ध (ऋ ५, २८, ३) इति संयाज्ये । शेषं पौर्णमासेन । वाजिनावभृथवर्जं माहेन्द्र्युक्ता । वाजिनं च अवभृथं च वाजिनावभृथे वाजिनाऽवभृथे वर्जयित्वा । माहेन्द्रीष्टिः, महेन्द्रो[1] यस्याः प्रधानः, सा माहेन्द्रीष्टिः । सा उक्ता वरुणप्रघासैः । सा क्रैळिनादनन्तरा भवति[2] । वरुणप्रघासैः[3] अतिदेशादग्निप्रणयनम्[4], अग्निमन्थनम्, नव प्रयाजाः, धाय्ये, विराजौ । ता एव देवताः । नवानुयाजाः[5] । वाजिनं[6] प्रतिषिद्धम्[7] अवभृथं च[8] ॥ १७ ॥

[माहेन्द्रीष्टयाः हविर्देवतानां कथनम् याज्यानुवाक्याविधानञ्च]

हविषां तु सप्तमादीनां स्थान इन्द्रो वृत्रहेन्द्रो महेन्द्रो वा विश्वकर्मा ॥ १८ ॥ आ तू न इन्द्र वृत्रहन्, आ नु ते दायि मह इन्द्रियाय, विश्वकर्मन् हविषा वावृधानो, या ते धामानि परमाणि यावमेति ॥ १९ ॥

माहेन्द्रं[9] [10]वरुणप्रघासैः सर्वं व्याख्यातम्[10] । हविषां तु स्थाने अन्यानि हवींषि वक्ष्यन्ते । षडेव वारुणप्रघासिकानि[11] अग्निः सोमः सविता[12] सरस्वती पूषेन्द्राग्नी इति एतानि षट् । सप्तमादीनां स्थानेऽन्यानि[13] वक्ष्यन्ते । इन्द्रो वृत्रहेन्द्रो महेन्द्रो वा त्रयो विकल्पाः । अध्वर्युवशादन्यतमेन विकल्पेन[14] सप्तमी देवता । विश्वकर्मा अष्टमी देवता । एवमष्टौ देवता भवन्ति । तु-शब्दो विशेषव्यावृत्त्यर्थः[15] अयन्तु[16] विशेषः । शेषं समानमिति ॥ १८ ॥

---

१. माहेन्द्रो ब$^{2-4}$ वि ; त्रुटितम् पू । २. क्रौळिनादनन्तरं ब^{1} ; क्रीडनादनन्तरं मै ; क्रौळिना° ब^{3,4} पू । ३. °घासे ब^{3,4} । ४. इति दर्शना° ब^{3,4} । ५. अनुयाजाः ब^{1} ; नवानूयाजाः ब^{4} मै । ६. वाजिनः (°न ब^{1}) ब^{1,2} मै पू । ७. प्राप्तनिषेधः ब^{1} ; प्राप्तप्रतिषिद्धम् ब^{2} मै पू । ८. नास्ति ब^{1,2} मै पू ; वा वि । ९. नास्ति ब^{1,3,4} । १०-१०. नास्ति ब^{1} । ११. वरुणप्रघासानि ब^{1} । १२. नास्ति ब^{2} । १३. स्थानेऽन्या ब^{3,4} वि ; त्रुटितम् पू । १४, °ल्पे स ब^{1} ; °ल्पेन स वि ; °ल्पेन न ब^{3,4} । १५. विषयव्या° ब^{1} ; ...व्या° पू । १६. अयं मै ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[1]आ तू न इन्द्र वृत्रहन् (ऋ ४, ३२, १), अनु ते दायि मह इन्द्रियाय (ऋ ६, २५, ८) इतीन्द्रस्य वृत्रहणे याज्यानुवाक्ये[†] । इन्द्रस्य च महेन्द्रस्य च नित्याः । विश्वकर्मन् हविषा वावृधानः (ऋ १०, ८१, ६), या ते धामानि[1] परमाणि[2] (ऋ १०, ८१, ५) [3]इति विश्वकर्मणः[3] ॥ १९ ॥

॥ इति अष्टादशः खण्डः ॥

१-१. नास्ति ब[1] । †. °नुवाक्या ब[2] मं पू । २. नास्ति ब[1,2] पू । ३-३. विश्वकर्मा ब[1] ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

चातुर्मास्यानि

अथ द्वितीयेऽध्याये एकोनविंशः खण्डः

[दक्षिणाग्नेरतिप्रतीतेऽग्नौ पित्र्येष्टिविधानम्]

दक्षिणाग्नेरग्निमतिप्रणीय पित्र्या ॥ १ ॥

[1]माहेन्द्रचा यो विहारः[1] तस्मिन्नेव विहारे[2] यो[3] दक्षिणाग्निस्तस्माद् [4]दक्षिणाग्नेः अग्निमतिप्रणीय[4] तस्मिन्नतिप्रणीतेऽग्नौ पित्र्या इष्टिः क्रियते। तस्मादारम्भाद् दक्षिणाग्नावतिप्रणीते वा[5] कर्म क्रियते इति दर्शितं भवति। पित्र्येति [6]इष्टेः संज्ञा[6]। दक्षिणे मार्जालीये पित्र्या (आश्रौ ९, २, १७) इत्युक्ते[7] एतस्या ग्रहणम् ॥ १ ॥

[शंयुवाकपर्यन्तं पित्र्येष्टिरिति विधानम्]

सा शंय्वन्ता ॥ २ ॥

[8]सा पित्र्या शंय्वन्ता भवति। शंयुवाकः अन्तो यस्याः सा शंय्वन्ता भवति। शंय्वन्ता इति सिद्धे सा शय्वन्ता इति पुनरुच्यते, सा एव पित्र्या शंय्वन्ता भवति[8], न माहेन्द्रीति। माहेन्द्री प्रकृता एव ॥ २ ॥

[पित्र्याया लुप्तजपात्ववषट्कारानुमन्त्रणाभिहिङ्कारराहितत्वकथनम्]

लुप्तजपा होतारमवृथा वषट्काराऽनुमन्त्रणाऽभिहिङ्कारवर्जम् ॥ ३ ॥

१-१. महेन्द्राया विहारे ब[१,२] ; महेन्द्रयोर्विहारे ब[३,४] ; मा (म पू) हेन्द्राविहारे मै पू। २. विहारे वृहत्परिक्रियते (वृहत्पक्रियते ब[२] पू ; क्रियते मै) तस्मादुच्यते दक्षिणाग्नेरिति ब[१,२] मै पू ; विहरेत् वि। ३. नास्ति मूको। ४-४. दक्षिणाग्निमति (°ग्निरमिति ब[२] ; °ग्निमिति मै वि पू) प्रणीय मूको। ५. नास्ति ब[१] ; त्रुटितम् पू। ६-६. इष्टिसंज्ञा मै। ७. इत्युच्यते ब[२] मै पू। ८-८. सा शंय्वन्तां भवति (पित्र्या शंय्वन्ता भवति पू) ब[१] पू ; सा शंय्वन्ता पित्र्या भवति (सा शंय्वन्ता इति सा शंय्वन्ता पित्र्या शंय्वन्ता भवति ब[३,४])। शंयुवाकः अन्तो यस्याः सा शंय्वन्ता भवति। सा शंय्वन्ता इति पुनरुच्यते (पुनरुच्यते ब[२]), सा एव पित्र्या शंय्वन्ता भवति ब[२-४] ; सा शंय्वन्ता पित्र्या शंय्वन्ता भवति। पुनरुच्यते, सा एव पित्र्या शंय्वन्ता भवति। शंयुवाकः अन्तो यस्यास्सा शंय्वन्ता भवति। पुनरुच्यते सा एव पित्र्या शंय्वन्ता भवति मै ; सा शंय्वन्ता इति पुनरुच्यते। सा एव पित्र्या शंय्वन्ता भवति। शंयुवाकः अन्तो यस्याः सा शंय्वन्ता भवति। सा शंय्वन्ता इति पुनरुच्यते। सा एव पित्र्या शंय्वन्ता भवति वि।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

लुप्यन्ते जपा यस्याः सा लुप्तजपा पित्र्या । जपाऽनुमन्त्रणाऽऽप्यायनोपस्थानान्युपांशु[1] । मन्त्राश्च[2] कर्मकरणाः[3] सर्वे जपा इत्युच्यन्ते, उत्तरत्र वषट्काराऽनुमन्त्रणाऽभिहिङ्कारवर्जम्[4] [5]इति वचनात्[5] ।

[6]होतारमवृथा† वषट्काराऽनुमन्त्रणाऽभिहिङ्कारवर्जम्‡[6] । [7]अभिहिङ्कारो व्याहृतिजपो[7] यः, इत्येतान् त्रीन् वर्जयित्वा येऽन्ये जपाः सर्वे लुप्यन्ते । होतारमवृथाः (आश्रौ १, ४, १०) इति निगद एवाऽयमुपांशु प्रयुज्यते । [8]यथा इळोपहूता (आश्रौ १, ७, ७) इति[8] । तस्मान्न लुप्यते । वाक् च वै प्राणापानौ च वषट्कारस्त एते वषट्कृते वषट्कृते व्युत्क्रामन्तिताननुमन्त्रयेत (ऐब्रा ३, ८) इति श्रुतिः । तस्मान्न लुप्यते । [9]जपहिङ्कारयोः †अभिहिङ्कारसंज्ञा । तस्मादभिहिङ्कारो जपो† न लुप्यते[9] ॥ ३ ॥

[अन्यत्र प्राङ्मुखं कर्तव्यानां कर्मणां पित्र्येष्ट्यां दक्षिणामुखत्वमन्यासां दिशां च तत्क्रमेण परिवर्तनम्]

तस्यां प्राञ्चि कर्माणि दक्षिणा ॥ ४ ॥

[10]इतराणि तथाऽन्वयम्[10] ॥ ५ ॥

[10]अस्यामिष्टौ यानि प्राञ्चि कर्माणि तानि[10] दक्षिणाऽनुगतानि[11] तथेतराण्यपि कर्माण्यनुगच्छन्ति । दक्षिणां दिशं प्राचीं कृत्वा इतरा दिशो यथा संभवन्ति तथा प्रयोक्तव्यानि । ब्रह्मयजमानौ प्राङ्मुखौ भवतः ॥ ४-५ ॥

[पित्र्यायां सामिधेनीमन्त्ररूपेण उशन्तस्त्वेत्यस्य त्रिरनुच्छ्वासं जपः]

उशन्तस्त्वा निधीमहीत्येतां त्रिरनवानं ताः सामिधेन्यः ॥ ६ ॥

उशन्तस्त्वा निधीमहि (ऋ १०, १६, १२) इत्येतामृचमनुच्छ्वसन् अनुब्रूयात्[12] । ता अस्यामिष्टौ सामिधेन्यो भवन्ति, प्राकृतीनां[13] पञ्चदशानां स्थाने

---

१. °स्थानानि मूको । २. नास्ति मूको । ३. तु. आश्रौ १, १, २० ; २१ । ४. °मन्त्रणवर्जम् ब[२-४] मै वि पू । ५-५. नास्ति ब[१] । ६-६. नास्ति ब[१] । †. तु. आश्रौ १, ४, १० । ‡. तु. आश्रौ १, ५, ७ । ७-७. °ङ्कारैर्व्याहृतिजपो ब[१] ; °ङ्कारे व्याहृतिभि जपो ब[२] ; °ङ्कारे व्याहृतिजपो मै पू ; °ङ्कारव्यावृत्तिः ब[३,४] । ८-८. य (त ब[१] पू) था इ (हि ब[१]) लोपह्वतेति (°पह्वे ब[१] मै ; °पहुते ब[२] पू ; लापहुतेति वि) मूको । ९-९. नास्ति ब[२] । †-†. अभिहिङ्कारो (°रो यो ब[४]) जपो ब[३,४] वि ; तु. आश्रौ १, २, ३ ; ४ । १०-१०. नास्ति ब[१,२] मै पू । ११. अनुपगतानि ब[१] ; अनुगतानि ब[२] मै पू । १२. नास्ति मूको । १३. प्रकृतीनां मूको ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

समानजातिन्यायेन । एतामिति वचनाद्[1] एका ऋग्भवति । †पञ्चदश प्रकृतौ† । ‡पञ्चदशत्वात् पादग्रहणे‡ कृतेऽपि ताः सामिधेन्य इति बहुवचनादेवमादिपञ्चदशैव प्राप्नुवन्ति । अनवानं च अविशेषवचनात् ϕप्राकृतं प्राप्तम्ϕ[1], त्रिरनवानमित्याह । ताः सामिधेन्य इति वचनात् ता एव सामिधेन्यो भवन्ति । अन्यथा न[2] ज्ञायेत[3] [4]किमेतामिति । प्रकृते तूक्ते[4] एतामिति वक्तव्यम् । ता इत्यनुच्यमाने[5] तासां सामिधेनीसंज्ञा न[6] प्राप्नोति । एतां[7] त्रिरनवानं सामिधेन्यः । एतामृचमुक्त्वाऽनन्तरं प्राकृतीः[8] सामिधेनीः अनुब्रूयादित्यर्थः [9]स्यात्, तस्मात् ता[9] इत्याह ॥ ६ ॥

[सामिधेनीनामन्ते आवहेत्यादेरुपसन्तानम्]

तासामुत्तमेन प्रणवेनाऽऽवह देवान् पितॄन् यजमानायेति प्रतिपत्तिः ॥ ७ ॥

तासां सामिधेनीनामुत्तमो यः प्रणवः अन्त्यः प्रणवस्तेन उत्तमेन प्रणवेन आवह देवान् पितॄन् यजमानाय इति एतां प्रतिपत्तिमुपसन्तनुयात् । तासामधिकारे तासाम् इति न वक्तव्यम् । इदं प्रयोजनम् । आगूःप्रणववषट्काराः (आश्रौ २, १५, १२) इत्युच्चैः[10] प्रणवाः प्राप्ताः, ऋचस्तु उपांशु । तासां प्रणवेनेति सम्बन्धवचनादुपांशुप्रणवा भवन्ति । प्रतिपद्य देवताः (आश्रौ १, ३, ६) इति वचनात् प्रकृतौ प्रतिपत्तिरिति सिद्धे पुनः प्रतिपत्तिः इति वचनादुत्तमेन प्रणवेन प्रतिपत्तिरेव संधीयते । लुप्यते शेषो निगदः[11] । अतः सहकारिणः सर्वत्र देवशब्दं[12] पितृसंयुक्तं कुर्वन्ति । पृथिवि देवपितृयजनि (आपश्रौ ८, १३, ६) इति[13] यथा[14] तेषां वचनम् । अस्माकमपि आवह देवान् पितॄन् यजमानाय इत्याम्नातम् । एतत् प्रदर्शनमिति मत्वा सर्वत्रैवं पितृशब्दान्[15] मन्यन्ते । यथा देवाः पितर आज्यपाः[16] (?) इति । तत्तु[16] न कर्तव्यं वचनाभावात् । आम्नायस्तु वचनं न भवति । वचनं[17]

१-१. वचनात् प्रागृचं ब[1] ; वचनात् ब[2] । †-†. नास्ति ब[3,4] वि ; °प्रकृत्योः मै । ‡-‡. पञ्च ...ग्रहणे पू । ϕ-ϕ. प्रागृचं मै पू । २. नास्ति मै । ३. ज्ञायते पू ; ज्ञाते ब[3,4] वि । ४-४. किमेतामुत (°क पू) प्रकृतीत्युक्ते (प्रकृती इति इत्युक्ते ब[3,4] वि पू ; प्रकृतिरित्युक्ते मै) मूको । ५. इत्यनूच्य° मूको । ६. नास्ति मूको । ७. तां ब[1,2] मै ; त्रुटितम् पू । ८. प्रकृतीः ब[1,2] मै वि पू । ९-९. स्यातां ब[1] । १०. एवोक्तिः- ब[1] ; एवोच्चैः- ब[2] मै पू ; उच्चैः- ब[3,4] । ११. तु. आश्रौ १, ३, ६ । १२. देवताः (°ता ब[3]) शब्दं ब[1,3,4] ; देवा (देवी मै) शब्दं ब[2] मै पू । १३. तु. मासं ३, ५ । १४. तथा ब[2] मै । १५. °शब्दो ब[1] ; शब्दा ब[2-4] मै पू । १६-१६. आज्यपानां (°नं मै) तु (त ब[1]) ब[1,2] मै पू ; आज्यपानां तु इति ब[3,4] वि ; तु. आश्रौ १, ५, २४ ; ९, ५ । १७. नास्ति ब[3,4] वि ; त्रुटितम् पू ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्रदर्शनं[1] भवति। यदि मन्त्राम्नायप्रदर्शनं प्रमाणं स्याद् आवह देवान् सुन्वते यजमानाय (आश्रौ ५, ३, ७) इत्युक्त्वा आवाहनादि सुन्वच्छब्दोऽग्रे यजमानशब्दात् (आश्रौ ५, ३, ७) इति न वक्तव्यं भवति। यथा तत्र वचनादाम्नायो वचनं च [2]उभयम्, नैवमिह चोद्यते[2]॥ ७ ॥

[अग्नेः कव्यवाहनस्यावाहनम्]

अग्निं होत्रायावह स्वं महिमानमावह इत्येतस्य स्थाने अग्निं कव्यवाहनमावाहयेत् ॥ ८ ॥

अग्निं होत्रायावह स्वं महिमानमावह (आश्रौ १, ३, २२) इत्येतस्य [3]निगदस्य स्थाने[3] अग्निं कव्यवाहनं देवतामावाहयेत्। आवाहने उक्तो विधिरुत्तरेषु निगमेषु[4] न प्राप्नोति, यथा[5] एकप्रदानासु। तस्मादुत्तरेष्वपि निगमेषु निगमनं विधीयते ॥ ८ ॥

[उत्तमे प्रयाजे आज्यपेभ्यः पूर्वं कव्यवाहनाग्निनिगमनम्]

[6]उत्तमे चैनं[6] प्रयाजे प्रागाज्यपेभ्यो निगमयेत् ॥ ९ ॥

[7]आवाहने निगमनमुक्तमग्नेः कव्यवाहनस्य †उत्तमे च† प्रयाजे एतमग्निं कव्यवाहनं प्रागाज्यपेभ्यो निगमयेत्[7]। च-शब्दः समुच्चयार्थः। प्रकृतावपि दृश्यमानमिह विधीयते चेति[8] सामर्थ्यात्। इदं दृष्ट्वा प्रकृतावपि केचित् प्रागाज्यपेभ्यो निगमनं मन्यन्ते। तन्न[9], वचनाभावात्। यथेह वचनं तथा [10]वचनं तत्र[10] न विद्यते; न च[11] तत्र देवता अपि[12] निगम्यमाना[13] दृश्यन्ते। सर्वेषु निगमेषु यथाम्नाता एव[14] [15]निगम्यन्ते यथार्थः स्यात्। स्वं महिमानम् (आश्रौ १, ६, ५) इत्येतस्याऽपि सूक्तवाके निगमनं कर्तव्यम्। न च क्रियते। तस्माद् यथाम्नात† एव[15] ॥ ९ ॥

---

१. प्रदर्शितं ब[3,6]। २-२. उभयत्रैवमिहोच्यते ब[1] वि; उभयत्रैवमिह चोद्यते ब[2,3] मै पू; उभयत्रैवमिहोद्यते ब[6]। ३-३. निगदस्याने ब[2-4] मै पू। ४. नास्ति ब[2] वि। ५. नास्ति ब[1,2] पू। ६-६. उत्तमे वैनं ब[3,4]; उत्तमो (°म ब[2]) वैनं ब[2] वि; उत्तरमेवैनं मै; त्रुटितम् पू। ७-७. नास्ति ब[1-4]। †-†. उत्तमेव वि; उत्तरमेव पू। ८. नेति ब[2] मै पू; तेति ब[3,6]। ९. तत्र ब[1-4]; त्रुटितम् पू। १०-१०. तत्र वचनं मै। ११. नास्ति ब[1,6] वि। १२. अथो ब[1,2] पू। १३. निगम्यते सा न ब[1]। १४. एवं ब[1]। १५-१५. नास्ति ब[1,3]। †. °तम् मै।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

चातुर्मास्यानि

[सूक्तवाकेऽग्निर्होत्रेणेत्यस्य स्थाने कव्यवाहनाग्निनिगमनम्]

[1]सूक्तवाके चाऽग्निर्होत्रेणेत्येतस्य स्थाने ॥ १० ॥[1]

[2]सूक्तवाके च अग्निर्होत्रेण (आश्रौ १, ९, ५) इत्येतस्य निगदस्य† स्थाने अग्निं कव्यवाहनं[2] [3]निगमयेत्। च-शब्दः अधिकारसमुच्चयार्थः। प्रागाज्यपेभ्यः (आश्रौ २, १९, ९) इति †अधिकारे प्राप्ते† अग्निर्होत्रेणेत्येतस्य स्थाने[3] आह[4] ॥ १० ।

[कार्यार्थमन्त्रलोपेऽपि कार्यालोपप्राप्तौ कार्यस्यापि प्रतिषेधः]

नेह प्रादेशः ॥ ११ ॥

इह अस्यां[5] पित्र्यायां प्रादेशो[6] न विद्यते। यानि कर्मप्रधानानि तेषु लुप्तेऽपि मन्त्रे कर्म प्रवर्तते कर्मप्रधानत्वात्[7]। तस्मात्[8] कर्माऽपि प्रतिषिध्यते, नेह प्रादेशः इति। एवं चेन्निरसनादीन्यपि कस्मान्न लुप्यन्ते इति। तान्यपि अस्मादेव वचनाल्लुप्यन्ते[9]। कथम्। न प्रादेशः इति सिद्धे इह वचनादिह-प्रभृतीनि। तस्मान्निरसनादीन्यपि लुप्यन्ते॥ ११ ॥

[पित्र्यायां बर्हिष्मतोः प्रयाजानुयाजयोः होतुरिडाभक्षणस्य च प्रतिषेधः]

न बर्हिष्मन्तौ प्रयाजाऽनुयाजौ नेळायां भक्षभक्षणम् ॥ १२ ॥

बर्हिश्शब्दवन्तौ[10] प्रयाजाऽनुयाजौ[11] न[12] भवतः। चतुर्थः प्रयाजः प्रथमश्चाऽनुयाजः[13]। तस्माच्चत्वारः[14] [15]प्रयाजा भवन्ति, द्वावनुयाजौ[15]। [16]नेळायां भक्षभक्षणम्[16]। इळायां[17] [18]होतुर्भक्षस्य भक्षणं न विद्यते[18]। [19]अन्येषां ब्रह्मादीनां भक्षणं विद्यते[19]। इळायां भक्षप्रतिषेधः प्रकृतिविकृत्यर्थम्। अवान्तरेळायां[20] चैवं,

---

१-१. त्येतस्य ब[2]। २-२. नास्ति ब[1,2]। †. निगमस्य वि पू।
३-३. नास्ति ब[1,2]। †-†. °कारप्राप्ते ब[3,4] वि पू। ४. नास्ति ब[2]।
५. अस्मिन् मूको। ६. तु. आश्रौ १, ३, २२। ७. °प्रधानकत्वात् ब[1,2] मै; °प्रधानकृत्वात् पू। ८. नास्ति ब[1]। ९. °चनान्न लु° ब[1] पू; वा लु ब[2]; °चना लु° ब[3,4] वि। १०. तु. आश्रौ १, ५, २४; ८, ७। ११. °नूयाजौ ब[3] मै। १२. नास्ति ब[1]। १३. नास्ति ब[1,2]; °नूयाजौ ब[3,4] मै।
१४. तस्माच्चतुरः ब[1-4] मै वि; तस्मा... पू। १५-१५. नास्ति ब[1,4] वि।
१६-१६. नेळायां ब[1,2] मै पू; नेळायां भक्षणं ब[3,4]। १७. नास्ति ब[2-4] मै वि पू।
१८-१८. नास्ति ब[3,4] वि। १९-१९. नास्ति ब[2]। २०. °न्तरेळां नेव (नैवं ब[3,4] वि; नैव पू; तेनैव मै) मूको।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

कृतार्थत्वात् । प्रकृतौ विकृतौ[1] च होतुरिळाभक्षो[2] न विद्यते । भक्षणम्[3] [4]इत्येक-वचनस्य निर्देशादेकस्यैव[4] भक्षस्य निर्देशो न सर्वेषाम् । यदि सर्वभक्षाणां[5] प्रतिषेधः स्याद् [6]उत्तरत्र प्राणभक्षवचनम्[6] अनर्थकं स्यात् । अविशेषवचनाद्धोतुर्भक्षस्यैव[7] प्रतिषेधो नाऽन्यस्य ॥ १२॥

[पित्र्यायामिडाभक्षणे मार्जनाभावकथनम्]

न मार्जनम् ॥ १३ ॥

मार्जनं[8] च सर्वेषां न विद्यते ॥ १३ ॥

[सूक्तवाके यजमाननामादेशप्रतिषेधः]

न सूक्तवाके नामाऽऽदेशः ॥ १४ ॥

सूक्तवाके नामाऽऽदेशो[9] न विद्यते ॥ १४ ॥

[अध्वर्युणेक्षिते उक्ते वा होतुरुपवेशनविधानम्]

ईक्षितः सीद होतरिति वोक्त उपविशेत् ॥ १५ ॥

ईक्षितः अध्वर्युणा ईक्षित उपविशेत् । सीद होतः इति वोक्त उपविशेद्[10], विकल्पः ॥ १५ ॥

[सव्यपादमुपस्थस्योत्तरतः कृत्वोपविष्टानां प्राचीनावीतिनामृत्विजां जीवातुमतोराज्ययो-र्हविर्भिश्चरणम्]

जीवातुमन्तौ सव्योत्तर्युपस्थाः प्राचीनावीतिनो हविर्भिश्चरन्ति ॥ १६ ॥

जीवातुमन्तावाज्यभागौ भवतः । तौ व्याख्यातौ[11] । सव्योत्तर्युपस्थाः प्राचीनावीतिनो हविर्भिश्चरन्ति । सव्यपाद उत्तर उपस्थस्य । सव्योत्तर्युपस्थो येषां त इमे[12] सव्योत्तर्युपस्थाः । प्राचीनावीतमेषां विद्यते ते प्राचीनावीतिनः । प्राचीनावीतिनश्च भूत्वा हविर्भिश्चरन्ति[13] ऋत्विजः । आज्यभागाभ्यां [14]पूर्वाणि यानि हवींषि तैरेवंभूताः† चरन्ति । हविर्ग्रहणाद्धविःष्वेवंभूताश्चरन्ति‡, न सर्वत्र[14] ॥ १६ ॥

---

१. नास्ति ब[१,२] । २. °ळाया भक्षो मै । ३. भक्षणस्य मूको । ४-४. °चननि° ब[२] मै वि पू ; °चनानि° ब[३,४] । ५. भक्षाणां ब[३,४] । ६-६. उत्तर-प्राण° ब[२-४] मै वि पू । ७. हविशेष° ब[१] । ८. नास्ति ब[४] । ९. तु. आश्वौ १, ९, ५ । १०. तु. आश्वौ १, ३, ३१ । ११. तु. आश्वौ २, १०, २ ; ३ । १२. इतीमे ब[३,४] । १३. हविर्भिश्च ब[२] मै पू । १४-१४. नास्ति ब[१,२] । †. तैरेव भूत्वा ब[३,४] । ‡. °द्धविश्चैवंभू° ब[३,४], °द्धविस्वेवंभू° वि ; त्रुटितम् पू ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

चातुर्मास्यानि

[पित्र्यायामाग्नीध्रस्य विहारस्य पश्चिमतोऽध्वर्योश्च पूर्वतोऽवस्थानं द्वयोर्द्वयोरनुवाक्ययोरनुच्छ्वसताध्यर्धर्चस्य च जपः]

दक्षिण आग्नीध्र उत्तरोऽध्वर्युर्द्वे द्वे अनुवाक्ये अध्यर्धामनवानम् ॥ १७ ॥

ऊर्ध्वमाज्यभागाभ्यां[1] [2]दक्षिण आग्नीध्रो[2] [3]भवति। विहारस्य[3] दक्षिणतः परस्यां[4] दिशि प्राङ्मुखो भवति। उत्तरोऽध्वर्युः[5]। विहारस्य उत्तरत उत्तरोऽध्वर्युर्यजति। प्राच्यां दिशि प्रत्यङ्मुखो भवति। येषामुत्तरो[6] यजमानो भवति, तैः सह प्रयोगे ब्रह्मणाऽपि[7] तथा भवितव्यं साहचर्यात्। सव्यावृतौ ब्रह्मयजमानौ (आश्रौ ३, ३, ६) इति वचनात्। [8]साहचर्याद्धोता स्वस्थान[8] एव, वचनात्। केषां चिद्धोता[9] दक्षिणस्यां भवति, तथा[10] तेषां वचनात्। अस्माकं तु [11]वचनं न[11] विद्यते। द्वे द्वे अनुवाक्ये[12]। [13]ऊर्ध्वमाज्यभागाभ्याम् एकैकस्या देवताया द्वे द्वे अनुवाक्ये भवतः। एकैका †चानुवाक्या[13] (आश्रौ २, १६, २८) इति प्राप्तम्। अध्यर्धामनवानम्। अर्धेनाधिकामृचम् अध्यर्धामृचम्[14] अनवानं ब्रूयात्। एवमध्यर्धामुक्त्वाऽवस्येच्छिष्टेन प्रणुयात्। अनुवाक्ये इति [15]वचनाद् †अनुवाक्यान्यायेन[15] पृथक्प्रणवेनावसाने प्राप्ते अध्यर्धामनवानमित्याह। समाप्तौ प्रणवेनावसानम् (आश्रौ १, २, १३) इत्युक्तम्। इह तु आनवान्यादवसानाभावात्[16] प्रणवनिवृत्तिः ॥ १७ ॥

[आश्रावणप्रत्याश्रावणसम्प्रैषविधानम्]

ओं स्वधेत्याश्रावणम्। अस्तु स्वधेति प्रत्याश्रावणम्। अनुस्वधा स्वधेति संप्रैषः ॥ १८ ॥

---

१. नास्ति ब[1,2]। २-२. °णाग्नी° ब[2]। ३-३. नास्ति ब[2]। ४. अपरस्यां ब[3]। ५. उत्तरतोऽध्वर्युः ब[1,2] मै ; उत्त... पू। ६. एषामु° ब[3,4] ; °मुत्तरतो ब[1]। ७. ब्रह्मणोऽपि ब[2-4] मै वि पू। ८-८. °चर्याद्विनस्वस्थान ब[1] वि ; °चर्याद्वितं (°त पू) स्वस्थान ब[2] पू ; °चर्याद्धि तस्य स्थान मै। ९. °द्धोतुः मै पू। १०. यथा ब[1] वि। ११-११. वचनं तु वचन ब[1] ; वचनं तु ब[2] ; न ब[3,4] ; वचनं मै ; वचनं तु वचनं न वि ; ...नं पू। १२. °क्ये अध्यर्धामनवानम् ब[1,3,4] वि। १३-१३. नास्ति ब[1,2] मै पू। †. याज्यानुवाक्यो ब[1] ; नु याज्या अनुवाक्ये ब[3,4] वि। १४. नास्ति ब[3,4] मै पू। १५-१५. खान्विती (खन्विती ब[2] ; खात्वीति मै ; °ति ब[4]) तदनुवाक्या- (तनुदनुवाक्या—ब[3] मै ; तदनुवाक्या- वि पू ; तनुवाक्या- ब[4]) न्यायेन मूको। †. तु. आश्रौ २, १४, २९ ; ५, ५, २। १६. अनवानाद° ब[2-4] ; °दवसायाभा° ब[1]।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ॐ स्वधेत्याश्रावणम् । हविषां तु ॐ स्वधेत्याश्रावणं भवति । [1]प्रत्याश्रावणविवक्षार्थमिदमुच्यते—अस्तु स्वधेति । तत्प्रत्याश्रावणं भवति आग्नीध्रस्य । [2]अनुस्वधा स्वधेति संप्रैषः[2] । अनुस्वधा, स्वधेति[3] संप्रैषौ[4] भवतः[5] । अनुस्वधेत्यनुवाक्यासंप्रैषः, स्वधेति याज्यायाम् । संप्रैषवशाद् याज्यानुवाक्यानां संप्रैषौ वक्तव्यौ ॥ १८ ॥

[आगूर्वषट्कारयोः प्रयोगविधानम्]

ये स्वधेत्यागूः, ये स्वधा मह इति वा स्वधा नम इति वषट्कारः ॥ १९ ॥

ये स्वधेत्यागूर्भवति याज्यादौ नित्याया आगुरः स्थाने । ये स्वधा महे इत्यागूर्भवति इति[6] विकल्पः[7] । [8]स्वधा नम इति वषट्कारः[8] । स्वधा नम इति हविषि[9] वषट्कारो याज्यान्ते भवति [10]नित्यस्य स्थाने । तत्स्थाने चोदितत्वात्[10] तद्धर्मः[11] । तद्धर्मत्वाद् वषट्काराऽनुमन्त्रणत्वं नित्यं भवति । प्लुतयस्तु न प्राप्नुवन्ति, शब्दाऽन्यत्वात् ॥ १९ ॥

[प्लुतीनां नित्यत्वकथनम्]

नित्याः प्लुतयः ॥ २० ॥

ब्रूहिप्रेष्यश्रौषड्वौषडावहानामादेः (पा ८, २, ९१) इति प्लुतिरुक्ता शब्दान्तरे[12] न[13] प्राप्नोति । तस्मान्नित्याः प्लुतय इत्युच्यन्ते[14] । यावता प्लुतयः तयोरादी प्लावयेत् (आश्वौ १, ५, ७) इत्येवमादयः शब्दाऽन्यत्वेऽपि सति ता नित्या भवन्ति ॥ २० ॥

[पित्र्यायां देवतानां निर्देशः]

पितरः सोमवन्तः, सोमो वा पितृमान्, पितरो बर्हिषदः, पितरोऽग्निष्वात्ता यमः ॥ २१ ॥

---

१. प्रत्याश्रावणार्थमि° ब^{3,4} ; प्रत्याश्रावण...... पू । २-२. नास्ति ब^{1,2} मै पू ; अनुस्वधेति संप्रैषौ ब^{3,4} वि । ३. नास्ति ब^{3,4} वि । ४. संप्रैषौ ब^{1,2} मै पू । ५. भवति ब^{2} मै । ६. नास्ति मूको । ७. °ल्पः स्वधाकारः ब^{1} । ८-८. नास्ति ब$^{1-4}$ मै पू । ९. हविष ब^{1} ; नास्ति ब^{3,4} । १०-१०. नित्यस्य (नित्य ब^{3,4} पू ; नित्यं मै) स्वानि तत्स्थाने (स्थाने तत्स्थाना ब^{2} ; स्थानिन स्थानि ब^{3}; स्थानि ब^{4} ; स्थाने तत्स्थान मै ; स्थानि तत्स्थानि वि ; स्थाने तत्स्थाने पू) चोदितत्वात् मूको । ११. धर्मः मूको । १२. °न्तरैः ब^{3,4} वि । १३. व ब^{2} ; च मै ; त्रुटितम् पू । १४. °च्यमाने ब^{3,4} ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

चातुर्मास्यानि

इदानीम् अस्यामिष्टौ या देवतास्ता वक्ष्यन्ते। पितरः सोमवन्तो देवता[1]। [2]सोमो वा पितृमान्[2]। सोमो वा पितृमान् देवता भवतीति[3] विकल्पः [4]आद्याया देवतायाः[4]। पितरो बर्हिषदो द्वितीया देवता। पितरोऽग्निष्वात्ताः तृतीया देवता। यमश्चतुर्थी देवता ॥ २१ ॥

इदानीं याज्यानुवाक्या वक्ष्यन्ते। एकैकस्या देवतायास्तिस्रस्तिस्र ऋचो भवन्ति—द्वे[5] अनुवाक्ये एका याज्या—

[पित्र्याया याज्यानुवाक्याकथनम्]

उदीरतामवर उत्परासस्, त्वया हि नः पितरः सोम पूर्व (°र्वे), उपहूताः पितरः सोम्यासस्, त्वं सोम प्रचिकितो मनीषा, सोमो धेनुं सोमो अर्वन्तमाशुं, त्वं सोम पितृभिः संविदानो, बर्हिषदः पितर ऊत्य-र्वाग्-, आहं पितॄन् सुविदत्रां अवित्सीदं (°त्सि इदं), पितृभ्यो नमो अस्त्वद्य, (-द्य अ-) अग्निष्वात्ताः पितर एह गच्छत, ये चेह पितरो ये च नेह, ये अग्निदग्धा ये अनग्निदग्धाः, इमं यम प्रस्तरमा हि सीदेति द्वे परेयिवांसं प्रवतो महीरनु ॥ २२ ॥

उदीरतामवरे इति तिस्रः (ऋ १०, १५, १; ९, ९६, ११; १०, १५, ५) पितॄणां सोमवताम्। त्वं सोम प्रचिकितः इति तिस्रः (ऋ १, ९१, १; १, ९१, २०; ८, ४८, १३) सोमस्य पितृमतः। बर्हिषदः पितरः इति तिस्रः (ऋ १०, १५, ४; १०, १५, ३; १०, १५, २) पितॄणां बर्हिषदाम्। अग्निष्वात्ताः इति तिस्रः (ऋ १०, १५, ११; १०, १५, १३; १०, १५, १४) पितॄणामग्निष्वात्तानाम्। इमं यम प्रस्तरम् इति तिस्रः (ऋ १०, १४, ४-५; १०, १४, १) यमस्य ॥ २२ ॥

[वैवस्वतस्यावाहने मध्यमाया ऋचो याज्यात्वम्]

वैवस्वताय चेन्मध्यमा याज्या ॥ २३ ॥

यमाय वैवस्वताय चेदावाहनं कृतं तथा सति मध्यमा ऋग्[6] याज्या भवति अङ्गिरोभिरा गहि (ऋ १०, १४, ५) इति, तल्लिङ्गत्वात्[7]। इमं यम (ऋ १०, १४, ४), परेयिवांसम् (ऋ १०, १४, १) इति अनुवाक्ये भवतः ॥ २३ ॥

---

१. नास्ति ब[1] पू; °ताः ब[2] मै; °तां वि। २-२. नास्ति ब[1]। ३. भवन्तीति ब[1] वि। ४-४. नास्ति वि; याज्या देवतायाः ब[1,4]। ५. द्वे द्वे ब[3,4]। ६. नास्ति ब[1]। ७. लिङ्गत्वात् ब[1,2] वि।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[अग्नेः स्विष्टकृतो याज्याकथनम्]

ये तातृषुर्देवत्रा जेहमानास्, त्वदग्ने काव्या त्वन्मनीषाः, स प्रत्नथा सहसा जायमान इति ॥ २४ ॥

ये तातृषुः इति तिस्रः (ऋ १०, १५, ९ ; ४, ११, ३ ; १, ९६, १) [१]स्विष्टकृतो भवन्ति[१] ॥ २४ ॥

[अग्नेः स्विष्टकृतः कव्यवाहनसंज्ञाकथनम्]

अग्निः स्विष्टकृत् कव्यवाहनः ॥ २५ ॥

अग्निः स्विष्टकृत् कव्यवाहनः[२] स्विष्टकृतो देवतादेशो भवति । कथं ज्ञायते, स्विष्टकृतो याज्यानुवाक्ययोः[३] संनिधाने उक्तत्वात् । ये स्वधा महेऽग्निं कव्यवाहनं स्विष्टकृतम् इति प्रयोगो भवति । अन्यथा आवाहने, अन्यथा [४]क्रिया तु याज्यायाम्[४] । प्रकृतावप्येवमेव अग्निं होत्रायावह स्वं महिमानम् आवह (आश्रौ १, ३, २२) इत्यावाहने, ये [४]यजामहेऽग्निं स्विष्टकृतम् (आश्रौ १, ६, ३) इति याज्यायाम् ॥ २५ ॥

[स्विष्टकृत ऊर्ध्वं सर्वं प्रकृतिवत्]

प्रकृत्यात ऊर्ध्वम् ॥ २६ ॥

[५]अतः अस्मात्[५] स्विष्टकृत ऊर्ध्वं प्रकृतया भवति । [६]ये †उक्ता विकारास्ते† न भवन्ति[६] । अस्मादारभ्यात्[७] [८]स्विष्टकृत्यपि विकारा[८] भवन्ति । [९]हविषामुक्ता विकाराः[९] स्विष्टकृति न प्राप्नुवन्ति, तस्मात् स्विष्टकृतोऽपि प्राप्त्यर्थं प्रकृत्यात ऊर्ध्वम् इत्युच्यते ॥ २६ ॥

[वषट्कारक्रियायां पित्र्यायामाज्यभागाभ्यामूर्ध्वं मन्त्रलोपादन्यत्र सर्वं प्रकृतिवत्]

वषट्कारक्रियायां चोर्ध्वमाज्यभागाभ्यामन्यन्मन्त्रलोपात् ॥ २७ ॥

उक्तं स्वधाकारक्रियायां विधानम् । इदानीं[१०] वषट्कारक्रियायां पित्र्यायां विधिरुच्यते । [११]वषट्कारः क्रियते[११] वषट्कारक्रिया[१२], तस्यां[१३] वषट्कारक्रियायां च पित्र्यायाम्[१४] ऊर्ध्वमाज्यभागाभ्यां [१५]सर्वं प्रकृत्या[१५] भवति[१६] यदुक्तं हविषः प्रकरणे

१-१. स्विष्टकृद् भवति मूको । २. °हनः अग्निः ब[१] । ३. °वाक्ये मूको । ४-४. क्रियानुया° ब[१,२] मै वि पू । ५-५. अतस्त्विस्मिन् ब[१] ; अतस्तस्मात् ब[२-४] मै वि पू । ६-६. नास्ति वि । †. उक्ताधिका° ब[२] मै पू । ७. तस्मादारभ्य (°भ्यः ब[१,२] वि) मूको । ८-८. °कृत्य (°त ब[४]) विकारा मूको । ९-९. हविषोक्तवि° मै । १०. नास्ति ब[१,२] । ११-११. नास्ति ब[१,२] । १२. नास्ति ब[१,२] पू । १३. नास्ति ब[१,२] । १४. पित्र्ययोः ब[३,४] ; त्रुटितम् पू । १५-१५. सर्वं (°र्वं ब[१]) प्रकृता ब[१,२] पू ; सर्वत्र प्रकृता मै । १६. भवन्ति मूको ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सव्योत्तर्युपस्थाः (आश्रौ २, १९, १६) इत्येवमादि[1]। च-शब्दः प्रकृतिभाव-समुच्चयार्थः[2]। प्रकृत्या (आश्रौ २, १९, २६) इति अविशेषवचनाद् ये हविषां विकारा उक्ताः, ये च प्रागुक्ता जपलोपाः, सर्वेषां निवृत्तिः[3] प्राप्ता, तस्मादिदमुच्यते—ऊर्ध्वम्[4] आज्यभागाभ्यां[5] प्रकृत्या भवति[6]। [7]मन्त्रलोपादन्यत् प्रकृत्या [†]भवति[7]। [8]मन्त्रास्तु लुप्यन्त[8] एव, वषट्कारक्रियायामपीति । ऊर्ध्वमाज्यभागाभ्यामित्य-नुच्यमाने[9] स्विष्टकृत एव ऊर्ध्वं प्रकृत्या[10] स्यात् ॥ २७ ॥

[वषट्कारक्रियायां सर्वहविषामेकैकानुवाक्येति विधानम्]

एकैका चानुवाक्या ॥ २८ ॥

वषट्कारक्रियायां सर्वहविषामेकैका अनुवाक्या[11] भवति । च-शब्दो वषट्-कारक्रियाधिकारसमुच्चयार्थः[12]। द्वितीयाऽनुवाक्या क्रियते, प्रथमा उद्धियते। प्रथमा ह्यावापिका भवति। [13]तथा दृष्टमावापस्थानं षष्ठेऽहनि प्रस्थितयाज्यासु[13] ॥ २८ ॥

[संयाज्याकथनम्]

यो अग्निः कव्यवाहनस्त्वमग्न ईळितो जातवेद इति संयाज्ये ॥ २९ ॥

यो अग्निः कव्यवाहनः (ऋ १०, १६, ११), त्वमग्न ईळितो जातवेदः (ऋ १०, १५, १२) इति संयाज्ये भवतः[14] वषट्कारक्रियायाम् । स्विष्टकृदा-देशश्च[15] प्रकृतो[16] भवति। आवाहनमपि स्विष्टकृद्देवतायाः प्रकृत्या कर्तव्यम् ॥ २९ ॥

[प्राणभक्षभक्षणादि दक्षिणाग्न्युपस्थानम्]

भक्षेषु प्राणभक्षान् भक्षयित्वा बर्हिष्यनुप्रहरेयुः । संस्थितायां प्राग्वाऽनुयाजाभ्यां दक्षिणावृतो दक्षिणाग्निमुपतिष्ठन्ते ॥ ३० ॥

---

१. °मादिषु ब[1]। २. प्रकृतभाव° ब[1,2] मै पू। ३. लोपनिवृत्तेः ब[3,4]। ४. सर्वं ब[1,2] मै पू। ५. नास्ति मूको। ६. भवन्ति ब[1,2] मै पू। ७-७. नास्ति ब[1]; अन्यमन्त्र° ब[3,4] वि; अन्यन्मन्त्र° ब[2] मै पू। †. भवन्ति ब[1,2] मै वि पू। ८-८. मन्त्रस्तु लुप्यत ब[1,2] मै। ९. °गाभ्यामनु (°नु ब[1,2]) च्यमाने ब[1,2] मै वि पू। १०. प्रकृत्येव ब[1,2] मै पू; प्रकृत्यैव ब[3,4] वि। ११. नास्ति मूको। १२. वषट्कारक्रियासमु° ब[1]; वषट्कारसमु° वि। १३-१३. नास्ति वि। तु. आश्रौ ८, १, १। १४. नास्ति वि; त्रुटितम् पू। १५. °कृतादेशस्तु ब[1]; °कृतादे° ब[2-4] वि पू। १६. प्राकृतो ब[3,4]। तु. आश्रौ १, ६, ३।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

भक्षेपु चावान्तरेळादयो ये भक्षाः सर्वर्त्विजाम्, तेषु भक्षेषु[1] प्राणेन भक्ष्यन्ते, ततो[2] भक्षा अवघ्राणभक्षाः प्राणेन भक्षयित्वा बर्हिषि अन्तर्वेदि भक्षान्[3] अनुप्रहरेयुः [4]संस्थितायां †प्राग्वानुयाजाभ्यां दक्षिणावृतो दक्षिणाग्निमुपतिष्ठन्ते[4] । संस्थितायाम् इष्टचां [5]शंयुवाकान्तं कृत्वा[5] उपतिष्ठन्ते । प्राग्वानुयाजाभ्याम्[6] [7]अनुयाजाभ्यां पूर्वं[7] कृते पिण्डदाने[8] पिण्डोपस्थाने च[9] कृते दक्षिणावृतो[10] दक्षिणाग्निमुपतिष्ठन्ते, [11]दक्षिणं बाहुमन्वावृत्य सर्वे ऋत्विजो दक्षिणाग्निमुपतिष्ठन्ते[11], अया विष्ठा (तु. मैसं १, १०, ३) इत्येतेन[12] मन्त्रेण । विहारादव्यावृत्तिश्च (आश्रौ १, १, ११) इति[13] प्राप्ते च[13] दक्षिणावृद्ग्रहणम्[14] । दक्षिणावृत आवर्तन्ते । एवं[15] समीपं गच्छन्तीत्यर्थः[16] ॥ ३० ॥

[अनावृत्यानतिप्रणीतचर्यायाम् ॥ ३१ ॥

अया विष्ठा जनयन् कर्वराणि स हि घृणिरुरुर्वराय गातुः । स प्रत्युदैद्धरुणं मध्वो अग्रं स्वां यत्तनूं तन्वामैरयत ॥ (तु. मैसं १, १०, ३) इति ॥ ३२ ॥

आवृत्य त्वेवेतरौ ॥ ३३ ॥

आहवनीयं सुसन्दृशं त्वा (ऋ १, ८२, ३) इति ॥ ३४ ॥

गार्हपत्यम् अग्निं तं मन्ये (ऋ ५, ६, १) इत्येकयर्चा न सूक्तेन ॥ ३५ ॥

अथैनमभिसमायन्ति मा प्रमा [?] माग्ने त्वन्नः [?] इति जपन्तः ॥ ३६ ॥

---

१. भक्षणेषु ब[3,4] ; नास्ति वि । २. ये ते ब[3,4] ; नास्ति वि । ३. भक्षा ब[1] ; भक्ष ब[2] पू ; भक्षं ब[3] वि ; भक्षणं ब[4] ; भक्षः मै । ४-४. नास्ति ब[1,2] मै । †. प्राग्वानू° ब[3,4] । ५-५. °वाकमुक्त्वा ब[1] ; °वाकमुपाकृत्वा ब[2] मै ; त्रुटितम् पू । ६. प्रागनु° ब[2] मै पू । ७-७. नास्ति ब[1] ; अनूया° ब[3,4] । ८. °दाने ब[3,4] वि । ९. नास्ति ब[1] । १०. °णाकृतो ब[1] । ११-११. नास्ति ब[1] । १२. इत्यनेन ब[3,4] । १३. नास्ति ब[1] । १४. नास्ति ब[1] । १५. एव मै ; त्रुटितम् पू । १६. गच्छन्तीत्यर्थः— इत्यतः परं कोष्ठकान्तर्गतः पाठो मातृकासु त्रुटितः । ब[1,4] वि-मातृकासु त्यक्तं लेख्यम् इति वर्तते ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

चातुर्मास्यानि

पूर्वेण गार्हपत्यसूक्ते समाप्य सव्यावृतस्त्र्यम्बकान् व्रजन्ति ।। ३७ ।।
तत्राऽध्वर्यवः ।। ३७ ।।

तत्राऽध्वर्यवः कर्माऽधीयते ।। ३८ ।।]

[अदितिदेवत्यया ऋचा चरणम्]

प्रत्येत्यादित्यया चरन्ति ।। ३९ ।।

अदित्या[1] नित्ये याज्यानुवाक्ये । यद्वा [2]आदित्यो देवता[2] यस्य[3] तत्तद्देवत्ये[4] याज्यानुवाक्ये ब्रूयात् । आदित्यया इति वचनादुभयत्रापि युज्यते[5] ।। ३९ ।।

[पुष्टिमन्तौ धाय्ये विराजौ]

पुष्टिमन्तौ धाय्ये विराजौ ।। ४० ।।

पुष्टिमन्तावाज्यभागौ भवतः । तौ [6]व्याख्यातौ । धाय्ये विराजौ । धाय्ये सामिधेनीषु भवतः[6] । [7]विराजौ च[†] संयाज्ये भवतः[7] । व्याख्याते[8] विराजौ । शेषं पौर्णमासेन । [9]समाप्ताः साकमेधाः[9] ।। ४० ।।

।। इति एकोनविंशः खण्डः ।।

---

१. आदित्याया ब[1] ; आदित्या ब[2-4] मै वि पू । २-२. आदित्यदेवता मूको ।
३. सा ब[1] ; अस्य ब[2] मै वि पू । ४. तत्र देवत्ये ब[1] । ५. युज्यन्ते मूको ।
६. तु. आश्रौ २, १, २७ । ७-७. नास्ति ब[1] । †. नास्ति ब[3,4] ।
८. तु. आश्रौ २, १, ३० । ९-९. समाप्तः साकमेधः ब[2,3] मै ; साकमेधः समाप्तः ब[4] ; ...साक° पू ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ द्वितीयेऽध्याये विंशः खण्डः

[साकमेधतः पञ्चम्यां पौर्णमास्यां शुनासीरीयेष्टिः]

पञ्चम्यां पौर्णमास्यां शुनासीरीयया ॥ १ ॥

साकमेधादिर्या[1] पञ्चमी पौर्णमासी तस्यां पञ्चम्यां[2] पौर्णमास्यां शुनासीरीया इष्टिः, तया शुनासीरीयया इष्ट्या यजेत[3]। शुनासीरौ देवता यस्यां[4] प्रधाना सा[5] शुनासीरीया। सा[5] वक्ष्यते ॥ १ ॥

[पञ्चमपौर्णमासीतोऽर्वागपि सा कर्तव्येति विकल्पकथनम्]

[6]अर्वाग्यथोपपत्ति वा ॥ २ ॥

अर्वागपि पञ्चम्या भवति। अयमपरः[7] कल्पः। अध्वर्यूणामप्युक्तम्—ततो द्व्यहे त्र्यहे[8] चतुरहेऽर्धमासे मासि[9] चतुर्षु वा मासेषु (आपश्रौ ८, २०, १) इति। यथोपपत्ति वा। यथा उपपद्यते तथा भवति। यदा अधिकमाससंवत्सरो भवति, तदा षष्ठे मासे भवति। तत्र[10] त्रयोदशो मासः (ऐब्रा १, १२) इति श्रुतिः ॥ २ ॥

[वाजिनवर्जं वैश्वदेव्या समानः प्रयोगो हविषां देवताकथनञ्च]

वाजिनवर्जं समाना वैश्वदेव्या। हविषां तु स्थाने षष्ठप्रभृतीनां वायुर्नियुत्वान् वायुर्वा शुनासीराविन्द्रो वा शुनासीर इन्द्रो वा शुनः सूर्य उत्तमः ॥ ३ ॥

[11]वाजिनवर्जं समाना वैश्वदेव्या[11]। [12]व्याख्या तु उक्ता[12]। हविषां तु स्थाने [13]षष्ठप्रभृतीनां वायुर्नियुत्वान् वायुर्वा शुनासीराविन्द्रो वा शुनासीर इन्द्रो वा शुनः। सूर्य उत्तमः। वैश्वदेव्यां यानि हवींषि[14] तेषां तु षष्ठप्रभृतीनां स्थाने अन्यानि

---

१. °धादि या मूको। २. नास्ति ब[1]। ३. यजते ब[1,2] मै; त्रुटितम् पू। ४. यस्याः ब[1] वि। ५. नास्ति मै। ६. नास्ति ब[1]। ७. एष परः ब[3,4]। ८. नास्ति ब[1]। ९. मासे मासयोश् ब[2] मै पू; मासयोन् वि; मासिश् ब[1]। १०. नास्ति ब[1] पू; त ब[2] मै। ११-११. नास्ति ब[1,2] मै पू। १२-१२. व्याख्याता उक्ता ब[3]; व्याख्यात्युक्ता वि; नास्ति ब[1,2] मै पू; तु. श्राश्रौ २, १५; १६; १७, १३। १३. नास्ति ब[1,2] मै पू। १४. नास्ति ब[1,4]।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

चातुर्मास्यानि
Digitized by Madhuban Trust

आदिश्यन्ते। वक्ष्यति—वायुर्नियुत्वान्, वायुर्वा षष्ठी देवता भवति। शुनासीरौ सप्तमी देवता, इन्द्रो वा शुनासीरः, इन्द्रो वा शुनः इति। एते त्रयः कल्पाः सप्तम्याः। द्विर्वाशब्दस्तृतीयकल्पप्राप्त्यर्थम्[1]। अन्यतरोऽपि भवति। शुनासीरावेव[2] भवतः। इतरयोः कल्पयोः कृताकृतत्वं दर्शयति। सूर्य उत्तमः। सूर्यो[3] देवता उत्तमो[4] भवति[5]। सूर्य एव मण्डलवेदी[6] भवति। उत्तमग्रहणात् षष्ठचादीनां स्थाने या आदिष्टास्तासां[7] सूर्य एव उत्तमस्थानान्न च्यवते। कृताकृता अन्या अधिका [8]न उत्तमा(?)[8] भवन्तीन्द्राग्न्यादयः॥ ३॥

[पूर्वसूत्रोक्तदेवतानां याज्यानुवाक्याकथनम्]

आ वायो भूष शुचिपा उप नः। प्र याभिर्यासि दास्वांसमच्छ। स त्वं नो देव मनसा, ईशानाय प्रहुतिं यस्त आनट्, शुनासीराविमां वाचं जुषेथां, शुनं नः फाला विकृषन्तु भूमिम्, इन्द्रं वयं शुनासीरमस्मिन् यज्ञे हवामहे। स वाजेषु प्र नोविषत्। अश्वायन्तो गव्यन्तो वाजयन्तः शुनं हुवेम मघवानमिन्द्रम्, अश्वायन्तो गव्यन्तो वाजयन्तः तरणिर्विश्वदर्शतः। चित्रं देवानामुदगादनीकमिति याज्यानुवाक्याः॥ ४॥

[9]आ वायो भूष शुचिपा उप नः, प्र याभिर्यासि दास्वांसमच्छ, स त्वं नो देव मनसा, ईशानाय प्रहुतिं यस्त आनट्†[9]। आ वायो भूष (ऋ ७, ९२, १), प्र याभिः (ऋ ७, ९२, ३) इति वायोर्नियुत्वतः। स त्वं नो देव मनसा (ऋ ८, २६, २५), ईशानाय (ऋ ७, ९०, २) इति वायोः। [10]शुनासीराविमामिन्द्रं वयं शुनासीरमस्मिन् यज्ञे हवामहे स वाजेषु प्र नोऽविषदश्वायन्तो गव्यन्तो वाजयन्तो० भूमिम्[10]। शुनासीराविमां वाचम् (ऋ ४, ५७, ५), शुनं न फाला (ऋ ४, ५७, ८) इति शुनासीरयोः। [11]इन्द्रं व्यन्तः[11]। इन्द्रं वयम्, अश्वायन्तः इतीन्द्रस्य शुनासीरस्य। [11]शुनं हुवेम मघवानमिन्द्रमश्वायन्तो गव्यन्तो वाजयन्तः०[11]। शुनं हुवेम

---

१. °तीयकल्पः प्रा° ब[1,4] वि; °तीयकल्पाप्रा° मै; °तीयः कल्पः प्रा° ब[3]; °स्तृ .. प्रा° पू। २. उत शुना° ब[1]। ३. नास्ति मूको। ४. उत्तमा ब[3,4] वि। ५. देवती ब[1]। ६. मण्डलावर्ती ब[3,4]। ७. तासां स्थाने ब[1] पू। ८-८. नास्ति ब[1] वि। ९-९. नास्ति ब[1,2] मै पू। †. आनटमच्छ वि; आनट् सप्त ब[1,4]। १०-१०. नास्ति ब[1,2] मै पू। अयं पाठोऽनपेक्षितः प्रतिभाति। ११-११. नास्ति ब[1,2] मै पू।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

(ऋ ३, ३०, २२), अश्वायन्तः (ऋ १०, १६०, ५) इतीन्द्रस्य शुनस्य[1]। [2]तरणिर्विश्वदर्शतश्चित्रं देवानामुदगादनीकम्[2]। तरणिः (ऋ १, ५०, ४), चित्रं देवानाम् (ऋ १, ११५, १) इति सूर्यस्य। इन्द्राग्नी इह देवता भवति। तस्याः प्रकृते याज्यानुवाक्ये वैश्वदेवेनातिदेशाद् वरुणप्रघासोक्ते[3] भवतः। इति याज्यानुवाक्याः। [4]इत्येता† याज्यानुवाक्या‡ व्याख्याताःϕ। इति याज्यानुवाक्ये[4]। वचनात् सूर्यस्येहोक्ते[5] याज्यानुवाक्ये भवतः, मित्रः सूर्यः (आश्रौ ३, १२, ८) इत्यत्र देवीनां चेत् सूर्यः (आश्रौ ६, १४, १७) इत्यत्र च अदृष्टादेशे नित्ये (आश्रौ २, १, ८) इति। आदिश्योक्ते[6] प्राग्वत् प्राप्ते बहुवचनम्। बहुवचनाधिकाराद् इति याज्यानुवाक्ये इति [7]द्विवचनेन नोच्यते[7]। द्वयोरेतयोर्याज्यानुवाक्यासंज्ञा स्याद् इति [8]संमतं स्यात्[8]॥ ४॥

[शुनासीरीयां समाप्य सोमेन यजनं तदशक्तौ च पशुना यजनम्]

समाप्य सोमेन यजेताशक्तौ पशुना ॥ ५॥

अविशेषवचनात् ज्योतिष्टोमो भवति सर्वक्रतूनां प्रकृतित्वात्। [9]प्रकृतिरनादेशे आदेशाधिकारात्[9]। अशक्तौ पशुना। सोमेज्यायाम् अशक्तश्चेत्[10] ततः पशुना यजेत[11]। पशुस्तु[12] ऐन्द्राग्नः एव भवति निमित ऐन्द्राग्नः (आश्रौ ३, ८, ४) इति वचनात्। अध्वर्यूणामपि [13]सोमान्तानि स्युरिति बौधायनः[13] [14]पश्वन्तानीति शालीकिः, सवनेष्ट्या यजेतेत्यौपमन्यवः[14] (बौश्रौ २१, ६ : २३-२५) इति। अशक्तवचनमत्र त्रिविकल्पार्थम्[15]॥ ५॥

[पुनश्चातुर्मास्यैरेव यजनमिति विकल्पः]

चातुर्मास्यानि वा पुनश्चातुर्मास्यानि वा पुनः ॥ ६॥

---

१. शुनासीरस्य ब[1,4]; नास्ति वि। २-२. नास्ति ब[1,2] मै पू। ३. वारुणप्रघासे ब[1]; वरुणप्रवासो न वि; °सोक्तेः मै। ४-४. नास्ति ब[1]। †. इति मै; नास्ति ब[2] पू। ‡. नास्ति ब[2] पू। ϕ. इहाख्या° ब[2]। ५. °होक्ते इति ब[2-4] वि पू; °होक्तेरिति मै। ६. आदित्योक्ते ब[1]; इति आदित्योक्ते ब[2-4] वि पू; एतदित्युक्ते मै; तु. आश्रौ २, २०, ३। ७-७. °चनेनोंच्यते ब[1,3,4] मै वि पू। ८-८. संमतस्य ब[1,4]। ९-९. °रनादेशाधिकारात् ब[1]। १०. °क्तश्च ब[1]; °क्ताश्च ब[2] मै पू; °क्ताश्चो वि। ११. यजते ब[1,2] मै पू; यजेत् वि। १२. पशुः ब[3,4]। १३-१३. सोमान्ता ता न स्युरिति वा बौधनः ब[1]; सामाम्नानि वा बौ° ब[2]; सामाम्नानि बौ° मै पू; सोमान्तानीति बौ° ब[3,4] वि। १४-१४. पश्वन्तानीति काठके (पश्चात्तानीति काठके ब[2] मै पू) सवनेष्टया वौपमन्यवः ब[2-4] मै वि पू। १५. विक° ब[3,4]।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

चातुर्मास्यानि

Digitized by Madhuban Trust

अथवा पुनः[1] चातुर्मास्यैरेव यजेत[2]। पुनर्ग्रहणे अक्रियमाणे चातुर्मास्यानामित्याद्येज्याया[3] एव विकल्पः स्यात्। सोमेन तुल्यविकल्पोऽयम्। चातुर्मास्यानि वा पुनरित्यध्यायान्तलक्षणोऽभ्यासो[4] ब्राह्मणानुकृतिरिति ॥ ६ ॥

॥ इति विंशतितमः खण्डः ॥

सूत्रव्याख्यायां वराहे[5] देवत्रातस्य कृतौ द्वितीयोऽध्यायः समाप्तः[6] ॥ २ ॥

---

१. नास्ति ब[1]। २. यजते ब[1,2,4] मै पू ; नास्ति वि। ३. °नामित्याज्याया ब[1,2] वि पू ; °नामिज्याया ब[3,4] ; °नामिति याज्याया मै। ४. °क्षणाभ्यासो ब[2-4] वि पू। ५. वाराही ब[1,2] मै पू ; वाराहो वि। ६. समाप्तः। इत्याश्वलायनश्रौतसूत्रभाष्ये द्वितीयोऽध्यायः मै।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ तृतीयेऽध्याये प्रथमः खण्डः

[पशिवष्टचुपक्रमः]

पशौ ॥ १ ॥

उक्तं[1] पौर्णमासेनेष्टिपशुसोमा [2]उपदिष्टाः (आश्रौ २, १, १) इति† तेः† तेनैव क्रमेण[2] वक्ष्यन्ते। अग्न्याधेयादि चातुर्मास्यपर्यन्ता इष्टयो व्याख्याताः। इदानीं पशवो वक्ष्यन्ते। तत्राधिकारसूत्रमिदम्—पशौ इति। पशावित्यधिकारः। यदित ऊर्ध्वं वक्ष्यते तत् पशौ विधानं वेदितव्यम्। पशुरिति [3]कर्मणो नामधेयम्[3]। अशक्तौ पशुना (आश्रौ २, २०, ५), द्वयोर्मासयोरैन्द्राग्नः पशुः (आश्रौ २, १७, १८) इत्युक्ते वक्ष्यमाणस्य विधेर्ग्रहणम्[4]। षष्ठ्या निर्देशः कर्तव्यः पशोरिष्टिरिति सप्तमीत्यनुकृता[5]। अनङ्गस्यात्र केवलसप्तमी[6] भवति[7]। केवलसप्तम्या इष्टिः[8] क्रियते नाऽङ्गभूते अग्नीषोमीयादौ[9]। अध्वर्यूणामप्युक्तम्—षड्ढोता[10] पशिवष्टिश्चाऽङ्गभूतेषु न विद्यते (आपश्रौ ११, १६, ३) इति॥ १॥

[पशोरादावन्ते चैकत्र वेष्टिविधानम्]

इष्टिरुभयतोऽन्यतरतो वा ॥ २ ॥

इष्टिर्वक्ष्यते। सा तस्य पशोरुभयतः क्रियते आदावन्ते च। अन्यतरतो वा। सा इष्टिस्तस्य पशोरन्यतरतो वा क्रियते, आदौ वा[11] क्रियते अन्ते वा[11] क्रियते॥ २॥

[आग्नेयीष्टिविधानम्]

आग्नेयी वा ॥ ३ ॥

---

१. इतः पूर्वम् ॐ नमः शौनकाश्वलायनाभ्याम् ब[२-४] वि पू; श्रीगणेशाय नमः ॐ नमः शौनकाश्वलायनाभ्याम् ब[१]। २-२. उपदिष्टक्रमेणैव मै। †. नास्ति मूको। ३-३. कर्मनम° ब[२-४] वि। ४. विच (विव ब[२]) क्षणम् ब[१,२] मै पू। ५. सप्तमो नु कृता ब[१-४] वि पू। ६. केवलं सप्तमी ब[३,४]; नास्ति वि। ७. नास्ति वि। ८. इष्टिः इत्यारभ्य ३, ९, ६ सूत्रभाष्यस्थ—आ संस्थाजपेनोपस्थाय इत्यन्तः पाठो नास्ति ब[४]। ९. °यादि ब[२] पू; °यादिपु ब[१] वि। १०. मनोतादि ब[१] वि; मनोता ब[२]; ...ता मै; अच्छोता पू। ११. च ब[१,२] मै पू।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सा इष्टिः आग्नेयी वा भवति, वक्ष्यमाणा वा। अग्निर्देवता यस्याः सा आग्नेयी ॥ ३ ॥

[आग्नावैष्णवीष्ट्या वा विकल्पः]

आग्नावैष्णवी वा ॥ ४ ॥

आग्नावैष्णवी वा [1]पूर्वोक्ता वा[1]। अग्नाविष्णू देवता यस्याः सा आग्नावैष्णवी। द्विर्वा-शब्दस्तृतीयकल्पप्राप्त्यर्थम्[2]। न[3] वा इष्टिः क्रियते। [4]एष एव[4] वा तृतीये प्रवचने कल्पः[5] ॥ ४ ॥

[आग्नेयी आग्नावैष्णवी वेष्टिः कर्तव्येति विकल्पः]

उभे वा ॥ ५ ॥

उभे वा इष्टी भवतः। आग्नेयी आग्नावैष्णवी च। उभयतोऽन्यतरतो वा (आश्रौ ३, १, २) इति विकल्पे प्राप्ते उत्तरेण सूत्रेण विशेषः क्रियते ॥ ५ ॥

[द्वयोरिष्ट्योः कर्तव्यतायामेकां पुरस्तादन्यामुपरिष्टात् कुर्यात्]

[6]अन्यतरा पुरस्तात्[6] ॥ ६ ॥

यदा उभे[7] भवतः, तदा तस्य[8] पशोः[9] अन्यतरा इष्टिः पुरस्तात् क्रियते, अन्यतरा उपरिष्टादापन्ना[10] भवति ॥ ६ ॥

[पूर्वोक्तवदग्निप्रणयनविधानम्]

उक्तमग्निप्रणयनम् ॥ ७ ॥

व्याख्यातम् अग्निप्रणयनं वरुणप्रघासेषु[11]। तदिह क्रियत इत्यर्थः। अग्निप्रणयनादि पाशुकं कर्म, तत् क्रियते ॥ ७ ॥

१-१. नास्ति वि। २. °शब्द प्रभृ (प्रकृ मै ; प्रतृ पू ; तृ ब[2]) तीय ऋतुः प्रा° ब[1,2] मै पू ; °शब्दस्तृतीयः कल्पः प्रा° ब[3] ; °शब्दस्तृतीयकल्पः वि। प्राप्त्यर्थम् इत्यारभ्य ३, १, १२ सूत्रव्याख्यास्थ—केषांचिच्छाखिनाम् इति पर्यन्तः पाठो नास्ति वि। ३. नास्ति ब[3]। ४-४. एव इता (°तो ब[1]) मूको। ५. क्रतुः मूको। ६-६. अन्यतरत्वात् ब[1,2] मै पू। ७. उभये (यो ब[2]) मूको। ८. अस्य ब[3]। ९. पशो ब[3]। १०. °दापन्नं मूको। ११. तु. आश्रौ २, १७, १-७।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[पाशुबन्धिकाया वेदेः पश्चादुपविष्टस्यानुवचनविधानम्]

पश्चात् पाशुबन्धिकाया वेदेरुपविश्य प्रेषितो यूपायाऽज्यमानायाञ्जन्ति त्वामध्वरे देवयन्त इत्युत्तमेन वचनेनार्धर्चं आरमेत् ॥ ८ ॥

पशुबन्धे भवा वेदिः पाशुबन्धिका। तस्याः[1] [2]पश्चाद् अपरस्यां[2] दिशि उपविश्य[3] यूपायाज्यमानाय प्रेषितः यूपाञ्जनार्थम्[4] अञ्जन्ति त्वामध्वरे देवयन्तः (ऋ ३, ८, १) इत्येतामृचं त्रिरन्वाह[5]। तस्या उत्तमेन वचनेन अर्द्धर्चम् उक्त्वा विरमेत्। पाशुबन्धिकाया इति विशेषवचनाद् दार्शपूर्णमासिकाया[6] मा भूदिति। प्रेषित इति[7] वचनं प्राक् संप्रैषादनुवचनं मा भूदिति। यूपायाऽज्यमानायेति वचनात् प्रेषितोऽपि न ब्रूयाद् यावदञ्जनं न[8] कुर्वन्ति। अज्यमानायैव[9] ब्रूयात्। उत्तमेन वचनेनेति न वक्तव्यम्। अर्थादेव उत्तमेन वचनेनाऽऽरमणं[10] भविष्यति। उत्तर-सन्तानमिति कृत्वाऽऽरमणमस्य[11]। तस्मादुत्तमेन वचनेनेति वचनादञ्जनीयाया वियुताया अपि त्रिर्वचनं भवति। उपशये[12] अञ्जनमेव भवति, नोच्छ्रयणम्[13], न परिव्ययणम्। अरशनात्वात्[14] पाशुकं स्वरुरशनमापादयेद्[15] (?) इत्येतस्मिन् पक्षे परिधौ पशुं नियुञ्जन्ति (आश्रौ ९, २, ४) इत्यत्र उच्छ्रयणाभावादञ्जनीया[16] उच्छ्रयणीया न[17] भवति। [18]तत्रापि अभिहिङ्काराभ्यासौ[18] भवतः ॥ ८ ॥

[अज्यमानयूपाभिधानेऽनुवचनपरिधानयोर्व्यवस्थापनम्]

उच्छ्रयस्व वनस्पते, समिद्धस्य श्रयमाणः पुरस्ताद्, ऊर्ध्व ऊ षु ण ऊतय इति द्वे, जातो जायते सुदिनत्वे अह्नामित्यर्धर्चं आरमेत्। युवा सुवासाः परिवीत आ गादिति परिदध्यात् ॥ ९ ॥

उच्छ्रयस्व वनस्पते (ऋ ३, ८, ३), समिद्धस्य (ऋ ३, ८, २), ऊर्ध्व ऊ षु ण ऊतये (ऋ १, ३६, १३ ; १४) इति द्वे। जातो जायते सुदिनत्वे अह्नाम् (ऋ ३, ८, ५) इत्येतस्या ऋचोऽर्धर्चमुक्त्वाऽऽरमेदा[19] संप्रैषात्। युवा सुवासाः

---

१. तस्यां ब[1]। २-२. नास्ति ब[1]। ३. तदुपविश्य ब[2,3]। ४. यू (त्रियू ब[2]) पायाज्यमानार्थेन (पायाञ्जनामाञ्जनार्थेन ब[1]) मूको। ५. भूरन्वाह ब[1,2] मै पू। ६. दर्शपौर्ण° ब[1,2] मै पू। ७. नास्ति मूको। ८. नास्ति ब[1,2] मै पू। ९. आज्य° मूको। १०. °नारम्भणं ब[2]। ११. कृत्वारम्भमाणस्य मूको। १२. औपसदे ब[1]; उपसदः ब[2] मै पू। १३. नावरणम् ब[1,2] मै पू। १४. अरशणात्वात् ब[1]; अरशणत्वात् ब[2] मै पू; आरशनत्वात् ब[3]। १५. स्वरु० शरमा (°म ब[2] मै; शरणम ब[1]) पाद (°दा ब[3]) येत् मूको। १६. °यणभा° ब[1] पू। १७. नास्ति ब[1,2] मै पू। १८-१८. तत्रापि (तत्र मै) हिङ्का° ब[1,2] मै पू। १९. °मुक्त्वाऽवस्येदा सं° ब[1,2] मै पू।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

परिवीत आगात् (ऋ ३, ८, ४) इत्येतया परिदध्यात्। सर्वत्रोत्तमां परिधानीयेति विद्यात् (आश्रौ २, १६, ८) इत्येतेन[1] प्राप्ते परिदध्यादिति न वक्तव्यम्। इदं प्रयोजनम्। [2]अञ्जनमुच्छ्रयणं परिव्ययणमिति[2] त्रीण्यनुवचनानि [3]संप्रैषसंस्कारशब्द-संबन्धेन प्राप्तानि, वचनात्[3] संबन्धः क्रियते परिदध्यादिति। [4]तस्मादेवाविशिभ्यां च षट् यूपेषु परिव्ययणात् संजातः[4]। जातो जायते सुदिनत्वे अह्नाम् (ऋ ३, ८, ५) इति परिधानीया भवति[5]। परिव्ययणीया[6] आचार्येणैव पृथक् पृथक् संयुक्ताः[7]। तस्मादेताभिस्त्रीण्यनुवचनानि पृथगपि प्रयुज्यन्ते, क्वच[8] (सह च?) प्रयुज्यते (°न्ते ?) ॥ ९ ॥

[सपशुकयूपबहुले एकपशुतन्त्रके कर्मणि अन्त्यानुवचनं परिधाय यूपसंस्तवनम्]

यत्रैकतन्त्रे बहवः सपशवोऽन्त्यं परिधाय संस्तुयादनभिहिङ्कृत्य यान्वो नरो देवयन्तो निमिम्युरिति षड्भिः पञ्चभिर्वा ॥ १० ॥

यत्र[9] यस्मिन्[10] कर्मणि एकतन्त्रे एकस्मिन् पशुतन्त्रे[11] बहवो यूपाः सपशवो बहुभिः पशुभिः सह भवन्ति। अन्त्यस्य यूपस्य परिधानीयामुक्त्वा संस्तुयात्[12] सर्वान् यूपपशूनुपस्तुयात्[13]। संस्तवनमिति[14] कर्मणो नाम चेदम् [नामधेयम्]। अनभि-हिङ्कृत्य अभिहिङ्कारमकृत्वा यान् वो नरः (ऋ ३, ८, ६-११) इति षड्भिर्ऋग्भिः पञ्चभिर्वा इति सूत्रार्थः[15]। [16]निरर्थाविकौराद्यत्र (? आश्रौ ३, ६, ८) इति[16] वचनाद् यत्र बहवो यूपा भवन्ति। सिखांसोमैवा(?)[17] यत्र भवन्ति।

एकतन्त्रे इति वचनान्नानातन्त्रस्थेषु न भवन्ति[18]। अहर्गणेष्वन्वहमेकादशिनी[19]

---

१. इत्यनेन ब[1]।   २-२. अञ्जनमुपरिव्ययण° ब[1]; °यणमुभयतोपरिव्ययण° ब[2]; अञ्जनमुच्छ्रयणमिति ब[3]; °यणं परिव्यापण° मै; °यणोपरिव्यपण° पू।   ३-३. °शब्दः सम्बन्धेन (°न्धे ब[1,3,4] मै पू) प्राप्त (प्राप्तानि ब[1]; प्राप्ता पू) वचनात् मूको।   ४-४. तस्मादेवा (देवा ब[1] मै पू) दिशिभ्यां च षट् (च वषट् मै पू; वषट् ब[2,3]) यूपेषु (कृत्येषु ब[2]) परिव्ययणा संयात (°णात् संजातः ब[3]; °णा संपात मै) मूको।   ५. भवन्ति मूको।   ६. व्ययणीया मै; °यण ब[3]।   ७. संमुक्ता ब[1,2] पू; संयुक्ता ब[3] पू।   ८. कवच्च ब[2] पू; केवल ब[3]।   ९. नास्ति ब[1,2] मै पू।   १०. एकस्मिन् ब[3]।   ११. पशुना ब[1]।   १२. संस्कुर्यात् ब[1]।   १३. यूपान् यूपे पशून् (पशु ब[1]) उप कुर्यात् (उपस्तुयात् ब[1,3] मै) मूको।   १४. तत्र वर्जमिति ब[1,2] मै पू।   १५. अतिसूर्वा (वा ब[2]; त्रा मै) थंः ब[1,2] मै पू; अभिस्तवार्थः ब[3]।   १६-१६. निररर्था (°र्थो ब[1]) वेको (°का मै) राद्यंन्नेति (°रात्रेति ब[2]; °द्यत्रेति मै) ब[2,1] मै।   १७. सिखां (शिखां मै; सिखं ब[1]) सौमैर्वा (°मे वा मै) ब[3] मै।   १८. भवति ब[2,3]।   १९. अहर्यहन्व (°यंह......त्व ब[2]; °यंदन्व ब[3]) हमिना (°मेता ब[3]) दिशि मूको।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

विधीयते, [1]सकृत् संपातवे आलभ्यते[1] तत्र संस्तुयात् । [2]नानापशुत्वादहर्गंदणः [3]एकतन्त्रेति (?न) वक्तव्यं भवति । नानातन्त्रे प्रत्युदाहरणाभावाव[4] ? ... ... इति । [5]वचनादन्त्येऽहनि संस्तवनं[6] न[7] प्राप्नोति । [8]नह्यन्त्येऽहनि सर्वे यूपाः सपशवो भवन्तीति । तत्प्रासने वर्ण्यमाने सपशव इत्येतदपि न वक्तव्यं भवति । सपशवो सम्पत्तिर्वा विद्यात्[9] । एकयूपाधिकाराद् बहव इत्युच्यन्ते[10] । यत्र बहवो यूपा भवन्ति सपशव इति वचनात् तत्र सर्वे यूपाः, तत्र संस्तुयादग्नीषोमीये[11] अग्निषु एव स पशुर्भवति । पक्षयूपेषु पशुनियोगाभावात् सपशवो भवन्तीति[12] [13]तत्र तत्र[13] संस्तुयात् स्वात्मन[14] एकेनापि पशुना सर्वे यूपाः सपशव इति वक्तव्यासी(?व्यमस्ती°)ति[15] [16]अपशवोऽद्य नूनं[16] वक्ष्यन्ते । तस्मात् सपशवो[17] नैव वक्तव्यं भवति । तस्मादूहत्येव स्तवनम् । स्तवनं कर्तव्यम् । तदादि [18]सर्वे पशवो[18] भवन्ति । स्यात्मनमन्त्रं(?न्त्यं)[19] परिधायेति संबन्धवचनादग्नीषोमीय एव[20] संस्तवनं[21] [22]प्राप्तं तदेव संबन्धवचनम् अनर्हसंस्तवनस्य[22] कलि(?काल)-मुपदिशन्ति । परिधानादनन्तरं संप्रधानमिति परिधाने [23]कृते यदा[23] सपशवो भवन्ति, य(?त)दा संस्तुयान्मन्त्रलिङ्गात् शृङ्गाणीवेच्छृङ्गिणां सं ददृश्रे (ऋ ३, ८, १०) इति पशवः[24] । यान् वो नरः (ऋ ३, ८, ६-११) इति षड्भिर्ऋग्भिः पञ्चभिर्वा ॥ १० ॥

१-१. सकृत्संपातवे (सकृत् प्रकृताया वाश्वकृत्स्नं एता ब^{3} ; साक्षात् प्रताया वा अकृत-संपातवे मै ; सकृत्प्रेताया वा अकृतसंपातवे पू) आलभ्यते (°न्ते मै पू) मूको । २. °शुतत्त्वा-दहर्ग्रहणः (°हर्गणः ब^{1} पू) ब$^{1, 2}$ पू । ३. एकतन्त्रमिति चेत् एकतन्त्रेण ब^{3} । ४. °भावाव...व ब^{2} ; °भावात्व...ब^{1} ; °भाव मै । ५. °दन्येऽहनि ब^{3} । ६. ससा (संसा ब^{2} मै पू) वचनं ब$^{1, 2}$ मै पू । ७. नास्ति ब^{3} । ८. नह्यन्तेऽ° मूको । ९. विद्यते ब$^{1, 2}$ मै पू । १०. °च्यते ब^{3} । ११. °येषु मै । १२. °न्तीति न ब^{1} । १३-१३. तत्र ब^{1} मै पू ; तत् ब^{3} । १४. स्यात्मन ब^{1} पू ; सात्मन ब^{2} ; स्यात्मनं ब^{1} । १५. च व्यासीति ब$^{1, 2}$ पू ; च प्यासीति मै । १६-१६. अपशवो द्यून ब$^{1, 2}$ पू ; अपशवो ह्यो न मै । १७. पशवो ब^{3} मै । १८-१८. सर्वे पशवो ब^{1} पू ; सर्वपशवो ब^{2} । १९. अस्यात्मनमन्त्रं मै ; °नमन्त्रं ब^{1} पू ; °नमन्त्यं ब^{3} । २०. एवं ब$^{1, 2}$ पू । २१. संस्तवन्न ब^{1} पू ; स्तवन्न ब^{2} ; संस्तवन ब^{1} । २२-२२. प्राप्तं न (प्रात्ना ब^{2} ; प्राप्तं ब^{1}) दैवात् (देव ब^{2} ; तदेव ब^{1}) संबन्ध (संबद्ध ब^{2}) वचनम् अनर्हं (वचन अनर्हं ब$^{1, 2}$ पू ; वचनानर्हं मै) संस्तवनस्य मूको । २३-२३. कृते यदात् ब^{1} पू ; कृते पदात् ब^{2} । २४. पशवः पशवः ब^{2} मै पू ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

पशुभागः
Digitized by Madhuban Trust

[प्रथमोत्तमयोरनभ्यासविधानम्]

अनभ्यासमेके ॥ ११ ॥

एके[१] आचार्या अनभ्यासम्[२] अभ्यासाभावमिच्छन्ति[३] ॥ ११ ॥

[अग्निमन्थनादिवनस्पत्यावाहनविधानम्]

उक्तमग्निमन्थनं तथा धाय्ये कृताकृतावाज्यभागौ । आवाहने पशुदेवताभ्यो वनस्पतिमनन्तरम् ॥ १२ ॥

उक्तं व्याख्यातम् अग्निमन्थनं वैश्वदेव्यां[४], तदिह क्रियत इत्यर्थः । तथा धाय्ये । यथा अग्निमन्थनं तथा [५]धाय्ये अपि उक्ते[५] अग्न्याधेयप्रकरणे[६] । [७]ते इह[७] सामिधेनीषु भवत इत्यर्थः । वैराजं त्वग्निमन्थने धाय्ये त्वेवैके (आश्रौ २, १४, १६-१७) इति । कृताकृतावाज्यभागौ । आवाहने केषांचिच्छाखिनाम् आज्यभागौ कृताकृतौ[८] । विज्ञायते—चक्षुषी वा एते यज्ञस्य यदाज्यभागौ (तैसं २, ६, २, १) इति । केषांचिच्छाखिनां[९] न[१०] क्रियते—[११]पशुर्वै चक्षुष्मान् न मे सं चतुर्थे स्वासं नैनं चतुरक्षरवीभत्सं सत् संकरवाणि (?   ) इति[११] । तस्माद् विकल्पः कृताकृतावाज्यभागाविति । अध्वर्यूणामपि आज्यभागौ यजति । तौ न पशौ करोति न सोमे इत्येके इति विकल्पः । आवाहने तौ आज्यभागौ[१२] कृताकृतौ । आज्यभागौ अनित्यौ इति सूत्रार्थः । आवाहनग्रहणं यागाङ्गमित्येवं[१३] दर्शयति । अध्वर्युवशाद् यदा पशुः[१४] क्रियते तदा [१५]आवाह्योति अप्रैषौ[१५] भवत इति[१६] ।

---

१. नास्ति ब[२] । २. नाभ्यासम् ब[१,२] पू ; नास्ति ब[३] मै । ३. अनभ्यासतोऽभाव° ब[३] । ४. °देव्यं ब[१] ; °देवां ब[२] पू ; °देवं मै ; तु. आश्रौ २, १६, १ । ५-५. धाय्येपि (धाय्योपि ब[२] पू) उक्तं (°क्त पू ; क्ते ब[१]) ब[२,३] मै पू । ६. तु. आश्रौ २, १, ३३ । ७-७. न इह ब[२] ; तां इह ब[३] ; नेह मै । ८. कृतौ ब[२] मै ; °तौ विज्ञेयौ ब[३] । ९. आश्रौ ३, १, ४ सूत्रव्याख्यास्य—प्राप्त्यर्थम् इत्यारभ्य केषाञ्चिच्छाखिनाम् इति पर्यन्तः पाठो नास्ति वि । १०. त ब[१,२] पू ; नास्ति मै । ११-११. पशुःति (पशुभिः ब[२]) चक्षुष्मान्न (°ष्माना ब[२]) मे मंचनुर्षे (यंचतुर्षे ब[२] ; मंचचुर्षे मै पू ; संचनुर्षे वि) द्वासंत्संकरणवाणी (ह्वासत्संकरणवाणी ब[३] ; ट्कसत्संकरवाणि मै ; द्वासंत्सं नैनं चतुरक्षं विभक्षं करवाणीति वि) ब[१,२] मै वि पू । १२. °भागौ यजति तौ न पशौ करोति ब[१] पू । १३. यागमित्येवं ब[१,२] पू ; यागां यागमित्येवं वि । १४. पशुनं ब[३] वि । १५-१५. आवाह्यौ तौ (ति वि) च प्रैषौ ब[३] वि । १६. नास्ति ब[२,१] वि ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

संप्रैषवशात् प्रैषौ आम्नातौ प्रैषसमाम्नाये। यदा तु[1] पशुपुरोडाशकाले क्रियते तदाऽनावाह्येति[2]। आवाहनाङ्गभूतत्वादप्रैषौ च[3] भवतः। पौर्णमासेनातिदेशात् कथं पुनरनावाहितयोः[4] पशुपुरोडाशकाले इज्या भवतीति[5]! यथैव[6] [7]पशुपुरोडाशः अनावाहित इज्यते[7] एवमाज्यभागावपि। कथं पुनरत्र आज्यभागयोः पशावनावाहितयोः[8] प्राप्तिरिति। तदुच्यते—पशुतन्त्रमध्यगतपुरोडाशः पशुतन्त्रमुपजीवति। सामिधेन्यादि पशौ न[9] कृतम्। प्रणीतादि आज्यभागादि यत् सर्वमुपसाधयति[10] तस्मिन् पशावकृतत्वाद् आज्यभागौ भवतः। तन्त्र(?तत्र)-न्यायः[11] सूत्रकारेण दर्शितः। आवाहनग्रहणादावाहने कृताकृतौ[12] भवतः। आज्यभागाविति वचावा(?वचनाद्) ग्रहणं[13] क्रियते। आवाहने पशुदेवताभ्यो वनस्पतिमनन्तरमिति। [14]तत्राः† सन्ति अन्यायः‡ अभिहितो भवति। आवाहनग्रहणादावाहने एव वनस्पतेर्निगमनं प्राप्नोति[14]। उत्तरेषु[15] [16]निगमेषु न प्राप्नोति[16]। अनन्तरवचनात् सर्वत्र भवति। पशुदेवताभ्यो [17]वनस्पतिमनन्तरम्। पशूनां देवताभ्यः पशुदेवताभ्यः अनन्तरं वनस्पतिदेवतां निगमयेत्। सर्वेषु निगमस्थानेषु अनुद्दिश्य विधानाद् भवति। पशुदेवताभ्य इति विकृतावेव[17] [17]बहुवचनमुक्तम्। पशुदेवताभ्यो[17] वनस्पतिरनन्तरमिज्यते। तस्माविज्यावशाद् वनस्पतेर्निगमनं विधीयते। [18]अस्या देवत्यात्र(?)[18] स्थानेषु यदाऽऽसन्नकालाः पशवो भवन्ति [19]तदा देवतायाः[19] अनन्तरं वनस्पतिरिज्यते स्विष्टकृच्च। तस्माविज्याक्रमेण वनस्पतेर्निगमनं कर्तव्यम्। स्विष्टकृतस्तु [20]सकृदेव निगमनं भवति अव्यवहितत्वात्। उक्तं—समानां देवतां समानार्थाम् (आश्रौ १, ३, २०), अव्यवहितां सकृत् (आश्रौ १, ३, २१) इति। सर्वत्र हि या देवता इज्यन्ते†, तासां निवचनानि‡ भवन्ति[20]। [21]तस्मादावाहने तु[21] तेषां निगमनेष्वनुवृत्तिरिति[22]।

---

१. नु ब[2] मै पू। २. तदा नावाह्यते ब[3] वि। ३. नास्ति ब[1] वि। ४. पुनरवादितयोः ब[1,2] मै पू। ५. भवन्तीति ब[1,2] मै पू। ६. तथैव ब[3]। ७-७. °डाशाः (°डाशे ब[3] वि; °डाशा मै) अनावाहितो (वनावाहिता मै) इज्येते (इज्यते ब[2,3] वि; विज्यते मै) मूको। ८. पशुपशाव° ब[3]। ९. नास्ति ब[2]। १०. °मुपसंधायति ब[1]। ११. स्तवन्याय ब[1] वि पू; स्तवभ्याय ब[2]; तभ्याय मै; सूत्रन्यायः ब[1]। १२. कृताकृतयोः ब[1,2] पू; कृता (°तो वि) कृताया ब[3] वि। १३. स्वचा (वना ब[2]) वाग्रहणं ब[1,3] वि। १४-१४. नास्ति ब[3]। †. तन्त्राः मै। ‡. अन्यायः (°या पू; °य्याः मै) ब[1,2] मै वि पू। १५. उत्तमेषु ब[3]; नास्ति ब[2] पू। १६-१६. नास्ति ब[2]। १७-१७. नास्ति ब[1] वि। १८-१८. अस्माद्देव° ब[2]; अस्मादेव° ब[1] वि। १९-१९. तद्देव° ब[1] वि। २०-२०. सकृदेवता इष्टपत्ते तासां निश्वा न भवन्ति मै। †. इक्ष्यन्ते ब[2] पू; ईक्ष्यन्ते मै। ‡. निचान ब[1] मै पू; निष्ट्वा न ब[3]। २१-२१. तस्मादाहन तु ब[1] वि; तस्माद (°दा ब[1]) दाने नु (तु ब[3]) ब[2,3]; तस्मादाह ननु मै पू। २२. निगमेष्वनु° ब[1-3] मै पू।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यासां पुनरिज्या न विद्यते, तासामुद्धारः[1]। उपसदि आज्यभागस्विष्टकृत्प्रयाजानु-याजदेवता[2] इज्यन्ते[3] [4]याः तासां[4] निगमो भवति। यथाऽग्नये भ्राजस्वते। एवं वनस्पतेरपि ॥ १२ ॥

[संमार्गतृणैः मुखसंमार्जनानन्तरं प्रवृताहुतिहोमविधानम्]

संमार्गैः संमृज्य प्रवृताहुतीर्जुहुयात् ॥ १३ ॥

जुष्टो वाचे भूयासं जुष्टो वाचस्पतये देवि वाक्। यद् वाचो मधुमत्तमं तस्मिन् मा धाः सरस्वत्यै वाचे स्वाहा ॥ १४ ॥

संमार्गतृणैः स्वमुखं[5] संमृज्य अनन्तरं प्रवृताहुतीः, [6]या वक्ष्यन्ते, ता जुहुयात्—जुष्टो वाचे (तैसं ३, १, १०, १) इति। संमार्गैः संमृज्येति प्रवृताहुतीनां यागस्थानं व्यपदिश्यते। प्रवृताहुतिरित्यासां संज्ञा। वक्ष्यति—प्रवृताहुतीर्जुह्वति वषट्कर्तारः (आश्रौ ५, ३, १२) इति। तत्रैता[6] आहुतयः[7] प्रत्येतव्याः ॥ १३-१४ ॥

[पुनः समन्त्रकं पञ्चाहुतिदानम्]

पुनरादाय पञ्च विग्राहं स्वाहा वाचे स्वाहा वाचस्पतये स्वाहा सरस्वत्यै स्वाहा सरस्वते महोभ्यः संमहोभ्यः स्वाहेति ॥ १५ ॥

पुनः स्रुवेण गृहीत्वा पञ्चाहुतीर्जुहोति पञ्चग्रहणे क्रियमाणे। विग्राहं विच्छिद्य विच्छिद्येत्यर्थः। स्वाहा वाचे इति [8]यथासमाम्नातैः पञ्चभिर्मन्त्रै-र्जुहोति[8]। पुनरादायेति वचनात् पूर्वोक्तेन मन्त्रेण पञ्चाहुतीर्जुहोति। [9]पुनरादानेनैव जुहोति[9]। [10]पञ्चग्रहणेऽक्रियमाणे[10] एकाहुतिः प्राप्नोति। विग्राहमित्यनुच्यमाने पुनः[11] पुनरादाय होमः प्राप्नोति। पञ्च-ग्रहणात् पञ्चैते मन्त्राः। चतुर्थी [12]संप्रदाने (पा २, ३, १३) इति चतुर्थी[12] भवति। आदौ प्रयुक्तत्वाद्[13] अन्ते[14] स्वाहाकारो न प्रयुज्यते, न चेन्मन्त्रे पठितः (आश्रौ १, ११, १०) इति वचनात् ॥ १५ ॥

---

१. तासामुपधारः मै पू ; तासामुधारः ब[1,2] वि। २. °जानु (नू ब[3] मै) याज (°जे ब[3] वि) देवतानां (°ता मै) ब[2,3] मै वि पू। ३. विद्यन्ते वि। ४-४. या तेषां मूको। ५. स्वय (समं ब[3] वि ; सम ब[2] पू ; स मै) मुखं मूको। ६-६. नास्ति ब[1,2] मै पू। ७. आहुती: ब[3] वि ; नास्ति ब[1,2] मै पू। ८-८. पक्षसमाम्ना...... तन्त्रैर्जुहोति वि। ९-९. नास्ति ब[3] वि। १०-१०. नास्ति वि। ११. नास्ति ब[3] वि। १२-१२. नास्ति ब[1]। १३. प्रयुक्तात् ब[1] पू। १४. अ (आ वि) नु (नू वि) ब[3] वि।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[सोमयाग एव प्रवृताहुतिविधानमिति विकल्पकथनम्]

सोम एवैके ॥ १६ ॥

'सोम एवैके'[1] आचार्याः प्रवृताहुतीरिच्छन्ति[2], न निरूढपशुबन्धे । सोमे सवनीये प्रवृताहुतीर्जुह्वति वषट्कर्तारोऽन्येऽच्छावाकात् (आश्रौ ५, ३, १२) इति । कोऽभिप्रायः क्रियते । सवनीये एव एता आहुतय आम्नाताः[3], न निरूढे । तस्मात् तत्रैव होतव्याः[4], नान्यत्रेति । अपरे[5] पुनः प्रवृताहुतीरिति संज्ञायामन्वर्थतया[6] सवनीयादन्यत्रापि होतुः प्रवृतस्य[7] वषट्कर्तृत्वमिच्छन्ति[8] प्रवृतस्य वषट्कर्तृत्वात् । तस्माद्धोतैव जुहोति, न मैत्रावरुणः । प्रवृतोऽपि मैत्रावरुणो न जुहोति अवषट्कर्तृत्वात् । वषट्कर्ताऽपि न[9] जुहोति अच्छावाकः । न हि तस्य प्रवरणं विद्यते ॥ १६ ॥

[मैत्रावरुणस्य प्रपदनानन्तरमस्मै समन्त्रकं दण्डदानम्]

प्रशास्तारं तीर्थेन प्रपाद्य दण्डमस्मै प्रयच्छेद् दक्षिणोत्तराभ्यां पाणिभ्यां मित्रावरुणयोस्त्वा बाहुभ्यां प्रशास्त्रोः प्रशिषा प्रयच्छामीति ॥ १७ ॥

प्रशास्ता मैत्रावरुण इत्यर्थः । तं प्रशास्तारं तीर्थेन चात्वालोत्करावन्तरेण प्रपाद्य[10] प्रवेश्य[11] दण्डम् औदुम्बरम् अस्मै मैत्रावरुणाय प्रयच्छेत्, मित्रावरुणयोस्त्वा इत्यनेन मन्त्रेण । होतुः हविःष्वासन्नेषु प्रपदनकालः उक्तः[12], स एव[13] कालः अङ्गकर्तृणामपि प्राप्तः । तीर्थेन प्रपाद्य[10] इति वचनात् । स्वस्य कर्मणः काले[14] तेषां प्रपदनमिति दर्शयति[15] । कर्मचोदनायां होतारम् (आश्रौ १, १, १४) इति होता[16] दण्डं [17]प्रयच्छति । अध्वर्यूणामस्मिन्नेव काले एतेनैव मन्त्रेण यजमानो मैत्रावरुणाय †दण्डं[17] प्रयच्छतीत्युक्तम्[18] । समानः कालः समानोऽर्थः[19] ।

१-१. सोम एके ब[1] ; एके ब[3] वि । २. °न्ति सोमे ब[1] वि । ३. समाम्नाता मै । ४. होतव्यं ब[1,2] मै पू । ५. अपरे तु वि । ६. °र्थता मूको । ७. °तस्यापि ब[1] । ८. वषट्कृत (°ट्कर्तृ ब[3] वि) त्वादिच्छन्ति मूको । ९. नास्ति ब[3] वि । १०. प्रपद्य ब[1,2] मै पू । ११. प्रविश्य ब[2,3] मै । १२. तु. आश्रौ १, १, ४ । १३. एष मै । १४. कालः ब[2,1] मै वि । १५. दर्शयन्ति ब[1] ; प्रदर्शयति वि । १६. नास्ति ब[1] वि पू । १७-१७. नास्ति मै । †. संमन्त्रं ब[3] वि । १८. तु. माश्रौ १, ८, ३, १४ ; तु. काश्रौ ६, ४, ४ । १९. समार्थः मूको ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तस्माद्धोतुर्मन्त्रो भवति। असमाने तु मन्त्रसमुच्चयो भवति यथा [1]योक्त्रविमोक्षे न तथा[1]। यजमानो वा[2] दण्डं ददाति[3] होता वा[4]। [5]उभयं शास्त्रप्रामाण्याद्[5]। दक्षिणः पाणिः उत्तरः उपरिष्टाद्[6] भवति ययोः पाण्योस्तौ दक्षिणोत्तरौ पाणी, ताभ्यां दक्षिणोत्तराभ्यां पाणिभ्यां गृहीत्वा दण्डं प्रयच्छेत् मित्रावरुणयोस्त्वा इत्यनेन मन्त्रेण ॥ १७ ॥

[मैत्रावरुणस्य हस्तौ संयोज्य समन्त्रकं दण्डग्रहणम्]

तथा युक्ताभ्यामेवेतरो मित्रावरुणयोस्त्वा बाहुभ्यां प्रशास्त्रोः प्रशिषा प्रतिगृह्णाम्यवक्रो विथुरो भूयासमिति ॥ १८ ॥

यथा होत्रा दक्षिणोत्तराभ्यां पाणिभ्यां दण्डो दत्तः, तथा युक्ताभ्यां पाणिभ्यामितरो मैत्रावरुणो दण्डं [7]प्रतिगृह्णाति मित्रावरुणयोस्त्वा इति यथासमाम्नातेन [7]मन्त्रेण। एव-शब्दोऽवधारणार्थः। प्राङ्मुखाय प्राङ्मुखो होता ददाति, तस्य नित्याः (आश्रौ १, १, ८) इति वचनात्[7] ॥ १८ ॥

[यावत् प्रैषवचनं नास्ति तावद् दण्डेन स्वपरयोः संस्पर्शननिषेधः]

प्रतिगृह्योत्तरेण होतारमतिव्रजेद्दक्षिणेन दण्डं हरेन्न चानेन संस्पृशेदात्मानं वाऽन्यं वाऽऽ प्रैषवचनात् ॥ १९ ॥

दण्डप्रतिग्रहं कृत्वा उत्तरेण होतारमतिव्रजेत् मैत्रावरुणः[8], दक्षिणेन होतुर्दण्डं हरेत्। यदीदं[9] नारभ्यते, सह दण्डेन मैत्रावरुणो होतुरुत्तरेण गच्छेत्। [10]प्रधानकर्तुर्बाह्या अङ्गकर्तारः[10] इत्येतस्मान्न्यायादेव[11] उत्तरेण गमनं प्राप्तम्। तस्य पुनरङ्गभूतो[12] दण्डः। सह दण्डेन गमनं प्राप्तम्[13]। तस्मादुच्यते—उत्तरेण होतारमतिव्रजेद् दक्षिणेन दण्डं हरेदिति। [14]प्रपाद्य (आश्रौ ३, १, १६) इति यदुक्तं तदेव[14] व्याख्यातम्। दण्डो यज्ञाङ्गप्रधानं[15] भवति। कर्ता अप्रधानः। तेनैव मार्गेण कर्ता अपि शब्दः(?) तदुभयं वक्तव्यम्[16]। न चाऽनेन संस्पृशेत्। च-शब्दो

१-१. °मोक्षणे न वा ब[1,2] मै पू ; °मोक्षे त तथा ब[3] ; °मोक्षे तया वि। २. नास्ति ब[3] वि। ३. ददातीति ब[3]। ४. नास्ति ब[1,2] मै पू ; तु. आश्रौ १, ११, १-४। ५-५. °यशा° मूको। ६. उपदिष्टाद् ब[1,2] मै वि पू। ७-७. नास्ति वि। ८. °वरुणः दक्षिणेन दण्डं प्रहरेत् ब[3] ; °वरुणः दक्षिणहरेत् वि। ९. यदिदं ब[3] मै। १०-१०. °ह्याङ्गकर्तुः मै ; तु. आपश्रौ २४, २, १३। ११. इत्येतस्य न्या° मै। १२. °रङ्गस्ततो ब[1] मै पू ; °रङ्गसूतो ब[2]। १३. नास्ति वि। १४-१४. यद्येतावदेव ब[1,2] वि पू ; एतावदेव मै ; प्रपद्येति तदेव ब[3]। १५. यज्ञाङ्गत्वाद् वक्तव्यं प्रधानं ब[3] ; नास्ति वि। १६. तिव्रजेत् ब[3] वि।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhubani Trust

विधिसमुच्चयार्थः । पूर्वोक्तमिदं मैत्रावरुणः कुर्यात् ॥ १९ ॥

[अन्येषामपि यज्ञाङ्गानां विहारेण व्यवायनिषेधः]

अन्यान्यपि यज्ञाङ्गान्युपयुक्तानि न विहारेण व्यवेयात् ॥ २० ॥

अन्यान्यपि उक्तानि[1] दण्डादन्यान्यपि यज्ञाङ्गानि । अङ्गानि[2] यज्ञद्रव्याणि उलूखलमुसलादीनि उपयुक्तानि कर्मणि[3] नियुक्तानि यानि[4] भवन्ति तानि[5] विहारेण[6] नान्तरेण[7] व्यवेयात् । अन्तरेण कर्ता न गच्छेत् । अग्नीनां यज्ञद्रव्याणां च अन्तरेण कर्ता न गच्छेदित्यर्थः । अन्येषामप्युक्तम् अभ्यन्तराणि[8] यज्ञाङ्गानि बाह्याः कर्तारः (आपश्रौ २४, २, १३) इति । दण्डस्य वचनादभ्यन्तरत्वमुक्तम् । दण्डादन्येषां द्रव्याणां वचनाभावादभ्यन्तरत्वं[9] न प्राप्नोति, तदुच्यते—अन्यान्यपीति[10] । उपयुक्तानीति वचनात् तत्समीपस्थानामनुपयुक्तानामप्रवृत्तकर्मणां च द्रव्याणामभ्यन्तरत्वं न भवति ॥ २० ॥

[होतृसदनाद्दक्षिणस्यामधोमुखो भूत्वा दण्डमवष्टभ्य प्रैषादि ब्रूयात्]

दक्षिणो होतृषदनात् प्रह्वोऽवस्थाय वेद्यां दण्डमवष्टभ्य ब्रूयात् प्रैषांश्चाऽऽदेशम् ॥ २१ ॥

वेदिश्रोण्यां होतृषदनम् । तस्माद्धोतृषदनाद् दक्षिणस्यां दिशि दक्षिणो भवति । प्रह्वः अर्वाक्प्राणशरीरः[11] अधोमुखः प्रह्वो भवति । प्रह्वोऽवस्थाय स्थित्वा वेद्यामन्तर्वेदि दण्डं चात्तमवष्टभ्य[12] [13]तस्मिन् दृष्टौ[13](?ष्टे) ब्रूयात् प्रैषांश्च ब्रूयाद् अनुवाक्यादीनि च[14], यानि वक्ष्यामः । आदेशम् आदिश्यादिश्यादेशम्[15] देवतादेशं कृत्वा प्रैषान् ब्रूयात् । दक्षिणो[16] होतृषदनादिति वचनान्नित्यस्थानादीषत्पश्चिमदेशे[17] होतृषदनं भवति, यथा दक्षिणो मैत्रावरुणोऽङ्गकर्ता बहिर्भवति । [18]तस्माद्धोतुरुत्तरतः स्थाने[18] प्राप्ते दक्षिण इत्याह । प्रह्वोऽवस्थायेति श्रुतिविहितम् ।

---

१. नास्ति ब^{1,2} मै पू । २. नास्ति ब^{3} वि । ३. कर्माणि मूको । ४. नास्ति वि । ५. तानि स्पृशेत् ब^{3} वि ; नास्ति ब^{1,2} मै पू । ६. न विहा° ब^{1} वि । ७. नास्ति ब^{1} वि । ८. अस्यान्तराणि ब^{2} मै ; अन्तराणि आपश्रौमुद्रितपाठः । ९. °वादभ्यन्तरा ब^{1,2} पू ; °वादनन्तराभ्यां ब^{3} वि ; °वादभ्यन्तरं मै । १०. °न्यपीति उक्तम् ब^{1,2} मै पू । ११. अर्वाक्प्रांशरीर ब^{1} वि ; अवाक्यां शरीर ब^{2} मै पू । १२. चावष्टभ्य ब^{2} ; चान्तमवष्टभ्य ब^{3} वि । १३-१३. तस्मिन्नदृष्टो ब^{2} ; तस्मिन् धृष्टौ ब^{1} वि । १४. नास्ति ब^{1} वि पू । १५. आदिश्यादेशं ब^{2,1} मै । १६. दक्षिणेन ब^{3} ; दक्षिणे वि मै । १७. °श्चिमे देशे वि ; °स्थानादिषु पश्चिमदेशे मै पू । १८-१८. °त्तरस्थाने ब^{2} ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

नष्टैष्यं ह्येतद् यत् प्रैषाः। तस्मात् प्रह्वस्तिष्ठन् प्रेष्यति (ऐब्रा ३, ९) इति प्रैषार्था श्रुतिः। तस्मात् प्रैषेष्वेव प्रह्वो भवति। अनुवाक्यादीनि च[1] अवस्थायैव[2] ब्रूयात्[3] प्रह्वः। श्रुतिवचनाभावादवस्थायेत्यधिकारादवस्थाय दण्डमवष्टभ्य एवम् अनुवाक्यादीनि च यानि प्रब्रूयात्। [4]प्रह्वत्वं हि[4] [5]विशेषणं प्रैषेषु[5] श्रूयते। तत् तेष्वेव भवति नान्यत्र। [6]चकारकरणं समुच्चयार्थम्[6]। प्रह्वोऽवस्थाय वेद्यां दण्डमवष्टभ्य ब्रूयात् प्रैषांश्चानुवाक्यादीनि च, यानि वक्ष्याम इति। तत्र प्रैषेषु[7] च[8] विशेषश्रुतिदर्शनात् तेषु प्रह्वत्वम्, अन्यत्र सर्वं समानम्। प्रैषेषु देवतादेश आम्नात एव। तस्मादादेशमिति न वक्तव्यम्। इदं प्रयोजनम्। पूर्वैः [9]किल प्रैषेषु[9] आदेशो न पठ्यते, तस्मादादेशमित्याह। इदमन्यत्[10] प्रयोजनम्—प्रैषेषु देवतादेशोऽस्तीति[11] दर्शयति। तस्माद् उद्धृत्यादेशपदम् (आश्रौ ५, ४, ४) इत्युक्ते विद्यमानस्यादेशस्योद्धारो भवति [12]अत्र। †अन्यथा तत्रादेशप्राप्त्यभावाद्† उद्धारवचनमप्यनर्थकं भवति। प्राप्तस्य हि उद्धारो भवति[12] ॥ २१ ॥

[अनुवाक्याविधानम्]

अनुवाक्यां च सप्रैषे पूर्वां प्रैषात् ॥ २२ ॥

[13]सप्रैषे कर्मणि या अनुवाक्या, तां च[13] मैत्रावरुणो ब्रूयान्न होता। पूर्वां प्रैषात्। प्रैषात् पूर्वां ब्रूयान्नोत्तराम्। अनुवाक्या होतुः प्राप्ता मैत्रावरुणस्यैव विधीयते। सप्रैष[14] इति वचनादप्रैषे कर्मणि होतैव ब्रूयात्। देवसुवादिषु[15] [16]प्रैषात् पूर्वां[16] याज्यासमीपे अनुवाक्या प्राप्ता, तस्मादाह—पूर्वां प्रैषादिति। सप्रैषवशादेवानुक्रमो[17] भविष्यति, किमर्थमनुक्रमो विधीयते इति। इदं प्रयोजनम्। [18]यत्र प्रैषस्य[18] संश्लेषो[19] न विद्यते, तत्रापि प्रैषो[20] वक्तव्य इति वक्ष्यति—यथा[21] संप्रैषस्य[22] स्थानमुपदिष्टं[23] स्यात्। पूर्वां प्रैषादिति वचनाद् अनुवाक्याया उपरिष्टात् प्रैषस्य स्थानं भवति ॥ २२ ॥

---

१. नास्ति ब[1,2] पू। २. °येति ब[1] पू ; यानि ब[3] वि। ३. प्रब्रू° वि। ४-४. तद् ब्रूहि ह वि ; प्रह्व हि ब[3] ; प्रह्वत्वं ह ब[1,2]। ५-५. विशेषेणाप्रैषेषु ब[3]। ६-६. चकारकरणसमुच्चयार्थः मूको। ७. प्रैषे ब[1,2] मै पू। ८. नास्ति ब[3]। ९-९. किलाप्रैषेषु मै। १०. अन्यमन्यत् ब[1,2] मै पू। ११. °देशास्ति (°स्त्वि ब[3] ; °स्त्वि मै पू। १२-१२. नास्ति मै। †-†. °यात् देश° ब[1,2] पू। १३-१३. नास्ति ब[3] ; संप्रैषे (°ष मै) कर्मणि ब[1] मै वि पू। १४. सम्प्रैष ब[1,2] मै वि पू। १५. °सूवादिषु ब[1]। १६-१६. प्रैषां पूर्वे (°र्वां वि) ब[1,2] मै वि पू। १७. संप्रैष ब[2,3] मै वि पू। १८-१८. यत्राप्रैषस्य मै। १९. श्लेषः ब[2]। २०. प्रैषो न ब[3]। २१. तथा ब[3]। २२. सप्रैषस्य ब[1] पू ; संप्रैष° मै। २३. स्थानमनुप° ब[1,2] मै पू।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[पर्यग्निस्तोकमनोतोन्नीयमानसूक्तपठनम्]

पर्यग्निस्तोकमनोतोन्नीयमानसूक्तानि च ॥ २३ ॥

पर्यग्निकरणं च स्तोकक्रिया च मनोता च उन्नीयमानसूक्तानि च एतानि चावस्थाय वेद्यां दण्डमवष्टभ्य मैत्रावरुणो ब्रूयात्। कर्मचोदनायाम् (आश्वौ १, १, १४) इति होतुः प्राप्तौ[1] मैत्रावरुणस्यैतानि विधीयन्ते। उन्नीयमानसूक्तानि प्रकरणान्तरस्थान्यपि[2] विधीयन्ते, समानविधानत्वात्। यदि न विधीयन्ते सोम आसीनोऽन्यत् इति वचनाद् आसीनस्य प्राप्नुवन्ति ॥ २३ ॥

[सोमे प्रैषातिरिक्तम् आसीनो ब्रूयात्]

सोम आसीनोऽन्यत् ॥ २४ ॥

सोमे प्रैषादिभ्यो यद् अन्यत् तद् आसीनो ब्रूयात्। सोमे उत्तरेण [3]सर्वान् धिष्ण्यान्[3] सन्नान् सन्नानपरेण (आश्वौ ५, ३, २२) इति वचनान्मित्रावरुणस्य सहचोदितं मन्त्रवद् भवति। तस्मादासीनस्य प्रैषादीनि च शस्त्रादीनि च प्राप्नुवन्ति[4]। तस्मादाह—सोमे प्रैषादिभ्यो यदन्यत् तदासीनो ब्रूयादिति। शस्त्राणि[5] च याज्याश्च[6] आसीनो ब्रूयात् ॥ २४ ॥

॥ [इति] तृतीयस्य प्रथमः खण्डः ॥

---

१. प्राप्ते ब³ वि। २. अप्रकरणान्त° ब³ ; अप्रकरणान्तरा वि ; तु. आश्वौ ५, ५, १४। ३-३. धिष्ण्यान् सर्वान् मूको। ४. प्राप्नोति ब¹'² वि पू ; प्रयोज्यानि ब¹। ५. शस्त्राणां ब¹'² मं पू। ६. याज्या मूको।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

पशुयागाः

Digitized by Madhuban Trust

अथ तृतीयेऽध्याये द्वितीयः खण्डः

[पशुयागे एकादशप्रयाजविधानम्]

एकादश प्रयाजाः ॥ १ ॥

पशौ[1] एकादश प्रयाजाः भवन्ति । पौर्णमासेनातिदेशात् पञ्च प्राप्ता एकादश विधीयन्ते ॥ १ ॥

[एकादशप्रयाजानामेकादशप्रैषविधानम्]

तेषां प्रैषाः ॥ २ ॥

तेषां प्रयाजानां प्रैषा भवन्ति । पौर्णमासेनातिदेशादप्रैषाः[2] प्राप्ताः इह च सप्रैषा विधीयन्ते । तेषामित्यनुच्यमाने[3] [4]प्रयाजा न[4] संबध्यन्ते, पृथगेव[5] प्रैषाः स्युः ॥ २ ॥

[पूर्वोक्तप्रैषसूक्तस्य पुनर्विधानम्]

प्रथमं प्रैषसूक्तम् । उक्तं द्वितीये ॥ ३ ॥

पञ्च प्रैषसूक्तान्याम्नातानि[6] । तेषां यत् प्रथमं प्रैषसूक्तं तत् प्रयाजेषु भवति होता यक्षदग्निं समिधा (खि ५, ७, १) इति । उक्तं द्वितीये । द्वितीये प्रैषे उक्तं विधानं प्रयाजयाज्यायां तनूनपादग्न आज्यस्य वेत्त्विति द्वितीयोऽन्यत्र वसिष्ठशुनकात्रिवध्र्यश्वराजन्येभ्यो । नराशंसो अग्न आज्यस्य वेत्त्विति तेषाम् (आश्रौ १, ५, २१ ; २२) इति । [7]तथा याज्यायामुक्तं[7] प्रैषे न[8] प्राप्नोति । तस्मादिदमुच्यते— उक्तं द्वितीय इति । यदिदं नोच्यते, आम्नायानुक्रमेण[9] प्रैषान् ब्रूयात्तथा सति विलक्षणं संपद्यते ॥ ३ ॥

[अध्वर्युप्रेषितो मैत्रावरुणो होतारं प्रेष्यति होता च यजति]

अध्वर्युप्रेषितो मैत्रावरुणः प्रेष्यति प्रैषैर्होतारं होता यजति ॥ ४ ॥

---

१. पशोः ब[1,2] पू । २. °दसम्प्रैषाः ब[3] । ३. °त्युच्यमाने ब[3] वि । ४-४. प्रयाजानां मूको । ५. प्रथमा एव ब[1,2] मं पू । ६. °न्याप्रीतानि वि ; तु. खि ५, ७, १-५ । ७-७. न याज्या° ब[1] ; तच्चायाज्या° वि । ८. तत् ब[3] वि । ९. °नुक्रमेणैव ब[1] ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अध्वर्युणा प्रेषितः अध्वर्युप्रेषितो मैत्रावरुणः प्रैषानाह[1] । तैः प्रैषैः मैत्रावरुणः प्रेष्यति होतारम्—होतर्यज इति । मैत्रावरुणेन प्रेषितो होता यजति याज्याभिः[2] सर्वत्र । होता यजति इति 'सूत्रावसाने अक्रियमाणे' इदं प्रयाजानामेव स्यात्, सर्वार्थं न स्यात् । इष्यते च सर्वार्थम् । प्रेषितो मैत्रावरुणः इति सिद्धे अध्वर्युग्रहणात् सप्रैषे[4] कर्मणि यद्यप्यध्वर्युर्यजेति संप्रैषमाह[5], [6]तथा सत्यपि अध्वर्युप्रेषित इति वचनाद् विलक्षणेनापि संप्रैषेण संप्रेषितो मैत्रावरुण एव† ‡संप्रैषमाह[6], न होता । यजतीति होता [7]सप्रैषे कर्मणि[7] मैत्रावरुणेनैव प्रेषितो याज्यामाह, नाध्वर्युणेति । [8]एतत्साधनार्थोऽयं सूत्रारम्भः[8] । होतुरधिकारे पुनः होता यजति इत्यत्र होतृग्रहणे अक्रियमाणे[9] यजतीत्युक्ते प्रथमानिर्देशान्मैत्रावरुणः संबध्यते, न होता, होतारमिति [10]द्वितीयया निर्दिष्टत्वात्[10] ॥ ४ ॥

[प्रैषलिङ्गाभिराप्रीभिर्होतुर्यजनम्]

आप्रीभिः प्रैषसलिङ्गाभिः[11] संज्ञकाभिः ॥ ५ ॥

अत्र होता यजतीति[12] अधिकारो वर्तते[13], प्रयाजाधिकारश्च वर्तते । प्रयाजेषु [14]मैत्रावरुणेन प्रैषैः[14] प्रेषितो होता यजति आप्रीभिः[15] । आप्रिय ऋचो भवन्ति । आप्रीभिरापृणाति (ऐब्रा २, ४) इति श्रुतिः[16] । सुसमिद्धो न आ वह (ऋ १, १३, १) इत्येवमादीनि दशाप्रीसूक्तानि[17] समाम्नातानि । विज्ञायते च ताभिर्यथ ऋष्याप्रीणीयात् (ऐब्रा २, ४) इति । [18]यथऋषिभिः आप्रीभिर्होता यजति प्रैषसलिङ्गाभिः प्रैषसमानलिङ्गाभिः[19] आप्रीभिः[20] यजति । यल्लिङ्गं प्रैषे, तल्लिङ्गाभिर्यजति । लिङ्गं देवता भवति । इध्मादयो देवता द्वादश प्रैषसूक्ते[21]

---

१. प्रैषमाह ब[3] वि । २. याज्याभावः ब[1] वि । ३-३. °साने क्रि° ब[3] वि ; °सानेक्रि° मै । ४. संप्रैषे ब[1] मै । ५. सप्रैषमाह ब[1] वि पू । ६-६. नास्ति ब[1] । †. एवं ब[1] मै । ‡. प्रैषमाह ब[2] वि पू । ७-७. सप्रैषक° ब[1] ; संप्रैषे क° ब[3] ; न प्रैषे क° ब[2] पू ; न प्रैषक° मै । ८-८. °नार्थोय यत्सू° ब[1,2] ; °नार्थो यं यत्सू° पू ; °नार्थोऽयं एतत्सू° मै ; °नार्थेऽयं सू° ब[3] । ९. नास्ति वि । १०-१०. द्वितीयानि° मै । ११. प्रैषसंज्ञ (°ज्ञि मै) काभिः ब[1,2] मै पू ; नास्ति ब[3] वि । १२. प्रतीतीति प्रैषसंज्ञकाभिः वि ; यजतीति प्रैषसंज्ञकालिङ्गाभिः ब[3] । १३. भवतीति ब[1] । १४-१४. °णेनाप्रैषैः ब[3] वि ; °प्रैषः ब[2] पू ; °प्रेषः मै । १५. नास्ति ब[1] । १६. श्रुतेः ब[3] वि । १७. तु. ऋ १, १४२ ; १८८ ; २, ३ ; ३, ४ ; ५, ५ ; ७, २ ; ९, ५ ; १०, ७० ; ११० । १८. यथा ऋ° ब[1,2] मै पू ; यद्वा (यच्चा वि) ऋ° ब[3] वि । १९. समान° मूको । २०. नास्ति ब[1] । २१. तु. खि ५, ७, १ ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आप्रीसूक्तेषु[1] च । [2]यद्देवत्यः प्रैषः[2], तद्देवत्ययर्चा[3] यजतीत्यर्थः । अस्यारम्भे प्रयोजनं समिद्धो अद्येति सर्वेषाम् (आश्रौ ३, २, ६) इति वक्ष्यति। प्राजापत्ये[4] तु जामदग्न्यः सर्वेषाम् (आश्रौ ३, २, ८) इति च। वसिष्ठादीनामपि च जामदग्न्य एव[5] भवन्ति । तथा सति उक्तं द्वितीये (आश्रौ ३, २, ३) इति वचनाद् वसिष्ठादीनां नाराशंसमेव प्रैषमाह मैत्रावरुणः । जामदग्न्येषु च नाराशंसी ऋङ् न विद्यते। प्रैषसलिङ्गाभिरिति वचनाद् नाराशंसी ऋगानेतव्या भवति। [6]यथ ऋषिसूक्तादानेतव्येति[6] शाङ्खायनिके[7] सूत्रे । अध्वर्युशाखासु तु वासिष्ठी आम्नाता नराशंसस्य महिमानम् (ऋ ७, २, २) इति । सर्वनाराशंसानां जामदग्न्यमेव[8] द्वादशर्चं सूक्तम् आम्नातम्[9] । निरुक्तेऽप्येवं[10] दर्शयति—नराशंसः कस्मात् ? । नराशंसस्य महिमानमेषाम् (ऋ ७, २, २) इत्यपि निगमो भवति इति। सूत्रकारोऽपि दर्शयति—अन्यत्र [11]वसिष्ठशुनकात्रि० इति[11] (आश्रौ १, ५, २१)। अत्र वसिष्ठस्य पूर्वनिपातवचनाद् वसिष्ठः सर्वनाराशंसानां मुख्य इति दर्शयति। मुख्यत्वात् सर्वनाराशंसानां वासिष्ठी[12] एव ऋग् भवति । [13]उभयसंस्तवे तु[13] सूक्ते [14]मैधातिथे वैर्घतमसे च[14] तयोरुक्तम् अनुक्रमण्याम्[15] । एकादश प्रयाजाः (आश्रौ ३, २, १) इति वचनात् तयोरन्यतरेण प्रयोगः स्यात् । उभे वाऽऽश्विनयाज्याधर्मश्रुतेरिति[16] छन्दसदन्तस्येति (?)[17] । तथा सति उभौ[18] प्रैषावचनान्न[19] वक्तव्यौ । कामादन्यतरेण वा[20] नराशंसाः प्रजाकामाः पूर्वे वयसि कुर्वते, उत्तरे वयसि अन्यतरेण वा उभाभ्यामिति ॥ ५ ॥

[शुनकानां वसिष्ठानां सर्वेषाञ्चाप्रीसूक्तकथनम्]

समिद्धो अग्निरिति शुनकानां जुषस्व नः समिधमिति वसिष्ठानां समिद्धो अद्येति सर्वेषाम् ॥ ६ ॥

---

१. तु. टि. १७, पृ. २९४ । २-२. यद्दे (°द्दे ब[2]) वत्य (°त्यः मै) प्रैषः मूको । ३. तद्दे (सदे ब[2] मै पू) वत्ययर्चा मूको । ४. प्राजापत्येषु मै । ५. नास्ति ब[3] वि । ६-६. यथा ऋषि° ब[1,2] मै पू ; यथर्षि° ब[3] ; यद्य रिषि° वि । ७. तु. शांश्रौ ५, १६, ७ । ८. °ग्न्यमेत ब[1] पू ; तामेव ब[3] वि ; तु. ऋ १०, ११० । ९. तु. मासं २९, २५-३६ । १०. तु. या ८, ६ ; ७ । ११-११. नास्ति ब[1] । १२. वसिष्ठा मूको । १३-१३. उभयस्तावत् ब[3] वि । १४-१४. मेधातिथौ दीर्घतमसि च मूको । तु. या ८, २२ ; ऋ १, १३ ; १४२ । १५. तु. ऋअ २, १, १३ । १६. °श्रुतिरिति ब[1,3] वि ; °श्विनधर्मश्रु° मै । १७. °सदान्तस्येति ब[2] मै ; °सं दन्तस्येति पू ; °स दां सां त स्यति ब[1] ; °स दा सा तास्यति वि । १८. तौ ब[1] वि । १९. प्रैषावनवानं ब[2] मै पू ; प्रैषाचनयानं ब[1] ; प्रैषवच° ब[3] ; प्रैषावचवानं वि । २०. वा च ब[1] ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

समिद्धो अग्निः (ऋ २, ३) इति शुनकानाम् । होता यजत्याप्रीभिः (आश्रौ ३, २, ४-५) इत्यविशेषवचनात् काश्चन आप्रियो भवन्तीति प्राप्ते उत्तरैः सूत्रैः आप्रियो[1] नियम्यन्ते । समिद्धो अग्निः इत्येता आप्रियो[2] भवन्ति शुनकानाम् । शुनक-ऋषिर्गोत्रं[3] येषां यजमानानां, ते शुनकाः, तेषामेता[4] आप्रियो[5] भवन्ति । यथ [6]ऋषि वा[6] (आश्रौ ३, २, ७) इत्येतेनैव सिद्धे अस्यारम्भे प्रयोजनं शुनक [7]आङ्गिरसः, तस्य आङ्गिरसत्वाद्[7] दैर्घतमसस्याऽऽर्षत्वात् समिद्धो अग्ने (ऋ १, १४२) इति प्राप्ताः । तस्माद् विकल्पो मा भूदिति नियमः क्रियते समिद्धो अग्निः इत्येता एव शुनकानामिति । एतत् प्रदर्शितं भवति अन्यत्रापि । यथा कण्वानामप्याङ्गिरसत्वाद् दैर्घतमसस्य प्राप्ताः । काण्वेन मेधातिथिना या दृष्टाः ता एव भवन्ति सुसमिद्धो न आवह (ऋ १, १३) इति, [8]सामान्याद् विशेषस्य बलीयस्त्वात्[8] । जुषस्व नः समिधमिति वसिष्ठानाम् । जुषस्व नः समिधम् (ऋ ७, २) इत्येता आप्रियो[9] भवन्ति वसिष्ठानां[10] वसिष्ठगोत्राणां यजमानानाम् । यथऋषि वा इति प्राप्ते आरम्भे प्रयोजनम्—वसिष्ठानामिति वसिष्ठादीनामित्युक्तं भवति । तस्माद् वसिष्ठादीनां नाराशंसानाम् । येषां [11]पृथग् ऋष्याप्रियो[11] न विद्यन्ते तेषामेता आप्रियो[12] भवन्ति राजन्यानाम् । समिद्धो अद्येति सर्वेषाम्[13] । समिद्धो अद्य मनुषो दुरोणे (ऋ १०, ११०) इत्येता आप्रियो[14] भवन्ति सर्वेषां सर्वगोत्राणां[15] यजमानानाम् । तत्र समिद्धो अद्येति समानप्रतीकत्वादेकस्य [16]समाम्नायस्येति याः[16] पूर्वास्ताः प्राप्नुवन्ति[17] समिद्धो अद्य राजसि (ऋ १, १८८) इति । उत्तरत्र जामदग्न्यः सर्वेषाम् (आश्रौ ३, २, ८) इति विशेषवचनाज्जामदग्न्यो भवन्ति । सर्वग्रहणात् शुनकादीनामप्येता विकल्पिता[18] भवन्ति । समिद्धो अद्येत्यन्येषामिति वक्ष्यति ॥ ६ ॥

---

१. आज्यो ब[1] ; आप्त्ये ब[2] ; आप्र्यो ब[1] मै ; आज्यो पू । २. आस्यो ब[1] पू ; आप्त्यो ब[2] मै ; आप्रत्यो वि । ३. °त्रे ब[1] पू ; °त्रो मै । ४. तेषाम् मै । ५. आम्यो ब[1] ; आप्त्यो ब[2] पू ; आप्त्यौ वि ; अप्र्यो मै । ६-६. वार्षिष्ठा (वासिष्ठा ब[3] वि) ब[2,1] मै वि । ७-७. अङ्गिरस (°र ब[1,3] वि पू) स्तस्य अङ्गिरसत्वाद मूको । ८-८. सामान्या (°न्य मै) विशेषस्य द्वितीयत्वात् ब[1,2] मै पू । ९. आप्र्यो ब[1,2] मै वि पू । १०. नास्ति ब[3] वि पू । ११-११. यथऋष्याप्र्यो ब[1] ; °ष्याप्र्यो ब[2] मै पू । १२. आप्र्यो ब[2] मै ; अग्न्यो ब[1] वि ; अर्प्यो पू । १३. नास्ति ब[1] पू । १४. आप्र्यो ब[1] मै पू । १५. गोत्राणां ब[3] । १६-१६. °यस्य नित्याः ब[3] ; °स्येति याज्याः ब[1] । १७. प्राप्नोति ब[1] मै पू । १८. °ल्पिनो ब[1,2] मै ; °ल्पितो पू ; °ल्पितोक्तं ब[3] ; °ल्पियो न वि ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[ऋषिनामानुसारेणाप्रीणां विकल्पकथनम्]

यथऋषि[1] वा ॥ ७ ॥

यो[2] यस्य यजमानस्य ऋषिः। यथऋषि[3] दृष्ट्वा वा आप्रियो[4] भवन्ति सर्वेषां सर्वगोत्राणाम्। ताभिर्यथा ऋष्याप्रीणीयात् (ऐब्रा २, ४) इति हि[5] श्रुतिः। अध्वर्युशाखायां तु सर्वगोत्राणां जामदग्न्य एवाम्नाताः। तस्माद् [6]विकल्पो भवति[6] सर्वगोत्राणाम् ॥ ७ ॥

[प्राजापत्ये पशौ सर्वगोत्राणामाप्रीणां जामदग्नीत्वम्]

प्राजापत्ये तु जामदग्न्यः सर्वेषाञ्च ॥ ८ ॥

प्राजापत्ये तु पशौ प्राजापत्यः अग्निचित्यासंयुक्तः इष्टकासंस्कारार्थो यो[7] भवति, तस्मिंस्तु पशौ जामदग्न्य एवाप्रियो[8] भवन्ति। [9]सर्वगोत्राणामित्यधिकारो वर्तते। प्राजापत्ये पशावन्यानि त्रीण्याप्री सूक्तानि† शाखान्तर आम्नातानि, तानि‡ आप्रीसूक्तानि भवन्ति[9]। ऊर्ध्वा अस्य समिधो भवन्ति (तैसं ४, १, ८, १; काठसं १८, १७; आपश्रौ १६, ७, ९) इति तत् काठके दृष्टम्। अस्माकं तु जामदग्न्यो विधीयन्ते। तस्याप्रियो[10] जामदग्न्यो भवन्ति (ऐब्रा ४, २६) इति श्रुतिः[11]। तु-शब्दो यथऋषिकल्पव्यावृत्त्यर्थः[12]। अग्निचित्यासंयुक्ते प्राजापत्ये जामदग्न्यो भवन्ति, न निरूढे, न सौमिके। कथं ज्ञायते अग्निचित्यासंयुक्त इति। उत्तरत्र विशेषवचनात् [13]प्राजापत्ये त्वग्निचित्यासंयुक्ते[13] (आश्रौ ३, ४, १२) इति। एतदेव विशेषणमुभयत्रापि भवति। तुकारसामान्याच्च। उभयत्रापि तुकारो विद्यते। तस्मादग्निचित्यासंयुक्त एव जामदग्न्यो भवन्ति। प्राजापत्ये जामदग्न्य इत्युक्तम्। वायव्येऽपि अग्निचित्यासंयुक्ते जामदग्न्य एव। कस्मात्। पश्वर्था ह्याप्रियो[14] भवन्ति न[15] देवतार्थाः। तथा हि श्रुतिः—तं वा एतं पशुमाप्रीतं

---

१. अथ ऋ° मूको। २. आप्र्यो ब^{1} वि। ३. यथा ऋषि (°षिः वि) ब^{2} वि पू; नास्ति मै। ४. आप्र्यो ब^{2,3} मै पू, नास्ति वि। ५. नास्ति ब^{2,3} वि। ६-६. °ल्पोद्भवति (°न्ति वि) ब^{1} वि; °ल्पेन भवन्ति ब^{3}; °भवन्ति ब^{2}। ७. नास्ति ब^{2}। ८. एवाप्र्यो ब$^{1-3}$ वि; एव प्राप्तो मै। ९-९. नास्ति ब^{1}। †. त्रीणि सूक्तानि मै। ‡. नास्ति ब^{2,3} मै पू। १०. तस्याप्र्यो मै वि। ११. श्रुतेः ब^{2}। १२. यथा ऋषि° ब^{1,2} मै वि पू; यथर्षि° ब^{3}। १३-१३. °पत्येऽग्नि° मूको। १४. ह्याप्र्यो ब^{1,2} वि पू। १५. नास्ति ब^{1,2} मै वि पू।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सन्तम् (ऐब्रा २, ११) इति । अयं च[1] पशुः सर्वरूपः । [2]गोअश्वपुरुषा-विकच्छागानां रूपाणि[2] सर्वाणि विद्यन्ते वायव्ये प्राजापत्ये च । जामदग्न्योऽपि सर्वरूपा एव अध्वर्यूणां ब्राह्मणे[3] । [4]ऐतरेयेऽपि ब्राह्मणे[4] (४, २६) सर्वरूपा वै जामदग्न्यः सर्वसमृद्धाः । सर्वरूप एष पशुः सर्वसमृद्धः इति । तस्मात् पशु-विहिता आप्रियो[5] देवतान्यत्वेऽपि एता भवन्ति । देवतान्यत्वमपि[6] न भवति । वर्णयति[7]—वायुर्ह्येव[8] प्रजापतिः (ऐब्रा ४, २६) इति । सर्वेषां च । सर्वेषां[9] च[10] आप्रियो[11] भवन्ति । किमर्थमिदम् । उच्यते । पूर्वमुक्तम्—समिद्धो अद्येति सर्वेषाम् (आश्रौ ३, २, ६) इति समानं प्रतीकम्, विशेषणं च न कृतम्[12] । इह तस्य विशेषः क्रियते । सर्वेषां यदुक्तमाप्रियस्ता[13] जामदग्न्यो भवन्तीति । अन्यथा वर्ण्यमाने[14] सर्वेषामित्यनर्थकं[15] वा भवति । सर्वेषामिति समानं[16], समिद्धो अद्येति सर्वेषाम् इत्यधिकारात् ॥ ८ ॥

[दशसूक्तेषु प्रेषितस्य मैत्रावरुणस्य प्रेषितवचनम्]

दशसूक्तेषु प्रेषितो मैत्रावरुणोऽग्निर्होता न इति तृचं पर्यग्नयेऽन्वाह ॥ ९ ॥

दशसूक्तेषु [17]दशसु प्रयाजेषु[17] उक्तेषु[18] [19]इष्टेषु अध्वर्युणा[19] प्रेषितो मैत्रावरुणः, अग्निर्होता नः (ऋ ४, १५, १) इति तृचं पर्यग्नये क्रियमाणाय अर्थं[20] अनुवचनमन्वाह[21] अनुब्रूयात् । दशसूक्तेष्विति [22]स्थानं विधीयते । प्रेषित इति वचनात् प्रेषित एव[†] प्रतिपद्यते नाऽप्रेषितः । अन्यथा दशसूक्तेष्विति[22] स्थानव्य-पदेशाद्[23] अप्रेषित[24] एव प्रतिपद्येत[25] । मैत्रावरुणग्रहणं होतुरधिकाराद् होतुरेव

---

१. तु वि । २-२. गोरश्वः (°श्व ब^{2,3}) पुरुष (°षा ब^{1}) अ (आ मै) विकछागानां (°गा यां ब^{1} ; °गा नाना ब^{3} ; °गां ना वि) रूपाणि मूको । ३. °णम् मै ; तु. शब्रा १३, २, २, १४ । ४-४. नास्ति ब^{1} पू । ५. आप्यो ब^{1,2} मै वि पू । ६. °न्यत्वमिति ब^{3} । ७. °न्ति ब^{2,3} वि । ८. वायुर्वै मै । ९. नास्ति ब^{3} । १०. नास्ति ब^{1,2,3} मै । ११. आप्यो ब^{1,2} मै वि पू । १२. वक्तव्यं वि । १३. आप्या ब^{1,2} वि पू ; आप्या मै । १४. वर्णमाने ब^{1,2} पू ; वत्स्मर्यमाने वि । १५. सर्वे इत्य° ब^{1,2} मै पू । १६. सामान्यं ब^{1} । १७-१७. दशप्रयाजेषु ब^{2} ; प्रयाजेषु दशसु ब^{1} ; प्रयाजेषु पू ; नास्ति ब^{3} । १८. तूक्तेषु मै ; नास्ति ब^{3} । १९-१९. नास्ति ब^{1} । २०. अर्थं ब^{1} ; आर्थं वि ; आद्यं ब^{3} । २१. एतं वचन° ब^{1,2} ; एतं कञ्चनमन्वाह मै ; एवं वचन° पू । २२-२२. नास्ति ब^{1} वि । †. इति ब^{1,2} मै पू । २३. स्थानधर्मव्यप° ब^{1} । २४. प्रेषित ब^{1,2} मै पू । २५. °द्यते मूको ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

पञ्चमभागः

Digitized by Madhuban Trust

स्यात् । यथाऽऽच्छावाकस्याधिकारे उन्नीयमानसूक्तमुक्तं तस्यैव भवति । मैत्रावरुणाऽधिकारे तु वचनं तद्धर्मप्राप्त्यर्थं स्यात् । पादग्रहणादृक्[1] प्राप्ता, तस्मात् तृचग्रहणम्[2] । पर्यग्नय इति वचनात् प्रेषितोऽपि न ब्रूयाद् यावत्पर्यग्निकरणं न प्रारब्धमिति तदर्थत्वात् । अन्वाहेति वचनादनुवचनधर्मप्राप्तिः ॥ ९ ॥

[अध्वर्युणा प्रेषितो मैत्रावरुणोऽन्तर्वेदि दण्डं निदधाति]

अध्रिगवे प्रेष्योपप्रेष्य होतरिति वोक्तोऽजैदग्निरसनद्वाजमिति (ऐब्रा २, ५) प्रैषमुक्त्वाऽन्तर्वेदि दण्डं निदध्यात् ॥ १० ॥

अध्रिगवे प्रेष्य इत्येवमध्वर्युणा प्रेषितः, उपप्रेष्य होतरित्यनेन वा[3] उक्तः प्रेषितः अजैदग्निरसनद् वाजम् (खि ५, ७, २, १ ; ऐब्रा २, ५) इत्येतं प्रैषं मैत्रावरुण उक्त्वा [4]अन्तर्वेदि वेद्या[4] अभ्यन्तरं दण्डं निदध्यात् स्थापयेत् । संप्रैषयोर्विकल्पः । तयोराम्नातं[5] [6]प्रयोजनम् । होतृशब्देन[6] प्रेषितोऽपि मैत्रावरुण एव प्रतिपद्यते अधिकारान्न होता । तथा हि ब्राह्मणे[7] । उक्तः प्रेषित इत्यर्थः । अप्रेषितस्य वचनं मा भूदिति प्रैषवचनम् । दण्डनिधानस्य स्थानविवक्षार्थं प्रैषमुक्त्वा प्रैषं समाप्य दण्डं निदध्यादिति । यथा—समाप्य प्रैषमग्नौ दण्डमनु प्रहरेद् (आश्रौ ३, ६, २१) इति, दण्डमवष्टभ्य ब्रूयाद् (आश्रौ ३, १, २०) इति वचनात् तावदन्तर्वेदि निधानं प्राप्तम् । परिसमाप्ते[8] प्रैषे यथागृहीत एव स्यान्निधानं[9] न प्राप्नोति, तस्मादुच्यते[10]—प्रैषमुक्त्वा० दण्डं निदध्याद् इति । वचनाद् यत्र क्व[11] च देशे निधाने प्राप्तेऽन्तर्वेदि इत्याह । अन्तर्वेद्यामेव निदध्यान्नाऽन्यत्रेति । अस्मादारम्भात् परिसमाप्ते प्रैषे अनुवचने वा अन्तर्वेद्यां दण्डं निदध्यादिति सिद्धम् ॥ १० ॥

[होतुरङ्गदैवतपशूनां यथार्थमूहपूर्वकमध्रिगुप्रैषवचनम्]

अध्रिगुं होतोहन्नङ्गानि दैवतं पशुमिति यथार्थम् ॥ ११ ॥

अध्रिगुप्रैषो भवति । तमुत्तरत्र वक्ष्यति—दैव्याः शमितारः (आश्रौ ३, ३, १) इति । तस्य अध्रिगुरिति संज्ञा । यथार्थमूर्ध्वमध्रिगोः (आश्रौ ३, २, १५)

---

१. तु. आश्रौ १, १, १७ । २. ऋचग्र° ब[1,2] मै वि पू । ३. व ब[2] ; च पू । ४-४. अन्तर्वेद्या मूको । ५. °ते ब[1,2] पू ; °त ब[3] वि ; तयोः मै । ६-६. नास्ति वि । ७. °णम् ब[1,3] मै वि पू । ८. °माप्तौ ब[1] मै पू । ९. स्याद्विधानं ब[1,2] मै पू । १०. तदुच्यन्ते ब[2] ; °च्यन्ते ब[1] मै वि पू । ११. क्वचिद् मै ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

इत्युक्ते एतस्य ग्रहणम् । तम् अध्रिगुप्रैषं होता आह । केन विधिना । तदुच्यते—ऊहन्नङ्गानि दैवतं पशुमिति यथार्थम् । अध्रिगुप्रैषे यानि पशोः अङ्गाभिधानानि देवताभिधानानि पश्वभिधानानि च, तानि यथार्थमभिधेयवल् लिङ्गानि वचनानि ऊहन्नाह । लिङ्गानि स्त्रीपुन्नपुंसकानि । वचनानि एकवचन-द्विवचन-बहुवचनानि । एतानि यथार्थमूह्यानि अभिधेयवत् शब्दान्तरैर्वक्तव्यानि[1] । अध्रिगोः प्रैषत्वान्मैत्रावरुणाधिकाराच्च मैत्रावरुणस्य प्राप्ते अध्रिगुं होता इत्याह । [2]होतैवाह, न मैत्रावरुणः[2] । ऊहो नाम यथाम्नातस्य मन्त्रस्य[3] प्रकृतौ[4] [5]विकृतिः । विधेयाऽन्यत्वे[5] सति अभिधेयवल्लिङ्गवचनानां च अभिधेयवच्छब्दान्तरेण वचनमूह इत्युच्यते । ऊहन्निति वचनाद् यावत् प्रकृतौ विक्रियते तस्य[6] सर्वस्य ऊहे प्राप्ते नियमः क्रियते—अङ्गानि दैवतं पशुमित्येतान्येव ऊह्यन्ते, नान्ये ऊहार्हाः[7] । यथा—अन्वेनं[8] माता मन्यतामनुपिताऽनुभ्राता सगर्भ्योऽनुसखा सयूथ्यः (आश्रौ ३, ३, १) इत्येवमादीनि नोह्यन्ते । ऊहः, तत्[9] किमुक्तं भवतीति न जानीमः, तस्मादिदमुच्यते—[10]यथार्थमूह इति[10] । यथार्थं लिङ्गानां[11] वचनानां च [12]अभिधेयवत् शब्दान्तरेण[12] वचनमूह इत्युच्यते । एकस्मिन्नर्थे एकदेवत्ये एकवचनम् मेधपतये । अर्थद्वये द्विदेवत्ये[13] द्विवचनम्—मेधपतिभ्याम् (ऐब्रा २, ६) इति । अर्थबहुत्वे बहुदेवत्ये बहुवचनं भवति—मेधपतिभ्यः (ऐब्रा २, ६) इति । मेधम् (ऐब्रा २, ६) इति पशौ एकवचनं पुँल्लिङ्गम् । यदा स्त्रियः पशवो भवन्ति तदा मेधां मेधे मेधाः । यथार्थमूह इति वचनाच्च[14] स्त्रीलिङ्गम् । एवमङ्गेष्वपि शरीरं शरीरे[15] शरीराणि इति ॥ ११ ॥

[स्त्रीपुंसोः सहैवोहे कर्तव्ये पुंवदूहकरणम्]

पुंवन्मिथुने ॥ १२ ॥

मिथुने[16] पुंसाऽभिधानं भवति, यत्र पशवः पुमांसः स्त्रियश्च प्रयुज्यन्ते । यथैकादशिन्यां सारस्वती मेषी अन्ये छागाः, तन्मिथनमित्युच्यते । तत्र[17]

---

१. °न्तरे व° ब[1,2] मै पू ।   २-२. न मैत्रावरुणः न होता ब[3] ।
३. नास्ति ब[2] ।   ४. प्रकृतेः ब[3] वि ।   ५-५. °तिविधे° ब[1,2] मै पू ; °तिर्वंधे° ब[3] वि ।   ६. नास्ति ब[3] वि ।   ७. ऊहार्थाः ब[3] ।   ८. नास्ति मूको ।
९. नास्ति ब[1,2] मै वि पू ।   १०-१०. °मूहति ब[2] मै वि पू ।   ११. अङ्गानां मै पू ।
१२-१२. °यवचनं शब्दोत्तरेण ब[1] ; °यवचनशब्दान्तरेण ब[2] मै पू ।   १३. नास्ति मूको ।
१४. °नात् ब[1,2] मै पू ।   १५. नास्ति ब[1] ।   १६. नास्ति ब[1,2] मै वि पू ।
१७. न च ब[3] ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

पशुभागाः
Digitized by Madhuban Trust

यथार्थमूह इति वचनात् पश्वभिधानस्य स्त्रीलिङ्गम्, उदीचीनां अस्याः[1] पदो निधत्तात् इति। यथा लोके इमाः अजाश्चरन्ति[2] अविकाश्चरन्ति[3], आसाम् एवं स्त्रीलिङ्गे प्राप्ते अयथार्थप्राप्त्यर्थमिदमुच्यते—पुंवन्मिथुन इति। पुँल्लिङ्गमेव भवति—उदीचीनाम् एषां[4] पदो निधत्ताद् इति ॥ १२ ॥

[मेधपत्याः पुंवद्देवोहविधानम्]

मेधपतीम् ॥ १३ ॥

मेधपतीं च पुंवदेव ब्रूयात्। मेधपतीमिति स्त्रीदेवताभिधानम्[5]। यदा स्त्रीदेवता भवति, तस्या यथार्थवचनात् स्त्रीलिङ्गं प्राप्तम्, यथा सरस्वती देवता। मेधपत्यै मेधपतीभ्यां[6] मेधपतीभ्य इत्येवं प्राप्ते पुँल्लिङ्गं विधीयते। मेधपतीं[7] च पुंवदेव ब्रूयात्, न स्त्रीवदिति। एवं हि ब्राह्मणं भवति—स यद्येकदेवत्यः पशुः स्यान्मेधपतय इति ब्रूयाद् यदि द्विदेवत्यो मेधपतिभ्याम् इति यदि [8]बहुदेवत्यो मेधपतिभ्य इति† (ऐब्रा २, ६) ‡इत्युक्त्वा आह‡—एतदेव स्थितम् (ऐब्रा २,६) इति[8]। [9]त्रिषु लिङ्गेषु एतदेव स्थितमिति[9] वचनादेव कल्पितं मेधपत्यै इत्युच्यमाने [10]एकवचन एव पुँल्लिङ्गं[10] स्यात्, द्विवचनबहुवचनयोर्न स्यात्। तस्माद् विभक्त्यन्तरेणोच्यते—मेधपतीमिति। तस्मात् त्रिष्वपि वचनेषु पुंवद् भवति ॥ १३ ॥

[स्त्रीपशौ मेधशब्दस्य ऊहे स्त्रीपुंल्लिङ्गयोर्विकल्पविधानम्]

मेधायां विकल्पः ॥ १४ ॥

मेधा स्त्रीपश्वभिधानम्। मेधायां स्त्रीपश्वभिधाने स्त्रीलिङ्गे प्राप्ते विकल्पो भवति [11]स्त्रीलिङ्गं पुँल्लिङ्गं वा। सारस्वती मेषी (आश्रौ ५, ३, ३)। तत्र देवताभिधाने पुँल्लिङ्गमेव पश्वभिधाने विकल्पः। मेधपतये मेधां[11] मेधमिति वा। [12]मेधां विकल्पः[12] [13]इति द्वितीयविभक्त्या वक्तव्ये विभक्त्यन्तरवचने[13] उक्तं[14] प्रयोजनम् ॥ १४ ॥

---

१. अस्यै ब[1]; अस्मै ब[2] मै पू; आसां ब[3] वि। तु. आश्रौ ३, ३, १। २. प्रजा° मूको। ३. अधिका° मूको। ४. तेषां ब[2,3] वि पू। तु. आश्रौ ३, ३, १। ५. देवता° वि। ६. नास्ति मूको। ७. मेधपतिं ब[1-3] पू; मेधवतीं मै; मेधयंता वि। ८-८. नास्ति वि। †. नास्ति मूको। ‡-‡. इत्यूहः ब[3]। ९-९. मिति ब[1]। १०-१०. °चनं पुंल्लिङ्गं ब[3] वि। ११-११. नास्ति वि। १२-१२. मेधायामिति विकल्पः मूको। १३-१३. द्वितीविभक्तात्यविभक्तान्तरवचने ब[1]; वेति वक्तात्ये विवाक्तत्ये विभक्तान्तरवचने ब[2]; वेति वक्तव्यविभक्त्यन्तरवचने ब[3] वि; वेति विभक्त्यन्त विभक्त्यन्तरवचने मै; वेति विभक्तात्य विभक्तान्तरवचने पू। १४. तु. आश्रौ ३, २, १३ देवव्रातभाष्यम्।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[अध्रिगोरूर्ध्वं यथार्थमूहनं स्त्रीपुरुषसमाहारेषु तु पुंलिङ्गेनोहनञ्च]

यथार्थमूर्ध्वमध्रिगोरन्यन्मिथुनेभ्यः ॥ १५ ॥

अध्रिगावूह उक्तः, अन्यत्र न[1] प्राप्नोति, तस्मादिदमुच्यते। अध्रिगोरपि ऊर्ध्वं पाशुके कर्मणि यथार्थमूहो भवति। अन्यन्मिथुनेभ्यः[2] मिथुनादन्यत्र[3] यथार्थमूहो भवति। मिथुने तु अयथार्थं[4] भवति। पुंवदेव भवति न स्त्रीवत्। तत्रैतान् प्रस्तुत्येव रभीयस इव कृत्वीति[5] च। तत्रैता इति न भवति। रभीयसीरिति [6]च न[6] भवति सर्वेषु[7] यजुर्निगदेषु[8] इति ऊहे प्राप्ते मिथुने अयथार्थप्राप्त्यर्थोऽयमारम्भः ॥ १५ ॥

[सर्वेषु यजुःषु निगदेषु च यथार्थमूहनम्]

सर्वेषु यजुर्निगदेषु[9] ॥ १६ ॥

[10]सर्वेषु पाशुकेषु पशोरन्यत्र च †यजुःषु च† निगदेषु[10] च यथार्थमूहो भवति। पश्वधिकारात् सर्वग्रहणम्। पशोरन्यत्रापि यत्र यत्र प्रकृतार्थो[11] विक्रियते, यथा[12] यजमानाभिधानानि[13]। भूर्भुवःस्वर्बृहस्पतिप्रसूतः (आश्रौ १, १२, १२) इति [14]प्रणीताप्रणयने जपः[14] प्रवर्ग्ये ऊह्यते। जपानुमन्त्रणाप्यायनोपस्थानकर्मकरणाः[15] [16]अनार्चिका ये मन्त्रास्तानि यजूंषि भवन्ति। अनार्चिका[16] उच्चैः प्रयुज्यन्ते ये मन्त्रास्ते निगदाः अग्ने महाँ असि (आश्रौ १, २, २७) इत्येवमादयः। यजुःषु[17] उदाहरणं शुरसि योऽस्मान् द्वेष्टि (आश्रौ ३, ६, २३) इति[18], भूर्भुवःस्वर्बृहस्पतिप्रसूतः मित्रावरुणयोस्त्वा बाहुभ्याम् (आश्रौ ३, १, १६)। निगदेषु[19] होतारमवृथाः (आश्रौ १, ४, ९-१०)। प्रैषेषु च यानि यजमाननामानि ॥ १६ ॥

---

१. नास्ति ब³। २. अन्यत् ब¹; अन्यस्मिन् मिथुनेभ्यः ब²; अन्यन्मिथुनेभ्यां ब³; अन्यन्मिथुनाभ्यां मै; अन्यन्मिथुनेभ्या वि; अन्यन्मिथुनात् पू। ३. मिथ्रणादन्यत्र ब³ वि; अन्यादन्यान्मिथुनादन्यत्र च निगदेषु च पू। ४. यथार्थं ब¹'² मै पू; अयथार्थो ब³। ५. तु. तैब्रा ३, ६, ११, ३। ६-६. वचन ब¹'²; वचनं ब³ मै वि। ७. सर्वे मै। ८. यज्ञनिग° ब¹'² मै वि पू। ९. यज्ञनि° ब¹'² मै। १०-१०. नास्ति वि। †-†. नास्ति ब¹'² मै पू। ११. °र्थी ब²; विकृत्यार्थी ब³। १२. यथार्थे ब³। १३. तु. आश्रौ १, ७, ७; ९, ५। १४-१४. °यनजपः ब³। १५. तु. आश्रौ १, १, २०। १६. अनर्चका मूक्तो। १७. यजुषि मै। १८. नास्ति मै। १९. निगमेषु मै।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

पशुयाग

Digitized by Madhuban Trust

[प्रकृतावभिधेयमर्थमभिधातुं समर्थानां मन्त्राणां विकृतावूहनं नाभिधातुमसमर्थानां मन्त्राणाम्]

प्रकृतौ समर्थनिगमेषु ॥ १७ ॥

प्रकृतावाम्नाये ये समर्थनिगमा[1] मन्त्राः अभिधेयमर्थम् अभिधातुं समर्था ये मन्त्रास्ते समर्थनिगमा[2] इत्युच्यन्ते। विकृतावपि ते ऊह्यन्ते। यथा मित्रावरुणयोस्त्वा (आश्रौ ३, १, १६) इति [3]प्रकृतावेकं दण्डम्[3] अभिधातुं समर्थो [4]विकृतावपि दण्डबहुत्वे ऊह्यते। ये पुनः प्रकृतावप्यसमर्थाः[4] [5]अभिधेयमर्थभिधातुं† ते असमर्थनिगमाः[5]। ते विकृतावप्यसमर्था एव। ते नोह्यन्ते। यथा —घृतवती-मध्वर्योः‡ स्रुचमास्यस्व (आश्रौ १, ४, ११) इति। स्रुचमिति एकवचनाम्नाता अर्थद्वयमभिधातुमसमर्थाः[7], विकृतावपि[8] वरुणप्रघासेषु अर्थबहुत्वमभिधातुमसमर्था[9] एव[6]। तस्मान्नोह्यन्ते[10]। यथार्थं सर्वत्र ऊह इत्येतावता सिद्धे यजुर्निगदेष्विति नियमाद् [11]ऋक्षु ऊहो न[11] भवति। तथाहि श्रुतिं दर्शयति—पूयति वा एतदृचोऽक्षरं यदेनदूहति तस्मादृचं नोहेत् (आश्रौ ५, ४, ८)॥ १७॥

[मन्त्रगतशब्दानां प्राकृतत्वेनोहनं न वैकृतत्वेन]

प्राकृतास्त्वेव मन्त्राणां शब्दाः ॥ १८ ॥

प्रकृतिराम्नायः[12]। प्रकृतौ भवाः प्राकृताः[13]। प्रकृतौ[14] एव यथाम्नाताः[15]। एवं[16] मन्त्राणां प्राकृताः[17] शब्दा ऊह्यन्ते, न वैकृताः। तैः[18] शब्दैरूहो न क्रियते, अनार्षत्वात्[19]। यथा अयं[20] यजमानः (आश्रौ १, ७, ७)। अत्र प्राकृत एव ऊह्यते, इमौ यजमानाविमे[21] यजमाना इति। केचिद् यत्र नाम संस्कारार्थं [22]ऊहः, तत्र[22] प्रकृत्यन्तरेणानाम्नातेन[23] शब्देन[24] ऊहमिच्छन्ति[25]। अहं[26] यजमानः, आवां

---

१. समर्था निगमा मै। २. समर्था निगमा ब[3] मै वि। ३-३. °वैकदण्डम् ब[1,2] पू। ४-४. नास्ति ब[3]। ५-५. नास्ति ब[1]। †. °धेयं समर्थं° ब[2]। ‡. °र्थो नि° ब[1]। ६. °र्तीं मूको। ७. °तुं (तु ब[2]) समर्थाः ब[2,3] मै। ८. °ता अपि ब[1]; °तामपि ब[2]; °ता वापि वि। ९. एव। तथा हि श्रुतिं दर्शयति ब[1] वि। १०. °ते ब[1] वि। ११-११. स्रुक् स्रुव होमो ब[3]। १२. नास्ति मै। १३. नास्ति ब[1]। १४. प्रकृतौ प्रकृता ब[2]; प्रकृता ब[1] पू; प्राकृता मै। १५. याज्याम्नाता ब[1]; याथानुम्नाताः वि। १६. एव ब[1,3]। १७. नास्ति मूको। १८. यैः ब[1]; नास्ति ब[1,2] मै वि पू। १९. अनर्थत्वात् ब[1,2] मै पू; अनार्षं वा यद्वा यं वैकृतैः ब[3] वि। २०. नास्ति मै। २१. नास्ति ब[1] पू। २२-२२. नास्ति मूको। २३. °णाम्नातेन ब[1,2] मै पू; °णाम्नातान् ब[3]; °णानाम्नाते वि। २४. एतच्छब्देन ब[1]; त शब्दे वि। २५. तदूह° वि। २६. अयं मूको।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यजमानौ, वयं यजमाना इति। तत्प्रतिषिद्धसूचनात् शब्दोपचयोऽपि न कर्तव्यः। आम्नायेऽपि 'तस्योपपादनं प्राप्तं'[1] व्यावर्तयन्ति। एव-शब्दोऽवधारणार्थः। प्राकृतत्वमेवावधारयति। प्राकृतास्त्वेवेति च। यथा वरुणप्रघासेषु अध्वर्युः स्रुचमादत्ते प्रतिप्रस्थाता च। स्रुचावादापयेन्निगदेन (आश्वौ १, ४, ९) इति वचनाद् घृतवतीमध्वर्युप्रतिप्रस्थातारावितिे[2] शब्दोपचयः कर्तव्यः प्राप्नोति, तत्प्रतिषेधार्थमपि प्राकृतास्त्वेवेत्युच्यते। प्राकृतास्त्वेव शब्दा इत्येतावता[2] सिद्धे मन्त्रग्रहणमूहस्यामन्त्रत्वार्थम्[3]। यथा भाषायां, तथा वर्णविकारे प्राप्ते मन्त्रग्रहणाद् यथा मन्त्रे वर्णविकारस्तथैव भवति। अघत् अघत्ताम् अघन् इति भवति। अघसत् अघसताम् अघसन् इति न भवति। यथा यजमानाँ अवन्त्वित्यत्र नकार लोपो भवति, [4]यजमानानवन्त्विति न भवति[4] ॥ १८ ॥

[प्रतिनिधिष्वपि प्राकृतशब्दानामूहनम्]

प्रतिनिधिष्वपि ॥ १९ ॥

शिष्टाभावे[5] प्रतिनिधिर्भवति। भावेऽपि[6] प्रतिनिधिर्दृश्यते[7] गोःस्थाने। गोरालम्भः श्रुतावाम्नातः। वैष्णवं वामनमेकविंशे (आश्वौ १२, ७, ११) इत्येवमादि। श्रुतावेव[8] गोवधः प्रतिषिद्धः मा गामनागामदितिं वधिष्ट (ऋ ८, १०१, १५) इति। तस्माद् गोः स्थाने छागादयः प्रतिनिधीयन्ते। उक्तं च—अन्योन्यस्य प्रतिनिधयो भवन्ति (बौश्रौ २८, ६ : १५) इति। तस्माद् गोःस्थाने छागः अविको[9] वा[10] प्रतिनिधिर्भवति। तत्र प्रतिनिधौ प्रत्यक्षबलीयस्त्वात् तस्यैवाभिधानेन छागस्य वपाया मेदस इत्येवं प्राप्ते प्रतिनिधिष्वपि प्राकृतास्त्वेव मन्त्राणां शब्दाः (आश्वौ ३, २, १८) इत्युच्यते[11]। गोः प्रतिनिधिः, तस्याभिधानेन प्रयोगः, गोर्वपाया मेदस इत्येवं[12] भवति। अपि-शब्दः समुच्चयार्थः। यदा संप्रैषे अव्यक्तचोदना भवति, तदर्थमिदमुक्तं द्रष्टव्यम् ॥ १९ ॥

[नाभिरुपमामेदोहविरित्येषामनूहनम्]

नाभिरुपमा मेदो[13] हविरित्यनूह्यानि ॥ २० ॥

१-१. °पादने प्राप्ते मैं। २. °प्रतिप्रस्थाता इत्येतावता ब[1] मैं पू। ३. °न्त्रत्वात् मूको। ४-४. नास्ति मैं। ५. शब्दाभावे ब[1,2] मैं पू। ६. अभावेऽपि ब[3]। ७. °धिर्गृह्यते ब[3]। ८. श्रुतावचस्थाने गोरालम्भः श्रुतावाम्नात् ब[1] पू। ९. अविका ब[1] वि ; आविको मैं। १०. नास्ति ब[1] वि। ११. °च्यन्ते मैं पू। १२. इत्येव (°कं ब[1]; °क वि) मूको। १३. मेऽदो मुद्रितपाठः।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

पशुनामा;
Digitized by Madhuban Trust

नाभिरुपमा मेदो हविरित्यनूह्यानि चत्वारि। [1]यथार्थवचनात् प्राप्ते प्रतिषेधः[1] । नाभेरङ्गत्वादूहः प्राप्तः । नाभिः प्राण: इति नोह्यते । श्येनादय[2] उपमा। हविराद्यत्वसामानाधिकरण्यादूहे[3] प्राप्ते पश्वङ्गत्वाभावात्[4] प्रतिषेधः। मेदसः अङ्गत्वादूहे प्राप्ते गुणत्वात् प्रतिषेधः। हविषः अङ्गत्वाद् ऊहे[5] प्राप्ते जातिवाचकत्वात् प्रतिषेधः । अध्रिगुं होतोहन् (आश्रौ ३, २, ११) इत्यधिकृत्य ऊहप्रकरणं[6] समाप्तम् ॥ २० ॥

॥ [इति] तृतीयस्य [7]द्वितीयं खण्डम्[7] ॥

१-१. °वचनता प्रतिषेधः ब[2] मै पू ; °वचनाः ता प्रतिषेधः ब[1] ; °वचनात् (°नाः वि) प्राप्ते प्रतिषेधः ब[3] वि। २. मेदादय मूको। ३. हवि (दिवि ब[1] ; हिवि ब[2] वि पू) राद्यन्तसमानाधिकरणात् (राज्यत्वात् समानोधिकरण्यात् ब[3] वि) मूको। ४. पश्वङ्गाभावात् मूको । ५. नास्ति मूको। ६. ग्रहः मै। ७-७. द्वितीयः खण्डः समाप्तः मै।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ तृतीयेऽध्याये तृतीयः खण्डः

[अध्रिगुप्रैषकथनं तत्रस्थपदानामूहश्च]

इदानीमध्रिगुप्रैषो वक्ष्यते—

दैव्याः शमितार आरमध्वमुत मनुष्या उपनयत मेध्या दुर आशासाना मेधपतिभ्यां मेधम् । प्रास्मा अग्नि भरत, स्तृणीत बर्हिरन्वेनं माता मन्यतामनु पिताऽनुभ्राता सगर्भ्योऽनु सखा सयूथ्यः। उदीचीनाँ अस्य पदो निधत्तात् सूर्यं चक्षुर्गमयताद् वातं प्राणमन्ववसृजतादन्तरिक्षमसुं दिशः श्रोत्रं पृथिवीं शरीरम् । एकधाऽस्य त्वचमाच्छ्यतात् पुरा नाभ्या अपिशसो वपामुत्खिदतादन्तरेवोष्माणं वारयध्वात् । श्येनमस्य वक्षः कृणुतात् प्रशसा बाहू शला दोषणी कश्यपेवांसाऽच्छिद्रे श्रोणी कवषोरू स्रेकपर्णाऽष्ठीवन्ता षड्विंशतिरस्य वङ्क्रयस्ता अनुष्ठ्योच्च्यावयताद् गात्रं गात्रमस्याऽनूनं कृणुतात् । ऊवध्यगोहं पार्थिवं खनतात् । अस्ना रक्षः संसृजतात् । वनिष्ठुमस्य मा राविष्टोरूकं मन्यमाना नेद्वस्तोके तनये रविता रवच्छमितारः । अध्रिगो शमीध्वं सुशमि शमीध्वं शमीध्वमध्रिगा३ उ अपाप (तु. ऐब्रा २, ६-७) ॥ १ ॥

दैव्याः शमितार [1]आ रभध्वम् इति प्रैषः । अनेन † शमितारः प्रेष्यन्ते । तस्मिन् प्रैषे यानि पश्वङ्गदेवताभिधानानि तानि‡ यथार्थमूह्यन्ते । तानि वक्ष्यामः । ϕमेधपतिभ्यामित्येकमेव[1] देवताभिधानम् । [2]मेधमिति पश्वभिधानम्[2]। [3]अस्मै एनमिति[3] च[4] । एवं मात्रादयो बन्धुशब्दा नोह्यन्ते । उदीचीनानस्य इत्येवमादि अस्येति पश्वभिधानं षट्कृत्व आवर्तते । पद इत्यङ्गाभिधानं नित्यं

१-१. आरधः पतिभ्यामित्येक° वि । †. अतः ब[1] । ‡. नास्ति ब[1,2] मै पू । ϕ. मेधपतये इत्येक एव ब[1] मै पू ; मेधपतयेमित्येक ब[2] । २-२. मेधपतिपश्व° ब[2,3] । ३-३. यस्यै एमिति ब[1] ; एतस्मै एतमिति ब[3] । यस्मै एतमिति वि । ४. नास्ति ब[1,2] मै पू ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

बहुवचनमेव। सूर्यं चक्षुर्गमयताद् वातं प्राणम् अन्ववसृजताद् अन्तरिक्षमसुं दिशः श्रोत्रमित्येते प्राणशब्दा अनङ्गत्वान्नोह्यन्ते। शरीरमित्यङ्गाभिधानं त्वचमिति च। पुराशब्दो देशवाचित्वाद् द्विरुच्यते। [1]नाभिरनूह्या। वपाशब्दोऽङ्गम्। †अन्तर्-शब्दो देशवाचित्वाद् द्विरुच्यते[1]। श्येनशब्द उपमा नोह्यते। वक्षः अङ्गं बाहू द्वावेव च। शला[2] उपमा। दोषणी अङ्गम्। कश्यपेव[3] उपमा। अंसावङ्गम्। अच्छिद्रशब्दः श्रोणीपरत्वादूह्यते। श्रोणी अङ्गम्। कवषा[4] इति उपमा नोह्यते। ऊरू इति अङ्गम्। स्रेकपर्णा उपमा नोह्यते। अष्ठीवन्ता इत्यूह्यते[5] ऊरुपरत्वात्[6]। षड्विंशतिशब्दो[7] द्विरुच्यते, वङ्क्रिपरत्वात्[8]। वङ्क्रयस्ताः इति नित्यं बहुवचनम्। गात्रंगात्रमित्यङ्गम्। नित्यवीप्सा। वनिष्ठुमित्यङ्गम्। उरूकमित्युपमा नोह्यते। अपरे वपाभिधानं मन्यन्ते। तेषामूह्यते। उपमा एव, नेद्वस्तोके तनये रविता रवच्छमितारः इति [9]मन्त्राभिवादादिति। एतावदभिधानानि[9] व्याख्यातानि[10]। अपापेति च प्रैषः समाप्यते॥ १॥

[अस्नेत्यादित्रयाणामुपांशु प्रयोज्यत्वम्]

अस्ना रक्षः संसृजताच्छमितारोऽपापेत्युपांशु॥ २॥

तस्मिन् प्रैषे अस्ना रक्षः संसृजतात्, शमितारः, अपाप इत्येते त्रयः शब्दा उपांशु भवन्ति। स यदि कीर्तयेदुपांशु कीर्तयेत् (ऐब्रा २, ७) इति श्रुतिः॥ २॥

[एकधाषड्विंशतिशब्दयोः पुरान्तरित्येतयोश्च द्विर्वक्तव्यत्वम्]

एकधा षड्विंशतिरिति द्विद्विबहूनाम्। पुरान्तरिति चैके॥ ३॥

एकधा षड्विंशतिरित्येतौ शब्दौ द्विर्वक्तव्यौ द्विबहूनां पशूनाम्। द्वयोः पश्वोः बहूनां च पशूनाम्। षड्विंशतिशब्दस्य संख्यापरमभिधानं प्राप्तं षड्-विंशतिरस्य वङ्क्रयः (आश्रौ १०, ८, ७)। [11]द्विपञ्चाशदेतयोर्वङ्क्रयः[11]। [12]अष्टा-सप्ततिरित्येतेषां वङ्क्रय इति। एवं यावन्तः पशवः सर्वेषां वङ्क्रयः प्रसंख्याय† वक्तव्या इत्येवं प्राप्ते आचार्येण षड्विंशतिरिति[12] अभ्यासो [13]विहितः। अनूनम्† (ऐब्रा २, ६) एवं श्रुतिरस्ति‡। अश्वस्य तु चतुस्त्रिंशद् वङ्क्रयः[13]। ता अश्व-

---

१-१. नास्ति ब[1] वि। †. अन्तरशब्दो मूको ; तु. ऐब्रा २, ६।
२. शलौ ब[3] वि। ३. कश्यपे च ब[1,3] मै वि पू। ४. कवष मूको ; तु. ऐब्रा २, ६।
५. °ह्यन्ते ब[1,2] मै वि पू। ६. ऊरूप° मूको। ७. षड्विंशशब्दो मै।
८. वङ्क्रय इति पर° ब[1] ; वङ्क्रयपर° ब[2] मै पू ; वायपर° ब[1] ; वङ्क्रियपर° वि।
९-९. मन्त्राभिवादाभिरित्येताव° ब[1,2] मै पू ; मन्दित्येताददभिधावानिघारधानानि ब[3] ; मन्त्रोभिवदोदित्येनादभिधानानि वि। १०. नास्ति ब[3]। ११-११. नास्ति ब[3]।
१२-१२. अष्टासप्ततिरिति वि; नास्ति ब[3]। †. प्राप्तव्याख्याय ब[1]। १३-१३. नास्ति ब[3]।
†. नूनम् मूको। ‡. श्रुतिरिति मै।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सूक्तेनोक्ताः चतुस्त्रिंशद् वाजिनो देवबन्धोः (ऋ १, १६२, १८) इत्येतयर्चा। पुरान्तरिति चैके। [1]'पुरा अन्तरित्येतौ च शब्दौ द्विर्वक्तव्यौ इत्येके आचार्या मन्यन्ते द्विबहूनां पशूनाम्† । द्विर्बहूनामित्यनुच्यमाने एकस्मिन्नपि पशौ द्विर्वचनं स्यात्'[1]। पुरान्तरित्येतयोः देशवाचित्वाद् द्विर्वचनमेके मन्यन्ते। अव्ययत्वादनूह्यावित्यपरे। तस्माद् विकल्पः कृतः ॥ ३ ॥

[अध्रिग्वादिनिगदशेषं त्रिरुक्त्वा शमितार इति मन्त्रं जपित्वा होतुर्दक्षिणावृदावर्तनम्]

अध्रिग्वादि त्रिरुक्त्वा शमितारो यदत्र सुकृतं कृणवथास्मासु तद् यद् दुष्कृतमन्यत्र तदिति जपित्वा दक्षिणावृदावर्तते ॥ ४ ॥

अध्रिगो अयं शब्द आदिर्यस्य निगदशेषस्य[2] सः अध्रिग्वादिनिगदशेषः। तम् अध्रिग्वादिनिगदशेषं त्रिरुक्त्वा। सकृद्वचने प्राप्ते त्रिर्वचनं विधीयते। अध्रिगो शमीध्वम् [3]'इत्यारभ्य अपापेत्यन्तं'[3] (आश्रौ ३,३,१) त्रिरुक्त्वा अनन्तरं शमितारो यदत्र (ऐब्रा २, ७) इत्येतं मन्त्रं जपित्वा तूष्णीमेव, दक्षिणावृदावर्तते [4]'दक्षिणं बाहुमन्वावर्तते'[4] होता। जपित्वेति वचनात् तूष्णीमावर्तते। जपित्वाग्रहणे अक्रियमाणे आवर्तनार्थो मन्त्रः स्यात् ॥ ४ ॥

[मैत्रावरुणस्य दक्षिणावृदावर्तनम्]

मैत्रावरुणश्च ॥ ५ ॥

मैत्रावरुणश्च दक्षिणावृदेवावर्तते[5]। अत्र जपो न प्राप्नोति। अध्रिग्वादि त्रिरुक्त्वा शमितारो यदत्र इति संबन्धकरणादध्रिगावयं[6] जपो भवति। तस्मान्मैत्रावरुणस्य [7]'च न'[7] प्राप्नोति। च-शब्दः समुच्चयार्थः। आवर्तते इत्यधिकारात् समुच्चयार्थः ॥ ५ ॥

[ब्रह्मयजमानयोः संज्ञप्तयोः पश्वोः सव्यावृदावर्तनम्]

सव्यावृतौ ब्रह्मयजमानौ संज्ञप्ते पशावावर्तेरन् ॥ ६ ॥

सव्यं बाहुमन्वावर्तते ययोस्तौ सव्यावृतौ। ब्रह्मयजमानौ सव्यावृतौ भवतः। सव्यावृद्वचनात् सर्वत्र ब्रह्मा[8] उदङ्मुखो भवतीति सिद्धम्। यजमानग्रहणाद् ब्रह्म-

---

१-१. नास्ति ब[3] वि। †. नास्ति ब[1] पू। २. °देशे° ब[1] वि। ३-३. इत्याप्राप्यते मे त ब[1]; इत्यप्राप्यतमेतं ब[2]; इत्यपायां नाम तं ब[3]; इत्यापायान्तामतं वि; इत्यारभ्य अपात्यतं पू। ४-४. दक्षिणं बाहु° ब[1] वि। ५. °वृदावर्तते ब[3]; दक्षिणावृते ब[2]। ६. °ध्रिगोवयं ब[2,3]। ७-७. वचनं (°न वि) ब[3] वि। ८. नास्ति वि।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यजमानयोः साहचर्यं दर्शयति। साहचर्यात् पत्नीसंयाजहोमार्थं ब्रह्मा न व्रजति। नित्यः सर्वकर्मणां दक्षिणतः (आश्रौ १, १२, ३) इति प्राप्तं तु गमनम्। यथा प्रवर्ग्ये यजमानवशान्न व्रजति, तथा पित्र्यायां[1] हविःषु परिक्रामन्ति ऋत्विजः। यजमानवशाद् ब्रह्मापि[2] परिक्रामति[3]। अस्माकं तु [4]वचनं न† विद्यते। संज्ञप्ते पशावावर्तेरन्। संज्ञप्ते संस्थिते[4] पशावावर्तेरन्। यदिदं नोच्यते, आऽन्यस्मात्[5] कर्मण आसीरन्निति [6]स्यात्†। तस्मात् संज्ञप्ते०‡ इत्याह[6]॥ ६॥

॥ [इति] [7]†तृतीयस्य तृतीयं खण्डम्†[7] ॥

---

१. तु. आश्रौ २, १९, १७ देवत्रातभाष्यम्। २. ब्रह्मा ब[1]। ३. विपरिक्रामति ब[1] मै। ४-४. व संज्ञा तस्य स्थिते वि। †. नास्ति ब[1]। ५. अन्यस्मात् मूको। ६-६. नास्ति वि। †. आत ब[1,2] मै पू। ‡. संज्ञाता ब[1,2] मै पू। ७-७. नास्ति वि। †-†. तृतीयः खण्डः मै।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ तृतीयेऽध्याये चतुर्थः खण्डः

[वपायां श्रप्यमाणायां प्रेषितस्य स्तोकेभ्योऽनुवचनम्]

वपायां श्रप्यमाणायां प्रेषितः स्तोकेभ्योऽन्वाह जुषस्व सप्रथस्तममिमं नो यज्ञमिति ॥ १ ॥

वपा अङ्गं भवति । तस्य पशोः वपामुद्धृत्याध्वर्यव आहवनीये श्रपयन्ति । तस्यां[1] [2]श्रप्यमाणायाम् अध्वर्युः[2] आज्येनाऽभिघारयन्नाह—स्तोकेभ्योऽनुब्रूहीति । एवं प्रेषितो मैत्रावरुणः[3] । तत्र ये स्तोकाश्चोतन्ति[4], तेभ्यः स्तोकेभ्यः अर्थे इदं वक्ष्यमाणमनुवचनमन्वाह[5] । जुषस्व सप्रथस्तमम् (ऋ १, ७५, १) इत्येका ऋक्, इमं नो यज्ञम् (ऋ ३, २१, १) इति सूक्तम् । वपायां श्रप्यमाणायाम् इति वचनाद-संप्रेषित एवाऽनुवचनं प्रतिपद्यत इति स्यात्[6], तस्मात् प्रेषित इत्याह । स्तोकेभ्य इति वचनात् प्रेषितोऽपि तावन्न ब्रूयाद् यावत्[6] स्तोकाश्चोतन्तीति[7] । श्रप्य-माणायां वपायां[8] ये[9] तत्राऽग्नौ स्तोका निपतन्ति, तेभ्यो हि इदमनुवचनम् ॥ १ ॥

[स्वाहाकृत्यर्थं स्रुगादापनमुत्तमाऽऽप्री याज्या च]

उक्तमादापनं स्वाहाकृतिभ्यः ॥ २ ॥

होताऽयक्षदग्निं स्वाहाऽऽज्यस्य स्वाहा मेदस इति प्रैषः, उत्तमाऽऽप्री याज्या ॥ ३ ॥

उक्तमादापनं, स्तोकसूक्तादनन्तरं[10] स्रुगादापनं वक्तव्यं भवति स्रुचावा-दापयेन्निगदेन (आश्रौ १, ४, ९) इति । तदत्रादापनमित्युच्यते । स्वाहाकृतिभ्यः । स्रुगादापनादनन्तरं स्वाहाकृतयः उत्तमः प्रयाजः । स्वाहाकृतिभ्यो देवताभ्यः अर्थे होताऽयक्षदग्निं स्वाहाऽऽज्यस्य स्वाहा मेदसः इति प्रैषो भवति । उत्तमाऽऽप्री याज्या

---

१. स तस्यां ब[1] ; स तस्या (°स्याः मै) ब[2] मै पू । २-२. नास्ति वि । ३. नास्ति मूको । ४. नास्ति वि । ५. °मनुप्रवच° ब[1,2] पू । ६. नास्ति ब[1,2] मै पू । ७. °तन्ति ब[3] वि मै । ८. नास्ति ब[1,2] मै पू ; यां वि । ९. ते ब[1] वि । १०. तु. ऋ ३, २१ ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

पदभागा
Digitized by Madhuban Trust

भवति। पुनरुच्यते प्रैष आप्रीयाज्येति। आप्रिग्रहणेनैव सिद्धे प्रैषग्रहणं याज्याविवक्षार्थम्। अन्यथा प्रैष एव उत्तमाऽऽप्रीयाज्यास्थाने स्याद्[1] इति नियमार्थं[2] प्रैषग्रहणं क्रियते। याज्याग्रहणं चेन्न क्रियते, याज्या[3] न प्राप्नोति, प्रैष एव स्यादित्युभयमुच्यते[4]। उत्तमा याज्या इति सिद्धे आप्रीग्रहणात् आप्रीणामुत्तमा भवति, न सूक्तस्योत्तमा समिद्धो अग्न आ वह (ऋ १, १४२) इत्येतस्मिन् सूक्ते ॥ २-३ ॥

[वपा पुरोडाशो हविरिति पशोर्यागविधानम्]

वपा पुरोळाशो हविरिति पशोः प्रदानानि ॥ ४ ॥

प्रयाजेभ्योऽनन्तरं वपा पुरोळाशो हविरित्येतानि पशोः त्रीणि प्रदानानि अनुक्रमेण भवन्ति। तेषामिदानीं विधिरुच्यते। पश्वधिकारे पशुग्रहणात् पशोर्या देवता तद्देवत्य एव पशुपुरोळाशो[5] भवति। वचनादन्यदेवत्यो भवति। प्रदानानीति इह वचनात् प्रदानानामुक्ताः प्रैषाः (आश्रौ ३, ७, १) इत्युक्ते एतेषां ग्रहणम् ॥ ४ ॥

[नानादेवतेषु पशुषु वपापुरोळाशहविषां पृथग्भावः]

तानि पृथङ् नानादेवतेषु ॥ ५ ॥

उक्तानि [6]पृथक् पृथक्[6] प्रदीयन्ते। नानादेवत्येषु पशुषु पृथग् वपाः पृथक् पुरोळाशाः पृथग्घवींषि। एकप्रदानेभ्योऽन्यत्र नानादेवतानामेकं[7] प्रदानं न संभवति। किमर्थमिदमुच्यते? इति। वक्ष्यति—अग्नीषोमयोः स्थाने या या पशुदेवता छागस्थान उस्रो गौः (आश्रौ ३, ४, ९-१०) इति। अस्माद् वचनान्नानादेवत्येषु एकैकस्मिन्[8] प्रदाने सर्वासां देवतानां पशूनां चाऽऽदेशः[9] प्राप्नोति। तस्मादिदमुच्यते। तानि पृथङ् नानादेवतेषु इति वचनाद् यस्यै देवतायै यत् प्रदानं तस्या एव देवताया आदेशो भवति, तस्यैव च पशोः ॥ ५ ॥

[नानादेवतेषु पशुषु पृथङ् मनोतामन्त्रस्यावर्तनम्]

मनोतां च ॥ ६ ॥

---

१. नास्ति मूफो। २. °मार्थं (र्थः मै) स्यात् ब[1,2] मै वि पू; °मार्थात् ब[2]। ३. नास्ति ब[1,2] मै पू। ४. स्यादुभयमित्युच्यते ब[1] मै पू; स्यादुभयमुच्यते ब[2]; स्यादुक्तमुच्यते ब[1] वि। ५. पुरोळाशो ब[2]। ६-६. पृथक् ब[1] पू। ७. नानामकं ब[1]; नानादेवतामेकं ब[2] वि पू। ८. एकस्मिन् ब[1]। ९. वादेशः ब[3] वि।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

नानादेवतेषु पशुषु मनोतां च पृथग् ब्रूयात् । च-शब्दोऽधिकारसमुच्चयार्थः । हविषामवदीयमानानामर्थे अनूच्यते [1]यस्मात्तस्मादावर्तते मनोता[1] ॥ ६ ॥

[मनोतामन्त्रस्यावर्तननिषेधविकल्पः]

न मनोताऽऽवर्ततेत्येके ॥ ७ ॥

प्रतिपशु मनोता नावर्तते इत्येके आचार्या मन्यन्ते । यथा तानि कर्माणि प्रयाजादीनि प्रतिपशु नावर्तन्ते । सकृदेव प्रयुक्तानि सर्वार्थानि भवन्ति । एवं मनोताऽपि[2] सकृदेव प्रयुक्ता[3] सर्वार्था[4] भवति[5] ॥ ७ ॥

[उक्तप्रदानानां प्रैषाणां समानलिङ्गत्वकथनम्]

तेषां सलिङ्गाः प्रैषाः ॥ ८ ॥

तेषां प्रदानानां[6] सलिङ्गाः समानलिङ्गाः प्रैषाः[7] प्रैषसमाम्नाये[8] आम्नाताः । यल्लिङ्गं प्रदानं तल्लिङ्गाः प्रैषाः[9] । वपालिङ्गो[10] वपायाः, पुरोळाशलिङ्गः पुरोळाशस्य, हविर्लिङ्गो हविषः, लिङ्गैर्ग्राह्याः । लाघवार्थमिदमुच्यते । प्रतीकोद्देशानुरूप्यात् ॥ ८ ॥

[प्रदानप्रैषेषु विकृतिषु च याः पशुदेवतास्तासामग्नीषोमस्थाने निर्देशविधानम्]

तेष्वग्नीषोमयोः स्थाने या या पशुदेवता ॥ ९ ॥

अग्नीषोमीयस्य पशोः प्रैषसमाम्नायः[8] । ते[11] प्रैषा [12]आदिष्टाः सन्तः सर्वपशुषु यथाम्नाताः प्राप्नुयुः, तस्मादिदमुच्यते । तेषु प्रैषेषु प्रदानप्रैषेषु† अग्नीषोमयोः पशुदेवतायाः[12] स्थाने या या[13] पशुदेवता भवति, तां तामादिशेत् । पशुग्रहणे अक्रियमाणे तन्त्रदेवतानामप्यादेश आज्यभागादीनां प्राप्नोति ॥ ९ ॥

[छागस्थानेऽन्वाविष्टानामुस्रमेषहयानां स्थाने गवादिपर्यायविकल्पः]

छागस्थान उस्रो गौर्मेषोऽविको हयोऽश्वोऽन्वादेशे व्यक्तचोदनाम् ॥ १० ॥

१-१. यस्मादस्मादन्वावर्तंते मनोतानां च नानादेवतेषु पशुषु ब[1] ; यस्मादस्मादन्वावर्तंते मनोता ब[2] ; यस्मात्तस्मादन्वावर्तंते मनोता मै पू । २. मनोता अपि मूको । ३. प्रयुक्ताः ब[1,2] वि पू ; नास्ति ब[3] ; प्रयुक्तः मै । ४. सवनीया ब[3] वि । ५. भवन्ति मूको । ६. नास्ति ब[3] । ७. प्रैषा नास्ति ब[1] । ८. तु. खि ५, ७, २ । ९. नास्ति मूको । १०. वपालिङ्गाः ब[1] पू ; प्रेषणा (प्रैवणा वि) लिङ्गो ब[3] वि । ११. तत्रैताः मै । १२-१२. आदिशशब्दाः या ब[3] । †. नास्ति वि । १३. नास्ति मै ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

छागस्य पशोः प्रैषाः समाम्नाताः । [1]ते यथासमाम्नाता[1] अन्येष्वपि पशुषु प्राप्ताः । तस्मादिदमुच्यते । छागस्थाने गोपशुर्यदा भवति तदा[2] उस्र[3] इत्युक्त्वाऽऽदेशो भवति, [4]गौरिति वा । यदा अविकजातिर्भवति, तदा छागस्थाने मेष इत्युक्त्वाऽऽदेशो भवति[4], अविक[5] इति वा । अश्वजातिर्यदा भवति, तदा छागस्थाने हय इत्यादेशो भवति, अश्व इति वा । अजजातौ[6] छागशब्द आम्नातः । अध्वर्युसंप्रैषवशाद् अजशब्दोऽप्यादिश्यते । एताश्चतस्रः पशुजातयः । यासां वपादीनि त्रीणि प्रदानानि प्रदीयन्ते, तासामपि पशवो नियुज्यन्ते । नान्येषां वपादीनि प्रदानानि विद्यन्ते । तस्मात् तिसृणामेव जातीनां द्वौ द्वौ जातिवाचकौ शब्दावुपदिशति । अध्वर्यूणामप्येते विकल्पा दृश्यन्त इति । सर्वान् गोपशूनुत्स्रयेद्[7] इति बौधायनः[8] (बौश्रौ २१, २६) इत्येते । छागस्थाने [9]यो यः[9] पशुरिति लघुना सिद्धे गुरुवचने प्रयोजनमुत्तरत्र वक्ष्यामः[10] । अन्वादेशे व्यक्तचोदनाम् । आदेशमनु आदेशः अन्वादेशः । अग्नीषोमयोः स्थाने छागस्य स्थाने च य आदेशः क्रियते सः[11] अन्वादेश इत्युच्यते । तस्मिन्नन्वादेशे छागस्थाने [12]य आदेश[12] उस्रो गौरिति एतां व्यक्तचोदनां प्रतीयादध्वर्युः[13] । [14]यं यदा स व्यक्तं चोदयति तदर्थमिह शास्त्रे व्यक्तचोदना क्रियते छागस्थाने उस्रो गौरित्येवम् । अन्यथा छागस्थाने[14] [15]यो यः पशुरिति ब्रूयात् । कथमध्वर्युर्व्यक्तं चोदयतीति । ऐन्द्रे †सारस्वत्यां तद्विकारेषु च दार्शपूर्णमासिकः‡ प्रचरणकल्पः इति येषां वचनं⌀ तेषाम् 'अनुब्रूहि' 'यज' इति µसंप्रैषौ भवतःµ । प्रैषस्य *संप्रैषो न विद्यते* । तथा¶सति छागस्य पशोर्व्यक्तचोदना न विद्यते । प्रैषाश्चादिष्टाः । तेषु अन्वादेशे Aकर्तव्ये व्यक्तचोदनांA प्रतीयात्[15] । गोपशौ सति छागस्य स्थाने उस्रस्य वपाया गोर्वपाया इति वा । [16]अविकपशौ सति मेषस्य वपाया अविकस्य वपाया इति वा[16] । एवं प्रयोक्तव्यम् । यजेति संप्रेषितः कथं प्रैषं प्रतिपद्यत इति । अध्वर्युप्रेषितो मैत्रावरुणः

१-१. नास्ति ब[1,2] मै पू । २. तत्र ब[1] । ३. उस्र (उस्रा ब[2] ; उग्र पू) आदेशो ब[1,2] पू ; उस्रादेश मै । ४-४. नास्ति ब[3] । ५. आविक मै । ६. अविजाती ब[3] ; अजाती वि । ७. °शूनुत्सजेत् ब[1] पू ; °शूनुत्सृजेत् ब[2,3] ; °शूनसृजेत् मै । ८. बोधा° मै । ९-९. यः सूको । १०. वक्ष्यते वि । ११. नास्ति ब[1] । १२-१२. नास्ति ब[1,2] मै पू । १३. प्रतीयात् ब[2] । १४-१४. नास्ति ब[1] । १५-१५. नास्ति ब[2] । †. सारस्वत्ये ब[1,3] मै वि पू । ‡. दर्शपौर्णमासिकः ब[1] वि पू ; दर्शपूर्णमासिकः ब[3] मै । ⌀. हिश्रौ ४, ५, ६५ । µ-µ. संप्रैषो भवति मै । *-*. संप्रैषा न विद्यन्ते वि । ¶. यथा ब[3] वि । A-A. कर्तव्यक्त° ब[1] पू ; कर्तव्याव्यक्त° पू ; कर्तव्यव्यक्त° वि । १६-१६. नास्ति मै ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्रेष्यति (आश्रौ ३, २, ४) इति वचनाद् 'वैकृतेनापि संप्रैषेण'[1] प्रैषं[2] प्रतिपद्यते, यदि [3]संप्रैषः कारणं[3] स्यात्। अनुवाक्यां च संप्रैषे[4] पूर्वां प्रैषाद् (आश्रौ ३, १, २२) इति न वक्तव्यम्। [5]सप्रैषे कर्मणि[5] सर्वाण्येव सप्रैषाणि[6]। पाशुके कर्मणि प्रयाजानुयाजाऽऽज्यभागवनस्पतिस्विष्टकृत्सूक्तवाकान्तानि सर्वाणि कर्माणि[7] ससंप्रैषाणि[8]। कथं त्रीण्येव वपादीनि प्रदानानि सप्रैषाणि[9] क्रियन्त इति[10] तद्विलोपो[11] भवति। तस्मात् प्रैषो नित्यः। नित्यत्वादविद्यमानेऽपि संप्रैषे[12] वक्तव्यो भवति ॥ १० ॥

[पूर्ववद् वनस्पत्यादिप्रैषेष्वन्वादेशे व्यक्तचोदनया प्रयोगकथनम्]

एवं वनस्पतिस्विष्टकृत्सूक्तवाकप्रैषेषु ॥ ११ ॥

यथा त्रिषु प्रदानेषु अव्यक्तचोदनायां[13] सत्याम् अन्वादेशे कर्तव्ये व्यक्तचोदना[14] आम्नाता[15]। एवं वनस्पतिस्विष्टकृत्सूक्तवाकप्रैषेषु अन्वादेशे कर्तव्ये व्यक्तचोदनां प्रतीयात्। वनस्पत्यादिभ्य अव्यक्त एव चोदना वनस्पतये प्रेष्य (तैसं ६, ३, ११, ४) इत्याह। तत्र संप्रैषे देवतायाः [16]पशोर्वा[16] चोदना नास्ति। तस्माद्यथा-प्रदानेषु अन्वादेशे चोदना[17] कृता[18], एवं वनस्पत्यादिष्वपि चोदना कर्तव्या इत्युक्तं भवति ॥ ११ ॥

[प्राजापत्ये वायव्ये च पशुपुरोडाशवर्धनम्]

प्राजापत्ये त्वग्निचित्यासंयुक्ते वायव्यं पशुपुरोळाशमेके वायव्ये प्राजापत्यं, तेन पशुदेवता वर्धत इत्याचार्याः पुरोळाशतत्प्रधानत्वात् ॥ १२ ॥

प्राजापत्ये तु पशौ अग्निचित्यासंयुक्ते [19]इष्टकानां संस्कारार्थे[19] [20]प्राजापत्ये पशौ[20] वायव्यं वायुदेवत्यं पशुपुरोळाशम् एके आचार्या मन्यन्ते। प्राजापत्यः प्राप्तः। वायव्ये तु पशावग्निचित्यासंयुक्ते वायव्य एव पशुपुरोळाशः प्राप्तः। प्राजापत्यं

१-१. वैकृतेऽपि संप्रै॰ वि; विकृतेऽपि संप्रै॰ ब[1]; वैकृतेनानित्यं प्रैषेण मै। २. नास्ति ब[1] वि। ३-३. ॰पकारणं मूको। ४. संप्रैषे मूको। ५-५. संप्रैष (सप्रैष पू; संप्रैषे ब[1]) कर्मणि मूको। ६. संप्रैषाणि ब[1-3] मै वि। ७. नास्ति ब[3] वि। ८. संसप्रैषाणि ब[1]। ९. संप्रैषाणि ब[1] वि पू। १०. नास्ति वि। ११. ॰लोपं ब[1,2] मै पू। १२. ॰षो वि। १३. अव्यक्तवाद॰ ब[1,2] वि; अव्यक्तावाद॰ पू; वक्तव्यचोद॰ ब[3]। १४. चोदना ब[3]। १५. ॰ताः मै। १६-१६. पशौ वा ब[2] मै पू। १७. चोदनां ब[1,2] मै वि पू। १८. कृत्वा मूको। १९-१९. इष्टकाः संस्कारार्थं (॰र्थे ब[2] मै पू) ब[1,2] मै पू। २०-२०. ॰त्यपशौ वि।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

पशुयागा:

Digitized by Madhuban Trust

[1]पशुपुरोळाशमेके मन्यन्ते। तेनाऽन्यदेवत्येनापि[1] पशुपुरोळाशेन पशुदेवतैव वर्धते। अथाऽप्येतेन पुरोळाशदेवता वर्धते। एवमाचार्या मन्यन्ते। कस्माद्धेतोः पुरोळाशतत्प्रधानत्वात्[2]। [3]पुरोळाशस्तत्प्रधानः, तदिति[3] पशुर्निदिश्यते। तत्प्रधानः पशुप्रधानः। पशुमालभ्य पुरोळाशं निर्वपति (द्र. आश्रौ ३, ३, ६) इति चोदितत्वात् पशुतन्त्रे[4] क्रियते। पशुतन्त्रमुपजीवति यस्मात् तस्मात् पशुप्रधानो भवति, न स्वः प्रधानः। तस्मात् तत्प्रधानत्वात् पशुप्रधानत्वात् अन्यदेवत्येनापि पशुदेवता [5]एव वर्धते[5] इति सूत्रार्थः। तत्र तु-शब्दो विशेषविधिविवक्षार्थः। प्राजापत्ये तु वक्ष्यमाणे विशेषः। तथान्येषु[6] पशुषु। अग्निचित्यासंयुक्ते इति वचनात् निरूढे सौमिके च न भवति। इह कृतं विशेषणम् अग्निचित्यासंयुक्ते इति तदन्यत्रापि [7]अविशेषवचने विशेषणम्[7]। प्राजापत्ये तु जामदग्न्यः सर्वेषाम् (आश्रौ ३, २, ८) [8]इत्यत्र तुकारसामान्याच्च[8] उभयत्र समानं भवति। आचार्यग्रहणं पूजार्थम्। तस्मात्तेषां वचनं प्रमाणम्॥ १२॥

[आज्यवर्जं हविषां पुरोडाशशब्देनैव निगमनविधानम्]

पुरोळाशनिगमेषु पुरोळाशवद्धवींष्याज्यवर्जं येषां तेन समवत्तहोमः॥ १३॥

पुरोळाशशब्दा.[9] पुरोळाशनिगमा इत्युच्यन्ते। यथा—होताऽयक्षदग्निं पुरोळाशस्य (आश्रौ ३, ५, ९), पचन् पुरोळाशान् (खि ५, ७, २, ११), अवीवृधत[10] पुरोळाशेन। एते पुरोळाशनिगमाः। तेषु पुरोळाशनिगमेषु [11]धानाचरुकरम्भादीनि† समवत्तपुरोळाश‡ आदिः येषां हविषां तेनϕ समवत्तहोमो भवति[11]। [12]धाना-करम्भपरिवाप-पुरोळाश-पयस्यादीनां[12] पुरोळाशशब्देनैव निगमनम्। होता यक्षदग्निं पुरोळाशानाम् (खि ५, ७, ४, ४; आश्रौ ५, ४, ७) इति।

१-१. नास्ति ब[२]। २. °ळाशप्र° ब[१,२] मै पू; °ळाशे तत्प्र° ब[१]; नास्ति वि। ३-३. °ळाशस्तत्प्रधानत्वादिति ब[3]। ४. °तन्त्रे वि। ५-५. एवावर्तते ब[3]। ६. अथान्येषु ब[१,२] मै पू; तत्पशुषु ब[१]; अतत्प वि। ७-७. अविशेषणं ब[२]; अविशेषैर्वचने विशे° वि। ८-८. इत्यनुतुकारसामान्याच्च ब[१] पू; इत्यनुवाकारसा° ब[२]; इत्यनु (°त्र ब[3]) तुकारे सा° ब[3] वि; इत्यनुकारसा° मै। ९. °शब्दः ब[१] मै पू। १०. अवीवृधत पुरोळाशान् अवीवृधत मै। ११-११. नास्ति ब[१]। †. धाना च (धानाश्च मै) करम्भादीनि ब[२] मै पू। ‡. °ळाशो ब[२,३] वि पू। ϕ. ते ब[3] वि। १२-१२. धानाः करम्भः परिवापः ब[१] वि; धानाः करम्भः परिवापः पुरोळाशेषु धानाः करम्भाः परिवापः पुरोळाशः पयस्यादीनां ब[२] मै; धानाः करम्भः परिवापः पुरोळाशः पयस्यादीनां ब[१] पू।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

एवमिहापि पुरोळाशवद्धवींषि निगमयेत् । आज्यवर्जम्[१] । आज्यं वर्जयित्वा अन्यानि हवींषि पुरोळाशवन्निगमयेत्[२] । होता यक्षदग्निं पुरोळाशानाम् इति । 'कस्माद् आज्यस्य' स्वशब्देन निगमनमिति प्रैषे आम्नातत्वाद् होता यक्षदग्निमाज्यस्य जुषताम् (खि ५, ७, २, २) इति। एवमन्येषां सान्नाय्यादीनाम् आम्नायो न विद्यते। तस्मात् तेषां पुरोळाशवन्निगमो भवति तथा सवनीयेषु दृष्टत्वात् । येषां तेन समवत्तहोमः । येषां [४]हविषां तेन[४] पुरोळाशेन समवदाय होमः, तेषां पुरोळाशवन्निगमा[५] भवन्ति[६], स्विष्टकृति[७] समवदाय हूयन्त इति। तस्मात् तत्प्रैषे[८] पुरोळाशवन्निगमा[९] भवन्ति[१०] । येषां पुनः पुरोळाशेन समवदाय होमो न[११] भवति, पृथगेव हूयन्ते[१२], तेषां[१३] पुरोळाशवन्निगमा[१४] न[१५] भवन्ति। पशुपुरोळाशानां प्रदानेषु पृथक्प्रदानानि[१६] भवन्ति। तत्र चरोः सान्नाय्यस्य पुरोळाशवन्निगमो न क्रियते। किमुदाहरणम्—पाशुकेषु चातुर्मास्येषु यावत्यो देवतास्तावन्तः पशव आलभ्यन्ते । चातुर्मास्यहवींष्येव पशुपुरोळाशा भवन्ति। तथा[१७] सति पुरोळाशानां यानि प्रदानानि तानि[१८] सप्रैषाणि[१९] भवन्ति। चरोः सान्नाय्यादीनां च हविषां प्रदानानि सप्रैषाणि[२०] भवन्ति सान्नाय्यादीनां प्रैषे निगमस्य आम्नायाभावात् । स्विष्टकृति तु[२१] पुरोळाशेन समवदाय हूयन्ते। तत्र तेषां [२२]पुरोळाशवन्निगमा भवन्ति[२२] सूक्तवाकप्रैषे च पुरोळाशनिगमेष्विति[२३] बहुवचनात्। आज्यवर्जमित्येतस्य उदाहरणम्—एककपालाः पुरोळाशाः सर्वहुता भवन्ति। तेषामाशयात् स्विष्टकृत्पुरोळाशेन समवदाय हूयते[२४] । तस्य आज्यवर्जमिति वचनात् पुरोळाशवन्निगमो न क्रियते। आज्यशब्देनैव[२५] निगमयति[२६] होताऽयक्षदग्निम् (आश्रौ ३, ५, ९) । आज्यपुरोळाशानामिति समासे आज्यमल्पाक्षरं पूर्वं निपतति। अथवा पुरोळाशः प्रधानः, [२७]आज्यं शेषस्य[२७] हुतं न[२८] प्रधानम्।

---

१. नास्ति ब³ वि। २. निगमयेत् मै। ३-३. कस्माद्धेतोः यस्य ब¹; कस्माद्वा यस्य वि। ४-४. पुनः ब³ वि। ५. °मो ब³। ६. भवति ब¹⁻³। ७. स्विष्टकृत् ब¹'² मै पू। ८. प्रैषे ब¹'³ वि पू। ९. °मो ब²'¹। १०. भवति ब¹⁻³ वि। ११. नास्ति ब³ वि। १२. हूयते ब²। १३. न तेषां ब³ वि। १४. °शनिगमो ब³; °शनि° मै। १५. नास्ति ब²'¹ मै वि। १६. °दाने न ब¹'² मै पू। १७. यथा ब¹ वि। १८. नास्ति ब¹। १९. संप्रैषाणि ब³ मै। २०. संप्रैषाणि मै; प्रैषाणि ब³। २१. नास्ति ब²। २२-२२. °गमो भवति ब³। २३. °ळाशवन्निग° ब¹'² मै पू; पुरोळाशव...... वि। इतः परं वि-ग्रन्थो नोपलभ्यते। २४. हूयन्ते ब²'³ मै पू। २५. सुशब्दे° ब¹'² मै पू। २६. निगम्यति ब¹'² पू; निगम्यात् ब³। २७-२७. आज्यशे° ब²'¹ मै पू। २८. नास्ति ब³।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्रधानस्य पुरोळाशस्य पूर्वनिपातो[1] भवति पुरोळाशाज्यानामिति[2]। एवं सूक्तवाकप्रैषे[3] न भवति। अत्र स्विष्टकृद्देवसुवादीनि[4] अन्वायात्यानि पशुपुरोळाशेन[5] समवदाय हूयन्ते। तेषामपि निगमाः प्राप्ताः, ते[6] न कर्तव्याः। ऐष्टिकानां हविषां हविर्निगमो न विद्यते। अन्वायात्यानि ऐष्टिकान्येव कर्माणि। अत एव सप्रैषाणि[7] प्रदानानि भवन्ति। तस्मादन्वायात्यहविषां स्विष्टकृत्प्रैषे निगमनं न विद्यते ॥ १३ ॥

[मेधरभीयश्शब्दयोः पश्वभिधायकत्वम्]

मेधो रभीयानिति पश्वभिधाने ॥ १४ ॥

मेधो रभीयानित्येतौ शब्दौ पश्वभिधायकौ[8]। पश्वभिधानत्वात् [9]पशौ ह्ययं मेधशब्दः[9]। पशुभ्यो वै मेधा उदक्रामन् (ऐब्रा २, ११) इति श्रुतिः[10]। तस्माद् गुणत्वात्[11] पश्वभिधानं स्यात्। तस्मादिदमुच्यते। पशुर्वै मेधः (ऐब्रा २, ६) इति श्रुतिः। रभीयःशब्दो[12] रभीयांसमिव कृत्वी (तैब्रा ३, ६, ११, ३) इति इवशब्ददर्शनादुपमानस्य। तत्र उपमाने पश्वभिधानं न[13] भवति। एवं प्राप्ते पश्वभिधानमित्युच्यते ॥ १४ ॥

[आददादिसप्तपदानां देवताभिधायकत्वकथनम्]

आदद् घसत् करज्जुषतामघदग्रभीदवीवृधतेति देवतानाम् ॥ १५ ॥

आदत्, घसत्, करत्, जुषताम्, अघत्, अग्रभीत्, अवीवृधत इत्येतानि[14] पदानि देवतानाम्[15] अभिधानानि। देवतानामभिधानत्वादूहः[16] प्राप्तः[17]। अनारभ्यमाणे तु विकल्पः स्यात्। यथा उपांशूच्चयोर्विकल्पः[18] [19]एवं विकल्पः[19] स्यात्। देवतावचनत्वादूह्यानि भवन्ति। परोक्षत्वादनूह्यानीति ॥ १५ ॥

॥ [इति] तृतीयस्य [20]चतुर्थः खण्डः[20] ॥

---

१. पूर्वं निपातितो (°ता ?) ब³। २. °ळाशस्याज्या° ब²; °ळाशार्थमिति ब³। ३. °प्रैषो मै। ४. °कृति देव° ब³। ५. पुरो° ब¹'² मै पू। ६. नास्ति ब²'³ मै पू। ७. संप्रैषाणि ब²'³ मै पू। ८. नास्ति मै। ९-९. पशुशब्दः ब¹; पशौ ह्ययं शब्दः ब¹'² मै पू। १०. श्रुतेः ब¹। ११. पशुगुणत्वात् ब³। १२. नास्ति मूको। १३. नास्ति ब²। १४. एतानि मै। १५. नास्ति मै। १६. देवताभिधा° ब³। १७. प्राप्तिः ब¹'² मै पू; प्राप्तिः ब¹। १८. तु. म्राश्रौ १, ३, १५। १९-१९. नास्ति ब¹'² मै पू। २०-२०. चतुर्थः खण्डः मै।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ तृतीयेऽध्याये पञ्चमः खण्डः

[हुतायां वपायां चात्वाले ऋत्विक्कर्तृकं मार्जनम्]

हुतायां वपायां सब्रह्मकाश्चात्वाले मार्जयन्ते निधाय दण्डं मैत्रावरुणः ॥ १ ॥

इदमापः प्रवहत सुमित्र्या न आप ओषधयः सन्तु दुर्मित्र्यास्तस्मै सन्तु योऽस्मान् द्वेष्टि यं च वयं द्विष्म इति ॥ २ ॥

प्रयाजेभ्य ऊर्ध्वं त्रीणि प्रदानानि भवन्ति, तान्यनुक्रमेण[1] हूयन्ते। [2]प्रथमां[†] वपा हूयते[2]। तस्यां हुतायां वपायां यदनन्तरं[3] कर्म तद्[4] वक्ष्यते। सब्रह्मकाः सह ब्रह्मणा सब्रह्मका ऋत्विजः चात्वाले मार्जयन्ते। मार्जनमुक्तम्[5] अञ्जलावप आसेचयते तन्मार्जनम् इति[6]। प्रकृतौ सर्वे ऋत्विजः प्राश्य सह मार्जयन्ते। ब्रह्मा तत्र [7]एक एव[7] पृथक् मार्जयते। एवमिहापि प्राप्ते ऋत्विग्भिः सह मार्जनप्राप्त्यर्थमुच्यते—सब्रह्मका इति। निधाय दण्डं मैत्रावरुणः। दण्डं तत्रैव निधाय मैत्रावरुणोऽपि मार्जयते। प्रकृतौ ये[8] मार्जनकर्मण्यधिकृतास्तेषामेवेहापि[9] मार्जनं प्राप्तं मैत्रावरुणस्य न प्राप्नोति। तस्मान्मैत्रावरुणस्य मार्जनं विधीयते। पाशुके कर्मणि प्रैषादीनि सर्वाणि कर्माणि दण्डं परिगृह्य क्रियन्ते। तेनैव न्यायेन मार्जनादीनाम्[10] अङ्गकर्मणामपि प्राप्तम्। [11]तस्मादिह प्रदर्श्यते[11]। अङ्गकर्माणि दण्डं निधाय कर्तव्यानीति। तानि[12] मार्जनं, प्राशनम्, आहुतिः, उपस्थानमित्येवमादीनि[13] ॥ १ ॥

इदमापः प्र वहत (ऋ १, २३, २२) [इति] ऋग् भवति, सुमित्र्या[14] नः (तु. वासं ६, २२) [इति यजुः] इत्येतौ मन्त्रौ मार्जयन्तो जपन्ति। न

---

१. तान्युत्क्रमेण मै। २-२. नास्ति ब[2] पू। †. प्रथमां ब[1]; प्रथमा मै। ३. च तदन° ब[3]। ४. नास्ति ब[1] मै पू; तद्वद् ब[2]। ५. °क्तम् एतदनन्तरं ब[3]। ६. तु. आश्रौ १, ८, २। ७-७. पृथक् ब[1]। ८. येन मै। ९. °मंणाधिकृ° ब[1]। १०. मार्जनम् मूको। ११-११. तस्मादिदमुपदिशन्ति ब[3]; °दिह प्रदर्शाद् ब[1]। १२. तस्मिन् ब[1-1] पू; तस्मात् मै। १३. उपस्थानानीत्ये° मूको। १४. सुमित्रिया ब[1,2] पू।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

मन्त्रान्तेन[1] क्रियते[2]। यत्र अनेके मन्त्रा आदिश्यन्ते, तत्र मन्त्रान्तेन क्रियते। कस्मात्? '[3]अन्त्य एव[3]' मन्त्रः कर्मणा संयुज्यते न ते[4] मन्त्राः ॥ २ ॥

[एतन्मार्जनस्य पशुकर्मविषयकत्वम्]

एतावन्मार्जनं पशौ ॥ ३ ॥

एतावन्मार्जनं यत् कृतं तत् पशौ भवति, नान्यत्। इह प्राशनादनन्तरं यन्मार्जनं तत् प्रतिषिध्यते, एतावदेव नान्यदिति। पशुग्रहणात् कृत्स्ने[5] पशौ[6] प्रतिषेधः[7] पशुपुरोळाशेऽपि[8] ॥ ३ ॥

[होतृमैत्रावरुणयोः पुरोडाशश्रपणपर्यन्तमासनविधानम्]

तीर्थेन निष्क्रम्यासीतामा पुरोळाशश्रपणात् ॥ ४ ॥

मार्जनादनन्तरं[9] तीर्थेन निष्क्रम्य होता मैत्रावरुणश्च आसीतां यथासुखम्। कियन्तं कालम्। आ[10] पुरोळाशश्रपणात्। यावत् पुरोळाशं श्रपयन्ति तावदासीताम्। अस्मादारम्भाद् दर्शयति—सर्वत्र कर्मान्तेषु तीर्थेन निष्क्रम्य आसितव्यं [11]यावदन्यत् कर्मेति[11]। यथा प्रवर्ग्ये परिसमाप्ते [12]यावदुपसदिति। श्रृते पुरोळाशे[12] आसन्ने च अनामन्त्रिताः तीर्थेन प्रपद्य पुरोळाशेन प्रचरन्ति। तस्य अनुवाक्या [13]प्रैषो याज्येत्युक्तम्[13] ॥ ४ ॥

[पुरोडाशेन चरित्वा स्विष्टकृता चरणविधानम्]

तेन चरित्वा स्विष्टकृता चरेयुः ॥ ५ ॥

तेन पशुपुरोळाशेन चरित्वा अनन्तरं स्विष्टकृता चरेयुः। कर्म च[14] विधीयते। तस्य स्विष्टकृतो विधानं वक्ष्यति ॥ ५ ॥

[अन्वायात्येषु हविःषु सत्सु तैः स्विष्टकृतः पूर्वं चरणविधानम्]

यदि त्वन्वायात्यानि तैरग्रे चरेयुः ॥ ६ ॥

---

१. मन्त्रान्तेः ब[1]। २. नास्ति ब[1]। ३-३. अन्त्य एव ब[1,2] मै पू; अन्यो य ब[3]। ४. नास्ति ब[2] मै। ५. कृत्स्नेऽपि ब[1]; कृत्स्नैव मै। ६. पशोः मै। ७. प्रतिषिद्धः ब[1]। ८. °रोळाशोऽपि ब[1,2] मै। ९. मार्जनान° ब[3]। १०. नास्ति ब[1,2] मै पू। ११-११. यावत्कर्मेति ब[2]; यावत्कर्मं कर्मेति ब[1] मै पू। १२-१२. यावदुपामिति श्रपणाद् पुरो° ब[3]। १३-१३. प्रैषोपद्येत्युक्तम् ब[1] पू; प्रैषापद्येत्युक्तम् ब[2]; प्रैषार्थं वेत्युक्तम् ब[3]; प्रैषो यदेत्युक्तम् मै। १४. नास्ति ब[3]।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अन्वायात्यानि यदि तु[1] भवन्ति । पशुपुरोळाशमनु यानि हवींषि निष्पद्यन्ते तानि अन्वायात्यानि । तानि तु यदि क्रियन्ते, तैः स्विष्टकृतः अग्रे पूर्वं चरेयुः । यथा [2]देवसुवानि देविकाहवींषि[2] । तेषां पशुपुरोळाशः स्विष्टकृतः प्रागिज्यास्थानम् । तु-शब्दः प्राप्तक्रमं व्यावर्तयति पुरोळाशादनन्तरं स्विष्टकृतम् इत्येतम् ॥ ६ ॥

[अन्वायात्यानां देवतानां निगमेष्वनुवृत्तिनिषेधः]

न तु तेषां निगमेष्वनुवृत्तिः ॥ ७ ॥

न तु तेषाम्[3] अन्वायात्यानां याज्याया उत्तरकालं वनस्पत्यादयो ये निगमास्तेषु निगमेषु देवतानां[4] निगमानुवृत्तिर्न क्रियते । अनुवर्तनमनुवृत्तिः । तु-शब्दोऽवधारणार्थः । [5]तेन(?) निगमानुवृत्तिरिति[5] । यथाचोदितमनावाहिताः (आश्रौ १, ५, २४) इति वचनादावाहनादूर्ध्वं यद्धविः[6] चोद्यते[7], नै(?)तत्तदा(?)[8], उत्तरेषु निगमेषु तस्य निगमनं प्राप्तं, तदन्वायात्येषु प्रतिषिध्यते । निगमेष्विति बहुवचनाद् वनस्पत्यादिषु सर्वेषु प्रतिषेधः । ७ ॥

[अन्वायात्येभ्योऽन्येषां हविषामावाहनादनन्तरमुत्पन्नानां निगमानुवृत्तिनिषेधविधानम्]

नान्येषामूर्ध्वमावाहनादुत्पन्नानाम् ॥ ८ ॥

[9]†अन्वायात्येभ्यः अन्येषामपि हविषामूर्ध्वम्† आवाहनादुत्पन्नानां चोदितानां[9] निगमेषु निगमानुवृत्तिर्न क्रियते । यथा पुरोळाशे आज्यभागोत्पत्तिशङ्कायाम्[10] । अन्वायात्यानामुक्तो विधिरित्यत्र[11] न स्यात् । तस्मादन्येषामपि प्रतिषेधः । ऊर्ध्वमावाहनादिति वचनात्प्रागावाहनादुत्पन्नानां निगमानुवृत्तिर्भवति[12] ॥ ८ ॥

[पुरोडाशस्विष्टकृतोऽनुवाक्याप्रैषयाज्याप्रदर्शनम्]

इळामग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध । स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥ होता यक्षदग्निं पुरोळाशस्य स्वदस्व हव्या समिषो दिदीहीति पुरोळाशस्विष्टकृतः ॥ ९ ॥

---

१. न ब[3] । २-२. तु. आश्रौ ४, ११, ५ ; ६, १४, १५ । ३. न तु तेषाम् मूको । ४. नास्ति ब[3] । ५-५. तेन म (?न) निगमा° ब[1] ; तेनानुगमनानु° ब[2] ; तेन निगमावृत्तिः° ब[1] ; तेन नु (तु ?) निगमानु° पू । ६. नास्ति ब[3] । ७. वोच्यते ब[3] । ८. °दादि ब[1,1] मै पू । ९-९. नास्ति ब[1] पू । †-†. ऊर्ध्वम् मै । १०. °ङ्काया ब[1,2] मै पू । ११. विधिरन्यत्र ब[1] । १२. अनुगमानु° ब[1] मै ; नुगमानु° ब[2] ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

इळामग्ने (ऋ ३, १, २३), होता यक्षदग्निं पुरोळाशस्य, स्वदस्व हव्या (ऋ ३, ५४, २२) इत्यनुवाक्या 'प्रैषो याज्येति'[1]। एतानि पुरोळाशस्विष्टकृतो भवन्ति । स्विष्टकृदधिकारस्य व्यवधानात् पुनरुच्यते स्विष्टकृत इति । पुरोळाशो[2] विशेषणं क्रियते पुरोळाशस्यैव[3] [4]स्विष्टकृतः । नाऽन्वायात्यानामिति[4], सर्वेषामधिकारात् ॥ ९ ॥

॥ [इति] तृतीयस्य [5]पञ्चमं खण्डम्[5] ॥

१-१. प्रैषया° ब[1,2] मै पू । २. °शे ब[2] । ३. °ळाशस्यैतत् ब[1] मै पू ; °ळाशस्य ब[2] । ४-४. स्विष्टकृत (°ते ब[1]) नान्वायात्या° मूको । ५-५. पञ्चमः खण्डः मै । देवत्रातः अत्रैव खण्डसमाप्ति मनुते, अन्ये व्याख्यातारस्तु ऊर्ध्वमिळायाः (आश्री ३, ६, १) इत्यनन्तरम् ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ तृतीयेऽध्याये षष्ठः खण्डः

[स्विष्टकृत ऊर्ध्वमिडायास्तदनन्तरं मनोतानामनुक्रमविधानम्]

ऊर्ध्वमिळायाः ॥ १ ॥

स्विष्टकृत ऊर्ध्वमिळा भवति। इळाया ऊर्ध्वं मनोतानामनुवचनं भवति। अनेनानुक्रमेणैतानि कर्माणि भवन्ति ॥ १ ॥

[मनोतानामनुवचनविधानम्]

मनोतायै संप्रेषितस्त्वं ह्यग्ने प्रथम इत्यन्वाह ॥ २ ॥

मनोतायै सम्प्रेषितः अध्वर्युणा त्वं ह्यग्ने प्रथमः (ऋ ६, १, १) इत्येतवनुवचनमन्वाह। मनोतायै इति वचनात् प्रेषितोऽपि न ब्रूयात्। मनोताया[1] अर्थे[2] हविःषु अवदीयमानेषु ब्रूयात् ॥ २ ॥

[मनोतानन्तरं हविषा प्रचरणविधानम्]

हविषा चरन्ति ॥ ३ ॥

मनोताया अनन्तरं हविषा प्रदानेन चरन्ति। तस्य[3] प्रदानस्यानुवाक्या प्रैषो याज्येत्येतानि व्याख्यातानि ॥ ३ ॥

[हविषः प्रैषे ऐतरेयिणां मतनिर्देशः]

तत्र प्रैषे करत एवाग्नीषोमावेवमित्यैतरेयिणः ॥ ४ ॥

तत्र हविषः प्रैषे, करत एवाग्नीषोमौ (खि ५, ७, २, ६) इत्याम्नायः। एवमिति पाठान्तरेण ऐतरेयिण आचार्या मन्यन्ते ॥ ४ ॥

[एकदेवते बहुदेवते च पशावैतरेयिणां मतप्रसङ्गः]

अन्यत्र द्विदेवतात् ॥ ५ ॥

---

१. °तायै ब[१-३] पू। २. अथ ब[१]। ३. तत्र ब[३]।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

पञ्चभागा

Digitized by Madhuban Trust

द्विदेवतात्[1] पशोरन्यत्र बहुदेवत्येषु[2] पशुषु एकदैवत्येषु च। तथा ह्याम्नायो दृश्यते आदित्यसावित्रग्रहप्रैषयोः[3]। द्विदेवत्ये तु पशौ यथाम्नातमेव भवति ॥ ५ ॥

[मैत्रावरुणदेवते च पशौ तन्मतप्रसङ्गदर्शनम्]

मैत्रावरुणदेवते च तथा दृष्टत्वात् ॥ ६ ॥

[4]मैत्रावरुणदेवते च पशौ द्विदेवत्येऽपि[4] सति[5] एवमिति पाठमैतरेयिणो मन्यन्ते। कस्मात्। तथा दृष्टत्वात्। तथा हि दृष्ट आम्नायो द्विदेवत्ये[6] मैत्रावरुणप्रैषे[7]। च-शब्द एवमित्यधिकारसमुच्चयार्थः ॥ ६ ॥

[तत्र गाणगारिमतेन प्रकृत्या]

प्रकृत्या गाणगारिः ॥ ७ ॥

प्रकृत्या यथाम्नातमेव। करत एवाग्नीषोमौ (खि ५, ७, २, ६) इति प्रकृतिः। प्रकृतवाऽऽम्नायं गाणगारिराचार्यो मन्यते ॥ ७ ॥

[तत्र कारणप्रदर्शनम्]

किं कारणम्—

उत्पन्नानां स्मृत [8]आम्नायेऽनर्थभेदे निरर्थो विकारः[8] ॥ ८ ॥

[9]यथोत्पन्नानां मन्त्राणां पारम्पर्येण स्मर्यमाण आम्नाये[9] अनर्थभेदे[10], अर्थभेदः[11] अर्थान्यत्वे शब्दान्यत्वं भवति। अर्थान्यत्वे अविद्यमाने शब्दस्य यो विकारः [12]क्रियते, स[†] निरर्थकः[12] स्मृतः ॥ ८ ॥

[याज्याया अन्तराऽर्धर्चौ वसाहोमे आरमणविधानम्]

याज्याया अन्तराऽर्धर्चौ वसाहोम आरमेत् ॥ ९ ॥

हविषो याज्याया[13] अन्तराऽर्धर्चौ अर्धर्चयोर्मध्ये वसा आचामः मांसरसः, सा हूयते। वसाहोमे हूयमाने आरमेत्, यावद् वसा हूयते। हुतायामुत्तरेणार्द्धर्चेन वषट्कुर्यात् ॥ ९ ॥

---

१. नास्ति ब[1]। २. अन्यदे° मूको। ३. आदित्यग्रहसावित्रप्रैषयोः मूको। तु. खि ५, ७, ४, १३ ; १४ ; आश्रौ ५, १७, २ ; ३ ; १८, १ ; २। ४-४. मैत्रावरुणदेवत्येऽपि ब[1,2] मै पू। ५. नास्ति ब[1]। ६. °त्यो ब[1]। ७. तु. खि ५, ७, ४, ७। ८-८. आम्नाये ब[1] मै। ९-९. नास्ति ब[1] मै। १०. अनर्थभेदः ब[1,1] मै पू ; नास्ति ब[2]। ११. नास्ति ब[3] पू। १२-१२. क्रियतेति एष कल्पः ब[1]। †. नास्ति ब[2] मै। १३. याज्या यौ ब[1]।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[वनस्पतिना प्रचरणं तत्र अनुवाक्याप्रैषयाज्येतिक्रमविधानम्]

वनस्पतिना चरन्ति प्रैषमभितो याज्यानुवाक्ये ॥ १० ॥

हविषः[1] अनन्तरं वनस्पतिर्देवता, तेन वनस्पतिना चरन्ति[1] प्रचरन्त्यध्वर्यवः। [2]तस्य पुनरुच्यते[2]। प्रैषमभितो याज्यानुवाक्ये। प्रैषः वनस्पतिप्रैषः [3]प्रैषसमाम्नाय आम्नातः†, तं[3] प्रैषमभितः उभयतः[4] याज्यानुवाक्ये तत्रैव (तैब्रा ३, ६, ११-१२) आम्नाते। अनुवाक्या प्रैषो[5] याज्येति यथासमाम्नातानि ग्राह्याणि[6] ॥ १० ॥

[तत्राऽऽज्यभागयोर्निगमनम्]

यत्राग्नेराज्यस्य हविष इत्यत्राज्यभागौ ॥ ११ ॥

[7]वनस्पतिप्रैषे आज्यभागयोर्निगमनम् आम्नातं तदुच्यते—यत्राग्नेराज्यस्य हविष इति। एवमत्र वनस्पतिप्रैषे आज्यभागौ† निगमयेत्, आग्नेये‡ आम्नातम्। आज्यभागाविति वचनात् सोमस्याप्येवमेव भवति। ϕदेवतानिगमनं समानम्ϕ।[7] [8]यत्राग्नेराज्यस्य¶ हविषः प्रिया धामानि‡[8]। यत्र सोमस्याज्यस्य हविषः प्रिया धामानि (खि ५, ७, २, ८)। अधिकारे सति पुनरत्रेत्युच्यते[9] स्विष्टकृन्निगमविवक्षार्थम्[10]। अत्रेत्यनुच्यमाने[11] स्विष्टकृते एव स्यात्। त्यक्तव्यमिदं[12] सूत्रम्, आज्यभागौ निगमयेदिति वक्तव्यम्। एवमुक्ते देवतायाः समाननिगमनं भविष्यति। इदं प्रयोजनम्। [13]आग्नेये हविःशब्दप्राप्त्यर्थोऽयमारम्भः[13], प्रकृतावनाम्नातत्वान्न स्यात्। स्विष्टकृत्यपि एतदेव प्रयोजनम् ॥ ११ ॥

[स्विष्टकृतीडोपह्वानानन्तरमनुयाजैश्चरणम्]

अयाळग्निरग्नेराज्यस्य हविष इति स्विष्टकृतीळामुपहूयानुयाजैश्चरन्ति ॥ १२ ॥

१-१. नास्ति ब[2]। २-२. कृतस्य पुन° ब[1]; कस्तस्य विधिरुच्यते ब[1]। ३-३. प्रैषसमाम्नात तं ब[1,2] पू; प्रैषाम्नाय आम्नातः ब[3]; †प्रैषसमाम्नातं मै। ४. ऐतरेयिणः ब[3]। ५. प्रैष° ब[1-1] पू। ६. गृह्याणि ब[2]। ७-७. नास्ति मै। †. °भागयोः ब[1] पू। ‡. अग्नये ब[2]। ϕ-ϕ. नास्ति मूको। ८-८. नास्ति ब[1]। ¶. ॐ यत्रा° ब[1] मै पू। ‡. धामानि देवतानिगमनम् ब[1,2]; धामानि देवतासमानम् मै। ९. अत्रेत्युक्ते ब[2]। १०. ते स्विष्ट° ब[1,2] मै पू; °कृति निग° ब[1]। ११. अत्रेत्यनूच्यमाने ब[1-3] पू। १२. तत्रत्यमिदं मूको। १३-१३. आग्नेयस्य हविः° ब[2,3]; आग्नेये हविःशब्दा ब[1] पू; आग्नेयहविः° मै।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अयाळग्निरग्नेराज्यस्य हविषः (खि ५, ७, २, १०) इत्येवमाज्यभागौ निगमयेत् । स्विष्टकृति स्विष्टकृत्प्रैषे आग्नेये आम्नातं तथैव सौम्ये[1] भवति। प्रिया धामान्ययाळिति [2]देवतानिगमनं समानम्। अयाळग्नेराज्यस्य हविषः प्रिया धामान्ययाट्, सोमस्याज्यस्य हविषः प्रिया धामान्ययाळ्[2] (खि ५, ७, २, १०) इति। स्विष्टकृतीत्युच्यते । वनस्पतेरधिकारात् प्रैषे आज्यभागयोर्निगमनं प्राप्तम्[3], तस्मादिदमुच्यते । इळामुपहूयानुयाजैश्चरन्ति[4]। स्विष्टकृतोऽनन्तरमिळा भवति। [5]इळामुपहूयाऽनन्तरमनूयाजैश्चरन्त्यध्वर्यवः[5] ॥ १२ ॥

[अनुयाजानामेकादशत्वविधानम्]

तेषां प्रैषास्तृतीयं प्रैषसूक्तमेकादशेह ॥ १३ ॥

प्रैषसमाम्नाये[6] तृतीयं[7] यत्प्रैषसूक्तं तदनुयाजेषु[8] भवति। एकादशेह । प्रकृतौ त्रयोऽनुयाजाश्चातुर्मास्येषु[9] नव, [10]इह तु पशौ[10] एकादश भवन्तीति[11] एकादश प्रैषा आम्नाताः अनुयाजेषु[12] ॥ १३ ॥

[अनुयाजानामेकादशत्वप्रकारप्रदर्शनम्]

प्रकृतौ विकृतौ[13] च नवैवाम्नाताः, कथमेकादश भवन्तीति तदुच्यते[14]—

प्रागुत्तमाद् द्वावावपेत । देवो वनस्पतिर्वसुवने वसुधेयस्य वेतु । देवं बर्हिर्वारितीनां वसुवने वसुधेयस्य वेत्विति ॥ १४ ॥

नवानाम् अनुयाजानां[12] प्राक् पूर्वम् उत्तमाद् अनुयाजात्[12] द्वौ अनुयाजौ[12] आवपेत[15]। कृते आवापे एकादश भवन्ति। [16]देवो वनस्पतिर्वसुवने वसुधेयस्य वेतु, देवं वर्हिर्वारितीनां वसुवने वसुधेयस्य वेत्विति[16] (खि ५, ७, ३, ९-१०)। देवो वनस्पतिरित्येतौ यथाम्नातौ ॥ १४ ॥

---

१. सोम्येऽपि ब[1]; सोमस्य मं। २-२. नास्ति ब[1]। ३. नाम्नातम् ब[2]; आम्नातम् ब[1]। ४. °यानूयाजै° ब[3] मं। ५-५. इळामुपहूयानन्तरम् ब[1,2] मं पू। ६. समाम्नाये ब[1] मं पू; आम्नाये ब[2]। ७. तु. खि ५, ७, ३। ८. तदनू° ब[3] मं। ९. त्रयोऽनू° ब[3] मं। १०-१०. इह तु ब[1] मं; एह तु ब[2] पू; पशौ ब[3]। ११. भवन्ति ब[1-3] पू। १२. अनू° ब[3] मं। १३. नास्ति ब[1] मं। १४. नास्ति मूको। १५. °पेत् ब[1] मं पू। १६-१६. नास्ति ब[1,2] मं पू।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[अनवानं प्रैषयजनयोर्विधानम्]

अनवानं प्रेष्यति । अनवानं यजति ॥ १५ ॥

[1]अनुयाजेषु मैत्रावरुणः अनवानं प्रेष्यति[1] । निगदानामनियतावसानत्वादनवानं[2] विधीयते । अनवानं यजति । अनवानमेव होता यजति । विकृतौ विहितमनवानं प्रकृतावपि भवति । उत्तमे अनुयाजे[3] समानं विधानमनुविशति, तज्[4] ज्ञापयति सर्वेऽनुयाजाः[5] प्रकृतौ विकृतौ च समानविधाना[6] इति ॥ १५ ॥

[उत्तमेऽनुयाजेऽनवानविकल्पः]

उक्तमुत्तमे ॥ १६ ॥

[7]अनुयाजे† उक्तम्, अनवानं वा (आश्वौ १, ८, ७) इति, तदिहापि भवति । अनवाने प्राप्ते विभाषा[7] विधीयते[8] ॥ १६ ॥

[सूक्तवाकप्रैषे आज्यभागयोर्ग्रहणविधानम्]

सूक्तवाकप्रैषे पूर्वस्मिन्निगमे गृह्णन्नित्यत्राज्यभागौ ॥ १७ ॥

सूक्तवाकप्रैषः[9] खिलेष्वाम्नातः[10] । तस्मिन् आज्यभागयोर्निगमनं नाम्नातम्[11] । तदुच्यते । तस्मिन् प्रैषे द्वौ देवतानिगमौ, तयोः पूर्वस्मिन्[12] निगमे विधिरुच्यते—"गृह्णन्नित्यत्राज्यभागौ । गृह्णन्नित्युक्त्वा अत्र अस्मिन्नेव निगमे आज्यभागदेवता निगमयेत्—गृह्णन्नग्नय आज्यं, गृह्णन् सोमायाज्यम् (खि ५, ७, २, ११) इति" । गृह्णन्नित्युक्त्वा पशुदेवतायाः शेषं समानं भवति । चतुर्थ्या विभक्त्या देवतादेशः । द्वितीयया विभक्त्या हविः । पशोश्छागः, आज्यभागयोराज्यम् । पूर्वस्मिन्निगमे इत्युक्त्वा अत्रेति न वक्तव्यम् । तस्य प्रयोजनमुक्तम्, अनन्तरे निगमे पूर्वेणोक्तम् (आश्वौ ३, ६, २१) इत्युक्ते गृह्णन्-शब्दो न वर्तते "ततस्तस्मान्नतः(?तत्) क्रियते"[13] । गृह्णन्नित्यत्रैव भवति, नोत्तर इति । यथा देवताया बध्नन्-शब्दः । एवं बध्नन्-शब्दे प्राप्ते एव[14] गृह्णन्-शब्दप्राप्त्यर्थः[15] सूत्रारम्भः ॥ १७ ॥

१-१. नास्ति मै । २. °दनवसानं मूको । ३. अनूयाजे ब[3] मै । ४. नास्ति मूको । ५. सर्वेऽनू° ब[3] मै । ६. °धानम् ब[3] । ७-७. नास्ति ब[3] । †. अनू° मै । ८. नास्ति ब[1] । ९. °प्रैषे ब[3] । १०. विधिश्चाम्नातः ब[3] । तु. खि ५, ७, २, ११ । ११. आम्नातम् ब[2,3] । १२. तु. खि ५, ७, २, ११ । १३-१३. नास्ति ब[3] । १४-१४. नास्ति ब[3] ; तत° (°ते ब[1]) स्तस्मान (°न्न ब[2] ; द मै) तः क्रियते ब[1,2] मै पू । १५. एवं ब[2] पू । १६. °शब्दः प्राप्त्यर्थं (°र्थं ब[1] पू ; °र्थः मै) मूको ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[पशुदेवतयोर्निगमनविधानम्]

बध्नन्नमुष्मा अमुं बध्नन्नमुष्मा अमुमिति पशूंश्च देवताश्च ॥ १८ ॥

बध्नन्-शब्दमुक्त्वा अमुष्मै इति चतुर्थ्या देवतादेशं च कृत्वा अमुमिति द्वितीयया पशुम् आदिशेत्। वीप्सावचनं देवताबहुत्वे च प्राप्त्यर्थम्। इत्येतेन[1] विधानेन पशूंश्च देवताश्च निगमयेद् यथाम्नाते प्रैषे, देवतास्थाने या या देवता छागस्थाने [2]यो यः पशुरिति[2]। [3]आदेशे अकृते[3] सकृद् बध्नन्-शब्दः प्राप्तः, देवताः पृथक् पशवश्च पृथक् प्राप्ताः। तस्मात् प्रतिदेवतं बध्नन्-शब्दः। प्रतिदेवतं च पशुः[4]। पशुनिगमप्राप्त्यर्थोऽयमारम्भः[5]। वीप्सा-वचनं देवताबहुत्वे च प्रतिदेवतं[6] बध्नन्शब्दस्य प्राप्त्यर्थम्। देवताश्च पशूंश्चेति अनुक्रमेण वक्तव्ये अयथानुक्रमविधानं ज्ञापकार्थम्—अनुक्रमः कारणं न भवतीति। इत उत्तरं ये शब्दा उपदिश्यन्ते[7], ते स्वे एव स्थाने विनियोज्याः। यदि अनुक्रमः कारणं स्यात् देवताश्चैवैकपशुकाः (आश्रौ ३, ६, १९) इत्युक्ते बध्नन्-शब्दादनन्तरं[8] [9]देवता एव निगमयेत्, अनन्तरं पशुमिति भवति। पशूंश्चैवैकदेवतान् (आश्रौ ३, ६, २०) इत्युक्ते बध्नन्-शब्दादनन्तरं[9] पशुमेव[10] निगमयेदिति प्राप्नोति। तस्मादनुक्रमः कारणं न भवतीति[11] ॥ १८ ॥

[प्रतिदेवतमेकः पशुरिति विधानम्]

देवताश्चैवैकपशुकाः ॥ १९ ॥

बध्नन्-शब्दमुक्त्वा चतुर्थ्या विभक्त्या सर्वा देवता एव निगमयेत्। अनन्तरमेकं पशुशब्दं द्वितीयया निगमयेत्। एकपशुका देवता भवन्ति, [12]तासां तद्विधानम्। एकः पशुः बह्वचो[12] देवताः, ता एकपशुका भवन्ति। अग्नय इन्द्राय विश्वेभ्यो देवेभ्यः छाग इति भवति। च-शब्दः समुच्चयार्थः। देवता उक्त्वा अनन्तरं "पशुं च" ब्रूयाद् इति। अन्यथा देवता एवेतिवचनाद्

---

१. इत्यनेन ब^{1,2} मै पू। २-२. यो पाः पशुरिति ब^{1}; या या पशुव्यक्तिरिति ब^{2}; या (यो पू) या पशुरिति ब^{3} मै पू। ३-३. आदेशेत्यकृते ब^{2} मै पू। ४. नास्ति ब^{1,2} मै पू। ५. निगम° ब^{3}। ६. प्रतिदैवतं ब^{1}। ७. दश्यन्ते ब^{1}; दिश्यन्ते ब^{2} पू; निर्दिश्यन्ते मै। ८. शब्दानन्तरं ब^{1,2} मै पू। ९-९. नास्ति ब^{2} मै। १०. देवतामेव मै। ११. भवतीत्यपि मै; भवति ब^{1}। १२-१२. तासं तव विधानतरमेकं पशुशब्दवह्यो (पशुवध्यो पू) ब^{1} पू; तासां तद्विधानमेकपशु (°शुः मै) बध्यो ब^{2} मै; तासामेतद्विधान एकपशुकास्थे ब^{1}। १३-१३. पशूं च ब^{2} पू; पशून् ब^{3}।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

एव-शब्दोऽवधारणार्थः । देवता एव निगमयेत् । पूर्वेण वचनेन प्रतिदेवतं[1] पशुनिगमः प्राप्तः ॥ १९ ॥

[एकदेवतानां पशूनां द्वितीयया विभक्त्या निगमनविधानम्]

पशूंश्चैवैकदेवतान् ॥ २० ॥

बध्नन्-शब्दमुक्त्वा चतुर्थ्या विभक्त्या [2]एकां देवतामादिश्य द्वितीयया विभक्त्या[2] सर्वान् पशून् एव[3] आदिशेत् । [4]एका देवता[4] येषां पशूनां ते एकदेवता भवन्ति । बध्नन् प्रजापतये अश्वमजं गोमृगम्[5] इति । च-शब्दः समुच्चयार्थः । [6]पशून् निगमयेद् देवताञ्चेति[6] । अन्यथा पशूनेवेत्युक्ते देवतानिगमप्रतिषेधः स्यात् । एवशब्दोऽवधारणार्थः । देवतामुक्त्वा पशूनेव ब्रूयात् । [7]प्रतिपशुदेवतां नावर्तयेत्[7] । [8]प्रतिपशु आवृत्तिः[8] (?प्रतिपशु नावृत्तिः) प्राप्ता पूर्वसूत्रेण ॥ २० ॥

[आज्यभागयोस्तृतीयया देवतायाश्चतुर्थ्या पशोश्च तृतीयया विभक्त्या निगमनविधानम्]

उत्तर आज्येनेत्याज्यभागावमुष्मा अमुनेति पूर्वेणोक्तम् ॥ २१ ॥

उत्तरे निगमे विधिरुच्यते । आज्येनेत्याज्यभागौ निगमयेत् । देवतानिगमेन पशुनिगमेन[9] च [10]तुल्यो विभक्तिनिर्देशः । छागशब्दस्य[10] स्थाने आज्यमादिष्टम् । अग्नये आज्येन सोमायाज्येनेति सर्वत्राज्यभागयोर्निगमनमाम्नातम् । इह यदि नाम्नायते, आज्यभागयोर्निगमनप्रतिषेधः[11] [12]स्यात् । तस्मादारम्भः[12] । अमुष्मा अमुनेति पूर्वेणोक्तम् । अमुष्मै इति चतुर्थ्या देवता निर्दिश्यते[13], अमुनेति तृतीयया पशुः । शेषं पूर्वेण निगमनमुक्तम्—देवताश्चैवैकपशुकाः (आश्वौ ३, ६, १९), पशूंश्चैवैकदेवतान् (आश्वौ ३, ६, २०) इति । अग्नये इन्द्राय विश्वेभ्यो देवेभ्यश्छागेन, प्रजापतये अश्वेनाजेन[14] गोमृगेण । अमुष्मा अमुनेति[15] यदि नोच्यते, तत् पूर्वेणोक्तमित्यतिदेशाद् देवतादेशे चतुर्थी, पश्वादेशे द्वितीया प्राप्नोति ॥ २१ ॥

---

१. प्रतिदैवतं ब^{1} । २-२. नास्ति ब^{3} । ३. नास्ति ब^{1} । ४-४. एकदेवता मूको । ५. तु. आश्वौ १०, ९, ५ । ६-६. पशुनि (नि ब^{1} ; न्नि ब^{1}) गमयेद्देवेति मूको । ७-७. प्रतिपशुं °शूं ब^{1,3}) देवतानां (°ता ना ब^{1,3}) वर्तं° मूको । ८-८. प्रतिप (प्रति मै) शूनां (शून्ना ब^{3}) वृत्तिः मूको । ९. °गमे ब^{1,2} मै पू । १०-१०. तुल्ये विभक्ति-निर्देशात् । निगमशब्दस्य ब^{1} । ११. °योर्निगमप्रति° ब^{2,3} । १२-१२. स्यादारम्भः ब^{1} पू । १३. निर्देशयति ब^{1} । १४. अजेन ब^{3} । १५. अमुमिति ब^{3} ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[सूक्तवाकप्रैषं समाप्याहवनीयेऽग्नौ दण्डप्रहरणमवभृथनिषेधश्च]

समाप्य प्रैषमग्नौ दण्डमनुप्रहरेदनवभृथे ।। २२ ।।

सूक्तवाकप्रैषं समाप्य आहवनीयेऽग्नौ दण्डम् प्रस्तरमनु प्रहरेत्। अनवभृथे अवभृथो यस्मिन् कर्मणि न विद्यते, तदनवभृथं कर्म। समाप्येति कालो व्यपदिश्यते[1], न संबन्धः क्रियते। परिधाय संस्तुयात् (आश्रौ ३, १, १०) इति संबन्धे सति[2] तदानीमेव अनुप्रहरणं प्राप्नोति। अनुप्रहरेदिति अनु-शब्दप्रयोगात् प्रस्तरमनु प्रहरणं भवति। अनवभृथं कर्म निरूढपशुबन्धः ।। २२ ।।

[सावभृथेषु कर्मसु अवभृथादनन्तरमनुप्रहरणविधानम्]

अवभृथेऽन्यत्र ।। २३ ।।

अनवभृथात् कर्मणोऽन्यत्र अन्येषु च कर्मसु सावभृथेषु अवभृथपात्रेषु उपहृतेषु[3] अनुप्रहरेत्, पाशुकेषु वरुणप्रघासेषु सौत्रामण्यां[4] सोमेषु च ।। २३ ।।

[वेदस्तरणविभाषायास्तीर्थेन निष्क्रमणादिहृदयशूलानुमन्त्रणान्तस्य च विधानम्]

कृताकृतं वेदस्तरणं तीर्थेन निष्क्रम्याग्निपशुकेतनान्यव्यवयन्तो हृदयशूलमुपोयमानमनुमन्त्रयेरञ् छुगसि योऽस्मान् द्वेष्टि यं च वयं द्विष्मस्तमभिशोचेति (तु. तैसं १, ३, ११, १) ।। २४ ।।

पूर्णपात्रं कृत्वा वेदस्तरणं[5] कृताकृतं क्रियते वा न क्रियते वा। इयं[6] व्यवस्थितविभाषा। पाशुके न क्रियते, सोमे क्रियते। [7]स्तीर्णे वेदे[7] समिष्टयजुषी जुहोति[8] इत्याध्वर्यवे श्रुतिः। पौर्णमासेन च सोमस्यातिदेशाद्[9] विभाषा न[10] भवति। यथा पौर्णमासे तथा भवति। तीर्थेन निष्क्रम्या० द्विष्मस्तमभिशोचेति। सर्वप्रायश्चित्तानि हुत्वा संस्थाजपमवशिष्य तीर्थेन निष्क्रम्य अग्निपशुकेतनान्यव्यवयन्तः, अग्निः शामित्रः, पशुकेतनानि पश्ववयवभूतानि[11] [12]रुधिरमांसलोमादीनि, अव्यवयन्तः सर्वे ऋत्विजो[12] [13]व्यवायमकुर्वन्तः पशुकेतनानि[13] विहारं चान्तरेण[14] न व्यवेयुः सर्वेषामुत्तरेण गच्छेयुः। अनेन मार्गेण गत्वा हृदयशूलमुपोयमानम् अनुमन्त्रयेरन्। येन शूलेन

---

१. ह्युपदि° ब[3]। २. नास्ति ब[1,2] मै पू। ३. प्रहर तेषु ब[1]; प्रहृतेषु मै पू; नास्ति ब[2]। ४. मैत्रावरुण्या मै। ५. वेदस्य स्तरणं ब[1,2] पू। ६. इत्थं ब[3]। ७-७. स्तीर्णंवेदे ब[2,1] मै पू; स्तीर्णे वंदे ब[1]। ८. तु. माश्रौ १,७,२,२०। ९. सोमस्यातिशयात् ब[1] मै पू। तु. आश्रौ २, १, ११। १०. नास्ति ब[3]। ११. नास्ति ब[3]; पश्ववयवानि ब[1,2] मै पू। १२-१२. नास्ति ब[2,3]। १३-१३. नास्ति ब[2,3]। १४. वान्त° ब[1,2] मै पू।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

हृदयं परिगृह्य संस्क्रियते तद्धृदयशूलम्। उपोयमानं शुष्कार्द्रयोः सन्धौ निक्षिप्यमाणम् अनुमन्त्रयेरन् ऋत्विजः समीक्षमाणा[1] मन्त्रं ब्रूयुः—शुगसि इति यथासमाम्नातम् ॥ २४ ॥

[समन्त्रकमप उपस्पर्शनविधानम्]

तस्योपरिष्टादप उपस्पृशन्ति द्रुपदे राज्ञो वरुणस्य गृहो मितो हिरण्ययः स नो धृतव्रतो राजा धाम्नो धाम्न इह मुञ्चतु। धाम्नो धाम्नो राजन्नितो वरुण नो मुञ्च। यदापो अघ्न्या इति वरुणेति शपामहे ततो वरुण नो मुञ्च (मैसं १, २, १८)। मैवापो मोषधीर्हिंसीरतो विश्वव्यचाऽभूस्त्वेतो वरुण नो मुञ्च। सुमित्र्या न आप ओषधयः सन्त्विति च ॥ २५ ॥

तस्य हृदयशूलस्य उपरिष्टाद् अप उपस्पृशन्तो मन्त्रं जपन्ति—द्रुपदे राज्ञः इत्येतम्। यत्र बहवो मन्त्रा[2] भवन्ति, तत्र[3] मन्त्रान्तेन क्रियत इति व्याख्यातम्[4]। सुमित्र्या[5] नः (आश्रौ ३, ५, २) इति च। अयं च मन्त्रो जप्तव्यः। मार्जने आम्नातस्यादिग्रहणम् ॥ २५ ॥

[हृदयशूलमस्पृष्ट्वानवेक्षमाणैः पृथक् प्रतिनिवर्तनं समन्त्रकं समिद्ग्रहणं च]

अस्पृष्ट्वाऽनवेक्षमाणा असंस्पृशन्तः प्रत्यायन्तः समिधः कुर्वते तिस्रस्तिस्र एकैकः ॥ २६ ॥

अग्नेः समिदसि तेजोऽसि तेजो मे देहीति प्रथमाम्। एधोऽस्येधिषीमहीति द्वितीयाम्। समिदसि समेधिषीमहीति तृतीयाम् ॥ २७ ॥

हृदयशूलम् अस्पृष्ट्वा अप उपस्पृशन्ति। यथा अन्वाहार्ये अस्पृशन्नवेति[6]। तादृशमेवैतत्। अनवेक्षमाणा[7] अप [8]उपस्पृश्य अनन्तरं तां†[8] हृदयशूलमनवेक्षमाणा[9] निवर्तन्ते। असंस्पृशन्तः अन्योन्यमसंस्पृशन्तः। प्रत्यायन्तः प्रतिनिवर्तमानाः[10]। समिधः कुर्वते समिधो गृह्णन्ति[11]। अपरिमिताः प्राप्ताः, तस्मादुच्यते—तिस्रस्तिस्रः समिध

---

१. समीक्ष्यमाणाः मूको। २. नास्ति ब[1,2] मै पू। ३. तत्तत्र ब[3]। ४. तु. आश्रौ ३, ५, २। ५. सुमित्रिया ब[1,2] पू। ६. तु. आश्रौ १, १३, ५; °शन्नेवेति ब[1]। ७. अनपेक्षमाणाः ब[1,2] मै पू; अनवेक्ष्यमाणाः ब[3]। ८-८. उपस्पृशन्तस्तान् ब[1]। †. नास्ति मै। ९. अनपेक्षमाणा मूको। १०. °वर्तेत ब[1]; °वर्तन्तः ब[2] पू; °वर्तयन्ता ब[3]; °वर्तन्ते मै। ११. गृह्णन्ते ब[1,2] पू; गृह्यन्ते मै।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

एकैको गृह्णाति। तूष्णीं ग्रहणे प्राप्ते मन्त्रा उपदिश्यन्ते। अग्नेः समिदसि इति प्रथमां गृह्णीयात्। एधोऽसि इति द्वितीयाम्। समिदसि इति तृतीयाम् ॥ २६-२७ ॥

[अग्नेः समीपमागत्योपस्थानं समन्त्रकं समिधामभ्याधानञ्च]

एत्योपतिष्ठन्त आपो अद्यान्वचारिषमिति। ततः समिधोऽभ्यादधति यथागृहीतमग्नेः समिदसि तेजोऽसि तेजो मेऽदाः स्वाहा सोमस्य समिदसि दुरिष्टेर्मा पाहि स्वाहा। पितॄणां समिदसि मृत्योर्मा पाहि स्वाहेति ॥ २८ ॥

एत्य आगत्य तीर्थेन प्रपद्य आहवनीयमुपतिष्ठन्ते[1], आपो अद्य (ऋ १, २३, २३) इत्येतयर्चा। आरादुपकारित्वादुपस्थानं दूरस्थैरपि न शक्यते कर्तुम्[2]। तस्मादेत्योपतिष्ठन्त इत्युच्यते। ततः[3] समिधोऽभ्यादधति[4] [5]यथागृहीतमग्नेः० स्वाहेति[5]। ततः उपस्थानादनन्तरं[6] या गृहीताः समिधस्ता अभ्यादधति[7] अग्नौ प्रक्षिपन्ति[8]। यथागृहीतं [9]येनानुक्रमेण समिधो गृहीतास्तेनैवानुक्रमेणाभ्यादधति†[9]। तस्मादनुक्रम उपलक्षयितव्यो भवति। अङ्गुल्यन्तरेषु उपधीयन्ते[10]। तूष्णीमभ्याधाने प्राप्ते मन्त्रा उपदिश्यन्ते। अग्नेः समिदसि इति प्रथमां समिधमभ्यादध्युः[11]। सोमस्य इति द्वितीयाम्। पितॄणाम् इति तृतीयाम् ॥ २८ ॥

[संस्थाजपेन पश्विष्टिसमाप्तिकथनम्]

ततः संस्थाजप इति पशुतन्त्रम् ॥ २९ ॥

ततः अभ्याधानादनन्तरं संस्थाजपः। ततः संस्थाजपेनोपतिष्ठन्ते[12] इति[13] इह संस्थाजपश्चोदितः। तस्मात् पूर्वमेव प्रायश्चित्तानि हुत्वा तीर्थेन निष्क्रम्येदं कर्म क्रियते इति ज्ञातं[14] भवति। इति पशुतन्त्रम् इति एतत् पशूनां तन्त्रं पशुतन्त्रं[15] पशुकर्मेत्यर्थः। पशाविष्टिः (आश्रौ ३, १, १-२) इति नित्यं [16]पशुं षाण्मास्यमधिकृत्य[16]

---

१. °नीये उप° ब[1,2] मै पू। २. उपस्थानं कर्तुम् ब[1,2] मै पू। ३. नास्ति ब[1,2] मै पू। ४. °दधाति मूको। ५-५. नास्ति ब[1,2] मै पू। ६. °स्थानानन्तरं मै। ७. °दधाति मूको। ८. प्रक्षिपति मूको। ९-९. येनानुक्रमेणाभ्यादधाति मै। †. °दधाति ब[1-3] पू। १०. °यते मूको। ११. °दध्यात् मूको। १२. °ष्ठते ब[1,2] मै पू। तु. आश्रौ १, १३, १०। १३. नास्ति ब[1,3] मै पू। १४. ज्ञानं मै। १५. नास्ति ब[1,3]; °तन्त्रः ब[2] मै पू। १६-१६. पशुषा° ब[1,2] पू; पशुष° मै; पशुषु इमासमिधकृत्य ब[3]।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

भवति । इदम् अन्यस्य पशोर्न प्राप्नोति । तस्मात् सर्वपशूनां तन्त्रप्राप्त्यर्थ-मिदमुच्यते—इति पशुतन्त्रमिति । तस्माद् आश्विनसारस्वतैन्द्राः पशवः (आश्रौ ३, ९, २) इत्युक्ते तेषामेतत्[1] तन्त्रं भवति । त्वाष्ट्रेण पशुना चरन्ति (आश्रौ ६, १४, १०) इत्युक्ते तस्य एतत् तन्त्रं भवति ॥ २९ ॥

॥ [इति] तृतीयस्य [2]षष्ठं खण्डम्[2] ॥

---

१. तेषामेवैतत् ब[1-3] पू ; तेषामेव मै । २-२. षष्ठः खण्डः मै ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ तृतीयेऽध्याये सप्तमः खण्डः

[पूर्वोक्तप्रैषप्रकरणस्योपसंहारः]

प्रदानानामुक्ताः प्रैषाः ।। १ ।।

उक्तानि प्रदानानि वपा पुरोळाशो हविः (आश्रौ ३, ४, ४) इति। तेषां प्रदानानामुक्ताः प्रैषा व्याख्याताः तेषां सलिङ्गाः प्रैषाः (आश्रौ ३, ४, ८) इति ।। १ ।।

[पूर्वोक्तप्रदानानां याज्यानुवाक्याधिकारकथनम्]

तेषां याज्यानुवाक्याः ।। २ ।।

इदानीं[1] तेषां प्रदानानां याज्यानुवाक्या वक्ष्यन्ते। एतदधिकृतं वेदितव्यमिति। उत्तरं या ऋचो वक्ष्यन्ते, तास्तेषां[2] याज्यानुवाक्या इति वेदितव्यम्। उक्तानि प्रदानानि पुनरधिक्रियन्ते, याज्यानुवाक्याविवक्षार्थम् एव, अप्रैषाधिकारात्[3] प्रैषाणां याज्यानुवाक्यानां च संबन्धार्थम्। [4]अन्यथा विद्यमाने[4] संप्रैषे[5] प्रैषं ब्रूयात्। [6]अविद्यमाने न ब्रूयात्[6]। अस्मात् संबन्धवचनाद् अविद्यमानेऽपि संप्रैषे[5] प्रैषो वक्तव्यो भवति ।। २ ।।

[पूर्वमनुवाक्यायास्ततो याज्यायाः कथनविधानम्]

सर्वेषामग्रेऽग्रेऽनुवाक्यास्ततो याज्याः ।। ३ ।।

सर्वेषां पशूनामेकैकस्य पशोर्या ऋचो वक्ष्यन्ते, तासामग्रे तिस्र ऋचः अनुवाक्या भवन्ति। [7]ततो याज्याः[7]। ततस्ताभ्य उत्तरास्तिस्रो याज्या भवन्ति। द्वे द्वे याज्यानुवाक्ये (आश्रौ १, १०, ७) इति प्राप्त इदमुच्यते। सर्वेषाम् इति वचनात् सर्वे पशवः संबध्यन्ते। कथं ज्ञायते। दैवतेन पशुनानात्वम् (आश्रौ ३, ७, ४) [8]इति वचनात् सर्वेषां पशूनामिति भवन्ति। (अग्रेऽग्रे इति) वीप्सावचनं पशुबहुत्वप्राप्त्यर्थम्[†][8] ।। ३ ।।

---

१. तदानीं ब[1,2] मै पू। २. नास्त्येषां (°षा ब[1]) ब[1,2] मै पू।
३. प्रैषा° ब[1,2] मै पू। ४-४. अन्यथाऽवि° मै। ५. सप्रैषे ब[1]।
६-६. नास्ति मै। ७-७. नास्ति ब[1,2] मै पू। ८-८. नास्ति मै।
†. पशुबहुत्वे प्राप्त्यर्थः ब[1,2] पू।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[देवतानुसारेण पशुनानात्वविधानम्]

दैवतेन पशुनानात्वम् ॥ ४ ॥

ऋचां दैवतेन पशूनां नानात्वं पृथक्त्वम्[1] आग्नेय्य[2] ऋच आग्नेयस्य पशोः, 'सारस्वत्य ऋचः' सारस्वतस्य, सौम्य[4] ऋचः सौम्यस्य । एवं सर्वेषाम्[5] । अस्मादारम्भाद् इत्याग्नेयस्य[6], इति सारस्वतस्य, इति सौम्यस्येति न वक्तव्यं भवति ॥ ४ ॥

[आग्नेयस्य पशोरनुवाक्यायाज्याकथनम्]

अग्ने नय सुपथा राये अस्मानिति द्वे, पाहि नो अग्ने पायुभिरजस्रैः (ऋ १, १८९, ४), प्र वः शुक्राय भानवे भरध्वं (ऋ ७, ४, १), यथा विप्रस्य मनुषो हविर्भिः (ऋ १, ७६, ५), प्र कारवो मनना वच्यमानाः (ऋ ३, ६, १) ॥ ५ ॥

[7]अग्ने नय (ऋ १, १८९, १) इति यथागृहीताः षड् ऋचः आग्नेय्यः आग्नेयस्य पशोः[7] ॥ ५ ॥

[सारस्वतस्य पशोरनुवाक्यायाज्याकथनम्]

एकाऽचेतत् सरस्वती नदीनाम्, उत स्या नः सरस्वती जुषाणा (ऋ ७, ९५, ४), सरस्वत्यभि नो नेषि वस्यः (ऋ ६, ६१, १४), प्र क्षोदसा धायसा सस्र एषा (ऋ ७, ९५, १), पावीरवी कन्या चित्रायुः (ऋ ६, ४९, ७), यस्ते स्तनः शशयो यो मयोभूः (ऋ १, १६४, ४९) ॥ ६ ॥

[7]एकाऽचेतत् (ऋ ७, ९५, २) इति[7] यथागृहीताः षट् सारस्वतस्य सरस्वतीदेवत्याः[8] ॥ ६ ॥

[सौम्यस्य पशोरनुवाक्यायाज्याकथनम्]

त्वं सोम प्र चिकितो मनीषेति द्वे, त्वं नः सोम विश्वतो वयोधा

---

१. पृथगुक्तं ब[3] । २. आग्नेये ब[1,2] मै पू । ३-३. नास्ति ब[3] ।
४. सौम्या ब[1,2] मै पू । ५. सर्वेषामेषाम् ब[3] । ६. °यस्य पशोः मै ।
७-७. नास्ति ब[3] । ८. सरस्वतीदेवता ब[3] ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

पशुव्याख्या :
Digitized by Madhuban Trust

(ऋ ८, ४८, १५), या ते धामानि दिवि या पृथिव्याम् (ऋ १, ९१, ४), अषाळ्हं युत्सु पृतनासु पप्रिं (ऋ १, ९१, २१), या ते धामानि हविषा यजन्ति (ऋ १, ९१, १९) ॥ ७ ॥

त्वं सोम प्र चिकितः (ऋ १, ९१, १) इति यथागृहीताः षट् सौम्यस्य ॥ ७ ॥

[पौष्णस्य पशोरनुवाक्यायाज्याकथनम्]

यास्ते पूषन्नावो अन्तः समुद्र इति द्वे, पूषेमा आशा अनु वेद सर्वाः (ऋ १०, १७, ५), शुक्रं ते अन्यद् यजतं ते अन्यत् (ऋ ६, ५८, १), प्र पथे पथामजनिष्ट पूषा (ऋ १०, १७, ६), पथस्पथः परि पतिं वचस्या (ऋ ६, ४९, ८) ॥ ८ ॥

यास्ते पूषन् (ऋ ६, ५८, ३) इति यथागृहीताः षट् पौष्णस्य[1] ॥ ८ ॥

[बार्हस्पत्यस्य पशोरनुवाक्यायाज्याकथनम्]

बृहस्पते या परमा परावदिति द्वे, बृहस्पते अति यदर्यो अर्हात् (ऋ २, २३, १५), तमृत्विया उप वाचः सचन्ते (ऋ १, १९०, २), सं यं स्तुभोऽवनयो न यन्ति (ऋ १, १९०, ७), वा पित्रे विश्वदेवाय वृष्णे (ऋ ४, ५०, ६) ॥ ९ ॥

बृहस्पते या परमा परावत् (ऋ ४, ५०, ३) इति यथागृहीताः षड् बार्हस्पत्यस्य ॥ ९ ॥

[वैश्वदेवस्य पशोरनुवाक्यायाज्याकथनम्]

विश्वे अद्य मरुतो विश्व ऊती, आ नो देवानामुपवेतु शंसः (ऋ १०, ३१, १), आ नो विश्व आस्क्रा गमन्तु देवाः (ऋ १, १८६, २), विश्वे देवाः शृणुतेमं हवं मे (ऋ ६, ५२, १३), ये के च ज्मा महिनो अहिमाया (ऋ ६, ५२, १५), अग्ने याहि दूत्यं मा रिषण्यः (ऋ ७, ९, ५) ॥ १० ॥

---

१. पौष्ण्या ब[1,2] मै पु ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

विश्वे अद्य (ऋ १०, ३५, १३) इति 'यथा गृहीताः' षड् वैश्वदेवस्य[2] ॥ १० ॥

[ऐन्द्रस्य पशोरनुवाक्यायाज्याकथनम्]

इन्द्रं नरो नेमधिता हवन्त इति तिस्रः, उरुं नो लोकमनु नेषि विद्वान् (ऋ ६, ४७, ८), प्र ससाहिषे पुरुहूत शत्रून् (ऋ १०, १८०, १), स्वस्तये वाजिभिश्च प्रणेतः (ऋ ३, ३०, १८) ॥ ११ ॥

इन्द्रं नरः (ऋ ७, २७, १) इति यथागृहीताः षड् ऐन्द्रस्य[3] ॥ ११ ॥

[मारुतस्य पशोरनुवाक्यायाज्याकथनम्]

शुची वो हव्या मरुतः शुचीनां, नू ष्ठिरं मरुतो वीरवन्तम् (ऋ १, ६४, १५), आ वो होता जोहवीति सत्तः (ऋ ७, ५६, १८), प्र चित्रमर्कं गृणते तुराय (ऋ ६, ६६, ९), अरा इवेदचरमा अहेव (ऋ ५, ५८, ५), या वः शर्म शशमानाय सन्ति (ऋ १, ८५, १२) ॥ १२ ॥

'शुची वो हव्या (ऋ ७, ५६, १२) इति यथागृहीताः षण्' मारुतस्य ॥ १२ ॥

[ऐन्द्राग्नस्य पशोरनुवाक्यायाज्याकथनम्]

आ वृत्रहणा वृत्रहभिः शुष्मैः, आ भरतं शिक्षतं वज्रबाहू (ऋ १, १०९, ७), उभा वामिन्द्राग्नी आहुवध्यै (ऋ ६, ६०, १३), शुचिं नु स्तोमं नवजातमद्य (ऋ ७, ९३, १), गीर्भिर्विप्रः प्रमतिमिच्छमानः (ऋ ७, ९३, ४), प्र चर्षणिभ्यः पृतना हवेषु (ऋ १, १०९, ६) ॥ १३ ॥

आ वृत्रहणा (ऋ ६, ६०, ३) इति यथासमाम्नाताः षड् ऐन्द्राग्नस्य ॥ १३ ॥

१-१. यथा ब[1,2] मै पू । २. विश्वदेवस्य मै । ३. नास्ति ब[3] । ४-४. नास्ति ब[1] ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[सावित्रस्य पशोरनुवाक्यायाज्याकथनम्]

आ देवो यातु सविता सुरत्नः, स घा नो देवः सविता सहाव (ऋ ७, ४५, ३) इति द्वे, उदीरय कवितमं कवीनां (ऋ ५, ४२, ३), भगं धियं वाजयन्तः पुरन्धिम् (ऋ २, ३८, १०) इति ॥ १४ ॥

आ देवो यातु सविता (ऋ ७, ४५, १) इति यथागृहीताः षट् सावित्रस्य ॥ १४ ॥

[वारुणस्य पशोरनुवाक्यायाज्याकथनेन सहैकादशिनत्वनिरूपणम्]

अव सिन्धुं वरुणो द्यौरिव स्याद्, अयं सु तुभ्यं वरुण स्वधावः (ऋ ७, ८६, ८), एवा वन्दस्व वरुणं बृहन्तं (ऋ ८, ४२, २), तत् त्वा यामि ब्रह्मणा वन्दमानः (ऋ १, २४, ११) इति द्वे, अस्तभ्नाद् द्यामसुरो विश्ववेदाः (ऋ ८, ४२, १) इत्यैकादशिनाः ॥ १५ ॥

अव सिन्धुं वरुणः (ऋ ७, ८७, ६) इति यथागृहीताः षड् वारुणस्य[1]। इत्यैकादशिनाः[2] । अग्निः सरस्वती सोमः पूषा बृहस्पतिः विश्वे देवा इन्द्रो मरुतः इन्द्राग्नी सविता वरुण इत्यैकादशिनाः पशूनामिति। एकादशिनान् वा (आश्रौ १२, ७, ६) इत्युक्ते[3] पशव ऐकादशिना भवन्ति । [4]एकादशिन्यां भवा[4] ऐकादशिनाः[5] । [6]एकादशिनी क्रियायां[6] यद्येकादशिन्यग्रतः कृता (आश्रौ ६, १४, १०) इति, ऐकादशिनान् वा इत्युक्ते एते एकादश पशवः प्रत्येतव्याः[7]। तस्माद् ऐकादशिनाः पूर्वं वक्ष्यन्ते इति। सोमे सवनीयाः प्रधानाः[8]। प्रधानत्वात्

---

१. वरुणस्य मूको। २. नास्ति ब[1,2] मै पू। ३. इत्येते ब[1,2] मै पू।
४-४. ऐकादशिना न्यातवा (ज्ञातव्याः?) ब[1] । ५. नास्ति ब[3] ।
६-६. एकादशिनि (°शि ब[3] ; °शनि मै) क्रिया मूको। ७. प्रतोद्यः (?°द्याः) ब[1] ।
८. नास्ति ब[1] मै पू ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[1]सवनीया एव पूर्वमुच्यन्ते[1]। [2]सवनीयास्तु आग्नेयादयः ऋतुपशव ऐकादशिना वा भवन्ति। तस्मादेकादशिनाः पूर्वं वक्ष्यन्ते। तेषु एते आग्नेयादयः ऋतुपशवश्च[2] विद्यन्ते। तस्मात् पूर्वमुक्ता[3] भवन्ति। अत ऊर्ध्वमङ्गपशवः अग्नीषोमीयादयः पशुबन्धा वक्ष्यन्ते। एवं निरूढपशुबन्धेऽपि क्रियन्ते। तस्मात् ते निमिता[4] इत्युच्यन्ते। सोमाग्निष्क्रम्य मिता निर्मिता[5] इति ॥ १५ ॥

॥ [इति] [6]तृतीयस्य सप्तमं खण्डम्[6] ॥

१-१. °या पूर्वं एवमुच्यन्ते ब[3] ; °या एव पूर्वं वक्ष्यन्ते ब[2] पू । २-२. सवनीयास्तु (°यासु मं) ; आग्नेयः (°य मं) क्रतुः पशवश्च ब[1] मं ; तेषु एते आग्नेयः क्रतुः पशवश्च ब[2] पू ; सवनीयासु आग्नेय ऋतुपशवः ऐकादशिनीं वा भवति । तस्मादेकादशिनाः पूर्वं वक्ष्यते । तेषु एतेषु आग्नेयादयः ऋतुपशवेषु विद्यन्ते ब[3] । ३. पूर्वं उक्ताः मूको । ४. निमित्त ब[1] ; निमित्ता ब[2] मं पू ; निमित्ता ब[3] । ५. निमिता (°त्ता मं) मूको । ६-६. तृतीये सप्तमः खण्डः मं ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ तृतीयेऽध्याये अष्टमः खण्डः

[अङ्गपशूनामनुवाक्यायाज्याकथनम्]

अग्नीषोमाविमं सु मे, युवमेतानि दिवि रोचनानि (ऋ १, ९३, ५) इति तृचौ, आ वां मित्रावरुणा हव्यजुष्टिम्, आ यातं मित्रावरुणा सुशस्ति (ऋ ६, ६७, ३), आ नो मित्रावरुणा हव्यजुष्टिं (ऋ ६, ६५, ४), युवं वस्त्राणि पीवसा वसाथे (ऋ १, १५२, १), प्र बाहवा सिसृतं जीवसे नः (ऋ १, ६२, ४), यद् बंहिष्ठं नातिविधे सुदानू (ऋ ५, ६२, ९), हिरण्यगर्भः समवर्तताग्र इति षट् प्राजापत्याः, चित्रं देवानामुदगादनीकमिति पञ्च, शं नो भव चक्षसा शं नो अह्ना (ऋ १०, ३७, १०), आ वायो भूष शुचिपा उप नः, प्र याभिर्यासि दाश्वांसमच्छा (ऋ ७, ९२, ३), आ नो नियुद्भिः शतिनीभिरध्वरं (ऋ ७, ९२, ५), पीवो अन्नाँ रयिवृधः सुमेधाः (ऋ ७, ९१, ३), राये नु यं जज्ञतू रोदसीमे (ऋ ७, ९०, ३), प्र वायुमच्छा बृहती मनीषा (ऋ ६, ४९, ४), तव वायवृतस्पते, त्वां हि सुप्सरस्तमम् (ऋ ८, २६, २४) इति द्वे, कुविदङ्ग नमसा ये वृधासः (ऋ ७, ९१, १), ईशानाय प्रहुतिं यस्त आनट् (ऋ ७, ९०, २), प्र वो वायुं रथयुजं कृणुध्वम् (ऋ ५, ४१, ६), उत त्वामदिते महि, अनेहो न उरुव्रजे (ऋ ८, ६७, १२), अदितिर्ह्यजनिष्ट (ऋ १०, ७२. ५), सुत्रामाणं पृथिवीं द्यामनेहसं (ऋ १०, ६३, १०), महीमू षु मातरं सुव्रतानाम् (ऐब्रा १, ९), अदितिर्द्यौरदितिरन्तरिक्षं (ऋ १, ८९, १०), न ते विष्णो जायमानो न जातः, त्वं विष्णो सुमतिं विश्वजन्यां (ऋ ७, १००, २), वि चक्रमे पृथिवीमेष एतां (ऋ ७, १००, ४), त्रिर्देवः पृथिवीमेष एतां (ऋ ७, १००, ३), परो मात्रया तन्वा वृधानः

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

(ऋ ७, ९९, १), इरावती धेनुमती हि भूतं (ऋ ७, ९९, ३), विश्वकर्मन् हविषा वावृधान इति द्वे, विश्वकर्मा विमना आद्विहायाः (ऋ १०, ८२, २), किं स्विदासीदधिष्ठानं (ऋ १०, ८१, २), यो नः पिता जनिता यो विधाता (ऋ १०, ८२, ३), या ते धामानि परमाणि यावमा (ऋ १०, ८१, ५), य इमे द्यावापृथिवी जनित्री, तन्नस्तुरीपमध पोषयित्नु (ऋ ३, ४, ९), देवस्त्वष्टा सविता विश्वरूपः (ऋ ३, ५५, १९), देव त्वष्टर्यद्ध चारुत्वमानट् (ऋ १०, ७०, ९), पिशङ्गरूपः सुभरो वयोधाः (ऋ २, ३, ९), प्रथमभाजं यशसं वयोधां (ऋ ६, ४९, ९), सोमापूषणा जनना रयीणामिति सूक्तम्, आदित्यानामवसा नूतनेन, इमा गिर आदित्येभ्यो घृतस्नूः (ऋ २, २७, १), त आदित्यास उरवो गभीरा (ऋ २, २७, ३), इमं स्तोमं सक्रतवो मे अद्य (ऋ २, २७, २), तिस्रो भूमीर्धारयन् त्रींरुत द्यून् (ऋ २, २७, ८), न दक्षिणा वि चिकिते न सव्या (ऋ २, २७, ११), मही द्यावापृथिवी इह ज्येष्ठे, ऋतं दिवे तदवोचं पृथिव्या (ऋ १, १८५, १०) इति द्वे, प्र द्यावा यज्ञैः पृथिवी नमोभिः (ऋ ७, ५३, १) इति द्वे, प्र द्यावा यज्ञैः पृथिवी ऋतावृधा (ऋ १, १५९, १), मृळा नो रुद्रोत नो मयस्कृधि (ऋ १, ११४, २) इति द्वे, आ ते पितर्मरुतां सुम्नमेतु (ऋ २, ३३, १), प्र बभ्रवे वृषभाय श्वितीचे (ऋ २, ३३, ८) इति तिस्रः, आ पश्चातान्नासत्या पुरस्ताद्, आ गोमता नासत्या रथेनेति चतस्रो (ऋ ७, ७२, १-४), हिरण्यत्वङ्मधुवर्णो घृतस्नुः (ऋ ५, ७७, ३), अभि क्रत्वेन्द्र भूरध ज्मन्, त्वं महाँ इन्द्र तुभ्यं ह क्षाः (ऋ ४, १७, १), सत्राहणं दाधृषिं तुम्रमिन्द्रं (ऋ ४, १७, ८), सहदानुं पुरुहूत क्षियन्तं (ऋ ३, ३०, ८), स्तुत इन्द्रो मघवा यद्ध वृत्रा (ऋ ४, १७, १९), एवा वस्व इन्द्रः सत्यः सम्राड् (ऋ ४, २१, १०), यद् वाग्वदन्त्यविचेतनानि, पतङ्गो वाचं मनसा बिभर्ति (ऋ १०, १७७, २), चत्वारि वाक्परिमिता पदानि (ऋ १, १६४, ४५), यज्ञेन वाचः पदवीयमायन् (ऋ १०, ७१, ३) इति द्वे, देवीं वाचमजनयन्त देवाः (ऋ ८, १००, ११), जनीयन्तोन्वग्रवः

CC-0. Public Domain. Vipin Kumar Collection, Deoband

पशुत्यागः

Digitized by Madhuban Trust

इति तिस्रो, दिव्यं सुपर्णं वायसं बृहन्तं (ऋ १, १६४, ५२), स वावृधे नर्यो योषणासु (ऋ ७, ६५, ३), यस्य व्रतं पशवो यन्ति सर्वे यस्य व्रतमुपतिष्ठन्त आपः । यस्य व्रते पुष्टिपतिर्निविष्टस्तं सरस्वन्तमवसे हुवेम (खिसा ७, ६६, १) ॥ १ ॥

सवनीयाः पशवो व्याख्याताः। इदानीमङ्गपशवो वक्ष्यन्ते[1] अग्नीषोमीयादयः[2] । अग्नीषोमाविमं सु मे (ऋ १, ९३, १) इति यथागृहीताः[3] षड्[4] अग्नीषोमीयस्य । आ वां मित्रावरुणा (ऋ १, १५२, ७) इति यथागृहीताः षण् मैत्रावरुणस्य अनूबन्ध्यायाः । हिरण्यगर्भः (ऋ १०, १२१, १) इति षडृचः प्राजापत्याः प्राजापत्यस्य । पादग्रहणाद् ऋक् प्राप्ता । तस्मात् षडित्याह । [5]कायं सूक्तं[5] दैवतेन पशुनानात्वम् (आश्रौ ३, ७, ४) [6]इति वचनात्[6] कायस्य पशोर्भवति । प्राजापत्या इति वचनात् प्राजापत्यस्यापि[7] पशोर्भवति[8] । अयमप्यङ्गपशुरेव—प्राजापत्ये त्वग्निचित्यासंयुक्ते (आश्रौ ३, ४, १२) इति। चित्रं देवानाम् (ऋ १, ११५, १) इति यथागृहीताः षट् सौर्यस्य[9] पशोः । अयमप्यङ्गपशुरेव—यस्याश्विने शस्यमाने सूर्यो नाविर्भवति, [10]सौर्यं बहुरूपमालभेत[10] (आपश्रौ १४, २४, १) । आ वायो भूष (ऋ ७, ९२, १) इति यथागृहीताः षड् [11]वायोर्नियुत्वतो वायव्यस्य पशोः । स चापि विकल्पेन भवति अग्निचित्यासंयुक्तः । तव वायवृतस्पते (ऋ ८, २६, २१) इति यथागृहीताः षड्[11] वायोः[12] । असावपि[13] वायव्यः अग्निचित्यासंयुक्तो भवति विकल्पेन । अङ्गपशवः समाप्ताः । इदानीमित उत्तरमादित्यादयो ये वक्ष्यन्ते, ते[14] विकृतौ क्व चित् क्व चित् सवनीया एव आम्नाताः । [15]ये आम्नाताः[15] ते अश्वमेधादिषु द्रष्टव्याः । ते वक्ष्यन्ते। उत त्वामदिते महि (ऋ ८, ६७, १०) इति यथागृहीताः षड् आदित्यस्य । अदितिर्देवता । आदित्यां वशामष्टाचत्वारिंशे (आश्रौ १२, ७, १२) । न ते विष्णो (ऋ ७, ९९, २) इति यथागृहीताः षड् वैष्णवस्य । वैष्णवं वामनमेकविंशे (आश्रौ १२, ७, ११) । विश्वकर्मन् (ऋ १०, ८१, ६) इति यथागृहीताः षड् वैश्वकर्मणस्य । वैश्वकर्मणमृषभं[16] महाव्रते (आश्रौ १२, ७, १३) । य इमे द्यावापृथिवी (ऋ १०, ११०, ९) इति यथागृहीताः षट् त्वाष्ट्रस्य । गार्हपत्ये

---

१. वतंन्ते वक्ष्यन्ते ब[1] । २. °मादयः मै । ३. °तं ब[1] ।
४. नास्ति ब[2] । ५-५. कायसूक्तं ब[1,2] मै पू ; तु. ऋअ २, १०, १२१ ।
६-६. नास्ति ब[1,2] पू । ७. °पत्यस्य ब[3] । ८. पशो भवन्ति (°ति मै) ब[1] मै पू ।
९. सूर्यस्य मूको । १०-१०. सौर्यमालभेत ब[1-3] पू । ११-११. नास्ति ब[1] पू ।
१२. नास्ति मूको । १३. पशावपि ब[3] । १४. ते ते ब[1] मै पू ; ते न ब[1] ।
१५-१५. नास्ति ब[3] । १६. °कर्मणं (°णां मै) मूको ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

त्वाष्ट्रेण पशुना चरन्ति (आश्रौ ६, १४, १०)। सोमापूषणा (ऋ २, ४०) इति सूक्तं सोमापौष्णस्य। विषुवति सौर्यः पशुस्तस्योक्तः सोमापौष्णो वा[1] (आश्रौ ८, ६, ५) वैकल्पिकः। अत्र सूक्तस्यापि पादग्रहणम् ऋग्धर्मप्राप्त्यर्थम्। पशुपुरोळाशस्य कृताकृतत्वाद्[2] ऋच एव प्रयुज्यन्ते न सूक्तम्। सूक्तग्रहणादन्या[3] ऋचो नोद्ध्रियन्ते। अन्यदेवत्वादुद्धारः[4]। अन्ये तु पूर्वे अदितिदेवतासूक्तप्रयोगे तु सा नोद्ध्रियते। सूक्तभाजे देवताः संश्रियन्ते। षडित्यनूच्यमाने[5] पञ्चानामेव देवतानामभ्यासं कुर्यात्, यथा षड् भवन्ति। दैवतेन पशुनानात्वम् (आश्रौ ३, ७, ४) इति वचनात्। आदित्यानामवसा नूतनेन (ऋ ७, ५१, १) इति यथागृहीताः षड् आदित्यस्य। आदित्यो देवता। मही द्यावापृथिवी इह ज्येष्ठे (ऋ ४, ५६, १) इति यथागृहीताः [6]षड् रौद्रस्य। रुद्रो देवता। आ पश्चातान्नासत्या पुरस्तात् (ऋ ७, ७२, ५; ७३, ५) इति यथागृहीताः षड् आश्विनस्य। अभि क्रत्वेन्द्र (ऋ ७, २१, ६) इत्येवमादियथागृहीताः[6] षड् [7]ऐन्द्रस्य वार्त्रघ्नस्य[7]। यद् वाग् वदन्ती (ऋ ८, १००, १०) इति यथागृहीताः षड् वाग्देवत्यस्य। जनीयन्तो न्वग्रवः (ऋ ७, ९६, ४) इति यथागृहीताः षट् सारस्वतस्य। सरस्वान् देवता ॥ १ ॥

[पशुकर्मोपसंहारनिर्देशः]

इति पशवः ॥ २ ॥

इत्येते पशवो व्याख्याताः। पुनरधिकारः क्रियते उत्तरसूत्रविवक्षार्थः ॥ २ ॥

[केषाञ्चित् पशूनां सोमाङ्गत्वं केषाञ्चिच्च निरूढत्वम्]

सौम्याश्च निर्मिताश्च ॥ ३ ॥

सौम्याश्च निर्मिताश्चेत्युक्ते एते पशवोऽभिसंबध्यन्ते। सौम्याश्च। एते पशवः सौम्याश्च भवन्ति। वक्ष्यमाणाश्च सोमाः[8]। [9]सोमेषु भवाः सौम्याः[9]। निर्मितवचनमुत्तरसूत्रविवक्षार्थम्[10]। वक्ष्यति निर्मितः[11] (आश्रौ ३, ८, ४) इति।

---

१. नास्ति ब[1] मै। २. कृतत्वात् ब[1,2] पू। ३. न सूक्तग्र° ब[1,2] मै पू; ग्रहणा° ब[2]। ४. °देवत्यादु° ब[3]। ५. °त्यनुच्य° ब[1] मै। ६-६. नास्ति ब[1,2] मै पू। ७-७. ऐन्द्रवा° ब[1,2] मै पू। ८. सोमा वक्ष्यमाणाः मूको। ९-९. सोमेन भवः सौम्ये (सौम्यः मै) ब[1,2] मै पू; सोमेन च सौम्य ब[3]। १०. निगमनव° मूको। ११. निर्मिता मूको।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

पशुभाग:

Digitized by Madhuban Trust

'इति पशवो निर्मिता' इत्युच्यमाने एते पशवो निर्मिता एव स्यु: । तस्मात् सौम्या इत्याह । निर्मिताश्च । एते पशवो निर्मिताश्च भवन्ति । सोमान् निष्क्रम्य मिता:[2] निर्मिता:[3] । श्रुतौ सोमप्रकरणे आम्नाता: सन्त: कामान्निर्मिताद्[4] वा पृथक् क्रियन्ते, तस्मान्निर्मिता इत्युच्यन्ते[5] । निरूढा इत्यर्थ: । च-शब्दात् निर्मिताश्च सौम्याश्च । द्विश्चकारकरणात् तृतीय: कल्प: । न च सौम्या:, न च निर्मिता: । इष्टकासंस्कारार्थ: [6]प्राजापत्यो वायव्यो[6] वा सोमाङ्गत्वान् निरूढो न भवति । सोमाद् वहि: स्वप्रधान:[7] क्रियते, तस्मात् सौम्यो न भवति ॥ ३ ॥

[निरूढस्य पशोरैन्द्राग्नत्वविधानम्]

निर्मित ऐन्द्राग्न: ॥ ४ ॥

निर्मितो निरूढश्चोद्यमान ऐन्द्राग्नो भवति । यथा अशक्तौ पशुना (आश्रौ २, २०, ५) इति । अत्र अविशेषचोदनया[8] य: कश्चित् पशुरिति प्राप्ते निर्मित [9]ऐन्द्राग्न इत्युच्यते[9] ॥ ४ ॥

[ऐन्द्राग्नस्य पशो: षट्सु षट्सु मासेषु संवत्सरे संवत्सरे वा क्रियमाणत्वकथनम्]

षाण्मास्य: सांवत्सरो वा ॥ ५ ॥

ऐन्द्राग्न: इति वर्तते । ऐन्द्राग्न: पशु: षाण्मास्यो[10] भवति । षट्सु षट्सु मासेषु क्रियमाण: षाण्मास्यो[11] भवति । षाण्मास्य:[12] पशुरैन्द्राग्न एव भवति । सौर्य: प्राजापत्यो वा (काश्रौ ६, ३, २६) इत्यन्येषाम् । सांवत्सरो वा । संवत्सरे संवत्सरे क्रियमाण: सांवत्सरो भवति । सांवत्सरो वा ऐन्द्राग्नो भवति विकल्प: । [13]सौर्य: प्राजापत्यो[13] वा इत्यन्येषाम् । नित्योऽयं भवति । अन्ये पशव: कामान्निर्मिताद् वा भवन्ति । विरूपान् निर्मिताद् वा भवन्ति । यस्य त्रिपुरुषा: सोमं न पिबन्ति, स व्रात्यो भवति । स ऐन्द्राग्नेन पशुना यजते[14] ॥ ५ ॥

१-१. नास्ति ब³ ; पशवो° ब¹'² मै पू । २. नास्ति मूको । ३. तु. देवव्रातभाष्यम् आश्रौ ३, ७, १५ । ४. कामा नि° ब¹ मै ; कामनि° ब² पू । ५. °च्यते मै । ६-६. °पत्यवा° मूको । तु. आपश्रौ १६, ७, १; ८, ३ ; काश्रौ १६, २, ३३ ; ३८ । ७. स्व: प्र° ब¹'² मै पू । ८. विशे° ब³ मै । ९-९. नास्ति ब¹ । १०. ष° मै । ११. ष° ब¹'² मै पू । १२. ष° मूको । १३-१३. प्राजापत्य: सौर्यौ ब¹ । १४. यजेत ब³ मै ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[उपांशुदेवतानां पशूनां कथनं तद्विकारकथनोपक्रमश्च]

प्राजापत्य उपांशु सावित्रसौर्यवैष्णववैश्वकर्मणाश्चैकेषां[1] तत्रोपांशुयाजविकारान् वक्ष्यामः ॥ ६ ॥

प्राजापत्यः[2] पशुः उपांशु[3] भवति । उपांशुदेवतो[4] भवतीत्यर्थः[5] । सावित्रसौर्यवैष्णववैश्वकर्मणाश्च[6] पशव उपांशुदेवता भवन्ति अन्येषां शाखिनाम् । अन्येषामुच्चैर्विकल्पः तत्रोपांशुयाजविकारान् वक्ष्यामः[7] । तत्र तेषु उपांशुपशुषु । उपांशु इज्यन्ते उपांशुयाजाः । उपांशुयाजानां विकारा उपांशुयाजविकारास्ते वक्ष्यन्ते ॥ ६ ॥

होतृकर्मणि[8] ये विकारास्ते उक्ताः[9] पौर्णमासे । इदानीं मैत्रावरुणकर्मणि प्रैषेषु ये विकारास्ते वक्ष्यन्ते ।

[प्रैषादेरागुरधर्मत्वकथनम्]

प्रैषादिरागुरस्थाने ॥ ७ ॥

प्रैषादिः होता यक्षत् इति । आगुरस्थाने[10] । आगुरस्थान[11] इति वचनादुपांशुयाजेषु आगुरः [12]ये धर्माः[12] उक्ताः आगूरुच्चैः इति, प्राणसन्तानश्च [13]य उक्तः† तथा आगूर्वषट्कारौ याज्यायाः (आश्रौ २, १५, १५) इति, ते धर्माः प्रैषादेरपि भवन्ति । होता यक्षत् इत्युच्चैः प्राणसन्तानश्च[13] भवति परेण देवतापदेन सह ॥ ७ ॥

[आददादीनां यथास्थानमुपांशुप्रयोगविधानम्]

आदद्घसत् करदिति चैतानि यथास्थानमुपांशु ॥ ८ ॥

आददादीनामुपांशुवचनादुच्चैः प्राप्तः प्रैषादेरुच्चैर्विधानाद् देवतादेश उपांशु भवति । [14]अर्थान्निर्वचने (?) इतिवदित्युक्तम्[14] । आदत् घसत् करद् इत्येतानि च इत्येवमादीनि च पदानि । [15]यथास्थानं यस्मिन् यस्मिन्[15] प्रैषे

---

१. °श्चैतेषां Bl. आन ; नास्ति ब[१-३] मै पू । २. प्राजापत्य उपांशुः । प्राजा° मै । ३. उपांशुः ब[२] । ४. °ता मूको । ५. भवन्तीत्यर्थः ब[३] । ६. °णाश्चैतेषां ब[३] । ७. नास्ति ब[१,२] मै पू । ८. होत्रक° ब[१-१] पू । ९. तु. आश्रौ १, ५, २५ ; २, १५, १२ ; १६ (?) । १०. °रः स्थाने ब[१] । ११. °रः स्थाने ब[१,१] । १२-१२. प्रैषधर्माः ब[२] । १३-१३. नास्ति ब[३] । †. तु. आश्रौ २, १५, १२ ; १४ । १४-१४. अर्थात्त्रिवचन (°नम् मै) इति यदित्युक्तम् ब[१,२] मै पू । १५-१५. स्थानं यस्मिन् ब[१] ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

पशुयागाः

Digitized by Madhuban Trust

भवन्ति तद् यथास्थानम् उपांशु भवन्ति[1] एतानि। उपांशुयाजेषु याज्यानुवाक्याना-मुपांशुत्वात् तत्सम्बन्धत्वात्[2] तदर्थाः प्रैषा अप्युपांशु। आदत् घसत् करदित्येवमादीनाम् उपांशुवचनात्[3] प्रैषा उच्चैर्भवन्ति। तत्र आददादीनि च उपांशिवति लघुना सिद्धे त्रीणि पदानि गृहीतानि आदत् घसत् करदिति। एतेषां ग्रहणे प्रयोजनम्—एतानि त्रीणि पदानि उपांश्वेव भवन्ति। उत्तराणि[4] चत्वारि पदानि उपांशु वा भवन्ति उच्चैर्वा। कथं जुषताम्[5] इत्येतत् पदं त्रिषु पुनः प्रैषेषु उपांश्वेव भवति। [6]वनस्पतौ स्विष्टकृति[6] उच्चैः। अघत् अग्रभीत् अवीवृधतेति त्रीणि सूक्तवाकप्रैषे[7] भवन्ति। तानि उपांशुदेवतायामुपांशु भवन्ति। यदा उपांशूच्चैश्च देवताः मिश्रिता भवन्ति तदा एते शब्दा उच्चैरेव। येऽन्ये तद्वचनाः परोक्षास्तानुपांशूच्चैर्वा (आश्रौ १, ३, १५) इति। इयं[8] व्यवस्थितविभाषा[9] कथ्यते। असाधारणानि पदानि उपांश्वेव। साधारणान्युच्चैः। च-शब्दोऽधिकारसमुच्चयार्थः। उपांशुयाजविकाराः वक्ष्यमाणा इत्यधिकृतम्। केचिद् विकारा इति। प्रैषादिरागुरस्थाने (आश्रौ ३, ८, ७) इत्येको विकारः, आगुरादि ऋच[10] उपांशु इति एते च विकाराः। एतानि यदि नोच्यन्ते, यान्येव त्रीणि पदानि गृहीतानि, तान्येव उपांशु भवन्ति। एतानीति[11] वचनादेतानि[12] यथा समाम्नातानि सर्वाण्युपांशु भवन्ति। यथास्थानम् इत्यनुच्यमाने[13] हविःप्रैषे यो जुषतां-शब्दः, [14]स एवोपांशु स्यात्। तथा अनुक्रमेणाम्नातत्वाद् वपाप्रैषेषु पुरोळाशप्रैषेषु यो जुषतां-शब्दः[14], तस्योपांशुत्वं न प्राप्नोति। यथास्थानवचनात्तु यथैतेषां[15] स्थानं यत्र यत्रैते आम्नाताः, ते तत्र उपांशु भवन्ति। उपांशुयाजविकारान् वक्ष्यामः (आश्रौ ३, ८, ६) इत्युक्तम्। [16]वनस्पतिः स्विष्टकृच्च[16] उपांशुयाजौ न भवतः। तस्मात् तयोः प्रैषयोः यो[17] जुषतां-शब्दः स[18] उच्चैर्भवति॥ ८॥

॥ [इति] तृतीयस्य [19]अष्टमं खण्डम्[19] ॥

---

१. भवति ब[3] मै। २. संबन्धत्वात् ब[1] मै। ३. °नाः ब[1,2] पू। ४. तु. आश्रौ ३, ४, १५। ५. जुषेताम् ब[3]। ६-६. तु. खि ५, ७, २, ८; १०। ७. तु. खि ५, ७, ४, १५। ८. इदं ब[3]। ९. °स्थिता विभाषा ब[2]। १०. च ब[3]। ११. नास्ति ब[2]। १२. °नादेव तानि ब[2]। १३. इत्युच्यमाने ब[3]। १४-१४. नास्ति ब[1]। १५. यथेतेषां ब[1,2] मै पू; याज्यान्येषां ब[3]। १६-१६. °ति स्विष्ट° मूको। १७. नास्ति ब[ ]। १८. नास्ति ब[3]। १९-१९. अष्टमः खण्डः मै।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ तृतीयेऽध्याये नवमः खण्डः

[सौत्रामण्यधिकारप्रवर्तनम्]

सौत्रामण्याम् ॥ १ ॥

इन्द्रः सुत्रामा देवता यस्यां क्रियायां प्रधाना सा सौत्रामणी क्रिया तस्याम् । सौत्रामण्याम् [1]इति अधिकारसूत्रम् । यदित ऊर्ध्वं वक्ष्यामस्तत् सौत्रामण्यां[1] विधानम् । संज्ञा चेयं[2] [3]संव्यवहाराद् विधिज्ञाने[3] धर्मः ॥ १ ॥

[आश्विनादिपशूनामैन्द्रादिपुरोडाशकथनम्]

आश्विनसारस्वतैन्द्राः पशवो बार्हस्पत्यो वा चतुर्थः । ऐन्द्रसावित्रवारुणाः पशुपुरोळाशाः ॥ २ ॥

आश्विनश्च सारस्वतश्च ऐन्द्रश्च एते त्रयः पशवो भवन्ति [4]सौत्रामण्याम् । ते व्याख्याताः[4] । सारस्वत इति सरस्वतीदेवताग्रहणेषु दर्शनात् । पशवश्च सुराग्रहाश्च समानदेवत्याः । बार्हस्पत्यो वा चतुर्थः । बार्हस्पत्यः[5] पशुर्भवति[6] चतुर्थः । सोमवामिनो[7] यजमानस्य भवति काम्यश्च[8] । चतुर्थग्रहणे अक्रियमाणे विकल्पः स्यात्, बार्हस्पत्यो वा स्यात्, पूर्वोक्ता वा त्रय इति । ऐन्द्रसावित्रवारुणाः पशुपुरोळाशाः । ऐन्द्रश्च सावित्रश्च वारुणश्च ऐन्द्रसावित्रवारुणाः । एते अन्यदेवत्याः[9] पशुपुरोळाशा भवन्ति । अन्यदेवत्यैरपि[10] पशुदेवता वर्धते (आश्रौ ३, ४, १२) इत्युक्तम् । नानादेवत्याः पशवश्च पुरोळाशाश्च भवन्ति समृद्ध्यै (तैब्रा १, ८, ६, २) इति श्रुतिः[11] । केचिदाहुः—ते पुरोळाशा एव [12]न पशुपुरोळाशा[12] इति । इष्टिवदनुब्रूहि यजेति[13] प्रेष्येति[14] । नैतेषां पशूनां पुरोळाशा भवन्ति । ग्रहपुरोळाशा[15] ह्येते (तैब्रा १, ८, ६, १) इति श्रुतिः । तस्याः श्रुतेः

१-१. नास्ति ब[3] । २. सा चेयं ब[1,2] मै पू । ३-३. न व्यवहाराद् विज्ञाने मै ; °हाराद् विन्योने ब[3] । ४-४. °मण्या ते व्या° ब[1] । ५. °त्याः ब[3] । ६. पशवो भ° ब[1-3] ; पशुर्न भ° मै । ७. सोमकाम (°मि मै) को ब[2] मै ; सौमको ब[4] ; तु. काश्रौ १९, १, १-२ । ८. काम्यस्य ब[1,2] मै पू ; कामस्य ब[1] । ९. °ताः ब[1] । १०. °दैव° ब[3] । ११. नास्ति ब[1,2] मै पू । १२-१२. तत्पशुपु° ब[1] ; पशुपु° ब[1] । १३. यजति ब[1,2] पू । १४. प्रेष्य ब[1,2] मै पू । १५. ते पुरो° ब[2] पू ; तदह पुरो° ब[1] ; नेह पुरोळाशो ब[3] ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

सौत्रामणी

Digitized by Madhuban Trust

अर्थमुपदिशन्ति[1] एतेषां पशूनां पुरोळाशा एव भवन्ति, ग्रहाश्च पुरोळाशाश्च भवन्तीति[2]। पशुपुरोळाशा इति वचनादिष्टिवत्संप्रैषे[3] सति प्रैषा वक्तव्याः। यदि नोच्यन्ते, सूक्तवाकप्रैषे पुरोळाशनिगमाः सर्वे वक्तव्या भवन्ति[4] ॥ २ ॥

[पुरोडाशस्थानीयानां सुराग्रहाणां क्रमेणानुवाक्याप्रैषयाज्याकथनम्]

मार्जयित्वा युवं सुराममश्विनेति ग्रहाणां पुरोऽनुवाक्या, होता यक्षदश्विना सरस्वतीमिन्द्रं सुत्रामाणं सोमानां सुराम्णां जुषन्तां व्यन्तु पिबन्तु मदन्तु सोमान् सुराम्णो होतर्यजेति प्रैषः, पुत्रमिव पितरावश्विनोभेति याज्या ॥ ३ ॥

मार्जयित्वा हुतासु वपासु सुराग्रहैः प्रचरन्ति। पुरोळाशानां स्थाने ग्रहाः पुरोळाशस्थानमापन्नाः पशुभिः समानदेवत्वमिति। युवं सुराममश्विना (ऋ १०, १३१, ४) इति ग्रहाणां पुरोऽनुवाक्या[5]। होता यक्षदश्विना इति यथासमाम्नातः प्रैषः। पुत्रमिव पितरावश्विनोभा (ऋ १०, १३१, ५) इति याज्या ॥ ३ ॥

[सविकल्पमनुवषट्कारकथनं सुरासोमयोः समन्वकमवेक्षणविधानं च]

अग्ने वीहीत्यनुवषट्कारः सुरासुतस्याग्ने वीहीति वा। नाना हि वां देवहितं सदस्कृतं मा संसृक्षाथां परमे व्योमनि। सुरा त्वमसि शुष्मिणीति सुरामवेक्ष्याधो बाहू सोम एष इति सोमम् ॥ ४ ॥

अग्ने वीहि (ऐब्रा १, २२) इत्यनुवषट्कारः। सुरासुतस्याग्ने वीहि इति वा अनुवषट्कारः। नाना हि वाम् (तु. मासं १९, ७) इति यथासमाम्नातेन मन्त्रेण ग्रहस्थां सुराम् अवेक्ष्य [6]अधो बाहू[6] कृत्वा सोम एष इत्यनेन मन्त्रेण सुरायामन्तर्भूतं सोमम् अवेक्षते। सर्वत्रैवंभूतः (आश्रौ १, १, २५) इति वचनात् संहितौ पाणी धारयन्[7] सुरामवेक्ष्य विस्रस्य पाणी अधस्ताद् बाहू करोतीति न्यञ्चौ हस्तौ करोति[8]। ततः सोमः सुरान्तर्भूतः। तत् कृत्वा सोम एष इति सोममवेक्षते। [9]तस्मात् सुरायामन्तर्भूतो यः सोमस्तमवेक्षते[9]। तथा हि श्रुतिः— यो ह वाव सोमपीथः सुरायां प्रविष्टः (ऐब्रा ८, २०) इति। मन्त्रेऽपि दृश्यते—

---

१६. अर्थमपादि° ब[1,2] मै पू। २. °न्ति ब[1] पू। ३. °वत्सप्रैषे ब[1]। ४. इति ब[1] मै पू। ५. अनुवाक्या ब[1,2] मै पू। ६-६. अधोबाहुत्वं ब[2]। ७. तु. आश्रौ १, १, २३। ८. करोति। तम (मृ ब[2]) न्त (त ब[2]) भूं (भू ब[2]) तं क्रियते मूको (प्रमादापतित एष पाठः ?)। ९-९. नास्ति ब[2]।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सोमानां सुराम्णां सुरासुतस्येति च[1] । अस्मात्तु[2] वचनाद् भक्ष्यः । यद्यपि ते न भक्षयन्ति । ब्राह्मणं परिक्रीणीयादुच्छेषणस्य पातारम् (तैब्रा १, ८, ६, २; आपश्रौ १९, ३, ३) इति [3]तेषामेव वचनम्[3] ॥ ४ ॥

[समन्त्रकं सोमभक्षणविधानम्]

यदत्र शिष्टं[4] रसिनः सुतस्य यदिन्द्रो अपिबच्छचीभिः । इदं तदस्य मनसा शिवेन सोमं राजानमिह भक्षयामीति भक्षजपः ॥ ५ ॥

यदत्र शिष्टम् (तु. मासं १९, ३५) इति यथासमाम्नातो[5] भक्षजपः । सोमं राजानमिह भक्षयामि (मासं १९, ३४) इति मन्त्रलिङ्गात् सोमस्य भक्षो न सुरायाः । भक्षजपो भक्षमन्त्रः ॥ ५ ॥

[नासिकासंयोगमात्रमत्र भक्षणमिति विधानम्]

प्राणभक्षोऽत्र ॥ ६ ॥

अत्र प्राणभक्षो भवति न प्रत्यक्षभक्षः । प्रतिवषट्कारं भक्षणं भवति, सोमभक्षत्वाद् । अत्रेति वचनाद् [6]अन्यत्र भक्षः प्रत्यक्षभक्ष[6] एव न नासिकासंयोगेन । ग्रहैः प्रचर्य यदि बार्हस्पत्यः पशुर्भवति, तस्य पुरोळाशेन प्रचरन्ति । ततोऽनन्तरं मनोतादिभिश्चरन्ति । [7]हविर्भिः प्रचर्य पुरोळाशैः प्रचरन्ति[7] [8]पुरोडाशैः प्रचर्य† वनस्पतिस्विष्टकृतेन चरन्ति[8] । तत इहानुयाजादि[9] पशुकर्म [10]समानम् आ प्रायश्चित्त-होमात्[10] संस्थाजपमवशिष्य[11] तीर्थेन निष्क्रम्यावभृथं व्रजन्ति । तत्रावभृथेष्टिः कृताऽकृता[12] । [13]ततोऽवभृथं कर्म[13] समाप्य हृदयशूलादि समानम् आ संस्थाजपे-नोपस्थाय[14] तीर्थेन[15] निष्क्रम्यानियमः (तु. आश्रौ १, ११, १४) । सन्तिष्ठते सौत्रामणी ।

---

१. नास्ति ब[1] पू । २. कस्मात्तु ब[1,2] मै पू । ३-३. तेषामे (°म ब[2,3]; °त्र मै) वचनम् मूको । ४. रिप्रं मासं १९, ३५ BI. । ५. °समाम्नाये मूको । ६-६. अत्र भक्षस्तस्यैव भक्षः मूको । ७-७. नास्ति मै । ८-८. नास्ति मै । †. प्रचरित्वा ब[1,3] पू ; प्रचरित्वा च ब[2] । ९. इहानू° ब[3] मै । १०-१०. समानप्रायश्चित्तहोमोऽत्र मै ; समानाप्रा° ब[3] । ११. °शिष्ट्वा मूको । १२. कृता (°तां ब[2]) मूको । १३-१३. °भृथकर्म ब[1,2] मै । १४. °नोपस्थाय इत आरभ्य ३, १, १ सूत्रीयभाष्यघटक—इष्टिः क्रियते इति पर्यन्तः पाठो नास्ति ब[4] । १५. र्थेन ब[4] ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

सौत्रामणी

Digitized by Madhuban Trust

समाप्ता हविर्यज्ञसंस्थाः सप्त। अग्न्याधेयम् अग्निहोत्रं दर्शपौर्णमासावाग्रयणं चातुर्मास्यानि पशुबन्धः सौत्रामणी [? चेति] बौधायनीये[1] प्रवचने सप्त समाम्नाताः ।

इदानीं हविर्यज्ञप्रायश्चित्तानि वक्तव्यानि। कृत्स्नान्यपि अप्रायश्चित्तानि कर्माणि उक्तानि कृत्स्नानि न[2] भवन्ति [3]तत्संस्कारार्थत्वात् तद् विकर्म समृद्धं क्रियते प्रायश्चित्तकर्मणा । तस्मात् तानि प्रायश्चित्तानि वक्ष्यन्ते[3] उत्तरैः पञ्चभिः खण्डैः ॥ ६ ॥

॥ [इति] तृतीयस्य नवमं[4] खण्डम्[5] ॥

---

१. बोधायने ब[1] । २. नास्ति ब[1,2] । ३-३. नास्ति ब[4] ।
४. एकादशं ब[3,4] ; नवमः मै । ५. खण्डः मै ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ तृतीयेऽध्याये दशमः खण्डः

[अग्न्याधेयादिकर्मसु विधिभ्रंशे प्रायश्चित्तविधानम्]

विध्यपराधे प्रायश्चित्तिः ॥ १ ॥

समाम्नातमग्न्याधेयादि कर्म[1] । द्रव्यमन्त्रक्रियासमुच्चितं[2] कर्म विधिरुच्यते । तस्य विधेरयथाकरणम् अकरणं वा[3] अपराधः । विधेरपराधो विध्यपराधः । तस्मिन् विध्यपराधे उत्पन्ने प्रायश्चित्तं नाम कर्म क्रियते दोषनिर्हरणार्थम्[4], इत्येतदधिकृतं वेदितव्यम् इत[5] उत्तरं यद् वक्ष्यामः पञ्चभिः खण्डैः । अन्वाहिताग्नेः प्रयाणोपपत्तौ (आश्रौ ३, १०, ३) इत्येवमादिषु[6] अमुष्मिन् कर्मणि इदं प्रायश्चित्तमिति वक्ष्यति । तेनैव सिद्धे इदं सूत्रं न वक्तव्यम् । वक्तव्यम्, असमानार्थम् । विध्यपराधे प्रायश्चित्तिरिति वचनात् प्रायश्चित्तं कर्तव्यमेव[7] । यद्यपि आम्नातं न विद्यते, अविद्यमाने आम्नाये श्रुत्यन्तरादागमयितव्यम् । [8]तथाप्यविद्यमाने †अविज्ञाते प्रायश्चित्तं कर्तव्यम्[8] । अविज्ञाते भूर्भुवः स्वरित्याहवनीय एव[9] इति ॥ १ ॥

[निर्दिष्टद्रव्याभावे तत्प्रतिनिधिद्रव्यविधानम्]

शिष्टाऽभावे प्रतिनिधिः ॥ २ ॥

शिष्टस्य निर्दिष्टस्य चोदितस्य व्रीह्यादिद्रव्यस्य कर्मणि प्रयुक्तस्य तस्मिन् व्यापन्ने तदेव पुनरानेतव्यम्[10] । तस्य चेत् पुनरभावो भवति, व्रीहयो न विद्यन्ते । ततस्तत्सरूपमन्यद्[11] द्रव्यमारब्धव्यम्[12] । नीवारद्रव्यं प्रतिनिधिर्भवति । तत् प्रतिनिधाय तत् कर्म समापयितव्यम् । द्रव्याभावे प्रायश्चित्तं न हूयते, [13]प्रतिनिधिरेव भवति । व्रीह्यभावे विद्यमाना‡ अपि यवाः श्रौता न प्रतिनिधीयन्ते । यदि कृते प्रतिनिधौ व्रीहय उपलभ्यन्ते, प्रतिनिधिना ϕएव तत्ϕ समापयितव्यम्[13] ।

---

१. कर्माणि मं । २. °च्चितं तत् ब[3,4] ; °चितं ब[1,6] मं पू । ३. च ब[6] ।
४. °निबर्हणार्थम् ब[3,4] । ५. उत्तरम् ब[2] । ६. इत्यादिषु मं ; °मादि ब[3,4] ।
७. °व्यमिति च ब[2]; एव ब[4] । ८-८. नास्ति ब[4] । †. °ज्ञातं ब[1] ; °ज्ञात ब[6] मं पू ।
९. तु. आश्रौ १. १२, ३३ । १०. °रानयितव्यम् ब[1,2,6] मं पू । ११. तत्तत्स्वरू° ब[1,4] ।
१२. °रब्ध्य (°ब्धुं ब[3,4]) ब[1,3,4] । १३-१३. नास्ति ब[1] । ‡. विधीयमानाः ब[1,4] ।
ϕ-ϕ. एतत् ब[3,4] ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

प्रायश्चित्तानि

Digitized by Madhuban Trust

सोमेऽनुपलब्धे पूतीकादिः प्रतिनिधिर्भवति (तु. काठ ३४, ३ ; शब्रा ४, ५, १०, २-६ ; तांब्रा ९, ५, ३) इति श्रुतिः। येषां तु प्रतिषेधः श्रूयते, सरूपाण्यपि तानि न प्रतिनिधीयन्ते । यथा—नोष्ट्रीक्षीरेण जुहुयात् (तु. आपध १, १७, २३), अयाज्ञिका वै [1]माषा वरकाः कोद्रवाश्च[1] इति। सरूपसामान्याभावे[2] कार्यसामान्यात् प्रतिनिधिः। नीवाराभावे प्रियङ्ग्वादीनामपि पिण्डाः पुरोळाशकार्ये समाना भवन्ति। सर्पिषोऽभावे [3]पयसा दध्ना वा तत्कार्यं[3] क्रियते। यूपाञ्जनं तु तैलेनापि[4] क्रियते। स्वाम्यग्नि-देवता-शब्द[5]-कर्म-दिग्देश-कालेषु प्रतिनिधिर्निवृत्तः[6] । काम्यं कर्म विगुणमफलं[7] भवति। तस्मात् प्रतिनिधिना समाप्य पुनर्यजेत्[8]। [9]विगुणमपि नित्यं फलाय भवति, तस्मात् प्रतिनिधिना समाप्य न† पुनर्यजेत्[9]। यवानां सरूपा गोधूमाः, व्रीहीणां सरूपा नीवाराः, खदिरस्य सरूपो बदरः[10], पलाशस्य तिनिशः, प्लक्षस्य जम्बूः इत्यनेन कार्यतो रूपतश्च [11]सामान्यात् प्रतिनिधिः कर्तव्यः[11] ॥ २ ॥

[अन्वाहिताग्नेर्भयादिना गमनेऽग्नीनां पृथङ्नयनविधानम्]

अन्वाहिताग्नेः प्रयाणोपपत्तौ पृथगग्नीन् नयेयुः ॥ ३ ॥

अन्वाधानं कृतं येषामग्नीनां ते अन्वाहिता अग्नयो यस्य सः अन्वाहिताग्निः। तस्य अन्वाहिताग्नेर्यजमानस्य प्रयाणं गमनं चेत् भयादुपपद्यते[12] तस्यां[13] प्रयाणोपपत्तौ पृथगग्नीन्नयेयुः। पृथग्ग्रहणं द्वित्रिभेदार्थम्। एकस्यानेकाग्निनयनं मा भूत् ॥ ३ ॥

[समन्त्रकमाज्याहुतिं हुत्वाऽग्नीनां पृथक्समारोपणविकल्पः]

तुभ्यं ता अङ्गिरस्तमेति वाऽऽज्याहुतिं हुत्वा समारोपयेत् ॥ ४ ॥

तुभ्यं ता अङ्गिरस्तम (ऋ ८, ४३, १८) इत्येतयर्चा वा आहवनीये आज्याहुतिं हुत्वा पृथगग्नीन्[14] समारोपयेत्। ब्रह्मा आज्याहुतिं[15] जुहोति। अध्वर्युर्यजमानो वा समारोपयेत्। अग्निहोमाधिकारादाज्यग्रहणम्। वक्ष्यमाणेन

१-१. माषा वरटा कोद्रव्या (°वा ब^{1}) श्च ब^{1,6} पू ; माषचरटकोद्रवाश्च ब^{2} ; माषा वर (वरर मै) कोद्रवाश्च ब^{1,4} मै। तु. वैश्रौ ११, ११ : ९। २. रूपसा° ब$^{1-3,6}$ मै पू। ३-३. दध्ना पयसा वा कार्यं ब^{3,4}। ४. तैलेन ब$^{1-3,6}$ पू।
५. °शब्दः मूको। ६. °वृत्तिः ब^{1,4}। तु. काश्रौ १, ६, ६। ७. विगुणफलं ब^{3} ; फलं ब^{4}। ८. पुनर्यागः ब^{3,4}। ९-९. नास्ति ब$^{2-4}$। †. नास्ति मै।
१०. वटः ब^{1,4}। ११-११. सामान्याः प्रतिनिधयः कर्तव्याः मै।
१२. समयादुप° ब^{3,4} ; उभयादुप° ब^{1,6}। १३. तस्मिन् मूको।
१४. नास्ति ब^{1,4}। १५. °हुतीः मै ; °हुतिः ब^{1,2,6} पू।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

विधानेन विकल्पोऽयम् । पृथगग्नीन्नयेयुः । आज्याहुतिं हुत्वा समारोपयेत् । अव्यक्तहोमत्वाद् आहवनीये होमो भवति ॥ ४ ॥

इदानीं समारोपणविधानं वक्ष्यते—

[गार्हपत्येऽग्नौ समन्त्रकमरणीप्रतपनम्]

अयं ते योनिर्ऋत्विय इत्यरणी गार्हपत्ये प्रतितपेत् ॥ ५ ॥

अयं ते योनिर्ऋत्वियः (ऋ ३, २९, १०) इत्येतयर्चा अरणी अधरारणी च उत्तरारणी च अरणी गार्हपत्येऽग्नौ प्रतितपेदध्वर्युर्यजमानो[1] वा । एतेनैव मन्त्रेण दक्षिणाग्नौ समारोपयेत्, [2]अथाहवनीये† । आहवनीयाधिकाराद् गार्हपत्यग्रहणम्‡ । गार्हपत्यादिष्वनुक्रमेणφ सर्वेषु समारोपयेत्[2] । विकृतावपि सर्वेषु[3] समारोपणं दर्शयति—अग्नीनस्य समारोप्य (आश्रौ ६, १०, ८) इति । पृथगरणीष्वग्नीन् समारोप्य (तु. आपश्रौ ६, २८, ८) इत्यन्येषाम् । सर्वेष्वग्निषु द्वाभ्यामेव अरणीभ्यां समारोपणमन्येषाम् । अस्माकं तु अन्वाहितेष्वजस्रेषु च न[3] ॥ ५ ॥

[यजमानस्य पाण्योः समन्त्रकप्रतपनविकल्पः]

पाणी वा या ते अग्ने यज्ञिया तनूस्तयेह्यारोहाऽऽत्माऽऽत्मानमच्छा वसूनि कृण्वन्नर्या पुरूणि यज्ञो भूत्वा यज्ञमासीद योनिं जातवेदो भुव आजायमान इति ॥ ६ ॥

आज्याहुतिं हुत्वा पाणी वा गार्हपत्ये प्रतितपेद् यजमानः या ते अग्ने (तु. तैब्रा २, ५, ८, ९) इत्येतेन मन्त्रेण । [4]पाणिश्च पाणिश्च[4] पाणी प्रतितपेत्, अरणी वेति विकल्पः । यजमान एव प्रतितपेद् मन्त्रलिङ्गाद् आत्माऽऽत्मानमच्छा (तैब्रा २, ५, ८, ८) इति ॥ ६ ॥

[अनन्वाहिताग्नेर्यजमानस्यापि प्रयाणोपपत्तौ होमरहितः पूर्वोक्त एव विधिः]

एवमनन्वाहिताग्निरहुत्वा ॥ ७ ॥

एवम् अनेनैव अन्वाहिताग्निविधिना[5] अनन्वाहिताग्निः यस्य अन्वाहिता[6] अग्नयो न भवन्ति[7], सः अनन्वाहिताग्निरपि प्रयाणोपपत्तौ पृथगग्नीन् नयेत्[8] ।

---

१. प्रतितापयेद° ब[3,4] । २-२. नास्ति मै । †. यद्याहव° ब[3,4] ।
‡. नास्ति पू । φ. °त्यादि अनुक्रमेषु ब[1,2,6] पू ; °त्यादिष्वनुक्रमेषु ब[1,4] ।
३. नास्ति ब[4] । ४-४. नास्ति ब[1] । ५. नास्ति ब[1] । ६. आहिता ब[1] ।
७. विद्यते ब[3,4] । ८. नयेयुः मूको ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

प्रायश्चित्तानि

Digitized by Madhuban Trust

आज्याहुतिमहुत्वा[१] वा समारोपयेत्, अरण्योः पाण्योर्वा यथोक्तम्[२]। एवमनन्वाहिताग्निरिति कृत्स्ने विधौ प्राप्ते आज्याहुतिप्रतिषेधः अहुत्वेति। अन्वाहिताग्नेः प्रयाणे उक्तो विधिस्तस्यैव स्यात्। तस्मादनन्वाहिताग्नेरपि प्रयाणे प्राप्त्यर्थोऽयमारम्भः ॥ ७ ॥

[पूर्वं पाण्योः प्रतपने कृतेऽरणी संस्पृश्य मन्त्रेणाग्निं मन्थयेत्]

यदि पाण्योररणी संस्पृश्य मन्थयेत् प्रत्यवरोह जातवेदः पुनस्त्वं देवेभ्यो हव्यं वह नः प्रजानन् प्रजां पुष्टिं रयिमस्मासु धेह्यथा भव यजमानाय शंयोरिति ॥ ८ ॥

अरण्योः समारोपणं पाण्योर्वा इत्युक्तम्[२]। तत्र यदि पाण्योः समारोपणं कृतं भवति, ततो मन्थनकाले[३] [४]अरणी पाणिभ्यां[४] संस्पृश्य मन्थयेत्। प्रत्यवरोह जातवेदः[५] इत्यनेन मन्त्रेण स्पृशेत् ॥ ८ ॥

[अवदीप्यमानस्याऽऽहवनीयाग्नेर्बहिर्गमने शम्यापरासादर्वागेकीकरणविधानम्]

आहवनीयमवदीप्यमानमर्वाक्शम्यापरासादिदं त एकं पर ऊ त एकमिति संवपेत् ॥ ९ ॥

यद्याहवनीयोऽग्निः स्तीर्णबर्हिरवदीप्यमानो गच्छेद् बहिर्गच्छेदित्यर्थः, तमाहवनीयमवदीप्यमानम् अर्वाक् [६]शम्यापरासात्, शम्या[६] शकटलिङ्गं[७] भवति। सा शम्या प्रक्षिप्ता यस्मिन् देशे पतति, स[८] देशः शम्यापरासः। तस्माद् देशादर्वाग् इदं त एकं पर ऊ त एकम् (ऋ १०, ५६, १) [९]इत्येतयर्चा तमग्निं[९] संवपेत्[१०]। संवपनम् एकीकरणम्। सर्वमग्निमाहवनीयमेकीभावं कुर्यात्। आहवनीयग्रहणादन्यस्याग्नेर्न भवति। अर्वाक् शम्यापरासादेतद् विधानम्। तस्माद् अन्यद् वक्ष्यति ॥ ९ ॥

[अग्नेरत्ययनादिष्वपराधेषु पथिकृतीष्टिविधानम्]

यदि त्वतीयाद् यद्यमावास्यां पौर्णमासीं वाऽऽतीयाद् यदि वाऽन्य-

---

१. आहुतिम° मूको। २. तु. आश्रौ ३, १०, ५-६।
३. संधानकाले ब[१,४]। ४-४. अरणीभ्यां ब[१,४]। ५. नास्ति ब[१,२,१] मै पू।
६-६. नास्ति ब[४]। ७. वा काष्ठलिङ्गं ब[३]; शम्यालिङ्गं ब[४]। ८. नास्ति ब[१]।
९-९. इति मै। १०. संवपेत ब[१,१]।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

स्याग्निषु यजेत यदि वाऽस्यान्योऽग्निषु यजेत यदि वाऽस्यान्योऽग्निरग्नीन् व्यवेयाद् यदि वाऽस्याग्निहोत्र उपसन्ने हविषि वा निरुप्ते चक्रीवच्छ्वा पुरुषो वा विहारमन्तरियाद् यदि वाऽध्वे प्रमीयेतेष्टिः ॥ १० ॥

यदि त्वतीयात्। यदि शम्यापरासमग्निरतीयात्, तथा सति इष्टिः पाथिकृती। तां वक्ष्यति[1]। यदि-शब्दः अनित्यभावे[2]। तु-शब्दः अधिकृतव्यावृत्त्यर्थः। यद्यमावास्यां पौर्णमासीं वाऽतीयात्। यदि यजमानः अमावास्यां पौर्णमासीं वा अन्यतरामनिष्ट्वा अतीयाद् अतिगच्छेत्[3]। ततः पाथिकृतीमिष्टिं वक्ष्यति[1]। तामस्मिन्निमित्ते कुर्यात्। अन्यतरातिक्रम एतदुक्तम्। उभयातिक्रमेऽपि एतदेव। वा-शब्दः समुच्चयार्थोऽपि भवति। अमावास्यां पौर्णमासीं चेति। दर्शपौर्णमासाख्यमेकं[4] कर्म। [5]तयोरेतयोर्द्वयोरपि[5] कर्मणोः अतिक्रमे चैतदेव[6] भवति। बहूनामतिक्रमे तु अन्वारम्भणीयामुपदिशन्ति। तथा हि बौधायनीये प्रवचने[7] दृष्टं, तत्र पाथिकृतं कृत्वा अथातिपन्नां यजेत[8] पाथिकृतीमेव कुर्यात्, नातिपन्नां यजेत इत्यपरे। पाथिकृतं वैश्वानरं च समुच्चयेन कुर्याद् इत्यन्येषाम्[7]। यदि-शब्दे अप्रयुज्यमाने यदि त्वतीयात् शम्यापरासमग्निस्ततः अस्मिन्निमित्ते इष्टिम्[9], अमावास्यां पौर्णमासीं वा न[10] कुर्यादित्ययमर्थः स्यात्। [11]यदि वान्यस्याग्निषु यजेत[11]। [12]यदि वा[12] अन्यस्य यजमानस्य अग्निषु विपर्यासेन यजेत अग्निहोत्रं जुहुयाद् इष्टिं वा कुर्यात्। एकस्मिन्नागारे अग्निहोत्रसमवाये विपर्यासो भवति। एतस्मिन्निमित्ते इष्टिं पाथिकृतीं वक्ष्यति। सा कर्तव्या भवति। यदि-शब्दे अप्रयुज्यमाने यद्यमावास्यां पौर्णमासीं वाऽतीयाद् वाऽन्यस्याग्निषु यजेतेत्ययमर्थः स्यात्। यदि-शब्दे तु प्रयुज्यमाने[13] विध्यन्तरं भवति। वा-शब्दः समुच्चयार्थः। एतस्मिश्च निमित्ते पाथिकृती वक्ष्यमाणा[14] भवति। [15]यदि वाऽस्याऽन्योऽग्निषु यजेत। यदि वा अस्य यजमानस्य अग्निषु यजते अन्यो यजमानः, †तदापीष्टिः पाथिकृती वक्ष्यमाणा भवति[15]। [16]यदि-शब्दस्य प्रयोजनमेवोक्तं[16] वा-शब्दस्य[17] समुच्चयोऽर्थ[18] इति। एकस्मिन्नागारे अग्निहोत्रसमवाये सति विपर्यासो भवति। अस्येत्यनुच्यमाने अस्याग्नयो न संबध्यन्ते। यदि वाऽस्याऽन्योऽग्निरग्नीन् व्यवेयात्।

---

१. तु. आश्री ३, १०, ११; १२। २. अतीत्यभावे ब[1,4]। ३. °गच्छेद् यजमानः मै। ४. दर्शपूर्ण° ब[6] मै; दर्शपूर्णमासिकं ब[3]। ५-५. तयोर्द्वयोरपि मै। ६. च तदेव ब[1,2,6] मै पू। ७-७. तु. बौश्री २३, १। ८. यजेत् ब[3,4]। ९. नास्ति ब[2-4]; इष्टिः मै। १०. म ब[1]; स मै। ११-११. नास्ति मै। १२-१२. नास्ति मूको। १३. अप्र° ब[4]। १४. नास्ति ब[2-4]। १५-१५. नास्ति ब[1,6] मै पू। †. तदपीष्टिः ब[2-4]। १६-१६. यदि वा शब्दस्य प्रयोजनमन्त्रोक्तं (°मन्त्रं ब[4]) ब[3,4]। १७. चशब्दस्य ब[3,4]; वाशब्दः मै। १८. °च्चयार्थः मूको।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

प्रायश्चित्त-वृत्ति

Digitized by Madhuban Trust

यदि वा[1] अस्य यजमानस्य अग्नीन् अन्योऽग्निर्लौकिको व्यवेयाद् अन्तरेण गच्छेत्, [2]तत एतस्मिन्निमित्ते[2] पाथिकृती इष्टिः[3]। सा वक्ष्यते। इतः [4]प्रभृतिषु योगेषु[4] यदि-शब्दश्चेन्न[5] प्रयुज्यते, ततः असमर्थो[6] भवति, अग्न्यादिभिश्चेद् व्यवायो भवति अध्वगतो[7] यजमानो म्रियेत इत्ययमर्थः[8] स्यात्। अस्येति यदि नोच्यते, अस्याग्नयो न संबध्यन्ते। अन्यथा [9]अस्य वाऽन्यस्य[9] वाऽग्निना[10] अन्तरेण व्यवायेऽपि प्रायश्चित्तं स्यात्। यदि वाऽस्याऽग्निहोत्र उपसन्ने। [11]यदि च अस्य यजमानस्य अग्निहोत्रे उपसन्ने[11] आहवनीयसमीपे कुशेषूपसाद्य (आश्रौ २, ३, १५) इति उपसन्ने, हविषि वा निरुप्ते इष्टिहविषो[12] निर्वापे कृते अस्मिन् काले [13]चेत्(?) कृतव्यवायो(?)[13] भवति। चक्रीवच्छ्वा पुरुषो वा विहारमन्तरियात्[14]। पुरुष इत्युक्ते पुरुषः स्त्री वापि भवति जातिग्रहणात्। एतेषां यत् किंचन विहारमन्तरियाद् अन्तरा मध्येन इयाद् गच्छेत्। तत एतेषु निमित्तेषु वक्ष्यमाणा पाथिकृतीष्टिर्भवति। [15]यदि-शब्द उक्तप्रयोजनः[15]। अस्येत्युत्तरसूत्रार्थम्। अध्वे प्रमीयतेत्युक्ते अस्येत्यधिकाराद् यजमानः संबध्यते। अन्यथा न संबध्येत। यदि वाऽध्वे प्रमीयेत। यदि च अध्वे[16] अध्वनि प्रवासे यजमानः प्रमीयेत, ततः अस्मिन् निमित्ते इष्टिर्भवति।

[17]यदि त्वतीयादित्यत आरभ्य यानि निमित्तानि अनुक्रान्तानि, आ एतस्मात् तेषु सर्वेषु इष्टिर्भवति[17]। अनुयोगं वाकारः[18] समुच्चयार्थः कृतः। तस्मात् सर्वेषु निमित्तेषु [19]समाना प्रायश्चित्तेष्टिः[19]। सा वक्ष्यते ॥ १० ॥

[पाथिकृतीष्टिदेवतानिरूपणम्]

अग्निः पथिकृत् ॥ ११ ॥

तस्यामिष्टौ अग्निः[20] पथिकृद् देवता ॥ ११ ॥

---

१. च ब^{1,2} मै पू। २-२. नास्ति ब^{1}; गत एव तस्मिन्नि° ब^{2,6} मै पू। ३. नास्ति ब^{1}। ४-४. प्रचलेतिपु गारेपु ब^{3,4}। ५. यदि वा शब्द° ब^{4}; °ब्दश्चेत् ब^{1}। ६. अयमर्थो ब^{1,3,4,6} मै पू। ७. अथ अध्व° ब^{4}। ८. इत्यर्थः ब^{1,6}। ९-९. अन्यश्चान्यस्य मै; अस्य चान्यस्य ब^{2,6}। १०. चाग्निना ब$^{2-4,6}$ मै। ११-११. नास्ति ब^{3,4}। १२. इष्टिर्हं (°ह ब^{2}) विषां (°षो मै पू) ब$^{2-4}$ मै पू। १३-१३. च कर्तव्यवाये ब^{1}; चेत् कर्तंध्याये ब^{1,4}; °वाये ब^{1,6} पू। १४. नास्ति ब^{1,2,4,6} मै पू। १५-१५. यदिशब्दोक्तप्रयोजनम् ब^{1,2,6} मै पू। १६. नास्ति ब^{3,4}। १७-१७. नास्ति ब^{3,4}। १८. चकारः मूको। १९-१९. समानप्रायश्चित्ते इष्टिः ब^{1,2,6} मै पू; संभवति प्रायश्चित्तेष्टिः ब^{3,4}। २०. नास्ति ब^{1,2,6} मै पू।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[याज्यानुवाक्यादक्षिणानिरूपणम्]

वेत्था हि वेधो अध्वन आ देवानामपि पन्थामगन्मेति । अनड्वान् दक्षिणा ॥ १२ ॥

वेत्था हि वेधो अध्वनः (ऋ ६, १६, ३), आ देवानामपि पन्थामगन्म (ऋ १०, २, ३) इत्यग्नेः पथिकृतो याज्यानुवाक्ये भवतः । अनड्वान् दक्षिणा । 'तस्या इष्टेः अनड्वान् दक्षिणा भवति'[1] । वोढुं समर्थः अनड्वान् भवति, पञ्चवर्षो भवति । अस्या इष्टेः शेषं पौर्णमासेन ।

दोषनिर्हरणार्थं[2] प्रायश्चित्तम् । तच्च[3] अनन्तरं दोषात् कर्तव्यम्[4] । इष्टिस्तु यस्मिन् कर्मणि चोदिता, तत् कर्म परिसमाप्य अन्ते कर्तव्या[5] । कर्ममध्ये न क्रियते '[6]वि वा[6] एतस्य[7] यज्ञश्छिद्यते यस्य तन्त्रे[8] [9]प्रततेऽन्यत् तन्त्रं प्रतायते[9] (बौश्रौ २३, १ : १५) इति श्रुतेः[10] । तस्मादन्ते क्रियते । आ प्रायश्चित्तसमाप्तेस्त एवाग्नयो भवन्ति तत्संस्कारत्वात् प्रायश्चित्तस्य । तदधिकृतं कर्म संस्क्रियते प्रायश्चित्तेन[11] ॥ १२ ॥

[अग्निं वर्जयित्वाऽन्येन व्यवाये प्रायश्चित्तेष्टेः प्राग् विहारमध्येन गोरतिक्रमणविधानम्]

व्यवाये त्वनग्निना प्रागिष्टेर्गामन्तरेणातिक्रमयेत् ॥ १३ ॥

[12]व्यवाये †विशिष्टविधिरुच्यते ‡अनग्निना अग्निव्यवायं वर्जयित्वा‡ अन्येन व्यवाये । अन्यःϕ चक्रीवत् श्वा पुरुषो भवति । तेन व्यवाये प्रागिष्टेः प्राक् प्रायश्चित्तेष्टेः गामन्तरेणातिक्रमयेत्¶[12] । विहारमध्येन[13] गां गमयेद् येन मार्गेण पुरुषादयो गताः । गां गमयित्वा अनन्तरम् इष्टिं कुर्यात् । तु-शब्दोऽधिकृतव्यावृत्त्यर्थः । बहूनि कर्माण्यधिकृतानि । व्यवाये तु विशेष उच्यते, नान्येषु । अनग्निना इति वचनाद् [14]अग्निव्यवाये तु[14] इति [15]वचनं न[15] भवति । नान्यो

१-१. नास्ति ब^{1,1,4,6} । २. °निबर्हणा° ब^{1} । ३. स च ब^{1}; स ब^{2} मै पू; घ ब^{6}; नास्ति ब^{3,4} । ४. कर्तव्यानि ब^{3,4}; कर्तव्यः मै । ५. °व्यम् ब^{1,2,6} पू । ६-६. विविधो वा ब^{1,2,6} मै पू । ७. एव ब^{2} मै । ८. यज्ञे ब^{3,4} । ९-९. प्रततेऽन्तरे तामिष्टिम् ब^{1,4} । १०. श्रुतिः ब$^{2-4}$ । ११. °त्ते मै । १२-१२. नास्ति ब^{1,4} । †. विशेषविधि° ब^{2} पू । ‡-‡. च ज्ञापित्वा ब^{1} पू; ज्ञापित्वा ब^{2}; च ज्ञात्वा ब^{6}; च ज्ञापयित्वा मै । ϕ. नास्ति मूको । ¶. °क्राम° मै पू । १३. गौः गामन्तरेणातिक्रमयेत् विहार° ब$^{2-4,6}$ मै पू । १४-१४. °वायेषु मूको । १५-१५. च ब^{1,2,6} मै पू; वचनं ब^{3,4} ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

विशेषः । प्रागिष्टेरिति वचनादिष्टिश्च भवति, विशेषविधिश्च । प्रागिष्टेरित्यनुच्यमाने[1] इष्टेरपवादः स्यात् ॥ १३ ॥

[शुना व्यवाये प्रायश्चित्तेष्टेः प्राक् शुनः पदमार्गे भस्म विकिरेत्]

भस्मना शुनः पदं प्रतिवपेदिदं विष्णुर्वि चक्रम इति ॥ १४ ॥

प्रागिष्टेरिति वचनात् [2]शुना व्यवाये[2] विशेषविधिरुच्यते । प्रागिष्टेः [3]शुना व्यवाये[3] भस्मना शुनःपदं पदमार्गं प्रतिवपेत् । तस्मिन् मार्गे भस्म विकिरेत् । इदम्[4] (ऋ १, २२, १७) इत्येतयर्चा भस्म विकिरेत् । अस्मिन् कर्मणि न गामन्तरेणातिक्रमयेत् । भस्मना प्रतिवपनमेव । यद्येष [5]समुच्चय इष्टः[5] स्यात्, भस्मना च शुनः पदं प्रतिवपेदिति ब्रूयात् । चकारं समुच्चयार्थं कुर्यात् ॥ १४ ॥

[अनन्तरं गार्हपत्याऽऽहवनीययोरन्तरं भस्मरेखोदकधारया च सन्तानविधानम्]

गार्हपत्याहवनीययोरन्तरं भस्मराज्योदकराज्या च संतनुयात् तन्तुं तन्वन् रजसो भानुमन्विहीति ॥ १५ ॥

भस्मप्रतिवपनं[6] कृत्वा अनन्तरं गार्हपत्याहवनीययोरन्तरम् अन्तरालम्[7] । भस्मराजिः भस्मरेखा । उदकराजिः उदकधारा । [8]उभयोरन्तरं भस्मराज्या उदकराज्या[8] च सन्तनुयात् । गार्हपत्यादारभ्य यावदाहवनीयं प्राप्नोति, तन्तुं तन्वन् रजसो भानुमन्विहि (ऋ १०, ५३, ६) इत्येतयर्चा भस्मराजीं[9] हरेत् । एतेनैव मन्त्रेण उदकधारां हरेत् । प्रतिद्रव्यमावर्तयेत् मन्त्रम्[10] ॥ १५ ॥

[अनन्तरमाहवनीयमुपशमय्य तं गार्हपत्यात् पुनः प्रणीय मन्त्रेणोपतिष्ठेत]

अनुगमयित्वा चाऽऽहवनीयं पुनः प्रणीयोपतिष्ठेत । यदग्ने पूर्वं प्रहितं पदं हि ते सूर्यस्य रश्मीनन्वा ततान । तत्र रयिष्ठामनु संभवैतां सं नः सृज सुमत्या वाजवत्या । त्वमग्ने सप्रथा असीति च ॥ १६ ॥

भस्मराज्या उदकधारया च संतानं कृत्वा[11] अनन्तरम् आहवनीयमग्निम्

---

१. °त्यनूच्य° ब[१-४,६] । २-२. शुनः व्य (वि ब[२] पू) वाये ब[१,२,४,६] पू ; शुनव्यवाये ब[३] ; व्यवाये मै । ३-३. शुनव्यवाये ब[२-४] मै पू । ४. नास्ति ब[१,२,६] मै पू । ५-५. च्चय इष्टिः ब[२] मै पू ; °च्चये ब[१,४] । ६. °तिवापनं ब[१-४,६] । ७. नास्ति ब[३,४] । ८-८. उभयोर्भस्मराज्या मूको । ९. °राजिं मै । १०. मन्त्रऋक् ब[१,२,६] मै पू ; मन्त्रंकृत्वा ब[३,४] ; ऋक् मै । ११. संस्कृत्वा ब[१] ; सकृत्वा ब[६] पू ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अनुगमयेत् उपशमयेत्[1]। अनुगमयित्वाऽऽहवनीयं पुनः प्रणयेत्। आहवनीयं पुनः[2] प्रणीय [3]गार्हपत्यात् प्रणीय उपतिष्ठेत[3] प्रणीतमाहवनीयमुपतिष्ठेत[4] यदग्ने[5] इत्यनेन मन्त्रेण यथासमाम्नातेन। त्वमग्ने सप्रथाः (ऋ ५, १३, ४) इत्येतयर्चा चोपतिष्ठेत। ततः उपस्थानादनन्तरम्[6] इष्टिः पाथिकृती क्रियते। च-शब्दः समुच्चयार्थः। अत्र[7] आहवनीयस्यानुगमनं दृष्ट्वा ब्रूमः—आ प्रायश्चित्तसमाप्तेः त[8] एवाग्नयो भवन्तीति ॥ १६ ॥

[यजमानेऽध्वनि मृतेऽभिवान्यवत्सायाः पयसाऽमन्त्रमग्निहोत्रविधानम्]

अध्वे प्रमीतस्याभिवान्यवत्सायाः पयसाऽग्निहोत्रं तूष्णीं सर्वहुतं जुहुयुरासमवायात् ॥ १७ ॥

अध्वे अध्वनि प्रवासे[9] प्रमीतस्य यजमानस्य। प्रागिष्टेः (आश्रौ ३, १०, १३) इति वर्तते। अभिवान्यो वत्सो यस्याः गोः सा अभिवान्यवत्सा अन्यं वत्समभिगता। तस्याः पयसा अग्निहोत्रं सायं प्रातः तूष्णीममन्त्रं सर्वहुतं[10] जुहुयुः। द्वितीयाहुत्यां सर्वमेव हूयते, प्राशनाय नावशिष्यते। कियन्तं कालम्। आ समवायात् आ यजमानेन समवायात्। आ शरीराणामाहर्त्तोः (ऐब्रा ७, २)। आहृतेषु[11] शरीरेषु पाथिकृतीमिष्टिं कृत्वा ततः [12]पितृमेधोक्तेन विधानेन[12] संस्कारं कुर्यात्। अथ[13] समिधं धारयति उपरि हि देवेभ्यः[14] (?) इति श्रुतिः। होमे प्रजापतिं ध्यायेत्[15]। सर्वहुतम् इति वचनात् प्राशनं न विद्यते[16]। प्राशनाभावात्[17] स्रुचा निनयनमपि न विद्यते तत्सम्बन्धत्वात्। उक्तो हि सम्बन्धः—भक्षयित्वाऽभ्यात्ममपः [18]स्रुचा निनयते (आश्रौ २, ४, १२) इति। पयसाऽग्निहोत्रमिति वचनात् पयसः संस्कारादि यत् कर्म[18], [19]तदेव क्रियते †यत्[19] [20]पयसः संस्कारात् प्राक् कर्म[20], तन्न विद्यते परिसमूहनपर्युक्षणधारानिनयनादि। होमादौ[21] लुप्तत्वाद् होमान्तेऽपि पर्युक्षणं न क्रियते। अध्वर्यूणामप्युक्तम्—प्राशनोत्सेचनपरिषेचनानि न विद्यन्ते (आपश्रौ ९, ११, १२) इति ॥ १७ ॥

---

१. नास्ति ब[4]। २. नास्ति ब[1,2,6] मै पू। ३-३. °पत्यमुपतिष्ठेत ब[1,4]। ४. °तिष्ठते मूको। ५. तु. तैब्रा १, ४, ४, १०। ६. °नानन्तरम् ब[4]। ७. तत्र ब[1,4]। ८. नास्ति ब[3,4]। ९. नास्ति ब[4]। १०. सर्वं ब[1,4]। ११. आहुतेषु ब[1,2,6] मै पू; अहुतेषु ब[3,4]। १२-१२. °धोक्तविधा° मै; °धोक्तेन विधिना ब[4]। १३. अध: ब[1,4]। १४. देवेत्यों ब[2]। १५. तु. आश्रौ २, ३, १९। १६. क्रियते ब[1,2,6] मै पू। १७. °भावेन ब[2]; °भावे ब[4]। १८-१८. नास्ति ब[4]। १९-१९. नास्ति ब[4] मै। †. तद् ब[1,2,6]। २०-२०. नास्ति मै। २१. होमादि ब[4]।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

प्रायश्चित्तानि

Digitized by Madhuban Trust

[आहिताग्नेः कृष्णपक्षे मरणाशङ्कायामवशिष्टाहुतिभिः शुक्लपक्षस्य नयनम्]

यद्याहिताग्निरपरपक्षे प्रमीयेताऽऽहुतिभिरेनं पूर्वपक्षं हरेयुः ॥ १८ ॥

यदीत्यनित्यभावे[1] । [2]आहिता यस्य अग्नयः स[2] आहिताग्निः । स यद्यपरपक्षे कृष्णपक्षे[3] प्रमीयेत न जीवतीति अग्निहोत्राहुतिभिः एनं यजमानं पूर्वपक्षं शुक्लपक्षं हरेयुः नयेयुः[4] । यस्मिन्[5] काले न जीवतीत्याशा[6] भवति । तदानीमेव[7] तूष्णीं [8]विहृत्य अग्निं पक्षहोमन्यायेन[8] अहानि परिसंख्याय तावन्ति च[9] चतुर्गृहीतानि गृहीत्वा एकां समिधमाधाय सायं होमं जुहुयात् । एवं प्रातर्होमः[10] । होमयोस्त्वरा[11] चेत् तदानीमेव प्रातर्होमं हुत्वा[12] ततः[13] सायं होमं जुहुयात् । ततः प्रातर्होमं च [14]अमावास्यां च[14] कुर्यादित्यर्थः । आहिताग्निग्रहणादनाहिताग्नेरुपासने[15] एष विधिर्न क्रियते । प्रमीयेतेति वचनात् समीपत उक्तो विधिर्जीवतोऽपि[16] न भवति । जीवतीति पुनः यथाकालमग्निहोत्रं जुहुयात् । अन्येषामप्युक्तम्—जीवेच्चेत्[17] पुनः काले (काश्रौ २५, ७, २) इति । पूर्वमेव पूर्वपक्षो[18] हुत[19] एव भवति ॥ १८ ॥

[देवतास्वावाहितासु हविषां केशादिभिः संसर्गे आज्येनेष्टिं समाप्य पुनर्हविषेष्टिविधानम्]

हविषां व्यापत्तावोळ्हासु देवतास्वाज्येनेष्टिं समाप्य पुनरिज्या ॥ १९ ॥

ऐष्टिकानि पुरोळाशादीनि हवींषि । तेषां व्यापत्तौ व्यापत्तिर्विनाशः । [20]केशादिभिः बीभत्सैः[20] संसक्तैः[21] व्यापत्तिर्भवति । तस्यां व्यापत्तौ । [22]ओळ्हासु देवतासु आवाहितासु देवतास्वित्यर्थः[22] । आवाहितासु देवतासु हविषां व्यापत्तिर्भवति । पुनस्तेषां निर्वापे प्राप्ते इदमुच्यते । आज्येन तामिष्टिं समाप्य

---

१. °नित्ये भावे ब[२] ; यया मै । २-२. नास्ति मै । ३. नास्ति ब[१,४] । ४. कथं प्रयोगः ब[४] । ५. कस्मिन् मूको । ६. जीवतीत्यर्थो ब[१,४] । ७. नेदा° ब[१] मै पू ; इदा° ब[२] ; तदन्तमेव ब[१,४] । ८-८. विहानाग्नि पक्षहोम° ब[१] ; विहृताग्निपक्षहोम° ब[२] पू ; चिताग्निहोमपक्षं (°क्ष ब[१]) न्या° ब[१,४]; विकृताग्निपक्षहोम° मै । ९. नास्ति ब[३,४,६] पू । १०. प्रातः ब[२] मै । ११. °योरुत्तरा ब[२] पू ; °योरन्तरा ब[३,४] । १२. जुहुयात् ब[१,४] । १३. ततस्ततः ब[२] मै । १४-१४. °स्यायाम् ब[१,४] । १५. ताग्नेस्तेषामेव ब[१,४] । १६. तावती तु ब[१] । १७. जीवे चेत् ब[१-१] मै पू ; जीवनं चेत् ब[४] । १८. पक्षं ब[१,४] ; °क्षं ब[१,२,१] मै पू । १९. हूत ब[१,६] पू । २०-२०. केशादिबी° ब[३,४] ; केशादितिबी° ब[२] मै पू । २१. संसत्ते ब[१] ; संसक्तै ब[२] ; संस्र (°स पू) त्तै ब[१] पू ; संपत्तैः ब[३,४] ; संसात्तेः मै । २२-२२. तु तासु देवतासु स्विष्टकृदित्यर्थः ब[१,४] ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ततः[1] पुनरिज्या पुनस्तयेष्टया[2] यजते[3]। ओळहास्विति [4]वचनात् प्रागावाहनाद्[4] व्यापत्तौ पुनर्निरुप्यन्ते[5]। ऊर्ध्वमावाहनादपि[6] अध्वर्यूणां निरुप्यन्त[7] एव व्यापत्तौ हि हविषाम् ॥ १९ ॥

[व्यापन्नत्वपरिभाषाकथनं व्यापन्नहविषामप्सु प्रक्षेपणमन्त्रकथनं वल्मीकबिले सान्नाय्यस्य होमविकल्पश्च]

व्यापन्नानि हवींषि केशनखकीटपतङ्गैरन्यैर्वा बीभत्सैः ॥ २० ॥ भिन्नसिक्तानि च ॥ २१ ॥ अपोऽभ्यवहरेयुः ॥ २२ ॥ प्रजापते न त्वदेतान्यन्य इति च वल्मीकवपायां वा सान्नाय्यं मध्यमेन पलाशपर्णेन जुहुयात् ॥ २३ ॥

व्यापन्नानि[8] विनष्टानि[9]। हवींषि केशनखकीटपतङ्गैः संस्पृष्टानि[10] व्यापन्नानि भवन्ति[11]। केशा वालाः छिन्नाः[12]। छिन्नानि नखानि कीटः अमेध्यकृमिर्यः[13] पिण्डानवगच्छति[14] स कीटो भवति। पतङ्गः क्रिमिरेव, यः पक्षी भवति। मक्षिका मशकांश्च वर्जयित्वा। एतैः संसृष्टानि[15] व्यापन्नानि भवन्ति। यानि [16]च भिन्नसिक्तानि[16] तान्यपोऽभ्यवहरेयुः अप्सु प्रक्षिपेयुः प्रजापते न त्वदेतान्यन्यः (ऋ १०, १२१, १०) इत्येतयर्चा। तानि प्रक्षिप्य ततोऽनन्तरं पुनर्हवींषि निरुप्य तामिष्टिं समापयेयुः।

वल्मीकवपायां वा सान्नाय्यं मध्यमेन पलाशपर्णेन जुहुयात्। वल्मीकस्य वपा वल्मीकबिलमित्यर्थः। तस्यां वल्मीकवपायां वा सान्नाय्यं जुहुयात्। अप्सु वा जुहुयात्। व्यापन्नमित्यधिकारः[17]। त्रीणि [18]पलाशस्य पर्णानि[18] भवन्ति। तेषां मध्यमेन पलाशपर्णेन जुहुयात् [19]स्रुचा वा। अग्नौ[19] प्राप्तो[20] होमः वल्मीकवपायाम् अप्सु वेति विकल्पः। बहूनामधिकारात् सान्नाय्यस्य ग्रहणम्। जुहुयादिति वचनात् स्वाहाकारो भवति। जुहुयात् स्वाहाकारान्तैः (आश्रौ १, ११, १०) इति वचनात् ॥ २०-२३ ॥

---

१. नास्ति ब[4]। २. °येष्ट्वा ब[1] पू। ३. यजेत ब[1,4]। ४. आवाह° ब[1,4]; प्रागाहवना मै। ५. °प्यते ब[1,2,6] मै पू। ६. तद्धर्मावा° ब[1,4]। ७. °प्यत ब[1]। ८. व्यापत्तौ मै। ९. निविष्टानि ब[2] मै; ष्टानि ब[1,6] मै। १०. संस्पृष्टानि ब[1,2,6] मै पू। ११. भवन्ति। विनष्टानि भवन्ति ब[4]। १२. नास्ति मूको। १३. अमेध्ये कृ° ब[1,2,6] मै पू; अमेध्यमेध्यकृ° ब[3,4]। १४. पिण्डान्न (°न ब[2]; °न्नं मै) च गच्छति ब[1,2,6] मै पू। १५. संस्पृष्टानि ब[1,2,6] मै पू। १६-१६. विभिन्नसि° ब[3,4]। १७. व्यापत्तिमित्यर्थः ब[1,4]। १८-१८. पलाशप° ब[3,4]। १९-१९. स्रुवाग्नौ ब[1,4]; स्रुचावाग्नौ मै। २०. प्राप्तौ ब[3,4]।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

प्रायश्चित्तानि

Digitized by Madhuban Trust

[विष्यन्दमानस्य सान्नाय्यस्य समन्त्रमन्तःपरिधि निवपनम्]

विष्यन्दमानं मही द्यौः पृथिवी च न इत्यन्तःपरिधिदेशे निवपेयुः ॥ २४ ॥

विष्यन्दमानं सान्नाय्यं विविधं स्यन्दमानम् विष्यन्दमानम् । समुदन्तमित्यर्थः[1] । मही द्यौः पृथिवी च नः (ऋ १, २२, १३) इत्येतयर्चा अन्तःपरिधिदेशे [2]अभ्यन्तरा परिधिदेशे[2], अविद्यमानेऽपि परिधौ स देशः परिगृह्यते, [3]निवपेयुः निनयेयुः[3] निनयनं होमो न भवति, तस्मादत्र[4] स्वाहाकारो न क्रियते ॥ २४ ॥

अथ तस्य स्थाने पुरोळाशो[5] वक्ष्यते—

[अदुष्टस्य सान्नाय्यस्यादोषे तद्व्यासिच्य प्रचरणम्]

अन्यतरादोषे व्यासिच्य प्रचरेयुः ॥ २५ ॥

अन्यतरस्य सान्नाय्यस्यादोषे[6] अन्यतरं दुष्टं भवति। अदुष्टं यत् तद् व्यासिच्य हविःस्थाने आसिच्य पात्रद्वये आसिच्य प्रचरेयुः यदि दधि दुष्टं तदा[7] पयसः[8] आसेचनं क्रियते[9]। पयसि दुष्टे दध्नोऽभ्यासेचनम् ॥ २५ ॥

[दुष्टसान्नाय्यस्य स्थाने पुरोडाशकरणस्य विधानम्]

पुरोळाशं वा तत्स्थाने ॥ २६ ॥

अथवा दुष्टस्य स्थाने पुरोळाशं कुर्यात् । विनिवेशोऽयम् । कथम् । पयसि दुष्टे पुरोळाशो भवति। दध्नि[10] तु दुष्टे पयसोऽभ्यासेचनम्[11] । तस्यान्यतरां भक्तिमातच्य तेन यजेत (ऐब्रा ७, ४) इति[12] । अत्र पय आतच्यमानं[13] तदानीमेव दधि भवति। [14]दधि तु पयोभावं[14] नोपजीवति ॥ २६ ॥

---

१. तु. आपश्रौ ६, ६, २ ।   २-२. नास्ति ब^{1}; °न्तरपरि° मै ।
३-३. तितयेयुः जविचेयुः ब^{1}; निनयेयुः न विचेयुः ब^{2}; निनयेयुः निवपेयुः ब^{3,4}; तिनयेयुः न विचेयुः ब^{6}; तिमयेयुः नयेयुः मै ; निमयेयुः न विचेयुः पू ।   ४. तस्मादेव ब^{3,4} ।
५. नास्ति ब^{3,4} ।   ६. °व्यस्य दोषे ब^{1,6} पू ; °व्यस्य दोष (दोषः ब^{1}) ब^{2} मै ; °व्यस्य दोषात् ब^{3,4} ।   ७. नास्ति मूको ।   ८. पयः ब^{1,2,4,6} मै पू ।
९. नास्ति ब^{2} ।   १०. दधि मूको ।   ११. °सोऽभ्यासेच° ब$^{1-4,6}$ मै पू ।
१२. नास्ति मूको ।   १३. आतच्यमेव ब^{1,6} पू ; आतच्या मा वे ब^{2} ; भातच्य तेन ब^{3,4} ; आतञ्च्यमेव मै ।   १४-१४. दधिन्यधंयोर्भावं ब^{1,6} मै पू ; दधिन्यद्वयोर्भावं (°व ब^{3,4}) ब$^{3-4}$ ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[उभयदोषे व्यवस्थायाः कथनम्]

'अन्यतरस्य दोषे' उक्तं विधानम् । इदानीमुभयदोषे वक्ष्यते—

उभयदोष ऐन्द्राग्नं पञ्चशरावमोदनम् ॥ २७ ॥

तयोः पृथक् प्रचर्या ॥ २८ ॥

उभयदोषे उभयदुष्टे ऐन्द्राग्नं पञ्चशरावमोदनं गार्हपत्ये पचन्ति[2] । तस्य[3] ओदनस्य इन्द्राग्नी देवता भवति । तयोः पृथक् प्रचर्या भवति[4] । इन्द्रायानुब्रूहि[5] अग्नयेऽनुब्रूहीति[6] । तयोरुक्ता याज्यानुवाक्या दर्शपूर्णमासयोः[7] ॥ २७-२८ ॥

[केवलमैन्द्रं पञ्चशरावमोदनमिति मतान्तरनिरूपणम्]

ऐन्द्रमेवेत्येके ॥ २९ ॥

ऐन्द्रमेव[8] इन्द्रदेवत्यमेव[9] पञ्चशरावमोदनम् । तमित्येक आचार्या[10] मन्यन्ते । एवम् अनेन विधिना तामिष्टिं समाप्य पुनर्यजेत[11] । अथोत्तरस्मै हविषे वत्सानपाकुर्यात्[12] (तैब्रा ३, ७, १, ६) इत्युक्तमध्वर्यूणाम् ॥ २९ ॥

[वत्सानां गोः स्तनपाने वायवे यवागूश्रपणस्य विधानम्]

वत्सानां धाने वायवे यवागूम् ॥ ३० ॥

वत्सतर्यः वत्सा यदि गा धयन्ति[13] पिबन्ति, तदा[14] वत्सानां धाने [15]वत्सानां †पाने[15] वायवे यवागूं वायुदेवत्यां यवागूं श्रपयन्ति[16], वायुदेवत्येन हविषा यवाग्वा प्रचरन्ति । सा इष्टिः अतन्त्रा[17] भवति । आमावास्यमेव[18] तन्त्रमुपजीवति[19] । हविराहुतिप्रभृतीळान्ता भवति । पशुपुरोळाशवत् प्रातर्दोहे होमः [20]आमावास्ये तन्त्रे[20] एभिः क्रियते । तस्य उक्ते याज्यानुवाक्ये शुनासीरीयेष्ट्याम्[21] । अनेन

१-१. °तरस्यादोषे ब[2] । २. पचति ब[3,4] । ३. तस्य तु मै । ४. भवति तदा ब[1,4] । ५. °ब्रूहीति ब[1,2,6] मै पू । ६. नास्ति ब[1] । ७. °पौर्ण° ब[2] । ८. इन्द्रमेव ब[1,6] । ९. एकदेवत्य° मूको । १०. नास्ति ब[1,4] । ११. °जेत् ब[3,4] मै । १२. °नपायूयात् ब[3,4] । १३. गच्छन्ति मूको । १४. नास्ति मूको । १५-१५. नास्ति ब[3,4] । †. सनि ब[1,2,6] मै पू । १६. श्रपयन्ते ब[1,4] । १७. अन्तरा ब[3,4] । १८. अमावास्यमेव ब[1,6] पू ; अमावस्यामेव ब[2] ; अ (आ मै) मावास्यामेव ब[3,4] मै । १९. तत्रैवमुप° मै । २०-२०. °वास्यतन्त्रे ब[3,6] ; अमावास्यायां तन्त्रे मै । २१. तु. आश्रौ २, २०, ४ ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्रायश्चित्तानि

[1]विधानेन आमावास्यं[1] समाप्य पुनर्यजेत[2]। अथोत्तरस्मै हविषे वत्सानपाकुर्यात् (तैब्रा ३, ७, १, ६) इत्युक्तमध्वर्यूणाम् ॥ ३० ॥

[अग्निहोत्रद्रव्येऽधिश्रिते तस्य पात्राधःस्रवणेऽभिमन्त्रणस्य विधानम्]

अग्निहोत्रमधिश्रितं स्रवदभिमन्त्रयेत गर्भं स्रवन्तमगदमकर्माग्निर्होता पृथिव्यन्तरिक्षम् । यतश्चुतदग्नावेव तन्नाभिप्राप्नोति निर्ऋतिं परस्तादिति ॥ ३१ ॥

अग्निहोत्रद्रव्यमधिश्रितं स्रवद्[3] यदि स्थालीमूलेन[4] स्रवति, तदा अभिमन्त्रयेत तदग्निहोत्रद्रव्यम् अभिमृश्य मन्त्रयेत गर्भं स्रवन्तम् (तु. तैब्रा ३, ७, ३, ६) इति [5]यथासमाम्नातं मन्त्रं जपेत्[5] ॥ ३१ ॥

॥ [इति] तृतीयस्य [6]दशमं खण्डम्[6] ॥

१-१. °नेनामावास्यां (°स्यायां ब[1,4]) मूको। २. यजेत् ब[1,4]; °जेत् ब[2]। ३. स्रवेत् ब[1,4]। ४. स्थाली मूको। ५-५. °म्नातमन्त्रेणाभिमृश्य यजेत (°त् ब[1]) ब[1,2,1] मै पू; °म्नातं मन्त्रमभिमृश्य जपेत् ब[1,4]। ६-६. दशमः खण्डः मै।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ तृतीयेऽध्याये एकादशः खण्डः

[वत्सेन संयुक्तायां दुह्यमानायामग्निहोत्र्यामुपविष्टायां तस्या अभिमन्त्रणस्य विधानम्]

यस्याग्निहोत्र्युपावसृष्टा दुह्यमानोपविशेत् तामभिमन्त्रयेत 'यस्माद् भीषा निषीदसि ततो नो अभयं कृधि। पशून्नः सर्वान् गोपाय नमो रुद्राय मीळ्हुषे' (ऐब्रा १५, २७) इति ॥ १ ॥

यस्य यजमानस्य अग्निहोत्री गौः उपावसृष्टा[1], वत्सेन संसृष्टा[2] उपावसृष्टा भवति, उपावसृष्टा दुह्यमाना यद्युपविशेत्। ततः तां गाम् अभिमन्त्रयेत अभिमृश्य मन्त्रं ब्रूयात्। आध्वर्यवमिदं कर्म भवति। यद्यपि स्वयमग्निहोत्रं जुहोति, अध्वर्युरेव एतत्[3] कुर्यात्। दुह्यमाना इत्येतावता सिद्धे उपावसृष्टेति वचनात् सवत्सा गौर्भवतीति दर्शयति[4]। अवत्साऽपि दुह्यते। [5]वत्सो नाधिकृतः[5]। तस्मात् तामभिमन्त्रयेतेत्युच्यते ॥ १ ॥

[अग्निहोत्र्याः समन्त्रकमुत्थापनस्य विधानम्]

अथैनामुत्थापयेदुदस्थाद्देव्यदितिरायुर्यज्ञपतावधात्। इन्द्राय कृण्वती भागं मित्राय वरुणाय चेति ॥ २ ॥

अथानन्तरम् अभिमन्त्रणादनन्तरं तां गाम् उत्थापयेद् उदस्थात् इति यथा-समाम्नातेन मन्त्रेण। एनामिति पुनरुच्यते एनामेनामिति वीप्सार्थम्। द्वयोर्दुग्धेन वासेऽग्निहोत्रं जुहुयाद् (आश्रौ ३, १२, १०) इत्यत्र प्रयोजनम् ॥ २ ॥

[तस्या अग्निहोत्र्या ऊधसि मुखे च जलपूर्णपात्रमुद्गृह्य ब्राह्मणाय दुग्धदानम्]

अथास्या ऊधसि च मुखे चोदपात्रमुपोद्गृह्य दुग्ध्वा ब्राह्मणं पाययेद् यस्याभोक्ष्यन् स्याद् यावज्जीवं संवत्सरं वा ॥ ३ ॥

---

१. उपविष्टा ब[3,4]। एवंनं तत् ब[3]; एतत् कर्म ब[6]।
२. संस्पृष्टा ब[2] पू।
३. एनम् ब[1,2,8] मै पू;
४. वचनात् ब[6]।
५-५. वत्सानधि° ब[1,4]।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

प्रायश्चित्तानि

Digitized by Madhuban Trust

अथ अनन्तरम् उत्थानादनन्तरम् अस्या गोः ऊधः स्तनाधिष्ठानं, तस्मिन् ऊधसि च मुखे च उदपात्रम्[1] उदकपूर्णपात्रम् उप समीपे उद्गृह्य[2] धारयित्वा ततः गां दुग्ध्वा ब्राह्मणं पाययेत्, न[3] तेन जुहुयात्। यस्य ब्राह्मणस्य अन्नम् अभोक्ष्यन् स्यात्। अभोक्ष्यन् भवति। कियन्तं कालम्, उत्तरं[4] यावज्जीवं[5] संवत्सरं वा। अथ-शब्दोऽनुक्रमार्थः[6]। अस्या इति वीप्सायां[7] तदेव प्रयोजनम्। द्विश्चकार-करणात् अपुनरुक्तं ब्राह्मणवाक्यत्वात्[8]। दुग्ध्वा तत् पयः ब्राह्मणं पाययेत्। अतो दुग्ध्वाऽग्निहोत्रं[9] न[10] जुहुयात्। इह ब्राह्मणं पाययेदित्युक्तम्। ब्राह्मणे तु गामेव ब्राह्मणाय दद्यादिति (ऐब्रा ५, २७)। यावज्जीवं संवत्सरं वेति वा-शब्दः संवत्सर-विकल्पः ॥ ३ ॥

[वत्सेन संयुक्तायां दुह्यमानायामग्निहोत्र्यां शब्दकरणे तस्यै समन्त्रं यवसप्रदानस्य विधानम्]

वाश्यमानायै यवसं प्रयच्छेत् सूयवसाद् भगवती हि भूया इति ॥ ४ ॥

उपावसृष्टा दुह्यमाना[11] यदि वाश्येत गौः शब्दं करोति, [12]ततस्तस्यै† यवसं तृणानि प्रयच्छेत्, सूयवसाद् (ऋ १, १६४, ४०) इत्येतयर्चा। उपावसृष्टा दुह्यमाना यदि वाश्येत[12] ततः एतद् भवत्यधिकारात्[13], अन्यस्मिन्[14] काले वाश्यमानायै यवसं[15] न प्रयच्छेत्। यवसं तृणानि भवन्ति। अद्धि तृणम् (ऋ १, १६४, ४०) इति मन्त्रे दर्शनात् ॥ ४ ॥

[शोणिते दुग्धे तद्गार्हपत्ये संक्षाप्यान्येन दुग्धेन होमविधानं दुग्धपात्रे भिन्ने सिक्ते वा तदभिमन्त्रणस्य विधानञ्च]

शोणितं दुग्धं गार्हपत्ये संक्षाप्यान्येन जुहुयात् ॥ ५ ॥

भिन्नं सिक्तं वाऽभिमन्त्रयेत—समुद्रं वः प्रहिणोमि स्वां योनिमपि गच्छत। अरिष्टा अस्माकं वीरा मयि गावः सन्तु गोपताविति[16] ॥ ६ ॥

---

१. उदकपाश्रम् ब[3,4]। २. उदुह्य ब[1]। ३. नास्ति ब[1,2,6] मै पू। ४. उत ब[1,3,4,6] मै पू; उत्त ब[2]। ५. °वनं ब[3]। ६. °शब्दानुक्रमार्थं (°र्थः ब[1]) ब[1,2,6] मै पू; °शब्दोऽनुक्रमार्थ ब्र[3,4]। ७. वीप्सार्थं ब[2]। ८. तु. ऐब्रा ५, २७। ९. दुग्धाग्नि° ब[2] मै पू; क्षीराग्नि° ब[1,4]। १०. नास्ति ब[1,4]। ११. °माना वा ब[1-3,6] मै पू। १२-१२. नास्ति ब[1]। †. यतस्तस्यै ब[2] मै पू; तत एतस्यै ब[6]। १३. °कारः ब[1,4]। १४. °स्मिन् वा ब[1,6]। १५. यवसं तृणं ब[1,6] मै पू। १६. तु. शौ १०, ५, २३; शांश्रौ ४, ११, ६; आपश्रौ ४, ११, ४ प्रभृ.।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

'शोणितं दुग्धं भवति[1], [2]शोणितं चेद् दुह्यते गौः । तद् दुग्धं[2] [3]गार्हपत्येऽग्नौ संक्षाप्य क्षामं कृत्वा अन्येन पयसा जुहुयात् । गार्हपत्यग्रहणान्न लौकिकेऽग्नौ[3], [4]अहोमार्थत्वात् । लौकिके प्राप्ते[4] [5]गार्हपत्ये संक्षाप्य[5] इत्युच्यते[6] । [7]तेनैव जुहुयादिति प्राप्ते अन्येन[7] जुहुयादित्युच्यते[8] । भिन्नं सिक्तं वा । स्थाली भिद्यते, सिच्यते[9] वा, पयसो यद् भिन्नं यच्च सिक्तं तदभिमृश्य मन्त्रं जपेत्[10] समुद्रं वः इत्येतं यथासमाम्नातम् । सर्वद्रव्याणामेष [11]विधिः, अविशेष-वचनात्[11] ॥ ५-६ ॥

[अग्निहोत्र्या दोहनकाले स्पन्दने पयसि स्कन्ने तदभिमन्त्रणस्य विधानम्]

यस्याग्निहोत्र्युपावसृष्टा दुह्यमाना स्पन्देत सा यत् तत्र स्कन्दयेत् तदभि जपेद् यदद्य दुग्धं पृथिवीमसृप्त यदोषधीरत्यसृपद् यदापः । पयो गृहेषु पयो अघ्न्यायां पयो वत्सेषु पयो अस्तु तन्मयीति ॥ ७ ॥

[12]यस्य यजमानस्याग्निहोत्री[12] गौः या उपावसृष्टा[13] वत्सेन उपसृष्टा[14] दुह्यमाना यदि स्पन्देत [15]यदि चलेत् । सा गौः स्पन्दनाद् यत् †पयस्तत्र तस्मिन् दुह्यते, यदि तत् स्कन्दयेत्[15], तदभिमृश्य जपेद् यदद्य दुग्धम् (ऐब्रा ५, २७) इत्येतं यथासमाम्नातम् मन्त्रम् । यस्येति वचनाद्[16] यद्यपि यजमानो जुहोति, अन्योऽपि दोहादि[17] करोतीति[18] । उपावसृष्टावचनात् सवत्सा च भवतीति दर्शयति । सा गौः स्पन्दमाना यत् स्कन्दयेत् तदभिमृश्य जपेत्—यदद्य इत्येतं मन्त्रम् । दोग्धा तु पुरुषो यत् स्कन्दयेत् तस्यैतन्न[19] भवति । तस्योक्तमेव भिन्नं सिक्तं वाऽभिमन्त्रयेत्—समुद्रं वः (आश्रौ ३, ११, ६) इति । [20]तत्रेति वचनाद्[20] दोहन एवैतस्यापराधे एतत् प्रायश्चित्तम् । दोहनादूर्ध्वं पुरुषापराधेऽपि एतदेव[21] ॥ ७ ॥

[परिशिष्टेन पयसा हवनविधानम्]

तत्र यत् परिशिष्टं स्यात् तेन जुहुयात् ॥ ८ ॥

१-१. दुग्धं शोणितं शोणितं च जुहुयात् ब[3,4] । २-२. नास्ति ब[4] । ३-३. नास्ति ब[3,4] । ४-४. नास्ति ब[1,4] । ५-५. नास्ति ब[4] । ६. नास्ति मूको । ७-७. नास्ति ब[4] । ८. इत्युच्यते ब[4] । ९. नास्ति ब[3,4] । १०. नास्ति ब[2] । ११-११. विधिश्च विशेषविधानात् ब[3,4] । १२-१२. नास्ति ब[2] । १३. उपसृष्टा ब[2,4] मै । १४. उपासृष्टा ब[1] । १५-१५. नास्ति ब[1,4] । †. पयसस्तत्र ब[2] मै पू । १६. वचनान्ते ब[1,4] । १७. देहेनापदि ब[1,3,6] मै पू । १८. करोति ब[1,4] । १९. यस्यै° ब[1,4] । २०-२०. तत्र वचनात् ब[1]; वचनात् ब[4] । २१. एतदेव यत् ब[1,2,6] पू ; एतदेव तत्र जुहुयात् ब[3,4] ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तत्र यत् परिशिष्टं स्यात्[1] परिशिष्टं यद् भवति तेन जुहुयात् यदि होमाय पर्याप्तं भवति ॥ ८ ॥

[परिशिष्टपयसो होमायापर्याप्तत्वेऽन्येन पयसा पूरयित्वा हवनविधानम्]

अन्येन वाऽभ्यानीय ॥ ९ ॥

यदि होमाय पर्याप्तं न भवति, अन्येन वा पयसाऽभ्यानीय अभिपूर्य जुहुयात् । वा-शब्दे अक्रियमाणे परिशिष्टं यद्यपि होमाय पर्याप्तं तथाप्यभ्यानयनं[2] कर्तव्यमेव स्यात् । यद्यु वै सर्वं सिक्तं स्याद् अथाऽन्यामाहूय तां दुग्ध्वा तेन जुहुयात् (ऐब्रा ५, २७) इति ब्राह्मणम् ॥ ९ ॥

[पयसि स्कन्ने प्रायश्चित्तावशिष्टकर्मकथनम्]

एतद्दोहनाद्या प्राचीनहरणात् ॥ १० ॥

एतदन्तं प्रायश्चित्तं दोहनादि[3] कृत्वा आ प्राचीनहरणात्[4], [5]समिधं स्रुचं चाध्यधि गार्हपत्यं हृत्वा (आश्रौ २, ३, १५) इति प्राचीनं हरेत्† । ‡आ एतस्मात्‡ प्राचीनहरणात्ϕ[5] । भिन्नं सिक्तं वाभिमन्त्रयेत (आश्रौ ३, ११, ६) इत्येतस्मिन् प्राप्ते इदमुच्यते । दोहनादीति[6] यदि[7] नोच्यते, एतदाप्राचीनहरणादित्युच्यमाने होमकर्मणि प्रारब्धे[8] [9]एतत् स्यात्[9] । आ प्राचीनहरणादिति मर्यादा, नाऽभिविधिः ॥ १० ॥

[तत्र स्कन्नपयसोऽभिमर्शनमन्त्रस्य कथनम्]

प्रजापतेर्विश्वभृति तन्वं हुतमसीति तत्र स्कन्नाभिमर्शनम् ॥ ११ ॥

प्रजापतेर्विश्वभृति तन्वं हुतमसि इत्येतेन मन्त्रेण [10]तत्र प्राचीनहरणे[10] स्कन्नस्याभिमर्शनम्[11] । तत्रेति अधिकृतं[12] निर्दिश्यते । किमधिकृतम्[13] ? प्राचीनहरणमधिकृतम् ॥ ११ ॥

---

१. यद्यपि होमः स्याद् मै । २. तथाप्यल्पान° ब[3,4] ।
३. °नादिं ब[2] मै पू । ४. °णादित्वात् ब[4] । ५-५. नास्ति ब[4] ।
†. ददेत् ब[1]; हृदयेत् ब[2] पू; हूयेत ब[3]; नास्ति मै । ‡-‡. आतस्तस्मात् ब[3]; अतस्तस्मात् पू । ϕ. °हरणादित्वात् ब[3] । ६. °नादिति मूको ।
७. नास्ति ब[1] । ८. प्रचरेत् ब[1,4] । ९-९. एतस्मात् ब[1,2,3,4,1] मै; एतस्यात् ब[2] पू । १०-१०. तत्प्राचीनहूयमाणे ब[1]; तत्प्राचीने हूयमाने ब[2] मै पू; तत्प्राचीने ह्रि (ह्री ब[4]) यमाणे ब[3,4]; तत्प्राचीनो हूयमानो ब[1] । ११. स्कन्दस्याभि° ब[1,2,1] मै पू; स्कन्दनस्याभि° ब[3,4] । १२. °कृते मूको । १३. किमनधिकृतम् मूको ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[स्कन्नपयसः शेषेण होमविधानम्]

शेषेण जुहुयात् ॥ १२ ॥

शेषेण [1]'होमो न'[1] प्राप्नोति[2]। कथं होमार्थमुन्नयनं प्राप्नोति[3]। स्कन्नं सद् हीनं भवति ॥ १२ ॥

[स्कन्नपयसोऽशेषे पुनरुन्नीय हवनविधानम्]

पुनरुन्नीयाऽशेषे ॥ १३ ॥

[4]पुनरुन्नीय जुहुयात्[4] अशेषे सति [5]सर्वस्मिन्नाशेऽशेषादिदं[5] नारभ्येत। पुनरुन्नयनं न प्राप्नोति। होमार्थमुन्नीतं तत्[6] [7]स्कन्नं पुनरुन्नयनं न प्राप्नोति[7], तस्मादारभ्येत। यथा—अवदानदोषे[8] पुनरायतनादवदानम् (आश्रौ ३, १४, ७) इति। तत्रैव स्थालीं स्रुचं च आहृत्य उन्नयेत्[9], [10]न तु† तं‡ देशं निवर्त्यφ उन्नयेत्[10]। यदि निवर्तयेत्[11] स्वर्गाल्लोकाच्च्यवेत इति श्रुतिः[12] ॥ १३ ॥

[उन्नेतव्यपयसोऽप्यशेषे आज्यमुन्नीय होमविधानम्]

आज्यमशेषे ॥ १४ ॥

स्थाल्यामप्यशेषे सति आज्यं गार्हपत्ये विलाप्य आनीतमाज्यमुन्नीय[13] जुहुयात्। अशेषाधिकारे पुनरशेषवचनात् [14]स्थाल्यामपि अशेषम्[14] आज्यं भवति। आज्यग्रहणाद् आज्यसंस्कार[15] एव भवति, नाग्निहोत्रद्रव्यसंस्कारः[16]। [17]सर्पिरिति चोदितं¶ स्यात्µ, अग्निहोत्रसंस्कारः प्राप्नोति। शब्दान्तरेण* चोदितत्वादग्निहोत्रसंस्कारो[17] न क्रियते। अग्निहोत्रसंस्कारेण संस्क्रियते[18] न हुतत्वात्। अत एव पुनर्होममाह गाणगारिः[19] ॥ १४ ॥

१-१. होमे न ब[1]; होमे ब[3,4]। २. प्राप्तेति ब[1,4]। ३. नास्ति ब[1,2,6] मै पू। ४-४. नास्ति ब[3,4]। ५-५. सर्वस्मिन्नशेषादिदं ब[1,2,6] मै पू; सर्वस्मिन्नाशेषादिदं ब[3,4]। ६. तत ब[1,6] पू; यत् ब[3,4]। ७-७. नास्ति ब[1]। ८. °दानशेषं ब[2-4,6] मै पू; °दानशेप ब[1]। ९. तु. आश्रौ २, ३, १५। १०-१०. नास्ति ब[1,4]। †. नास्ति ब[1,6] मै पू। ‡. तत् मै। φ. निवृत्य ब[1,2,6] मै पू। ११. °येत् य ब[1]। १२. तु. ऐब्रा ७, ५। १३. आनीय तमा° मूको। १४-१४. तत्स्थाल्यमाज्यशेपे ब[3,4]। १५. संस्कार (°रा ब[1,4]) मूको। १६. °द्रव्यं संस्कारः ब[1,2,6] पू। १७-१७. नास्ति ब[4]। ¶. °तः ब[3]। µ. तु. आश्रौ २, ६, १०। *. शब्दोत्तरेण ब[1] पू। १८. संस्तूयते ब[2] मै पू। १९. तु. आश्रौ ३, ११, १८।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[पूर्वोक्तप्रायश्चित्तस्य होमपर्यन्तत्वकथनम्, वारुणीमृचं जपित्वा वारुण्या होमविधानम्]

एतदाहोमात् ॥ १५ ॥

वारुणीं जपित्वा वारुण्या जुहुयात् ॥ १६ ॥

प्राचीनहरणादि [1]यत् प्रायश्चित्तम्[1] एतद् आ होमाद् [2]भवति । हुते पूर्वस्मिन् होमे सति अन्यत् प्रायश्चित्तं वक्ष्यति । यत्र वेत्थ वनस्पते इति उत्तरस्या आहुत्याः स्कन्दने (आश्वौ ३, ११, २३) इति । एतदा होमाद् इत्यनुच्यमाने तत्र स्कन्नाभिमर्शनम् (आश्वौ ३, ११, ११) इति वचनात् प्राचीनहरणं† भवति । साबनादर्धहोमात्‡[2] स्कन्ने[3] उपस्पर्शनमेव[4] स्यात् । [5]भिन्नं सिक्तं वाऽभिमन्त्रयेत[5] (आश्वौ ३, ११, ६) इति वचनात् । तस्मादुच्यते—एतदा होमाद् इति ॥ १५ ॥

[6]वारुणीं जपित्वा वारुण्या जुहुयात्[6] । वारुणीं जपित्वा इमं मे वरुण श्रुधी (ऋ १, २५, १९) [7]इति वारुणीं जपित्वा[7] ततोऽनन्तरं वारुण्या ऋचा जुहुयात् तत् त्वा यामि (ऋ १, २४, ११) इत्येतयर्चा जुहुयात् । नित्यस्य होममन्त्रस्योद्धारो भवति । आज्येन[8] हूयमाने एतद् भवति[9] ॥ १६ ॥

[सपत्नीकयजमानस्य परवर्तिहोमकालपर्यन्तमनशनविधानम्]

अनशनमाऽन्यस्माद्धोमकालात् ॥ १७ ॥

यजमानस्य पत्न्याश्च अनशनम् अभोजनम् । कियन्तं कालम् । आ[10] अन्यस्माद्धोमकालात्[11] । सायंहोमे[12] चेद् आ प्रातर्होमकालात् । प्रातर्होमे[13] चेद् आ सायंहोमकालात् । प्राग् होमान्नाश्नीयात्[14] ॥ १७ ॥

[गाणगारिमते पुनरग्निहोत्रं हुत्वाऽनशनविधानम्]

पुनर्होमं च गाणगारिः ॥ १८ ॥

१-१. नास्ति ब[6] । २-२. प्राचीनहरणादि एतदाहोमात् ब[1,2] पू; नास्ति ब[6] मै । †. °रणे ब[3,4] । ‡. °र्धहोमवचनात् ब[4] । ३. सन्ने ब[1-3,6] पू । ४. अन्यर्शन° ब[1] ; उस्पर्शन° ब[2] पू ; अन्यस्पर्शन° ब[6] ; उपमर्शन° ब[4] । ५-५. भिन्नसिक्तमभि° ब[1,4] । ६-६. नास्ति ब[1,2,6] मै पू । ७-७. नास्ति मूको । ८. आद्येन ब[1,2,6] मै पू । ९. भवनं ब[1] ; भवतं पू । १०. नास्ति मूको । ११. अस्मा° मै । १२. स्वयंहोमी ब[3,4] । १३. °र्होमी (°मि ब[1]) ब[1,4] । १४. प्रातर्होमा° मूको ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पुनर्होमं च गाणगारिराचार्यो मन्यते । तदानीमेव पुनरग्निहोत्रं हुत्वा ततोऽनन्तरम् अनशनं भवति । गाणगारिग्रहणात् सूत्रकारः पुनर्होमं न मन्यते । अनशनमेव मन्यते ॥ १८ ॥

[अग्निहोत्रद्रव्येऽधिश्रिते शरशराशब्दकरणे द्वितीयया विभक्त्या शत्रुनामोच्चारणविधानम्]

अग्निहोत्रं शरशरायत् समोषामुमिति द्वेष्टारमुदाहरेत् ॥ १९ ॥

अग्निहोत्रद्रव्यम् अधिश्रितं यदि शरशरायत्[1] शरशराशब्दं चेत्[2] कुर्यात्, ततः समोषामुमिति द्वितीयया विभक्त्या । यो यजमानस्य द्वेष्टि[3], द्विषति किमसावधीते, किमसौ जानातीति यो द्विषति, न प्रशंसति, स द्वेष्टा[4] । द्वेष्टारमुदाहरेत् समोषामुं[5] [6]समोष दह अमुकम्[6], समोष शिरिण्डिकम्[7] इति उदाहरेत्[8] । उदाहरेदिति वचनाद् उपांशुत्वं न प्राप्नोति[9] । उच्चैरुदाहरणं भवति ॥ १९ ॥

[अग्निहोत्रद्रव्येऽधिश्रिते विष्यन्दमाने तस्याहवनीयभस्मान्ते निनयनविधानम्]

विष्यन्दमानं मही द्यौः पृथिवी च न इत्याहवनीयस्य भस्मान्ते निनयेत् ॥ २० ॥

यद्यधिश्रितं[10] विष्यन्दते[11] विविधं स्यन्दते[11], सर्वतो विष्यन्दमानम् अग्निहोत्रं यत् स्थाल्यामवशिष्टमस्ति[12] तत्[13] मही द्यौः पृथिवी च नः (ऋ १, २२, १३) इत्येतयर्चा आहवनीयस्य भस्मान्ते निनयेत् ॥ २० ॥

[अग्निहोत्रद्रव्ये केशादिसंसृष्टे सान्नाय्यवत् प्रायश्चित्तविधानम् अग्निहोत्रद्रव्ये संस्कृतेऽभिवर्षणे च समिदाधानविधानम्]

सान्नाय्यवद् बीभत्से ॥ २१ ॥ अभिवृष्टे मित्रो जनान् यातयति ब्रुवाण इति समिदाधानम् ॥ २२ ॥

सान्नाय्येन तुल्यं सान्नाय्यवत् । यथा सान्नाय्यं केशादिभिर्बीभत्सं

---

१. सूत्रे शरे (शारे ब[1]) शरा° ब[1,6] मै पू । २. च ब[2,4] मै पू । ३. द्वेष्टा यो ब[1,6]; द्वेष्ट यो ब[2] पू; द्वेषयो मै । ४. नास्ति ब[2] । ५. समोषामुकं ब[1] पू; समोषाममुकं ब[2] मै; समोषां ब[3,4] । ६-६. नास्ति ब[1,2,6] मै पू । ७. शिरिणुकम् ब[2]; शिण्डिकम् ब[3,4]; शिरिणिकम् मै । ८. नास्ति ब[2]; ब्रूयात् उदाहरेत् ब[1]; ब्रूयात् ब[6] । ९. भवति मै । १०. °धिकृतं ब[1,2] पू । ११. °न्दति मूको । १२. °शिष्यमिति ब[1,2,6] पू; °शिष्टमिति मै । १३. नास्ति ब[3,4] ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

प्रायश्चित्तानि

Digitized by Madhuban Trust

प्रजापते (ऋ १०, १२१, १०) इत्येतयर्चा[1] मध्यमेन पलाशपर्णेन अप्सु जुहुयात् [2]वल्मीकवपायां वा† । एवमग्निहोत्रद्रव्यं बीभत्सं यदि भवति सान्नाय्यवदेव जुहुयात् । ततः अन्येनाग्निहोत्रं जुहुयात्[2] ॥ २१ ॥

अग्निहोत्रद्रव्ये संस्कृते यदि वर्षधारा अभिपतति तदा अभिवृष्टं भवति । तस्मिन्नभिवृष्टे सति अग्निहोत्रद्रव्ये मित्रो जनान् यातयति ब्रुवाणः (ऋ ३, ५९, १) इत्येतयर्चा समिदाधानं भवति । आहवनीये नित्यस्य समिदाधानमन्त्रस्य स्थाने समानजातिन्यायेन[3] यजमानस्तु नित्यमेव आधानमन्त्रमाह । नित्यो हि तस्य विधिः । समिदाधानापेक्षो विधिर्न भवति । शेषं समानम् । अभिवृष्टे एतावदेव[4] विकारः ॥ २२ ॥

[उत्तरस्या आहुत्याः स्कन्दने समिदाधानमन्त्रान्तरकथनम्]

यत्र वेत्थ वनस्पत इत्युत्तरस्या आहुत्याः स्कन्दने ॥ २३ ॥

यत्र वेत्थ वनस्पते (ऋ ५, ५, १०) इत्येतयर्चा समिदाधानं क्रियते । यद्युत्तराहुतिः[5] अहुता[6] स्कन्दति [7]तस्य स्कन्दे सति आहुतिस्थाने समिधमादध्यात् । न पुनरुन्नयनं क्रियते[7] । [8]उत्तरस्या आहुत्या †ऊर्ध्वं यदि स्कन्दति[8] [9]प्राशनस्य लोपो भवति, शेषाभावात् । यथा उत्तरस्याः स्कन्दने† उन्नयनं न‡ क्रियते[9], एवं[10] [11]प्राशनार्थमपि स्थाल्यां न[11] गृह्यते ॥ २३ ॥

॥ [इति] तृतीयस्य [12]एकादशं खण्डम्[12] ॥

---

१. इत्येनयर्चा ब[1,6] पू । २-२. नास्ति ब[3,4] । †. तु. आश्रौ ३, १०, २० ; २३ । ३. समाने समानजाति° ब[1] ; समाने जाति° ब[2] । ४. एतदेव मै । ५. यत्रोत्तरा° मै । ६. आहुता ब[1,3,4] । ७-७. नास्ति ब[3,4] । ८-८. नास्ति ब[1,3,4] । †. जुहूः मै । ९-९. नास्ति ब[1,6] । †. स्कन्दनेन ब[2] । ‡. नास्ति ब[2-4] पू । १०. नास्ति ब[6] । ११-११. °नार्थं स्थाल्या न ब[1,4] । १२-१२. °दशः खण्डः मै ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ तृतीयेऽध्याये द्वादशः खण्डः

[प्रदोषसमाप्ति यावत् सायंहोमकाल इति निरूपणम्]

प्रदोषान्तो होमकालः ॥ १ ॥

अस्तमिते होमः (आश्रौ २, २, ९) इति होमकाल उक्तः। स प्रदोषान्तो भवति। रात्र्याः प्रथमो यामः प्रदोषो भवति। प्रदोषः अन्तो यस्य होमकालस्य स प्रदोषान्तः। आ प्रदोषसमाप्तेर्होमकालो भवति। [1]अस्तमिते होमः इति वचनाद्[1] अस्तमितमात्र एव होमकालो[2] भवति। तस्यातिक्रमे प्रायश्चित्तं स्यात्। तस्मादिदमुच्यते—प्रदोषान्त इति। तस्यातिक्रमे तु[3] प्रायश्चित्तं वक्ष्यति ॥ १ ॥

[संगवसमाप्ति यावत् प्रातर्होमकाल इति विधानम्]

संगवान्तः प्रातः ॥ २ ॥

उपोदयं व्युषित उदिते वा (आश्रौ २, ४, २४) इत्युक्तो होमकालः संगवान्तो भवति। अह्नः प्रथमो यामः प्रातरित्युच्यते। द्वितीयो यामः संगवो भवति। संगच्छन्ते[4] गावो वत्सैः सह यस्मिन् काले स कालः संगवो भवति। आ मध्याह्नाद् भवति। मध्यन्दिने संगविनीमायन्ति (ऐब्रा ३, १८) इति श्रुतिः। उदित इति वचनादुदितमात्रे होमकालः[5]। तस्यातिक्रमे प्रायश्चित्तं स्यात्। तस्मादासंगवान्त इति। आसंगवपरिसमाप्तेर्भवति। तस्यातिक्रमे प्रायश्चित्तं वक्ष्यति ॥ २ ॥

[होमकालातिक्रमे चतुर्गृहीतस्याज्यहोमस्य विधानम्]

तमतिनीय चतुर्गृहीतमाज्यं जुहुयात् ॥ ३ ॥

तं कालं प्रदोषं संगवं वा अतिनीय अतिक्रम्य चतुर्गृहीतमाज्यं जुहुयात्। [6]गार्हपत्ये विलाप्याहवनीयसमीपं गत्वा जुह्वा स्रुचा चतुर्गृहीतमाज्यं जुहुयात्[6]।

१-१. नास्ति ब1’’6।
२. होमः (°म्यः ?) कालो ब1’’2’’6 मं पू।
३. नास्ति मं।
४. संगच्छन्ति मूको।
५. होमः (°म्यः ?) कालः ब1’’6 मं पू।
६-६. नास्ति ब1’’2’’6 मं पू।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

स्रुवेण प्राप्ते[1] चतुर्गृहीतमित्याह[2]। ऐष्टिके कर्मणि प्रकृतम् आज्यमस्ति, तस्मात् तत्र आज्यमिति[3] नोच्यते। स्थाल्याः स्रुवेणादाय (आश्रौ १, ११, १०) इत्युच्यते, तदा [4]होमेष्वाज्यं प्राप्तम्[4]। इह तु प्रकृतम् आज्यं[5] न विद्यते, तस्मादाज्यमित्याह ॥ ३ ॥

[सायंप्रातर्होमातिक्रमे पृथक्पृथग्घोममन्त्रकथनमग्निहोत्राविजपमन्त्रविधानञ्च]

यदि सायं दोषा वस्तर्नमः स्वाहेति, यदि प्रातः प्रातर्वस्तर्नमः स्वाहेति। अग्निहोत्रमुपसाद्य भूर्भुवः स्वरिति जपित्वा वरं दत्त्वा जुहुयात् ॥ ४ ॥

यदि सायं कालातिक्रमो भवति दोषा वस्तर्नमः स्वाहा (तु. मैसं १, ८, ७) इति अनेन मन्त्रेण चतुर्गृहीतमाज्यं जुहुयात्। यदिशब्दे अप्रयुज्यमाने सायंशब्दो मन्त्रादिः स्यात्—सायं दोषावस्तरिति। [6]यदि प्रातः, प्रातर्वस्तर्नमः स्वाहेति[6]। यदि प्रातःकालातिक्रमो भवति ततः प्रातर्वस्तर्नमः स्वाहा (तु. मैसं १, ८, ७) इत्यनेन[7] मन्त्रेण चतुर्गृहीतमाज्यं जुहुयात्। अग्निहोत्रमुपसाद्य० जुहुयात्। होमानुक्रमेण पूर्वं [8]सायंहोमे विधिरुच्यते[8]। सायंहोमे अग्निहोत्रद्रव्यमुपसाद्य आहवनीयसमीपे कुशेषूपसाद्य उपसादनं कृत्वा [9]भूर्भुवःस्वरिति व्याहृतीर्जपित्वा[9] समिधमाधाय अप[10] उपस्पृश्य वरं दत्त्वा यदस्य गृहे श्रेष्ठं वरं तदध्वर्यवे दत्त्वा जुहुयात्। उपसाद्य जपित्वा वरं दत्त्वा जुहुयादित्येवं चोदितेऽपि असमानकालान्येतानि असमानकर्तृकाणि च। कथम्। उपसाद्येति[11] वचनादुपसाद्य[12] जपो भवति। अध्वर्योरेव[13] भवति। वरं दत्त्वा जुहुयादिति वचनाद् होमकाले वरदानं[14] भवति। ददातीति[15] यजमानम् (आश्रौ १, १, १५) इति वचनाद् यजमानो वरं ददाति। अध्वर्युर्जुहोति। यदि स्वयमेव यजमानो जुहोति, कस्य वरं ददाति। गौर्वरो भवति, बहुफलत्वात्। अन्येषामप्युक्तम्—गौर्वरो भवति[16] ॥ ४ ॥

[सायंहोमातिक्रमेऽनन्तरं वारुण्या इष्टेर्विधानम्]

इष्टिश्च वारुणी ॥ ५ ॥

---

१. प्राप्तं ब१,२,६ मै पू; प्राप्त ब३,४। २. °त्याहुः ब१,४।
३. आज्यं निमित्ति ब२। ४-४. °ष्वाज्ये प्राप्ते मूको। ५. यद्यन्नं ब४।
६-६. नास्ति मै; यदि प्रातः ब१,२,६ पू। ७. इत्येतेन मै। ८-८. °होमविधि° मै।
९-९. °स्वर्व्याहृतीति ज° ब१,२,६ मै पू। १०. नास्ति ब२,३,६ मै पू।
११. °द्य ब३,४। १२. नास्ति ब३,४। १३. अध्वर्युरेव ब१-४ मै पू।
१४. वा दानं ब१,४। १५. तदानीमिति ब३,४ मै। १६. तु. आपश्रौ ५, ११, ४।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[1]अनेन विधिना अग्निहोत्रं जुहुयात्[1], इष्टिश्च वारुणी क्रियते। च-शब्दः समुच्चयार्थः। तदानीमेव संस्थितेऽग्निहोत्रे कुर्यात्। त[2] एवाग्नयो भवन्ति। आ प्रायश्चित्तसमाप्तेस्त एवाग्नयो भवन्तीति व्याख्यातम् [3]अनुगमयित्वा चाहवनीयम् (आश्रौ ३, १०, १६) इत्यत्र[3]। [4]सायंकालातिनये तु प्रायश्चित्तं व्याख्यातम्[4]। [5]प्रातःकालातिनये तु तदिदानीं[5] वक्ष्यते[6] ॥ ५ ॥

[प्रातर्होमातिक्रमे पूर्वोक्तं सम्पाद्य गोदानविधानम्]

हुत्वा प्रातर्वरदानम् ॥ ६ ॥

प्रातःकालातिनये[7] चतुर्गृहीतमाज्यं हुत्वा अग्निहोत्रमुपसाद्य व्याहृतीर्जपित्वा समिधमादाय अप उपस्पृश्य[8] द्वे आहुती हुत्वा वरं ददाति। प्रातर्होमे हुत्वा वरदानं भवति[9]। [10]जपस्तु यथास्थाने[10] भवति। इह प्रातरितिवचनात् [11]पूर्वोक्तो विधिः सायंहोमे†[11] भवति ॥ ६ ॥

[पूर्वोक्तं सम्पाद्याऽऽहवनीयमग्निं विसृज्य गार्हपत्यात् पुनस्तस्य समन्त्रं प्रणयनम्]

अनुगमयित्वा चाऽऽहवनीयं पुनः प्रणयेदिहैव क्षेम्य एधि मा प्रहासीरमुं माऽमुं माऽऽमुष्यायणमिति ॥ ७ ॥

अनेन विधिना प्रातरग्निहोत्रं[12] हुत्वा आहवनीयं चानुगमयति। तमनुगमयित्वा अनन्तरं पुनः[13] प्रणयेद्, इहैव क्षेम्य एधि (मैसं १, ८, ९) इत्यनेन[14] मन्त्रेण। च-शब्दः प्रातरधिकारसमुच्चयार्थः। सर्वेषामधिकारादाहवनीयग्रहणम्। अस्मिन् मन्त्रे अमुमिति निर्देशात् त्रीणि नामान्युपदिशन्ति—यजमानस्य नाम नक्षत्रं[15] प्रवरमिति। तन्नोपपद्यते, वचनाभावात्। यथा सूक्तवाके वचनमेवं[16] विहितं न[17] विद्यते [18]वचनम्। तस्माद् यथाम्नात एव मन्त्रः प्रयोक्तव्यः। मन्त्रो हि यजमानं पत्नीं प्रजां च वदति[18] ॥ ७ ॥

१-१. नास्ति ब[1]। २. एत ब[4] मै। ३-३. नास्ति ब[2]। ४-४. नास्ति ब[2,4]; °कालनिनये° मै; °कालानिनये° पू; °कालातिपन्नप्राय° ब[1]। ५-५. प्रातःकालनिनये° ब[2] मै; प्रातः करोतिनये° ब[1] पू; प्रातःकाले अतिक्रमे तज्जप्यात् कलातिनये तदानीं ब[3]; सायंकालातिकाले अतिक्रमेज्जप्यात् कलातिनये तु नये तदानीं ब[4]। ६. वक्ष्यति ब[1]। ७. °कालनिनये ब[2] मै पू। ८. तु. आश्रौ २, ३, १६। ९. भवति। आहुती तु हुत्वा च वरदानमिति ब[1,2,6] मै पू। १०-१०. जपमुपस्थाने ब[1,4]। ११-११. पूर्वोक्तविधिना सायं होमो ब[3,4]। †. सायंप्रातर्होमे मै। १२. °होत्रहोमं मै। १३. नास्ति ब[3,4]। १४. इत्येतेन ब[3]; इत्येनेन ब[4]। १५. नाक्षत्रं ब[1,5,6]। १६. °मेव ब[3] मै पू। १७. नास्ति ब[2-4]। १८-१८. नास्ति ब[2]।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[अनन्तरं मित्रसूर्यदेवताकेष्टिविधानम्]

तत इष्टिर्मित्रः सूर्यः ॥ ८ ॥

प्रणयनादनन्तरम् इष्टिः क्रियते । सा[1] वक्ष्यते। मित्रः सूर्य इत्येते द्वे देवते भवतः । तयोर्याज्यानुवाक्या वक्ष्यन्ते ॥ ८ ॥

[मित्रस्य याज्यानुवाक्योः कथनं सपत्नीकयजमानस्याग्न्युपासनञ्च]

अभि यो महिना दिवं, प्र स मित्र मर्तो अस्तु प्रयस्वानिति संस्थितायां पत्न्या सह वाग्यतोऽग्नीञ्ज्वलतोऽहरनश्नन्नुपासीत ॥ ६ ॥

अभि यो महिना दिवम् (ऋ ३, ५९, ७), प्र स मित्र (ऋ ३, ५९, २) इत्येते याज्यानुवाक्ये मित्रस्य । [2]सूर्यस्य शुनासीरीयायाम्†[2] । शेषं पौर्णमासेन । संस्थितायां [3]पत्न्या सह वाग्यतोऽग्नीञ्ज्वलतोऽहरनश्नन्नुपासीत[3] । तस्यां संस्थितायाम् इष्ट्यां पत्नीसहितो यजमानो वाग्यतः अभाषयन्[4] अग्नीन् ज्वलतः समृद्धान् कुर्वन् अहरनश्नन्[5] अभुञ्जन् कृत्स्नमहरुपासीत । इह पत्न्या सहेतिवचनाद् दर्शितं भवति, यद् यजमानस्य व्रतमुच्यते तत् पत्न्या भवतीति । अनशनमाऽन्यस्माद्धोमकालात् (आश्रौ ३, ११, १७) इति उभयोरप्यनशनं[6] भवतीति । अहर्ग्रहणाद् एतत् सर्वमहन्येव भवति, न रात्रौ[7] । अन्यथा आ प्रायश्चित्तसमाप्तेः [8]सर्वं स्यात्, तस्माद्[8] रात्रौ भुञ्जीत, न च [9]वाग्यमः, न चाग्नीनां ज्वलनम् । धार्यन्ते त एव[9] आ प्रायश्चित्तसमाप्तेः । [10]प्रायश्चित्तार्थेषु चाग्निषु[10] सायं होमो न[11] हुतः[12] । तस्मादा प्रायश्चित्तसमाप्तेर्धार्यन्ते[13] । सायंहोमार्थं एव ये भवन्ति ते धार्यन्ते[14] ॥ ६ ॥

[द्वयोर्धेन्वोर्दुग्धेन सायमग्निहोत्रविधानम्]

द्वयोर्दुग्धेन वासेऽग्निहोत्रं जुहुयात् ॥ १० ॥

---

१. वा ब[1,2,6] मै पू । २-२. शुनासीरीयायां सूर्यस्य ब[3,4] । †. तु. आश्रौ २, २०, ४ । ३-३. नास्ति ब[1,3,6] मै पू । ४. आपयन् ब[3,4] । ५. अहरहर° ब[4] । ६. तयोरप्य° ब[6] ; °योरन° ब[3,4] । ७. तत्र मै । ८-८. सर्वमान्तरतम्यात् ब[3,4] । ९-९. वाग्यतः ते (न ब[6] ; व पू) चाग्निनां ज्वलन्तां (न्तं ब[2] पू ; °न्ती ब[6]) धार्यन्ते एव ब[1,2,3] मै पू ; वीरयमः तवाग्नी वा ज्वलनं धीयन्ते (विधीयन्ते ब[4]) त एव ब[3,4] ; वाग्यतः वचनादग्निं ज्वलन्तं धार्यन्त एव मै । १०-१०. °त्तार्थेष्वेवाग्निषु ब[1,3,6] मै पू ; °त्तार्थे चाग्निषु ब[3,4] । ११. नास्ति ब[1,2,6] मै पू । १२. द्रुतः ब[1,3] । १३. °प्तेर्द्धायत् ब[1] ; °प्तेर्धार्यंते ब[1,2,6] मै पू । १४. °न्ते धेन्वाः ब[3,4] ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

द्वयोर्धेन्वोर्दुग्धेन[1] वासे सायमग्निहोत्रं[2] जुहुयात् तेष्वेवाग्निषु ॥ १० ॥

[द्वयोर्धेन्वोर्दुग्धयोः सहाधिश्रयणनिषेधकथनम्]

अधिश्रितेऽन्यस्मिन् द्वितीयमवनयेत् ॥ ११ ॥

पयसि अधिश्रिते तस्मिन् द्वितीयं पयः अवनयेत्[3]। द्वयोः सहाधिश्रयणं[4] न क्रियते। द्वयोर्दुग्धेनेति वचनात्[5] सहाधिश्रयणं[4] प्राप्तम्। द्वयोर्दुग्धेनेति वचनाद् द्वयोरपि पत्नीयजमानयोः अग्निहुतशेषस्यानशनमुपदिशति[6]। ततः [7]हुतेऽग्निहोत्रे† भोजनम्। न च वाग्यमः, न चाग्नीनां ज्वलनम्, धार्यन्ते‡ एव[7] ॥ ११ ॥

[प्रातरग्निहोत्रं हुत्वेष्टिविधानम्]

प्रातरेवम्[8] —

प्रातरिष्टिः ॥ १२ ॥

ततः[9] [10]प्रातरग्निहोत्रंϕ हुत्वाऽनन्तरमिष्टिः[10] क्रियते। सा वक्ष्यते। प्रातरिति वचनाद् हुतेऽग्निहोत्रे भवति। [11]समाने काले[11] चोदिता इष्टिः पूर्वोक्तत्वादग्निहोत्रं पूर्वं भवति, अनन्तरम्[12] इष्टिः। सा वक्ष्यते ॥ १२ ॥

[इष्टेर्देवतानिर्देशः]

अग्निर्व्रतभृत् ॥ १३ ॥

[13]अग्निर्व्रतभृद् देवता[13] ॥ १३ ॥

[इष्टेर्याज्यानुवाक्याविधानम्]

त्वमग्ने व्रतभृच्छुचिरग्ने देवाँ इहा वह। उप यज्ञं हविश्च नः।

---

१. द्वयोर्दुग्धेन ब[1] मै; द्वयोर्द्वयोर्दुग्धेन ब[2,6] पू; तयोर्द्वयोर्दुग्धेन ब[3,4]। २. वसायम° ब[1,2,6] मै पू; वासे रात्रिसायम° ब[3,4]। ३. °नयेत ब[2] मै। ४. °श्रपणं ब[1,2,6] मै पू। ५. वचनात् इत्यारभ्य ३, १२, २० पर्यन्तो व्याख्याभागः त्रयोदशखण्डस्य प्रथमसूत्रव्याख्यायां पतितः मै। ६. अग्न (°ग्ने ब[2] °ग्र ब[4] पू) हुतशेषप्राशन (°षस्यानशन° ब[3,4]) मूको। ७-७. हुते ब[4]। †. °ग्निमात्रे मै। ‡. धार्यते ब[1,2,6]। ८. नास्ति ब[1,4]। ९. एवं प्रातरिष्टिः ततः ब[3]; नास्ति ब[4]। १०-१०. प्रातरिष्टि ब[1]; अनन्तरमिष्टिः ब[4]। ϕ. °होत्रे ब[2]। ११-११. समानकाले ब[1,6] मै पू। १२. °न्तरा ब[1,2,6] पू। १३-१३. व्रत° ब[3,4]; देवता ब[1,2,6] पू; अग्नेर्व्रत° मै।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

प्रायश्चित्तानि

Digitized by Madhuban Trust

व्रतानि बिभ्रद् व्रतपा अदब्धो यजानो देवाँ अजरः सुवीरः। दधद्रत्नानि सुमृळीको अग्ने गोपाय नो जीवसे जातवेद इति ॥ १४ ॥

त्वमग्ने व्रतभृत् (मैसं ४, ११, ४) इति यथासमाम्नाते याज्यानुवाक्ये। शेषं पौर्णमासेन। समाप्ता इष्टिः। समाप्तं च[1] कालातिक्रमप्रायश्चित्तम्[2] ॥ १४ ॥

[पत्नीयजमानयोर्दुःखेनाश्रुपाते पूर्वोक्ताया एवेष्टेर्विधानम्]

एषैवाऽऽर्त्याऽश्रुपाते ॥ १५ ॥

आर्त्या दुःखेन पत्नीयजमानयोः[3] अश्रुपाते सति [4]रोदने सति[4]। अविशेषवचनात् सर्वकालं प्राप्ता इष्टिः उपवसथे[5] एव भवति। तथा हि श्रुतिः—तदाहुर्य आहिताग्निरुपवसथेऽश्रु कुर्वीत (ऐब्रा ७, ८) इति। आर्त्या इति वचनादार्त्याऽश्रुपात एव[6] भवति, हर्षाश्रुपाते न[7] भवति, न तत्र प्रायश्चित्तम् ॥ १५ ॥

[आहवनीयेऽप्रणीते सूर्येऽस्तङ्गते प्रायश्चित्तविधानम्]

यद्याहवनीयमप्रणीतमभ्यस्तमियाद् बहुविद् ब्राह्मणोऽग्निं प्रणयेद् दर्भैर्हिरण्येऽग्रतो ह्रियमाणे ॥ १६ ॥

यद्याहवनीयम् उद्धराहवनीयमित्यपराह्ण आह (ऐब्रा ५, २६) इति श्रुतिः[8]। उत्सर्गेऽपराह्णे (आश्रौ २, २, १) इति वचनादपराह्णे प्रणयनम्। यदि तस्मिन् काले आहवनीयमप्रणीतम् आदित्योऽभ्यस्तमियात्[9]। तथा सत्यस्तमितेऽपि बहुविद् ब्राह्मणोऽग्निं प्रणयेत्। बहु वेत्तीति बहुवित्। बहुशब्दो नित्यमधिकृतापेक्ष एव। [10]बहु तु यज्ञकर्माधिकृतं[10] तद् यज्ञकर्म विद्यां यो वेत्ति स बहुविदित्युच्यते। [11]या इमा देवताः, या एव देवता अधिदेवत्ये† एवम् अधियज्ञे अध्यात्मनि वा वेत्ति स बहुविदित्युच्यते‡[11]। तस्मादादित्यः न कदाचनास्तमेति नोदेति, नित्य आत्मनि व्यवस्थितः[12]। तदुक्तम् ऋषिणा—सूर्य आत्मा जगतस्तस्थुषश्च (ऋ १, ११५, १)

---

१. नास्ति ब[३,४]। २. कालातिनयप्रा° ब[१,२,६] पू; कालनिनये प्रा° मै।
३. यजमानपत्न्योः ब[६]। ४-४. नास्ति ब[६]। ५. उपसवं ये ब[१]; उपदसव्ये ब[२]; उपसव्ये मै पू; औपवसथ्ये ब[३,४]। ६. एव न ब[२]; एवं ब[३,४]।
७. नास्ति ब[२-४]। ८. नास्ति ब[१]। ९. आदित्येऽभ्य° ब[६] मै; °त्योऽस्त° ब[३,४]।
१०-१०. बहु च या जं कर्मा° ब[३,४]; बहु तु यात (°ज्ञ ब) क° ब[१,६]; बहुतयाज्ञ (°त पू) क° ब[२] मै पू। ११-११. नास्ति ब[१,६] मै पू। †. °वत्या ब[३,४]।
‡. °विदुच्यते ब[१,४]। १२. तु. ऐब्रा ३, ४४।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

इति। तमेव आत्मान्तर्गतं[1] मनसा विज्ञानेन[2] पश्यन्नाहवनीयं प्रणयेदिति। एवं विदुषा प्रणीयमानः अनस्तमिते एव[3] प्रणीतो भवति। अग्नावग्निः स्वाहेति निदध्यादादित्यमभिमुखः (आश्रौ २, २, ४) इति आदित्येऽग्नौ आहवनीयोऽग्निर्निहितो भवति। अविदुषा तु[4] प्रणीयमाने प्रयमार्थो न सिध्यति। तस्माद्[5]—बहुविद् ब्राह्मणोऽग्निं प्रणयेत्। बहुविदिति वचनाद् बहुविदेव प्रणयति, नाध्वर्युः। ब्राह्मण इति वचनात् क्षत्रियो बहुविदपि न प्रणयति, न वैश्यः। दर्भैर्हिरण्येऽग्रतो ह्रियमाणे दर्भैर्हिरण्यं परिगृहीतं[6] भवति, तस्मिन् हिरण्येऽग्रतो ह्रियमाणे पुरस्तान्नीयमाने हिरण्ये ब्राह्मणोऽग्निं प्रणयति। ज्योतिर्वै हिरण्यम् (तैब्रा १, ४, ४, १) इति श्रुतिः ॥ १६ ॥

[आहवनीयेऽप्रणीते सूर्येऽभ्युदिते प्रायश्चित्तविधानम्]

अभ्युदिते चतुर्गृहीतमाज्यं रजतं च हिरण्यवदग्रतो हरेयुः ॥ १७ ॥

यद्याहवनीयमप्रणीतमभ्युदियादादित्यस्तस्मिन् अभ्युदिते[7] आदित्ये चतुर्गृहीतमाज्यं जुह्वां गृहीत्वा रजतं रूप्यम् आज्यं रजतं च हिरण्यवद् दर्भैः परिगृह्य अग्नेः प्रणीयमानस्य अग्रतो हरेयुः नयेयुः। तस्मिन्नाज्येऽग्रतो[8] ह्रियमाणे बहुविद् ब्राह्मणोऽग्निं प्रणयेत्। [9]तस्मिन् रजते हिरण्ये च ह्रियमाणे[9] [10]बहुविद् ब्राह्मणोऽग्निं प्रणयेत्[10] [11]†प्राकृतमाज्यं न विद्यते, तस्मादाज्यमित्याह। यत्र प्राकृतमस्ति‡ तत्र जुहुयादित्येवφ ब्रूयात्। यथाग्नीध्रीये आज्याहुतिं जुहोति¶ इति*। च-शब्दः समुच्चयार्थः। आज्यं रजतं चेति। हिरण्यवदिति वचनात् शेषम् µअभ्यस्तम् (आश्रौ ३, १२, १६) इति विहितेनµ समानं बहुविद् ब्राह्मण[11] इत्येवमादि[12]। पुनरग्रतो वचनाद् आज्यस्यापि अग्रतो गमनं विधीयते। बहुवचनं कर्तृबहुत्वाद् आज्यमेकः, हिरण्यमेकः,[13] रजतम्[14] एकः प्रणयति ॥ १७ ॥

---

१. आत्मगतं ब[१,२,६] मै पू। २. ज्ञान न ब[१,२,६] पू; ज्ञानं मै। ३. एवं ब[१,२,४,६] मै पू। ४. नास्ति ब[४]। ५. तस्मादाह ब[१,३,६] मै पू। ६. प्रतिगृ° ब[१,२] मै पू। ७. यदृग्गहव° ब[१]; यथाहव° ब[२-४] मै पू। ८. तस्मिन्नग्रतो मूको। ९-९. नास्ति मै; तस्मिन् हिरण्येह्रिय° ब[१,३,६] पू; तस्मिन् रजते ह्रिय° ब[४]। १०-१०. नास्ति ब[२] मै। ११-११. नास्ति ब[२]। †. प्रक्व° ब[१,६] मै पू। ‡. प्रकृत° मै। φ. °त्येवं ब[१,४] पू। ¶. जुह्वति ब[३,४,६] पू। *. तु. आश्रौ ३, १३, १८। µ-µ. °भ्यस्तमिति (°ते मै) विहि° ब[३,४] मै पू। १२. °मादिषु ब[१,६] पू। १३. नास्ति ब[१,२,६] मै पू। १४. नास्ति मूको।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

प्रायश्चित्तानि

Digitized by Madhuban Trust

[चतुर्गृहीतस्याज्यस्य होमविधानम्]

अथैतदाज्यं जुहुयात् पुरस्तात् प्रत्यङ्मुख उपविश्योषाः केतुना जुषतां स्वाहेति ॥ १८ ॥

अथ अनन्तरं प्रणयनादनन्तरम् एतदाज्यम् एतच्चतुर्गृहीतम् आज्यमध्वर्युर्जुहुयात् पुरस्ताद् आहवनीयस्य पूर्वस्यां दिशि प्रत्यङ्मुख उपविश्य उषाः केतुना जुषतां स्वाहा इत्यनेन मन्त्रेण । एतदितिवचनाद् अधिकृतं चतुर्गृहीतं भवति। अन्यथा ह्यन्यदाज्यं[1] प्राप्नोति। चतुर्गृहीतं प्रणयनार्थमेव स्यात्। प्राकृतवत्[2] सर्वं प्राङ्मुख[3] इति प्राप्ते प्रत्यङ्मुख इत्याह। [4]प्रणयनाधिकाराद् यथागतः[4] तथैव स्थित्वा जुहुयात् इति प्राप्ते उपविश्य इत्युच्यते। ब्राह्मणोऽग्निं प्रणयेत् (आश्रौ ३, १२, १६) इति वचनात् प्रणयनादन्यत् सर्वमध्वर्युः कुर्यात्[5] ॥ १८ ॥

[शेषस्य विधेः प्रदोषान्तो होमकाल इत्यादिविधिना निर्देशः]

कालात्ययेन शेषः ॥ १९ ॥

प्रदोषान्तो होमकालः (आश्रौ ३, १२, १) इत्येवमादिहोमकालविधिना शेषो विधिर्व्याख्यातः। अभ्युदितेऽभ्यस्तमिते[6] च उभयत्रापि शेषो विधिः कालात्ययेन व्याख्यातः, उभयोरधिकारात्। यद्यभ्यस्तमिताधिकारो निवृत्तः, बहुविद् ब्राह्मणोऽग्निं प्रणयेत् (आश्रौ ३, १२, १६) इत्येतदभ्युदिते न प्राप्नोति। तस्मादुभयोरधिकारः। अभ्यस्तमिते अग्निं प्रणीय चतुर्गृहीतं हुत्वा [7]अग्निहोत्रमुपसाद्य †भूर्भुवः स्वरिति† जपित्वा ‡वरं दत्वा‡ जुहुयादिष्टिश्च वारुणी (तु० आश्रौ ३, १२, ४; ५)। अभ्युदिते प्रणीयाज्यं हुत्वा पुनश्चतुर्गृहीतं हुत्वा[7] उपसाद्य [8]व्याहृतीश्च जपित्वा वरं दत्वा अनुगमनमग्नेः[8] प्रतिषिद्धम्[9]। तत इष्टिः (आश्रौ ३,१२,८) इत्येवमादि[10] आ प्रायश्चित्तसमाप्तेः सर्वं समानम् ॥ १९ ॥

[आहवनीयेऽप्रणीते सूर्येऽभ्युदिते पूर्वोक्तविधिनाग्नेर्नानुगमयितव्यत्वम्]

न त्विहाग्निरनुगम्यः ॥ २० ॥

कालात्ययेन शेषः (आश्रौ ३, १२, १९) इति वचनाद् अनुगमयित्वा चाहवनोयम् (आश्रौ ३, १२, ७) इत्यनुगमनं प्राप्तं, तत् प्रतिषिध्यते। इह तु

---

१. ह्यन्यद्रव्यं ब[३,४]। २. रजतवत् ब[१-३] मै पू ; रजत ब[४]। ३. तु. आश्रौ १, १, ४; ८। ४-४. °कारयोगः ब[३,४]; °गत ब[१,२,६] पू ; °गतं मै। ५. नास्ति मूको। ६. °ते ह्यस्त° मूको। ७-७. नास्ति ब[२]। †-†. नास्ति ब[१,२,४,६] पू। ‡-‡. नास्ति ब[१]। ८-८. °हुतीर्जपित्वाऽनुग° ब[१,२,६] मै पू। ९. तु. आश्रौ ३, १२, २०। १०. एवमादि ब[१,४]।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अभ्युदिते[1] अग्निर्नानुगमयितव्यः[2] । तु-शब्दः प्राप्तव्यावृत्त्यर्थः । इह-वचनात् कालात्यये अनुगमनमेव । [3]अन्यथा तत्रापि[3] प्रतिषेधः स्यात् । आरम्भ प्रतिषेधो' विकल्पो भवति[4] ॥ २० ॥

[आहवनीयेऽनुपशान्ते गार्हपत्यस्योपशान्तौ प्रायश्चित्तविधानम्]

आहवनीये चेद्ध्रियमाणे[6] गार्हपत्योऽनुगच्छेत् स्वेभ्य एनमवक्षामेभ्यो मन्थेयुरनुगमयेत्त्वितरम् ॥ २१ ॥

आहवनीये ध्रियमाणे[7] अनुपशान्ते [8]चेद् यदि[8] गार्हपत्योऽनुगच्छेत् उपशाम्येत्[9], ततः स्वेभ्य[10] एनं गार्हपत्यम् अवक्षामेभ्य उल्मुकेभ्यो मन्थेयुः[11]। अनुगमयेत् त्वितरम् । गार्हपत्यादितरम् आहवनीयम् अनुगमयेत् उपशमयेत् । चेदिति[12] अनित्यभावे । स्वेभ्य इत्यनुच्यमाने [13]अन्यस्याग्नेरवक्षामेभ्यो मथनं स्यात् । एनमिति वचनाद् एनं गार्हपत्यं मन्थेयुः,† नाहवनीयम् इति । एनमित्येतस्मादारम्भात्[13] पूर्वमेवाहवनीयमनुगमयित्वा[14] गार्हपत्यं मन्थयेदिति[15] दर्शितं भवति । तस्मादुभयोरनुगतयोरुत्तरेणोपपद्यते, एनं गार्हपत्यं मन्थयेन्नाहवनीयम्[16] । तु-शब्दोऽवधारणार्थः । अनुगमयेदेवेतरं वक्ष्यमाणेषु सर्वेषु मन्थनकल्पेषु । अन्यथा [17]क्षामाभाव एवां स्यात्[17] ॥ २१ ॥

[गार्हपत्ये क्षामाभावे भस्मनाऽरणी संस्पृश्य मन्त्रेणाग्निमन्थनम्]

क्षामाभावे भस्मनाऽरणी संस्पृश्य मन्थयेदितो जज्ञे प्रथममेभ्यो योनिभ्यो जातवेदाः । स गायत्र्या त्रिष्टुभा जगत्याऽनुष्टुभा च देवेभ्यो हव्यं वह नः प्रजानन्निति ॥ २२ ॥

---

१. अनुदिते ब[2] । २. अग्नि (°ग्नी ब[1,3,6]) नानुग° मूको । ३-३. अन्यआपि मै । ४. °धे मै । ५. आश्वौ ३, १२, ११ तमसूत्रव्याख्यास्थ - वचनात् सहाधिश्रयणं प्राप्तम् इति व्याख्याभागमादाय ३, १२, २० तमसूत्रव्याख्याभागस्त्रयोदशखण्डस्य प्रथमसूत्रव्याख्यायां पतितः मै । ६. चोद्ध्रियमाणे ब[1] । ७. उद्ध्रियमाणे ब[3,4] । ८-८. यदि चेद् मूको । ९. उपशमेत् ब[1-3,6] मै पू ; उपशमने ब[4] । १०. तेभ्यः मूको । ११. मन्थयेयुः ब[4,6] । १२. इति मूको । १३-१३. अन्यस्याग्नेरवक्षामारम्भात् ब[1,2,6] मै पू । †. मन्थयेयुः ब[4] । १४. °हवनीयोऽनुग° ब[1,2,6] मै पू । १५. मन्थेदिति मै । १६. मन्थेन्नाहवनीयमिति मै । १७-१७. क्षाममन्थने ब[1,2,6] मै पू । †. इत्येव ब[4] ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[1]क्षामाभावे क्षामाणामभावे विनाशे† । यदि क्षामाणि न विद्यन्ते, तथा सति भस्मना[1] उभावरणी संस्पृश्य मन्थयेत् [2]इतो जज्ञे इत्येतं† मन्त्रं‡ जपित्वा मन्थयेत् । अयं मन्त्रो यावन्मन्थयेत्, तावज्जप्यते[2] उभौ कल्पावधिकृत्य विधानात्[3] ॥ २२ ॥

[आहवनीयस्य प्रणयनोपस्थाने]

मथित्वा प्रणीयाहवनीयमुपतिष्ठेताग्ने सम्राळिषे राये रमस्व सहसे द्युम्नायोर्जेऽपत्याय । सम्राळसि स्वराळसि सारस्वतौ त्वोत्सौ प्रावतामन्नादं त्वान्नपत्यायाऽऽदध इति ॥ २३ ॥

मथित्वा [4]अन्यतमेन कल्पेन[4] मथित्वा तदनन्तरं प्रणीय आहवनीयमुपतिष्ठेत[5] अग्ने सम्राळिषे इत्यनेन मन्त्रेण[6] । मथित्वा प्रणीयेति सम्बन्धवचनादाहवनीयमनुगमय्य[7] मन्थनं भवति । [8]मन्थनादनन्तरमेव प्रणयनम्[8] । आहवनीयग्रहणं गार्हपत्याधिकारात् ॥ २३ ॥

[आहवनीयादेवान्यमाहवनीयं प्रणयेदित्येकेषां मतान्तरस्य कथनम्]

अत एवैके प्रणयन्त्यन्वाहृत्य दक्षिणम् ॥ २४ ॥

अतः[9] आहवनीयाद् एव एके शाखिनः अन्यम् आहवनीयं प्रणयन्ति— दक्षिणमग्निमाहवनीयसमीपं नीत्वा प्रत्यग् दक्षिणम् आहृत्य अनन्तरमाहवनीयं प्रणयेत् । आहवनीये चेद्ध्रियमाणे (आश्रौ ३, १२, २१) इत्यधिकाराद् अत एवेत्यनेन आहवनीयोऽभिसंबध्यते । एव-शब्दोऽवधारणार्थः । आहवनीयादेव प्रणयन्ति । एके इति वचनाद् विकल्पः । अन्वाहृत्येति साकाङ्क्षवचनाद् दक्षिणाग्निमाहृत्य प्रणयेत् ॥ २४ ॥

[भस्मसहितमाहवनीयमुद्धृत्य गार्हपत्यायतने पुनः पूर्वस्यामाहवनीयमुद्धरेदिति विकल्पकथनम्]

सहभस्मानं वा गार्हपत्यायतने निधायाथ प्राञ्चमाहवनीयमुद्धरेत् ॥ २५ ॥

१-१. नास्ति ब[1,2,6] मै पू । †. न नियत् ब[1,4] । २-२. नास्ति मं । †. इत्यंतं ब[1] । ‡. नास्ति ब[1,6]; तु. मासं १३, ३४ । ३. विधानत्वात् मूको । ४-४. °तमकल्पेन ब[3,4] । ५. °ष्ठते ब[1,4] । ६. तु. मासं १३, ३५ । ७. °गम्य ब[2-4,6] पू । ८-८. °न्तरमेषप्र° ब[1,2] पू; °न्तरं मेषप्र° मै । ९. अत एव मं ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अयं वा कल्पो भवति । भस्मना सह [1]आहवनीयमुद्धृत्य दक्षिणेन विहारं हृत्वा गार्हपत्यायतने[1] निधाय स्थापयित्वा अथ अनन्तरं प्राञ्चं पूर्वस्यां दिशि आहवनीयमुद्धरेत् । प्राञ्चमिति वचनाद् दक्षिणेन विहारम् [2]आहृत† इति सिद्धं दक्षिणेन विहारं[2] [3]हृत्वा† (ऐब्रा ७, ५) इति ब्राह्मणवचनात् । आहवनीयश्रवणादितरस्य‡ गार्हपत्यसंज्ञा सिद्धा[3] । अन्यथा स आहवनीय एव । अयमेव कल्पो ब्राह्मणे दृष्टः । इतरे प्रतिषिद्धाः[4] । यन्मन्थेत्[5] भ्रातृव्यं यजमानस्य जनयेत्, यदि प्राञ्चम् आयतनाच्च्यवेत, यत्[6] प्रत्यञ्चम् असुरवद् यज्ञं तन्वीत (तु० ऐब्रा ७, ५) । सहभस्मानं दक्षिणेन विहारं हृत्वा[7] गार्हपत्यायतने निधायाथ[8] प्राञ्चमाहवनीयमुद्धरेत् (तु० ऐब्रा ७, ५) । एतदेव प्रशस्तम् । इतरे विकल्पाः श्रुत्यन्तरेऽपि[9] प्रशस्ताः । सर्व एव स्वविकल्पाः[10] ॥ २५ ॥

[इष्टितद्देवताकथनम्]

तत इष्टिरग्निस्तपस्वाञ्जनद्वान् पावकवान् ॥ २६ ॥

ततः[11] तस्मान्मन्थनाद् विहरणादनन्तरमिष्टिर्भवति[12] । [13]सा वक्ष्यते । अधिकारे पुनस्तत इति वचनात् ततस्तस्मात्† कल्पादियमिष्टिर्भवति । अन्यथा[13] [14]अन्त्यादेव कल्पादिष्टिः[14] स्यात् । अग्निस्तपस्वान् जनद्वान् पावकवानिति देवताः[15] ॥ २६ ॥

[पूर्वोक्ताया इष्टेर्याज्यानुवाक्याकथनम् आहवनीये प्रणीते होमात् प्रागुपशान्ते इष्टिविधानञ्च]

आ याहि तपसा जनेष्वग्ने पावको अर्चिषा । उपेमां सुष्टुतिं मम ॥
आ नो याहि तपसा जनेष्वग्ने पावक दीद्यत् । हव्या देवेषु नो दधदिति ॥

प्रणीतेऽनुगते प्राग्घोमादिष्टिः ॥ २७ ॥

१-१. आहवनीयायतने ब[4] । २-२. नास्ति ब[3,4] । †. अकृत्वा मै । ३-३. नास्ति ब[2] । †. कृत्वा ब[1,6] मै पू । ‡. °नीयस्य श्रव° ब[1,4] । ४. तु. ऐब्रा ७, ५ । ५. यदि मन्थयेत् ब[3,4,6]; यदि मन्थेत् ब[2,3]; यन्मथेत् मै । ६. यदि ब[1,3,4,6] मै पू । ७. कृत्वा ब[1,3,4,6] मै पू । ८. निधाय मै । ९. °न्तरे ब[3,4] मै । १०. कल्पाः ब[1,6] । ११. नास्ति ब[1,2,6] मै पू । १२. विहा(ह मै)रणान° ब[1,2,6] मै पू । १३-१३. नास्ति ब[3-4] पू । †. ततस्ततस्त° ब[1,2,6] पू । १४-१४. सविकल्पादिष्टिः ब[1]; सविकल्पा इष्टिः ब[6] । १५. °ता ब[3,4] ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

प्रायश्चित्तानि

Digitized by Madhuban Trust

[1]आ याहि इति[1] यथासमाम्नाते[2] याज्यानुवाक्ये। [3]इतरेषां† तु सर्वत्रानुगमनेष्टिः[3] इत्युक्तमध्वर्यूणाम्[4]। अस्माकमप्युक्तम्—तत इष्टिः (आश्रौ ३, १२, २६) इति। तस्मात् सर्वेष्वप्यनुगतेषु[5] एषैवेष्टिः। प्रणीतेऽनुगते प्राग्घोमादिष्टिः। प्रणीते आहवनीये होमात् प्रागनुगते होमात् पूर्वमनुगते उपशान्त इष्टिर्भवति। [6]सा वक्ष्यते[6]। तत इष्टिः (आश्रौ ३, १२, २६) इति या उक्ता इष्टिः सा[7] सर्वेषामनुगमने [8]इष्टा† तस्मात् प्रणीत इत्याहवनीयस्याधिकारः क्रियते‡[8]। [9]प्राग्घोमादिति वचनात् होमादूर्ध्वमनुगमने[9] [10]अन्यत् प्रायश्चित्तं वक्ष्यति—†अग्नावनुगतेऽन्तराहुती हिरण्ये† उत्तरां‡ जुहुयात् (आश्रौ ३, १४, २३) इति[10]। ततः हिरण्य एव होमशेषं समापयेत्, न पुनर्विहरेत्। आ प्राग्घोमाद् अनुगते विहृत्य[11] इष्टिं कुर्याद् [12]यदि अप्रक्रान्तो† होमो भवति। प्रक्रान्ते तु‡ अनुगते होमं परिसमाप्य इष्टिं कुर्यात्[12]। सा वक्ष्यते ॥ २७ ॥

[इष्टिदेवताकथनम्]

अग्निर्ज्योतिष्मान् वरुणः ॥ २८ ॥

अग्निर्ज्योतिष्मान् देवता। वरुणो द्वितीया देवता[13] ॥ २८ ॥

[अग्नेर्ज्योतिष्मतो याज्यानुवाक्याकथनं सर्वेष्वग्निषूपशान्तेषु सूर्येऽभ्युदितेऽस्तमिते वा प्रायश्चित्तविधानम्]

उदग्ने शुचयस्तवाग्ने बृहन्नुषसामूर्ध्वो अस्थादिति। सर्वांश्चेदनुगतानादित्योऽभ्युदियाद्वाभ्यस्तमियाद्वाग्न्याधेयं पुनराधेयं वा ॥ २९ ॥

[14]†उदग्ने शुचयस्तव (ऋ ८, ४४, १७) अग्ने बृहन्† (ऋ १०, १, १) इति ‡अग्नेर्ज्योतिष्मतो‡ याज्यानुवाक्ये। वरुणस्य उक्ते[14] वरुणप्रघासेषु[15]। शेषं

१-१. आयाह्यादीनि मै। २. तु. मैसं ४, १०, २। ३-३. इत्येषानुगमनेष्टिः ब[1,6] मै पू। †. इत्येषा ब[2,3]। ४. तु. आपश्रौ ९, २, २। ५. पूर्वेष्वप्य° मै; सर्वेष्वनुमानेषु ब[3,4]। ६-६. नास्ति ब[1,2,6] मै पू। ७. नास्ति ब[2-4] मै पू। ८-८. नास्ति मै। †. दृष्टा ब[3,4]। ‡. क्रियते इति ब[1,6]। ९-९. नास्ति ब[3,4] मै। १०-१०. नास्ति ब[1,4]। †-†. °हुतीर्हि° मै। ‡. उत्तराहुतिं ब[6]। ११. विकृत्य मै। १२-१२. नास्ति ब[1] मै। †. प्रक्रान्तो ब[3,4]। ‡. नास्ति ब[3,4]। १३. नास्ति ब[6]। १४-१४. नास्ति ब[1]। †-†. उदग्ने बृहन् ब[1]; उदग्ने बृहन् ब[2] पू; उदग्ने अग्ने बृहन् मै। ‡-‡. अग्नये ज्योतिष्मते ब[2-4] मै पू। १५. °प्रघासे ब[3,4]; प्रघासेषु ब[6]; तु. आश्रौ २, १७, १५।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पौर्णमासेन। [1]सर्वांश्चेदनुगतान् अग्नीन् उपशान्तान् आदित्यः अभ्युदियाद् वा[1] अस्तमियाद् वा। ततः[2] अग्न्याधेयं प्रायश्चित्तं भवति, पुनराधेयं वा[3] भवति। सर्वेष्वनुगतेषु[4] [5]मथित्वा प्रणयने प्राप्ते इदमुच्यते। अन्येषामध्वर्यूणाम् यजमान एवाग्नयो भवन्ति[5] (?) इति वचनात् अभ्युदितेऽभ्यस्तमितेऽपि[6] अरण्योः प्रत्यवरोहणं कृत्वा पृथक्कृत्य जुहुयात्[7] ।। २९ ।।

[समारूढेष्वग्निषु अरण्योर्नाशेऽग्न्याधेयस्य पुनराधेयस्य वा विधानम्]

समारूढेषु चारणीनाशे ।। ३० ।।

अरण्योः समारूढेषु चाग्निषु यद्यरण्योर्नाशः अरणीनाशस्तस्मिन् अरणीनाशे अग्न्याधेयं वा[8] भवति। [9]पुनराधेयं वा भवति[9]। चशब्दः[10] समुच्चयार्थः। येषां यजमान एवाग्नयो भवन्ति (?) इति वचनम्[11] ते अरणी आहृत्य तयोः प्रत्यवरुह्य मन्थन्ति[12] ।। ३० ।।

।। [इति] [13]तृतीयाध्यायस्य द्वादशं खण्डम्[13] ।।

१-१. नास्ति मै; सर्वांश्चेदनुगतान् ब[1,2,6] पू। २. तदाम ब[1,6]; त ब[2] पू; तम् मै। ३. नास्ति ब[2,4]। ४. °गमनेषु ब[1,4]। ५-५. नास्ति ब[3,4]। ६. °दिताभ्यस्त° ब[1,2,6] पू; अभ्युदयाभ्यस्त° ब[3,4]। ७. जुहुयुः ब[1,2,6] मै पू। ८. वा न ब[1,2,6] मै पू। ९-९. नास्ति ब[1,2,6]; मै पू। १०. वा (व ब[4]) शब्दः ब[1,4]। ११. वचनात् मूको। १२. मन्थयन्ति मै। १३-१३. तृतीयस्य द्वादशः खण्डः मै।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ तृतीयेऽध्याये त्रयोदशः खण्डः

[आग्नेयीनामिष्टीनामुपक्रमः]

अथाग्नेय्य इष्टयः ॥ १ ॥

अथ-शब्दोऽधिकारार्थः। आग्नेय्य इष्टयोऽधिक्रियन्ते। यदित ऊर्ध्वमनुक्रमिष्यामः तदाग्नेयीनामिष्टीनां विधानम्। आग्नेय्य इत्यधिकाराद् इत ऊर्ध्वं 'ये गुणा[1] वक्ष्यन्ते, ते अग्निगुणा[2] भवन्ति। व्रतपतये (आश्रौ ३, १३, २) अग्नये व्रतपतये (ऐब्रा ७, ८) इति। अग्नये अग्निवते[3] (आश्रौ ३, १३, ३) इष्टिर्भवति। इष्टिवचनादिष्टयो भवन्ति, आहुतयो भवन्ति। प्रत्याम्नाये वक्ष्यमाणाभ्यामृग्भ्यां तस्यै देवतायै[4] आहुतिं जुहुयात्। इष्टयो वक्ष्यन्ते ॥ १ ॥

[व्रतातिपत्तावग्नये व्रतपतये इष्टिविधानम्]

व्रतातिपत्तौ व्रतपतये ॥ २ ॥

दर्शपौर्णमासयोः[5] तद्विकारेषु चातुर्मास्येषु[6] व्रतान्यादिष्टानि अधः शयीत मधुमांसलवणस्त्र्यवलेखनानि वर्जयेद् (आश्रौ २, १६, २४) इति। व्रतस्यातिपत्तिः व्रतातिपत्तिः[7] [8]तस्यां व्रतातिपत्तौ[8] सत्याम् एतस्मिन् निमित्ते अग्नये व्रतपतये[9] इष्टिर्भवति। तस्या देवताया वक्ष्यति याज्यानुवाक्ये। शेषं पौर्णमासेन। ब्राह्मणे औपवसथ्ये[10] इत्युक्तम्[11]। इह तु अविशेषवचनात् सर्वार्थं भवति ॥ २ ॥

[अनुपशान्तेऽग्नावग्निप्रणयनेऽग्नयेऽग्निवते इष्टिविधानम्]

साग्नावग्निप्रणयनेऽग्निवते ॥ ३ ॥

सहाग्निना आयतनं साग्नि[12], साग्नावायतने चेदग्निः प्रणीयते। अनुपशान्तेऽग्नौ उपशान्त इति मत्वा ह्यग्निं प्रणयति। प्रणीतेऽग्नौ यदि दृश्यतेऽग्नि-

---

१-१. सगुणा ब[1,4]; ये गुणास्ते ब[1,2,6] मै पू। २. अग्नेर्गुणा ब[1] मै पू। ३. अग्निमते मूको। ४. नास्ति ब[1,4]। ५. दर्शपूर्ण° ब[1,3,4,6] मै। ६. °स्येषु यानि मूको। ७. नास्ति मूको। ८-८. तस्यातिपत्तौ नास्ति ब[1,2,6] मै पू। ९. नास्ति ब[6]। १०. उपवसथे मै। ११. तु. ऐब्रा ७, ८। १२. साग्निः मूको।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

स्तस्मिन्ननग्नावग्निप्रणयने सति अग्नयेऽग्निवते इष्टिर्भवति । तस्या वक्ष्यति याज्यानुवाक्ये । शेषं पौर्णमासेन । स यद्यनुपश्येदुद्धृह्य पूर्वमपरं निदध्यात् (ऐब्रा ७, ६) इत्युक्तं ब्राह्मणे[1], तथापि प्रायश्चित्तं विद्यते साग्नावग्निप्रणयन इति[2] ॥ ३ ॥

[यजमानगृहस्य दाहे क्षामवतेऽग्नये श्मशानाग्निसंसर्गे च शुचयेऽग्नये इष्टिविधानम्]

क्षामायागारदाहे शुचये सर्जनेऽग्निनाऽन्येन ॥ ४ ॥

क्षामायागारदाहे[3] अग्नये क्षामवते इष्टिर्भवति । आगारदाहे यजमानस्य [4]गृहदाहे । तस्या[†][4] याज्यानुवाक्ये वक्ष्यति । शेषं पौर्णमासेन । अध्वर्यूणां[5] क्षामवत इति चोदितम्[6] । इह तु क्षामायेति । तस्मादध्वर्यवः अग्नये क्षामवते इति प्रेष्यन्ति[7] । तैः सह अग्निं क्षामवन्तमावहेति[8] भवति[9] । [10]शुचये संसर्जनेऽग्निनाऽन्येन[10] । [11]अग्नये शुचये[11] इष्टिर्भवति अग्निनान्येन[12] [13]श्मशानाग्निना संसर्गे[13] सति । तस्या उक्ते याज्यानुवाक्ये आधानेष्टचा[14] । अन्येनेति श्मशानाग्निना इत्युक्तं भवति । उत्तरत्रान्येनेति उक्तं च श्रुत्यन्तरे[15] ॥ ४ ॥

[सर्वेषामग्नीनां मिश्रणे विविचयेऽग्नये इष्टिविधानम्]

मिथश्चेद् विविचये ॥ ५ ॥

यदि सर्वे अग्नयो मिथो भवन्ति एकीभावं गच्छन्ति, तथा सति अग्नये विविचये इष्टिर्भवति । तस्या[16] याज्यानुवाक्ये वक्ष्यति । शेषं पौर्णमासेन । चेदित्यनित्यभावे[17] ॥ ५ ॥

[गार्हपत्याऽऽहवनीययोर्मिश्रणे वीतयेऽग्नये इष्टिविधानम्]

गार्हपत्याहवनीययोर्वीतये ॥ ६ ॥

[18]गार्हपत्याहवनीययोः मिथोभावे द्वयोरेव एकीभावे सति अग्नये वीतये इष्टिर्भवति । तस्या[†] याज्यानुवाक्ये वक्ष्यति । शेषं पौर्णमासेन[18] । मिथोभूतान् अग्नीन् विभज्य स्थानेषु स्थापयित्वा इष्टिं कुर्यात् ॥ ६ ॥

---

१. °णेऽपि ब[४] । २. इति वक्ष्यति ब[१,६] । ३. वक्ष्यमाणागारदाहे ब[२] मै पू । ४-४. नास्ति ब[३,४] । †. तस्य ब[१,२,६] पू । ५. अध्वर्युणा ब[३,४] । ६. तु. आपश्रौ ९, ३, १७ । ७. प्रैष्यन्ति ब[१,३,४]; प्रैक्ष्यन्ति (°न्ते मै) ब[२,६] मै पू । ८. °न्तमाहेति ब[२] मै पू । ९. नास्ति ब[१] । १०-१०. नास्ति मै ; शुचये ब[१,२,६] पू । ११-११. शुचये अग्नये मै । १२. अग्निनेत्यनेन मै । १३-१३. °नाग्निसं° ब[१,२,६] मै पू ; उत्सनाग्नि सं° ब[३,४] । १४. तु. घाश्रौ २, १, २५ । १५. तु. ऐब्रा ७, ७ । १६. तस्य ब[१,२,६] पू । १७. नास्ति मै । १८-१८. नास्ति मै । †. तस्य ब[१,२,६] पू ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

प्रायश्चित्तानि

Digitized by Madhuban Trust

[लौकिकाग्निना संसर्गे संवर्गायाग्नये इष्टिविधानम्]

ग्राम्येण संवर्गाय ॥ ७ ॥

ग्राम्येणाग्निना संसर्गे सति अग्नये संवर्गायेष्टिर्भवति । तस्या[1] याज्यानुवाक्ये वक्ष्यति । शेषं पौर्णमासेन । इह ग्राम्येणेति [2]वचनादारण्येनाग्निना संसर्गे इष्टिरन्या[2] निर्मातव्या । तदुक्तं ब्राह्मणे—तस्य दवाग्निना[3] संसर्गे[4] (?) इति ॥ ७ ॥

[वैद्युताग्निना संसर्गेऽप्सुमतेऽग्नये तथा वैरिणामन्नभोजनेऽग्नये वैश्वानरायेष्टिविधानम्]

वैद्युतेनाप्सुमते वैश्वानराय विमतानामन्नभोजने ॥ ८ ॥

विद्युति भवो वैद्युतः, तेनाग्निना संसर्गे[5] अग्नयेऽप्सुमते इष्टिर्भवति । तस्या[6] याज्यानुवाक्ये वक्ष्यति । शेषं पौर्णमासेन । वैश्वानराय विमतानामन्नभोजने । अग्नये वैश्वानरायेष्टिर्भवति, विमता नामात्मनो[7] विद्वेषिणो वैरिणस्तेषां विमतानाम् अन्नभोजने सति, तेषामन्नं यजमानो यदि भुञ्जीत[8] । तस्या[9] याज्यानुवाक्ये उक्ते चातुर्मास्यप्रकरणे[10] ॥ ८ ॥

[कपाले नष्टेऽनुद्वासितेऽभ्याश्राविते वा वैश्वानरीयेष्टिविधानम्]

एषैव कपाले नष्टेऽनुद्वासिते ॥ ९ ॥

अभ्याश्राविते वा ॥ १० ॥

एषैवेष्टिर्भवति [11]वैश्वानरीये कपाले[11] नष्टे सति । कर्मणि[12] नियुक्तं[13] यदि नश्यति ततस्तत्प्रायश्चित्तं[14] भवति । अनधिकृतस्य न भवति[15] । वक्ष्यति[16]—कपालं भिन्नमनपवृत्तकर्म (आश्रौ ३, १४, १०) इति । तदेव शेषवचनम्[17] अविशेषवचने[18] सति । [19]अनुद्वासितेऽभ्याश्राविते वा[19] । अनुद्वासिते कपाले ।

---

१. तस्य ब[1,2,6] पू । २-२. वचनादरण्ये संवर्गेष्टिरन्या मै । ३. दावा° मै । ४. तु. ऐब्रा ७,७ यस्याग्नय आरण्येनाग्निना संदहेयेरन् इति । ५. °र्गे इष्टिः ब[3,4] । ६. तस्य ब[1,2] पू । ७. नामानः ब[3] मै पू । ८. भुञ्जति मूको । ९. तस्य ब[1,2] पू । १०. तु. आश्रौ २, १५, २ । ११-११. °नर (°री ब[2,6]) कपाले ब[2,6] मै पू ; °नरायकपाले ब[1,4] । १२. कर्मणे ब[2] । १३. युक्तं ब[3,4] । १४. ततस्तं (°स्त ब[6] पू) प्राय° ब[1,6] पू ; ततस्ततः प्राय° ब[1,4]; ततः प्राय° मै । १५. वक्ष्यति ब[1,2,6] मै पू । १६. नास्ति ब[1] । १७. वचनम् ब[1,2,6] मै पू । १८. अवशे° ब[4]; अशेष° ब[3] । १९-१९. अनुद्वासिते ब[1,2,6] पू ; नास्ति मै ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

उद्वासनकाले अध्वर्युणा यदि नोद्वासितं कपालं ततः प्रागाश्रावणाद्[1] यदि स्मर्यते, नास्ति प्रायश्चित्तम् । अथ यदि [2]आश्रावणे† कृते स्मर्यते‡ तदा भवति इष्टिस्तदर्थमिदमुच्यते—अनुद्वासिते कपाले अभ्याश्राविते ϕसति । एतस्मिंश्च निमित्ते वैश्वानरीया इष्टिर्भवतिϕ । वा-शब्दः समुच्चयार्थो$ भवति[2], अभ्याश्राविते[3] च[4] इति । येषामध्वर्यूणां पत्नीसंयाजकाले उद्वासनं, तैः सह प्रयोगे प्रायश्चित्तं न विद्यते ॥ १० ॥

[यजमाने प्रवासगते जीवत्यपि मृतशब्दश्रवणे सुरभयेऽग्नये पूर्णाहुतिरहितेष्टिविधानम्]

सुरभय एव यस्मिञ्जीवे मृतशब्दः ॥ ११ ॥

अग्नये सुरभये इष्टिरेव भवति, न पूर्णाहुतिः । यस्मिन् यजमाने जीवे सति[5] मृतशब्दः[6] श्रूयते—प्रवासगते यजमाने मृत इति लोके शब्द उत्पद्यते । एव शब्दोऽवधारणार्थः इष्टिमवधारयति[7] । अग्नये सुरभये इष्टिरेव भवति । पूर्णाहुतावाहुतिरिति[8] वक्ष्यति—इष्टिस्थाने पूर्णाहुतिर्वा[9] । विभाषानिवृत्यर्थमेवकारः ॥ ११ ॥

[पूर्वोक्तानां दशानामिष्टीनां मध्ये यासां याज्यानुवाक्याः पूर्वं नोक्तास्तासां याज्यानुवाक्यानां कथनं यजमानस्य भार्याया गोर्वा यमलजनने मरुत इष्टिविधानम्]

त्वमग्ने व्रतपा असि, यद्वो वयं प्रमिनाम व्रतानि (ऋ १०, २, ४), अग्निनाऽग्निः समिध्यते (ऋ १,१२,६), त्वं ह्यग्ने अग्निना (ऋ ८,४३,१४), अग्ने त्वमस्मद् युयोध्यमीवा (ऋ १, १८९, ३), अक्रन्ददग्निस्तनयन्निव द्यौः (ऋ १०, ४५, ४), वि ते विष्वग्वात जूतासो अग्ने (ऋ ६, ६, ३), त्वामग्ने मानुषीरीळते विशः (ऋ ५, ८, ३), अग्न आयाहि वीतये (ऋ ६, १६, १०), यो अग्निं देववीतये (ऋ १, १२, ९), कुवित्सु नो गविष्टये (ऋ ८, ७५, ११), मा नो अस्मिन् महाधने (ऋ ८, ७५, १२), अप्स्वग्ने सधिष्टव (ऋ ८, ४३, ९), यदग्ने दिविजा असि (ऋ ८, ४३, २८), अग्निर्होता न्यसीदद् यजीयान् (ऋ ५,१,६), साध्वीमक-

---

१. °श्रव° मूको । २-२. नास्ति ब[1] । †. आश्रवणे ब[2] मै । ‡. दृश्यते ब[3,4,6] मै पू ; नास्ति ब[2] । ϕ-ϕ. स···इष्टिर्भं° पू ; सति दृश्यते तदा भवति ब[4] । $. °च्चयार्थे ब[3,4,6] । ३. आश्राविते ब[1] । ४. वा ब[3,4] । ५. भवति ब[1,2,6] मै पू । ६. मृत इति शब्दः ब[1,2,6] पू । ७. इष्टिं च धारयति ब[1,2,6] मै पू । ८. °तिरेव मै । ९. तु. आश्रौ ३, १३, १४ ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

देववीतिं नो अद्य (ऋ १०, ५३, ३) इति। यस्य भार्या गौर्वा यमौ जनयेदिष्टिर्मरुतः ॥ १२ ॥

व्रतातिपत्तौ व्रतपतये (आश्रौ ३, १३, २) इत्येवमाद्येकहविषो दश इष्टयो नानानिमित्तेषु व्याख्याताः, यासामन्ते मृतशब्द[1] आस्ते[2]। शुचये याज्यानुवाक्ये [3]आधानेष्ट्यामुक्ते[†][3]। अग्नेर्वैश्वानरस्य चातुर्मास्यप्रकरणे[‡] उक्ते याज्यानुवाक्ये। अन्या या अष्टाविष्टयः, तासामनुक्रमेण[4] याज्यानुवाक्या[5] वक्ष्यति। एकैकस्या द्वे द्वे ऋचौ। त्वमग्ने व्रतपा असि (ऋ ८, ११, १) इत्येवमादिषोडश प्रतीकानि। यस्य भार्या गौर्वा [6]यमौ जनयेदिष्टिर्मरुतः[6]। [7]यस्य यजमानस्य भार्या गौर्वा[7] यमौ पुत्रौ जनयेत्, तस्मिन्निमित्ते इष्टिर्भवति[8]। मरुतो देवता भवति, तस्या उक्ते याज्यानुवाक्ये ऐन्द्रामारुतीं भेदकामाः (आश्रौ २, ११, १३) इत्यत्र। शेषं पौर्णमासेन। यस्येति यदि नोच्यते, यजमानस्य गौर्न स्यात्। यथा आग्नेय्य इष्टयः (आश्रौ ३, १३, १) इत्याग्नेयीषु इष्ट्यधिकारः कृतः आग्नेयीष्वेव भवति, अन्यत्र इष्टिः[9] [10]न भवतीतीष्टिग्रहणम्[10] ॥ १२ ॥

[आमावास्ये कर्मणि पूर्वस्यां दिशि चन्द्रेऽभ्युदिते प्रायश्चित्तेष्टिदेवताविधानम्]

सांनाय्ये पुरस्ताच्चन्द्रमसाऽभ्युदितेऽग्निर्दातेन्द्रः प्रदाता विष्णुः शिपिविष्टः ॥ १३ ॥

[11]पुरस्तात् पूर्वस्यां दिशि[11] [12]चन्द्रमसाऽभ्युदिते सति[12] सान्नाय्ये एतस्मिन्निमित्ते इष्टिर्भवति। सा वक्ष्यते। अग्निर्दाता, इन्द्रः प्रदाता, विष्णुः शिपिविष्ट इत्येतास्तिस्रो देवताः, तासां याज्यानुवाक्या[13] वक्ष्यन्ते ॥ १३ ॥

[पूर्वोक्तदेवतानां याज्यानुवाक्याकथनं प्रायश्चित्तेष्टीनां स्थाने तत्तद्देवतायै पूर्णाहुतिविधानविकल्पकथनञ्च]

अग्ने दा दाशुषे रयिं, स यन्ता विप्र एषां, दीर्घस्ते अस्त्वङ्कुशो, भद्रा ते हस्ता सुकृतोत पाणी, वषट् ते विष्णवास आकृणोमि, प्र तत्ते

---

१. तु. आश्रौ ३, १३, २-११। २. नास्ति मै। ३-३. नास्ति ब[2]। †. तु. आश्रौ २, १, २५। ‡. २, १५, २। ४. °क्रमे ब[3,4]। ५. °वाक्ये ब[3,4]। ६-६. नास्ति ब[1,2,6] मै पू। ७-७. नास्ति पू। ८. तु. ऐब्रा ७, ९। ९. इष्टि ब[1,2,6] मै पू। १०-१०. नास्ति मूको। ११-११. नास्ति ब[1,4]। १२-१२. चन्द्रमा अभ्युदिति ब[1]; चन्द्रमा अभ्युदितेति ब[2,6] मै पू। १३. °वाक्ये ब[1,3,4] मै पू।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अद्य शिपिविष्ट नामेति । अपि वा प्रायश्चित्तेष्टीनां स्थाने तस्यै तस्यै देवतायै पूर्णाहुतिं जुहुयादिति विज्ञायते ॥ १४ ॥

अग्ने दा दाशुषे रयिम् (ऋ ३, २४, ५), स यन्ता विप्र (ऋ ३, १३, ३) इत्येते अग्नेर्दातुर्याज्यानुवाक्ये। दीर्घस्ते अस्त्वङ्कुशः (ऋ ८, १७, १०), भद्रा ते (ऋ ४, २१, ९) इत्येते[1] च इन्द्रस्य प्रदातुः। वषट् ते (ऋ ७, ९९, ७), प्र तत्ते [2]अद्य शिपिविष्ट नाम[2] (ऋ ७, १००, ५) इति विष्णोः शिपिविष्टस्य। शेषं पौर्णमासेन। अमावास्यायां[3] ये मध्यमास्तेषामग्नये दात्रे पुरोळाशम्[4]। ये स्थविष्ठास्तेषामिन्द्राय प्रदात्रे [5]दधनि चरुम्[5]। येऽणिष्ठास्तेषां विष्णवे [6]शृते चरुम्[6] इति[7]। एवमेतामिष्टिं[8] संस्थाप्य पुनरमावास्येन यजेत[9]। अपि वा प्रायश्चित्तेष्टीनां स्थाने तस्यै तस्यै देवतायै पूर्णाहुतिं जुहुयादिति विज्ञायते। अपि वा अयं विकल्पः[10]—प्रायश्चित्तेषु आम्नायेषु[11] या या इष्टयः तासामिष्टीनां स्थाने तस्यै तस्यै[12] देवतायै नाम्नाऽऽम्नातायै[13] चतुर्थ्या विभक्त्या स्वाहाकारेण पूर्णाहुतिः। स्रुचि[14] चतुर्गृहीतं गृह्यते। चतुर्थेन पूर्णां कृत्वा आहुतिं जुहुयाद् इति विज्ञायते इत्येवं विज्ञायते[15] श्रूयते। श्रुतिवचनादिष्टचा तुल्यः कल्पः[16]। अपि-शब्दः तुल्यविकल्पार्थः। अयं विधिः अयमपीति। वेति[17] विकल्पार्थे। प्रायश्चित्ताधिकारे पुनः प्रायश्चित्तग्रहणादनाम्नातेषु इष्टिप्राप्त्यर्थम्[18]। अन्यथाधिकृतानामेव[19] स्यात्। इष्टिग्रहणादिष्टीनामेव स्थाने आहुतिर्भवति। यदन्यत्[20] कर्म, तत्र[21] विद्यते। यथा समाम्नाये[22] प्रायश्चित्तस्थाने वचनादिष्टिधर्मः[23]। परिस्तीर्य ब्रह्माणं[24] दक्षिणतो यजमानं चोपवेश्य पत्नीं च[25] गार्हपत्यस्योत्तरतः, जुहूं[26] स्रुवमाज्यस्थालीं प्रोक्षणानि [27]एतान्यासाद्य[27] प्रोक्षेत्[28]। गार्हपत्ये आज्यं विलाप्य

---

१. इति ब[1-3,6] मै पू। २-२. ब[1,2,6] मै पू। ३. अगावास्यस्य मै; अमावास्यास्य ब[1,2,6] मै पू। ४. °ळाशः मूको। ५-५. दधति चरुः ब[1,2,6] मै पू; दधानं चरुम् ब[3,4]। ६-६. घृते चरुः ब[1,2,6] मै पू; शृते चरुः ब[3,4]। ७. नास्ति मूको; तु. तैसं २, ५, ५, २; बौश्रौ १७, ५०: ६-९। ८. एवमेषामिष्टिं ब[1]; एवमेनामिष्टिं ब[3,4]। ९. यजति ब[2-4] पू। १०. वा कल्पः ब[3,4]; ११. आम्नातेषु ब[3,4]। १२. नास्ति ब[1]। १३. नाम्नातां ब[1-4,6] पू; नाम्नातम् मै। १४. स्रुचः ब[1,2,6] पू। १५. ज्ञायते ब[1-4,6] पू; ज्ञाप्यते मै। १६. नास्ति ब[1,2,6] मै पू। १७. चेति ब[3,4]; नास्ति मै। १८. इष्टिषु प्राप्त्यर्थः (°र्थम् ब[1,4]) मूको। १९. °था कृता° ब[3,4]। २०. °न्यत्र ब[3,4]। २१. तत्र न ब[1,4]। २२. आम्नाते ब[1,6]; आम्नाये ब[2] मै पू। २३. वनादिष्टि° ब[1,2,6] पू; अवस्थानादिष्टि° मै; °दिष्टविधयः ब[3,4]। २४. ब्राह्मणं ब[1-4]; ब्राह्मणं मै पू। २५. नास्ति ब[1,4]। २६. जुहुं ब[3,4]; जुहूः मै। २७-२७. एतान्यस्तां च ब[1]; एतान्य (°न्या ब[6]) स्योच्च ब[2,6]; °द्य यच्च मै; °द्य च पू। २८. प्रोक्षण ब[1] मै पू; प्रोक्ष ब[2,6]।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

स्थाल्यां पवित्रमन्तर्धाय निरूप्य स्रुवसंमार्गं[1] कृत्वा स्थालीं स्रुवं[2] 'च गृहीत्वा' आहवनीयसमीपे कुशेषूपसाद्य इध्ममुपसमाधाय स्रुचि[4] चतुर्गृहीतं गृहीत्वा चतुर्थेन पूर्णां[5] कृत्वा देवतानाम्ना चतुर्थ्यन्तेन स्वाहाकारेण यजमानेनान्वारब्धे जान्वाच्याहुतिं हुत्वा व्याहृतीर्जुहुयात्[6] । ऐष्टिके कर्मणि देवतायां हविश्चतुरवत्तं गृह्यते, तद्धर्मत्वादिहापि चतुर्गृहीतं गृह्यते । अवषट्कारप्रदानेष्वध्वर्युरासीनो जुहोति । तस्यै तस्यै इति वीप्सावचनाद्[7] देवतानेकत्वे प्रतिदेवतं[8] जुहुयात् । देवतावचनाद् देवताया[9] [10]नाम्ना जुहुयात् न[†] याज्यानुवाक्याभ्याम्[‡] । श्रुत्यन्तरे तु याज्यानुवाक्याभ्यां श्रूयते । देवतायै[10] चतुर्थ्या निर्दिष्टत्वाच्चतुर्थ्या[11] विभक्त्या हूयते[12] । यथा—अग्नये पथिकृते स्वाहेति (ऐब्रा ७, ८) । पूर्णाहुतिमिति च वचनाच्चतुर्थेनापूर्य हूयते । जुहुयादिति चोदिते स्वाहाकारो भवति । श्रुतिप्रदर्शनाद् [13]विधिः प्रमाणं[13] भवति ॥ १४ ॥

[हविषां पतितस्यांशस्य मन्त्रेणाभिमर्शनविधानम्]

हविषां स्कन्नमभिमृशेद् देवाञ्जनमगन् यज्ञस्तस्य[14] माशीरवतु वर्धताम् । भूतिर्घृतेन मुञ्चतु यज्ञो यज्ञपतिमंहसः । भूपतये स्वाहा भुवनपतये स्वाहा भूतानां पतये स्वाहा । यज्ञस्य त्वा प्रमयोन्मयाऽभिमया प्रतिमया द्रप्सश्चस्कन्देति ॥ १५ ॥

आज्यादीनां पुरोळाशादीनां च हविषां स्कन्नं यत् पतितं तदभिमृश्य[15] जपेत्[16] --देवाञ्जनमगन् यज्ञः इत्येवं[17] यथाम्नातान्[18] मन्त्रान् ॥ १५ ॥

[परिधेर्बहिराहुत्या हूयमानायाः पतने आग्नीध्रकर्तृकं तद्धवनविधानम्]

आहुतिश्चेद् बहिष्परिध्याग्नीध्र एनां जुहुयात् ॥ १६ ॥

---

१. स्रुवसू (°सु ब[1] पू) वसंमार्गं ब[1,6] पू ; स्रु (श्रु ब[2]) वसंमार्गं ब[2-4]; रुक्ममार्गं मै । २. स्रुचं ब[1,6] मै । ३-३. चतुर्गृहीत्वा ब[1] । ४. स्रुवं ब[2] । ५. पूर्णां ब[3,4] । ६. आज्याहुतीर्जु° (°तिं जु° मै) ब[1,2,6] मै पू । ७. वचनात् ब[1,3,4,6] । ८. °दैवतं ब[1] । ९. तदेवादाय ब[3,4] । १०-१०. नास्ति ब[1] । †. नास्ति मूको । ‡. यथानुवाक्याभ्याम् ब[3,4] । ११. नास्ति ब[3,4] । १२. न हूयते ब[2] । १३-१३. विधिप्र° ब[1,2,6] मै पू । १४. द्र. काठसं. ३२, ६ । १५. स्वमभि° ब[2] पू ; अभि° ब[3,4] ; तमभि° मै । १६. य (या ?) जयेत् ब[3]; जुहुयात् ब[4] । १७. इति ब[3,4] । १८. यथा समाम्नातान् ब[3]; समाम्नातान् ब[4] ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[1]आहुतिर्हूयमाना चेद् यदि बहिष्परिधि† परिधेर्बहिः स्कन्देत्‡, आग्नीध्रः एनां स्कन्नामाहुतिं पाणिना गृहीत्वाऽग्नौ जुहुयात् तूष्णीम्[1]। बहिष्परिधीति[2] वचनादन्तःपरिधि[3] पतितामध्वर्युरेव जुहुयात् । एनामित्यनुच्यमाने सा न[4] संबध्यते ॥ १६ ॥

[आग्नीध्राय हुतवते पूर्णपात्रदानविधानम्]

हुतवते पूर्णपात्रं दद्यात् ॥ १७ ॥

हुता आहुतिर्येन स हुतवान् तस्मै हुतवते आग्नीध्राय पूर्णपात्रं दद्यात् । पूर्णपात्रं यवैः पूर्णं भवति (?) इत्यन्येषाम् । अस्मिन्निमित्ते चोदितं दक्षिणाकाले दद्यात् । ऐष्टिके कर्मणि [5]यद् दानं चोद्यते[5] तद् दक्षिणाकाले एव भवति । अतोऽन्यत्र अग्निहोत्रादिषु यत्र[6] चोदितं तत्रैव[7] दीयते, दक्षिणाकालाभावात्[8] । हुतवते इति वचनाद् ऋत्विग्भ्यो न दीयते ॥ १७ ॥

[द्वयोर्देवतयोरनुवाक्ययोर्याज्ययोराज्ययोरवदानयोर्हविषोर्वा विपरिहारे मन्त्रेणाज्याहुतिं हुत्वा मुख्यधनदानविधानम्]

देवते अनुवाक्ये याज्ये वा विपरिहृत्याऽऽज्ये अवदाने हविषी वा यद्वो देवा अतिपातयानि वाचा न प्रयुती देवहेळनम् । अरायो अस्माँ अभिदुच्छुनायतेऽन्यत्रास्मन्मरुतस्तन्निधेतन स्वाहेत्याज्याहुतिं हुत्वा मुख्यं धनं दद्यात् ॥ १८ ॥

देवते[9] अनुवाक्ये याज्ये वा विपरिहृत्य द्वे देवते विपरिहृत्य [10]अन्यमन्यस्य स्थाने[10] कृत्वा अग्निस्थाने[11] अग्नीषोमावावाहयेत्, [12]अग्नीषोमयोः स्थाने अग्निमावाहयेत्[12] । स विपरिहारः । द्वे अनुवाक्ये विपरिहृत्य अग्नेः अग्नीषोमीयाऽनुवाक्यां कुर्यात्; अग्नीषोमयोश्च आग्नेयीम् । एवं याज्ये विपरिहृत्य विपरिहारं कृत्वा आज्याहुतिं हुत्वा इति वक्ष्यति । द्वे[13] आज्ये

१-१. नास्ति ब[1] । †. °धिः मैं । ‡. यदि (यदा ब[6] मैं) स्कन्देत (°तू ब[3]; °न्दते ब[6]) ब[2,3,6] मैं पू । २. °रिधिरिति मैं । ३. °धेः ब[2-4] । ४. नास्ति ब[3,4] । ५-५. यदा न चेष्यते मैं । ६. यन्न ब[1,6] । ७. तन्नैव ब[1] । ८. °काले दद्यात् [3,4] । ९. नास्ति ब[3,4] । १०-१०. °मन्यस्थाने ब[6] । ११. आग्नेयस्थाने ब[3,4] । १२-१२. अग्निस्थाने अग्नीषोमावावाहयेत् मैं । १३. नास्ति ब[3,4] ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

विपरिहृत्य ध्रौवे ग्रहीतव्ये स्थाल्याः[1], स्थाल्या ग्रहीतव्ये ध्रुवाया[2] गृहीते[3]। अथ[4] अवदाने विपरिहृत्य अग्नये पूर्वमवदानम्। [5]पूर्वं गृहीते[5] पश्चादपरं[6] गृह्यते[7]। यदि विपर्यस्य गृह्णाति स विपरिहारः। [8]अग्नीषोमीयेषु अपरं पूर्वं गृह्यते, पश्चात् पूर्वं गृह्यते† यदि विपर्यस्य गृह्णाति स विपरिहारः[8]। द्वे हविषी वा विपरिहृत्य आग्नेयादवदाने ग्रहीतव्ये [9]अग्नीषोमीयाद् गृह्यते[9]। अग्नीषोमीयाद्[10] ग्रहीतव्ये[11] आग्नेयाद्[12] गृह्यते[13]। एतानि विपरिहृत्य उत्तरकालं स्थित्वा यद् वो देवाः (तु. तैब्रा ३, ७, ११, २) इत्यनेन मन्त्रेण आहुतिं हुत्वा धनं[14] दद्यान्मुख्यं श्रेष्ठं यदस्य गृहे पुष्कलं[15] स्यात् तद् दद्याद् इति। अध्वर्यूणां ब्रह्मा जुहोति, यजमानो दक्षिणाकाले ऋत्विग्भ्यो ददाति। [16]आज्याहुतिमित्याज्यग्रहणं बहूनामधिकाराद् आज्ये अवदाने हविषी† वेति[16] ॥ १८ ॥

[अप्रकृतदेवताया आवाहने स्मरणे पुनरुपोत्थाय प्रकृतदेवताऽऽवाहनविधानम्]

स्थानिनीमनावाह्य देवतामुपोत्थायाऽऽवाहयेत् ॥ १९ ॥

स्थानिनीं स्थानमस्या[17] विद्यते[18] सा[19] स्थानिनी, तां स्थानिनीं देवतामनावाह्य स्थाने यद्यन्या[20] देवता आवाहिता, यदि[21] स्मरेत्, तदा[22] उपोत्थाय स्थानिनीं देवतामावाहयेत्। तत ऊर्ध्वमुत्तरेषु निगमेषु[23] स्वस्थाने[24] तां निगमयेत्। यथा पौर्णमासे अग्नीषोमावनावाह्य तयोः स्थाने [25]इन्द्राग्नी चेदावाहयेत्[25], ततः स्मृत्वा[26] [27]उपोत्थायाग्नीषोमावावाहयेत्[27] ॥ १९ ॥

[मनसैव प्रकृतदेवताऽऽवाहनमतान्तरकथनमाज्येनाप्रकृतदेवताया यजनविधानम्]

मनसेत्येक आज्येनास्थानिनीं यजेत् ॥ २० ॥

---

१. नास्ति ब^{2,4} मै पू। २. जुह्वा मै। ३. °तम् मूको। ४. नास्ति ब^{3,4}। ५-५. पूर्वगृहीते ब^{1,3,4,6}। ६. पश्चादपि ब^{2}। ७. ते मूको। ८-८. नास्ति ब^{4}। †. ते मूको। ९-९. नास्ति ब^{2}; °याद्गृहीतं ब^{3,4}; °माद्गृ° मै; आग्नीषोमीयो ब^{6}। १०. °षोमीये ब^{3,4} मै। ११. गृह्यते ग्रहीतव्ये ब^{3}। १२. आग्नेयो ब^{3,4}; आग्नेया (°य्या मै) ब^{1,2} मै पू। १३. स गृ° मै पू। १४. दानं ब^{1,2,3} मै पू। १५. फलं मै। १६-१६. नास्ति ब^{4}। †. हवींषि ब^{1,2,6} मै पू। १७. °मस्यां ब^{1,2} मै पू; °मस्य ब^{1,4}। १८. विद्यात् ब^{3,4}। १९. नास्ति ब^{3,4}। २०. यदन्या ब^{3,4}। २१. यदा मै। २२. ततः ब^{3,4}। २३. °पु न ब^{2}। २४. स्वे स्थाने ब^{2,6} पू। २५-२५. इन्द्राग्नी देवता वावाहयेत् ब^{1,4}। २६. स्पृश्य ब^{1} मै पू; त्वा ब^{2}। २७-२७. नास्ति ब^{1,2,6} मै पू।

आश्व०—५०

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

उपोत्थाय स्थानिन्या देवताया मनसा आवाहनं कर्तव्यमित्येके आचार्याः। आज्येनास्थानिनीं यजेत् । [1]या अन्ते[1] देवता, ताम् इष्ट्वा प्राक् स्विष्टकृतः आज्येनास्थानिनीं देवतां यजेत् । नित्येन हविषा स्थानिनीमेव स्थाने यजेत् । तामेव निगमेषु[2] निगमयेद् आस्थानिन्या इज्यामात्रमेव । यद्यधिकां[3] देवतामावाहयेत्, तेनैव न्यायेन तामप्याज्येन [4]यजेद् निगमयेत्[4] ॥ २० ॥

॥ [इति] तृतीयस्य [5]त्रयोदशं खण्डम्[5] ॥

१-१. आज्येन ब[3,4] । २. नास्ति ब[1,4] । ३. अधिकां ब[1,4] । ४-४. यजेत्तस्मिन्निग° ब[1]; यजेत्तन्निग° ब[2,6] मै; यजेत निग° ब[1,4] । ५-५. त्रयोदशः खण्डः मै । †. °दशमं ब[1-4,6] पू ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ तृतीयेऽध्याये चतुर्दशः खण्डः

[हविषि क्वचिच्छृते क्वचिदश्रृते चतुर्णां पुरुषाणां पर्याप्तमोदनं ब्राह्मणान् भोजयेदिति विधानम्]

हविषि दुःश्रृते चतुःशरावमोदनं ब्राह्मणान् भोजयेत् ॥ १ ॥

[1]हविषि पुरोळाशे चरौ वा दुःश्रृते †कश्चिद् देशः श्रृतः कश्चिदश्रृत इति दुःश्रृतः† तस्मिन् दुःश्रृते[1] सति चतुःशरावं, शरावं[2] पुरुषान्नं भवति। चतुर्णां पुरुषाणां पर्याप्तमोदनं लौकिकेऽग्नौ[3] पक्त्वाऽथ[4] कर्मान्ते[5] ब्राह्मणान्[6] भोजयेत् । हविषि एकस्मिन्नपि बहुष्वपि[7] एतदेव । ब्राह्मणग्रहणाद् ऋत्विजो न भवन्ति ॥ १ ॥

[हविषि दग्धे शिष्टेनेष्ट्वा पुनर्यजनविधानम्]

क्षामे शिष्टेनेष्ट्वा पुनर्यजेत ॥ २ ॥

हविषि क्षामे [8]सति दग्धे[8] सति शिष्टेनेष्ट्वा पुनर्यजेत[9] । शिष्टेन [10]अवदानेन अवदानैकांशेन†[10] इष्ट्वाऽनन्तरं तेन हविषा पुनर्यजेत[11] । क्षाममवदानं[न ?] ग्राह्यमित्यर्थः[12] । स्थाने अवदानं न गृहीतमिति पुनरिज्या ॥ २ ॥

[सम्पूर्णे हविषि दग्धे पुनर्यजनविधानम्]

अशेषे पुनरावृत्तिः ॥ ३ ॥

अशेषे शेषे[13] अविद्यमाने सर्वस्मिन् क्षामे सति पुनरावृत्तिः[14] । उक्तम् आज्येनेष्टिं समाप्य पुनरिज्या (आश्रौ ३, १०, १९) इति ॥ ३ ॥

१-१. नास्ति ब[2] । †-†. कश्चिद्देशः श्रृतः कश्चिद् दुःश्रृत इति ब[1,6] पू ; कश्चिद्दुःश्रृतः कश्चिच्छृत इति ब[3,4] ; कश्चिदेकः श्रृतः कश्चिद् दुःश्रृत इति मै । २. नास्ति ब[4] । ३. लौकिकाग्नौ ब[2] । ४. पक्त्वाऽयं ब[1,2,6] मै पू । ५. °न्तेषु ब[3,4] । ६. °णं ब[1,2,6] मै पू। ७. नास्ति ब[3,4] । ८-८. सदग्धे ब[1,4] । ९. °जेत् ब[4] । १०-१०. अवकाशेन ब[1,4] । †. अवदानैकरोत् ब[1] ; अवदानावकाशेन ब[2] ; अवदानेदेशेन ब[6] ; अवदानै (°नौ मै) कोशेन मै पू । ११. °जेत् ब[1,4] । १२. °दानग्राह्य° ब[2-5] मै पू । १३. नास्ति ब[2-4] । १४. नास्ति मूको ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[प्रागावाहनाद्धविषि दुष्टे पुनर्यजनविधानम्]

प्रागावाहनाच्च दोषे ॥ ४ ॥

[1]प्रागावाहनाच्च दोषे पुनरावृत्तिः[1] ॥ ४ ॥

[अप्रधानेषु हविःषु दुष्टेष्वपि पुनर्यजनविधानम्]

अप्यत्यन्तं गुणभूतानाम् ॥ ५ ॥

अत्यन्तम् अप्रधानमित्यर्थः । अत्यन्तमपि अप्रधानमपि[2] गुणभूतानाम् अन्वायात्यानां हविषां दोषे सति [3]पुनरावृत्तिः । अपिशब्दः[3] समुच्चयार्थः । गुणभूतानि प्रधानानां पशुपुरोळाशमनु निरुप्यन्ते, यानि देवसुवादीनि[4] [5]देविकाहवींषि इत्येवमादीनि†[5], तेषां हविषां व्यापत्तौ ओळहासु देवतासु आज्येनेष्टिं समाप्य पुनरिज्या (आश्रौ ३, १०, १९) इति प्राप्ते इदमुच्यते ॥ ५ ॥

[स्विष्टकृतः प्राक् प्रधानभूतानां हविषां दोषे विधानम्]

प्राक् स्विष्टकृत उक्तं प्रधानभूतानाम् ॥ ६ ॥

हविषां यदुक्तं विधानम् आज्येनेष्टिं समाप्य पुनरिज्या (आश्रौ ३, १०, १९) इति तत् प्राक्[6] स्विष्टकृतो भवति । येषामावाहनं कृतं तानि प्रधानभूतानि । तेषां प्राक् स्विष्टकृतो [7]व्यापत्तौ आज्येन[7] समाप्य पुनरिज्या भवति । स्विष्टकृत ऊर्ध्वं यदि व्यापत्तिः आज्येन समाप्य तेन पुनरिज्या भवति । ओळहासु देवतास्वाज्येनेष्टिं समाप्य पुनरिज्या (आश्रौ ३, १०, १९) इति अविशेषवचनादा-समाप्तौ व्यापन्ने पुनरिज्या प्राप्ता भवति । तस्मादुच्यते—प्राक् स्विष्टकृतः इति ॥ ६ ॥

[अवदाने दुष्टे आयतनात्पुनरवदानग्रहणविधानम्]

अवदानदोषे पुनरायतनादवदानम् ॥ ७ ॥

[8]अवदानस्य दोषः[8] अवदानदोषः, तस्मिन्नवदानदोषे । अवदानं गृहीतं

१-१. नास्ति ब[१,२,६] मै पू । २. °नमिति मूको । ३-३. °वृत्यपि° ब[१,६] पू ; °वृत्ति अपि° ब[२]; °वृत्य अपि° मै । ४. °सूवासिनि ब[१]; सुवानि ब[२,३,६] मै पू । ५-५. देवताहवींषीत्ये° ब[२-४,६] मै पू । †. तु. आश्रौ ४, ११, ५ ; ६, १४, १५ ; आपश्रौ १३, १४, ८ । ६. प्रकारात् ब[३,४] । ७-७. व्यापत्ते स्वाज्येन ब[१,४] । †. व्यावृत्तौ मै । ८-८. नास्ति ब[४] ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यदि केशादिभिर्दुष्यते,[1] तस्मिन् दुष्टे सति अप्सु प्रक्षिप्य पुनरायतनादवदानं गृह्णीयात् । अवदानस्य[2] स्थानं श्रुतावाम्नातम् । गृहीते व्यापन्ने[3] सति तत्स्थाने अन्यदवद्यति[4] ॥ ७ ॥

[हविषि दग्धे शिष्टेन कृतस्य यजनस्य दक्षिणाया द्वेष्ट्रे दातव्यत्वम्]

द्वेष्ट्रे त्विह दक्षिणां दद्यात् ॥ ८ ॥

[5]प्रकृतमनुसृतम् । यत् पुनरुक्तं क्षामे शिष्टेनेष्ट्वा (आश्रौ ३, १४, २) इति । तेन तस्मिन् प्रयोगे या दक्षिणा, सा द्वेष्ट्रे देया न ऋत्विग्भ्य इत्येवमर्थः†[5] ॥ ८ ॥

[उर्वराया भूमेर्दक्षिणात्वेन दानविधानम्]

दक्षिणादाने उर्वरां दद्यात् ॥ ९ ॥

सस्यक्षेत्रमुर्वरा इत्युच्यते । अन्वाहार्यप्रतिग्रहे कृते अन्वाहार्यादन्या या दक्षिणास्तासां प्रतिग्रहणकालो भवति ॥ ९ ॥

[अनपराद्धेऽपि कर्मणि कपाले भिन्ने मन्त्रेण तत्संधाय मन्त्रेण जलप्रक्षेपविधानम्]

कपालं भिन्नमनपवृत्तकर्म गायत्र्या त्वा शताक्षरया संदधामीति संधायापोऽभ्यवहरेयुरभिन्नो घर्मो जीरदानुर्यत आर्तस्तदगन् पुनः । इध्मो वेदिः परिधयश्च सर्वे यज्ञस्याऽऽयुरनुसन्तरन्तु । त्रयस्त्रिंशत्तन्तवो यान् वितन्वत इमं यज्ञं स्वधया ये यजन्ते । तेभिश्छिद्रं प्रतिदध्मो यजत्र स्वाहा यज्ञो अप्येतु देवानिति ॥ १० ॥

नापवृत्यते[6] कर्म यस्य तत् अनपवृत्तकर्म[7] । [8]उद्वासितम् अपवृत्तं[8] कर्म भवति । कपालं यद्यनपवृत्तकर्म भिद्यते, भिन्नं सत्[9] गायत्र्या त्वा इत्येतेन[10]

---

१. तु. आश्रौ ३, १०, २० । २-२. स्य ब^{2} । ३. व्यापत्तौ मूको । ४. अनेद्यद्यति ब^{1}; अवददाति ब^{2} मै ; अदादाति ब^{3,4}; अन्यदवदाद्यति ब^{6}; अवदानं ददाति पू । ५-५. नास्ति ब$^{2-4}$ । †. इत्यर्थः पू ; दानंकुर्वन् दद्यात् मै । ६. नापवृज्यते मूको । ७. °पवृत्त ब$^{1-4}$ पू । ८-८. नास्ति ब^{1,4}; °वृत्त ब^{1,2} मै पू । ९. सतं ब^{1,2} मै पू ; नास्ति ब^{3,4} ; संतं ब^{6} । १०. इत्यनेन ब^{2} ; तु. मैसं १, ४, १३ ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यथासमाम्नातेन मन्त्रेण कपालं संधाय अपोऽभ्यवहरेयुः 'अप्सु प्रक्षिपेयुः'[1] अभिन्न इत्येतौ मन्त्रौ[2] जपित्वा प्रक्षिपेयुः । अनपवृत्तकर्मेति वचनाद् अपवृत्ते भिन्ने प्रायश्चित्तं न[3] विद्यते । इहोक्तमनपवृत्तकर्मेति इदं प्रदर्शनमन्यत्रापि एवंव कपाले नष्टे (आश्रौ ३, १३, ९) इति । तदपि[4] अनपवृत्तस्य नष्टे भवति ॥ १० ॥

[यज्ञीयद्रव्येषु मार्जारादिभिरवलीढेषु केनचिद्वाचा कुत्सितेषु पूर्वोक्तप्रायश्चित्तस्य करणीयत्वम्]

एवमवलीळ्हाभिक्षिप्तेषु ॥ ११ ॥

यथा कपालम् अनपवृत्तकर्म भिन्नं सत्[5] अप्सु प्रक्षिप्यते[6] । एवमन्येष्वपि द्रव्येषु भिन्नेषु अवलोळ्हाभिक्षिप्तेषु [7]च मार्जारादिभिरवलीळ्हेषु केन चिद्†वाचाऽभिक्षिप्तेषु[7] कुत्सितेषु[8] इमानि पात्राणि उच्छिष्टेन सिक्तानीति एवं दुष्टेषु सत्सु ॥ ११ ॥

[कपालादन्येषु मृन्मयपात्रेषु कुत्सितेषु तेषां मन्त्रेण जले प्रक्षेपणविधानम्]

अप एवान्यानि मृन्मयानि[9] । भूमिर्भूमिमगान्माता मातरमप्यगात् । भूयास्म पुत्रैः पशुभिर्यो नो द्वेष्टि स भिद्यतामिति ॥ १२ ॥

[10]एवं† दुष्टानि कपालादन्यानि मृन्मयानि‡[10] पात्राणि[11] अप एव अप्स्वेव प्रक्षिपेयुः भूमिः इत्येतेन[12] मन्त्रेण[13] । यथा चरुस्थाली सान्नाय्यस्थाली पिष्टोद्वपनी, एवमादीनां पात्राणां संसादनादि यावद्बर्हींषि तेषु निष्पद्यन्ते [14]तावदेव तद्[14] भवति हुतेषु हविःषु आ समाप्तेरेतस्मिन्नन्तरा[15] काले[16] एतद् भवति । अहर्विर्हविषां दुष्टानाम् उक्तम्—भिन्नसिक्तानि चापोऽभ्यवहरेयुः (आश्रौ ३, १०, २१-२२) इति । एवं[17] वचनादप्सु प्रक्षेपे प्राप्ते अप एव इति न वक्तव्यम् । इदं प्रयोजनम् । भिन्नानां पात्राणां संधायापोऽभ्यवहरेयुः (आश्रौ ३, १४, १०)

१-१. नास्ति ब[3,4] । २. तु. तैसं १, ५, १०, ४ । ३. नास्ति ब[2] । ४. तदापि ब[2]; यद्यपि ब[3,4] । ५. सन्तम् ब[1,2,6] मै पू । ६. प्रक्षिपेत् ब[1,6] पू । ७-७. नास्ति मै । †. °चिद्वावाभि– ब[1,2,6] पू; °चिद्वाभि– ब[1,4] । ८. कुत्सिते ब[1,6]; कुत्सते ब[2] पू; कुत्सुते मै । ९. मृण्मयानि मै । १०-१०. नास्ति ब[2] । †. नास्ति ब[3,4] । ‡. मृण्मयानि मै । ११. पात्रादि (°दी ?) नि ब[4] । १२. इत्यनेन ब[3,4] । १३. तु. षब्रा १, ६, २० ; आपश्रौ ३, २०, ९ । १४-१४. तावदेतद् मै । १५. °न्तरे मै । १६. कपाले ब[1,4] । १७. एव ब[1,2,6]; एव दुष्टमिति ब[3,4] ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

'इति प्राप्ते[१] अप एवेति वचनादप्स्वेव प्रक्षिपेन्न सन्धानमिति। अस्मादारम्भाद् भिन्नस्याप्यधिकारः। [२]मृन्मयानीति† वचनात् कपालेष्वपि अवलीढाभिक्षिप्तेषु‡ प्राप्तेषु अन्यानीत्युच्यते। कपालादन्यानि यानि[२] मृन्मयानि[३] तेषामेतद् विधानम्। मृन्मयानीतिवचनात् मृन्मयानामेतद्विधानं न दारुमयादीनाम्[४]। एवमित्यतिदेशात् स एव मन्त्रः[५] प्राप्तः। तस्मादन्यो[६] [७]मन्त्र आम्नातः। एवमित्यतिदेशादनपवृत्तस्य भिन्नस्यैव भवति। एवमवलीढाभिक्षिप्तान्यप एवान्यानि मृन्मयानि। द्वितीयादेशे कर्तव्ये अवलीढाभिक्षिप्तेष्विति सप्तमीवचनाद्[७] न केवलं मृन्मयेष्वेव[८] अन्येष्वपि अवलीढाभिक्षिप्तेषु भवति[९] दारुमयेषु कपालेषु एतद्[१०] एवमित्यतिदेशान् मन्त्रः प्राप्तः स एव। अप एवेति वचनाद् मन्त्रो न भवति। अप एव प्रक्षिपेत्, [११]न मन्त्रं ब्रूयादिति[११]। [१२]मृन्मयेष्वनुवचनान्मन्त्रः[१२]। दारुमयेषु तु भिन्नेषु आहवनीये प्रहरणमाध्वर्यवे आम्नातम्[१३]। लौहायसाश्ममयादीनां[१४] तु दुष्टानां शौचं धर्मशास्त्रे[१५]। तदेतदश्ममयानां[१६] दारुमयानां[१७] च प्राप्ते श्रुतावेवैतद्[१८] विहितम् ॥ १२ ॥

[पुरोडाशे स्फुटिते उत्पतिते वा बर्हिष्येनं निधायाभिमन्त्रणविधानम्]

यदि पुरोळाशः स्फुटेद् वोत्पतेत वा बर्हिष्येनं निधायाभिमन्त्रयेत किमुत्पतसि किमुत्प्रोष्ठाः शान्तः शान्तेरिहाऽऽगहि। अघोरो यज्ञियो भूत्वाऽऽसीद सदनं स्वमासीद सदनं स्वमिति मा हिंसीर्देवप्रेरित आज्येन तेजसाऽऽज्यस्व मा नः किंचन रीरिषः। योगक्षेमस्य शान्त्या अस्मिन्नासीद बर्हिषीति ॥ १३ ॥

यदीत्यनित्यभावे। यदि[१९] पुरोळाशः पच्यमानः स्फुटति द्विधा त्रिधा भिद्यते। यदि वा उत्पतति[२०] स्थानात्[२१] स्थानान्तरं यदि गच्छति, मण्डूक इव स[२२]

१-१. नास्ति ब[१,२,३] मै पू। २-२. नास्ति ब[१,४]। †. मृण्म° मै। ‡. °लीढाभिवक्षि° ब[१]; °लीढावक्षि° ब[२] मै पू। ३. मृण्म° मै। ४. दारुपात्रादीनाम् ब[१,३]; दारुणादीनाम् ब[१,४]; दार्वादीनाम् मै। ५. मनु (:?) ब[१,२] मै पू। ६. तस्मात् ब[१,२,३] मै पू। ७-७. नास्ति ब[१,२,३] मै पू। ८. मृन्म (मृण्म मै) यान्येव मूको। ९. नास्ति ब[१,३] मै पू। १०. एतेषु ब[१,२,३] मै पू। ११-११. तमनु ब्रू° ब[१,२] मै; तमनयाब्रू° ब[१,४]; त मंत्रं ब्रू° ब[३]; न मन्त्रं ब्रू° पू। १२-१२. °येषु तु व° मै पू। १३. तु. आपश्रौ ९, १६, ३। १४. लोहाय° ब[२] मै। १५. तु. पराशरसं ३, २६; २७। १६. °मयादीनां ब[३,४]। १७. नास्ति ब[३,४]। १८. श्रुतौ च वैतद् ब[३,४]; श्रुतावेव तद् मै। १९. नास्ति मै। २०. चोत्पतति ब[२]; वात्येति मै। २१. न ब[३,४]; नास्ति ब[१]। २२. नास्ति मै।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

उत्पतितो[1] भवति, एतस्मिन्निमित्ते अन्तर्वेदि बर्हिषि एन पुरोळाशं निधाय ब्रह्माऽभिमन्त्रयेत अभिमृश्य मन्त्रं ब्रूयात् । अयमेव मन्त्रः स्फुटिते उत्पतिते चोभयलिङ्गत्वात्[2] किमुत्पतसि किमुत्प्रोष्ठाः इति । बर्हिष्येनं[3] निधायेति वचनात् पच्यमानस्यैतदुत्पद्यते[4] इति ज्ञानं भवति । वेति विकल्पार्थे[5] । अस्मिन्निमित्ते अत्रान्वेति[6] [7]ब्राह्मणवाक्यत्वाद् द्विर्वाशब्दः[7] ॥ १३ ॥

[अग्निहोत्रार्थमग्नौ मथ्यमानेऽनुत्पन्ने सत्यन्येन लौकिकाग्निना कर्मकरणविधानम्]

अग्निहोत्राय कालेऽग्नावजायमानेऽप्यन्यमानीय जुहुयुः ॥ १४ ॥

अग्निहोत्रमिति च कर्मनामधेयम् । अग्निहोत्रार्थे[8] अपराह्णे गार्हपत्यं प्रज्वल्य (आश्रौ २, २, १) इति एतस्मिन्[9] काले यद्यनुगतो भवति गार्हपत्यः[10], ततः स्वेभ्य एनमवक्षामेभ्यो मन्थेयुः (आश्रौ ३,१२,२१), क्षामाभावे भस्मनाऽरणी संस्पृश्य मन्थयेत् (आश्रौ ३, १२, २२) तमेव मन्त्रं जपित्वा । यदि मथ्यमानो न[11] जायते, आदित्यश्चाभ्यस्तमेति अभ्युदेति वा[12], [13]तत्र अग्न्याधेयं[13] पुनराधेयं वा इत्युक्तम्[14] । तस्मादिदमुच्यते । कालेऽग्नावजायमाने प्रागस्तमनाद् अन्यम् अनधिकृतं लौकिकमग्निम् आनीय तस्मिन्[15] लौकिकेऽग्नौ अग्निहोत्रं जुहुयुः यथोक्तेन विधानेन अनस्तमिते लौकिकमग्निमानीय मन्त्रेण विहृत्यास्तमिते जुहुयात् । अपि-शब्दं कुर्वन् कालः[16] प्रधान[17] इति दर्शयति—अप्यन्यमानीय[18] जुहुयात्, न च कालातिक्रम इति[19] । अग्नावजायमानेऽप्यन्यमानीयेति वचनाद् अन्योऽग्निर्नित्यस्य[20] स्थाने चोदितः । अन्यस्याग्नेर्ये धर्मा विहारोपदिष्टाः ते लौकिकस्यापि भवन्ति, [21]समानजातिन्यायात्[†] । ब्राह्मणवाण्यादिषु[‡] तु[φ] अनग्नौ होमेषु विहारोपदिष्टा[21]

---

१. उत्पन्नो ब[1,2,6] मै पू । २. वोभय° ब[3,4] । ३. बर्हिषि ब[3,4] ।
४. पद्यमान° ब[2]; °मानस्यैवोत्प° ब[3,4]; यजमान° मै । ५. °ल्पार्थं ब[1,4] ।
६. अत्रन्वा इति ब[1,6]; अन्वा इति ब[2]; अन्या इति ब[3,4]; अत्रन्ना इति पू ।
७-७. °वाक्यात्तत्रातरं वर्नीयशब्दः ब[4] । तु. ऐब्रा ७, ५ । ८. °होत्रार्थेभ्यः ब[3,4]; °होत्रार्थेभि मै । ९. तस्मिन् मूको । १०. °पत्य ब[1,2] पू; °पत्यं ब[3,4] ।
११. नास्ति ब[4] । १२. नास्ति मूको । १३-१३. मन्वग्न्या° ब[2] मै पू; तमन्वग्न्या° ब[1,6] । १४. तु. आश्रौ ३, १२, २९ । १५-१५. नास्ति ब[1,2,6] मै पू ।
१६. कालं ब[1,2]; काले ब[4] मै पू; काल ब[3] । १७. प्रधानं ब[1] । १८. अथान्य° ब[3,4] । १९. इष्यति (°ते?) ब[3,4] । २०. अथाग्निमित्यस्य ब[1,4]; °नित्य ब[2] मै ।
२१-२१. नास्ति ब[6] । †. °जातीयन्या° ब[1,4] मै । ‡. तु. आश्रौ ३, १४, १६ ।
φ. नास्ति ब[4] ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्रायश्चित्तानि

[1]धर्मा† न भवन्ति[1], गार्हपत्यादुद्धरणं[2] गार्हपत्यावेक्षणम्[3] अपरयोर्होमः, अग्रेणाहवनीयं गत्वा समिध आदध्याद् इत्येवमादिकाः[4] ॥ १४ ॥

[लौकिकाग्नेरभावे ब्राह्मणपाण्यादिषु सप्तसु पूर्वपूर्वालाभे उत्तरोत्तरे होमविधानम्]

पूर्वालाभ उत्तरोत्तरम् ॥ १५ ॥

ब्राह्मणपाण्यजकर्णदर्भस्तम्बाप्सु काष्ठेषु पृथिव्याम् ॥ १६ ॥

लौकिकमग्निमादिं[5] कृत्वा सप्तसु द्रव्येषु[6] होमो विधीयते। लाभे सति पूर्वस्मिन्नेव [7]हूयते, नोत्तरे[7]। [8]यदा पूर्वालाभस्तदोत्तरे हूयते। एवमुत्तरोत्तरं पूर्वस्य पूर्वस्यालाभे उत्तरोत्तरे[8] हूयते। लौकिकस्य अलाभे ब्राह्मणपाणौ, पाण्यभावे अजकर्णे, अजकर्णस्याभावे दर्भस्तम्बे[9], दर्भस्तम्बाभावेऽप्सु[10], [11]अपामभावे काष्ठेषु, काष्ठानामभावे पृथिव्याम्। अनुकल्पदर्शनार्थः सूत्रारम्भः। तुल्येषु सत्सु†[11] यस्मिन् कस्मिंश्चिद् होमः प्राप्नोति। [12]ब्राह्मणपाणिश्च अजकर्णश्च दर्भस्तम्बश्च आपश्च। ब्राह्मणस्य दक्षिणे[12] [13]पाणौ। अजस्य दक्षिणे कर्णे। एकाङ्गवचने दक्षिणम्[13] (आश्रौ १,१,१२) इति वचनाद् [14]दक्षिणाङ्गे भवति[14]। दर्भस्तम्बे[15] अप्सु इत्येषाम्[16] [अभावे] [17]उत्तरोत्तरे† जुहुयात्[17]। तत्र पाणौ चेद् वासेऽनवरोधः (आश्रौ ३, १४, १८) इति वचनादेकस्मिन् पाणौ होमो भवति, न पाण्योः। अनस्तमित एव[18] संनिहितं कृत्वा अस्तमिते जुहुयात्। परिसमूहनपर्युक्षणे भवतः [19]अग्निसंस्कारत्वात्। यो यमपि[19] परोक्षाग्निहोमविधानम्। अग्निर्वा एष वैश्वानरः पञ्चमेनिर्यत्[20] पुरोहितः (ऐब्रा ८, २५) इति श्रुतिः। उदकधारा न विद्यते[21] विहाराभावात्। अधिश्रयणं[22] न विद्यते अङ्गाराभावात्[23]। अग्न्यभावात्[24] प्रतितपनं[25]

१-१. नास्ति ब[6]। †. ते लौकिकधर्मा ब[1,4]। २. नास्ति ब[1]।
३. धाराहरणं ब[2] मै; नास्ति पू। ४. °मादि मूको। ५. °काग्निमादिं मै; °मादि ब[2-4] पू। ६. नास्ति ब[2]। ७-७. हूयमानेनोत्तरे ब[1,6] मै पू; °त्तरेषु ब[3,4]। ८-८. नास्ति ब[1,2,6] मै पू। ९. नास्ति ब[1,2] पू। १०. तस्याप्यभा° ब[3,4]; स्तम्बाभा° ब[6]। ११-११. नास्ति ब[1,2,6] मै पू। †. अप्सु ब[3,4]। १२-१२. ब्राह्मणपाणिम् ब[1,6] मै पू। १३-१३. नास्ति ब[1,6] मै पू। १४-१४. नास्ति ब[3,4]। १५. नयादर्भं° ब[1]; अदर्भं° ब[2]। १६. एतेषाम् ब[3,4]। १७-१७. उत्तरे ब[1] पू। †. °त्तरं ब[6]। १८. एवं ब[2-4] मै। १९-१९. °रे चाद्योयमपि ब[2]। २०. यत् मूको। २१. विद्यन्ते ब[1]। २२. °श्रयणे ब[1]; °श्रपणं ब[2] पू। २३. नास्ति ब[4]। २४. स्त्र्ययग्ने गूभावात् ब[1]; अग्निभावात् ब[2]; अग्नेरभावात् ब[6]; अग्निनाभावात् मै; नास्ति पू। २५. प्रतितापं मै।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

न विद्यते पाणौ । उत्तरतः कुशेषूपसादयित्वा[1] ओमुन्नयानीत्युक्त्वा उन्नीय स्थालीमभिमृश्य[2] समिधं स्रुचं च अपरस्यां दिशि कुशेषूपसाद्य जान्वाच्य समिधमाधाय अप उपस्पृश्य हुत्वाऽवेक्षणं न विद्यते[3] गार्हपत्याभावात्[4] । अथोत्तरां हुत्वाऽऽनुप्रकम्प्य कुशमूलेषु निमृज्य पितृभ्योऽवनीय अप[5] उपस्पृश्य (तु. आश्रौ २, ३, २०-२३) उदङ्ङावृत्य भक्षयेत् । [6]भक्षयित्वाऽभ्यात्ममपः (आश्रौ २, ४, १२) इति स्रुचोऽभिसम्बन्धादपां[6] सेचनं भवति । षष्ठी लुप्यते गार्हपत्याभावात्[7] । प्रतितपनं न विद्यते अग्न्यभावात् । वेद्यभावात् परिकर्मिणे[8] एव प्रयच्छेत् । गार्हपत्यदक्षिणाग्न्योरभावात् तयोर्होमो न विद्यते । अग्न्यभावात् समिदाधानं न विद्यते । इन्धनार्थत्वाद् दीदिहि (आश्रौ २, ४, १९) इति लिङ्गदर्शनाद्[9] इन्धनाय पर्युक्षणसमूहने तु भवतः पूर्ववेव[10] उत्तरेष्वपि द्रव्येषु[11] । चतुर्णामेव द्रव्याणां समासेन वचनं तुल्यत्वात्[12] । [13]तुल्यं हि व्रतविधानम् । इतरेषु तु व्रताभावादसमासः । काष्ठेषु, एषामभावे काष्ठेषु जुहुयात्[13] । अग्नेरुक्तो विहारः । काष्ठेषु[14] विहरणं न प्राप्नोति । विहाराभावाद् विहारोपदिष्टानि कर्माणि लुप्यन्ते, यथा पाणिहोमे । पृथिव्याम्, काष्ठाभावे पृथिव्यां जुहुयात् । पृथिव्या एकत्वाद् विहरणं न संभवति । विहाराभावाद् विहारोपदिष्टानि न विद्यन्ते, [15]यथा पाणिहोमे । यथा[15] पृथिव्यामेवमप्सु होमेऽपि तुल्यम् ॥ १५-१६ ॥

[पूर्वोक्ते हुत्वा पुनर्मन्थनम्]

हुत्वा त्वपि मन्थनम् ॥ १७ ॥

एवमन्ते अभावे[16] [17]यज्जात्यं स्याद्यल्लभेत[17] तस्मिन् हुत्वा तदानीमेव मन्थने[18] च[19] प्रायश्चित्तेष्टिं[20] कुर्यात् । तु-शब्दोऽवधारणार्थो[21] भवति, हुत्वा तदानीमेव मन्थनमिति । गार्हपत्यो नित्योऽजस्रः । तस्यानुगमस्य[22] मुहूर्तमप्युपेक्षणमन्याय्यम्[23] ।

---

१. कुशेषु साद° ब[1,2,6] मै पू । २. °भिस्पृश्य ब[6] । ३. विद्यात् ब[3,4] । ४. नास्ति ब[3,4] । ५. उत्तरमप ब[3,4]; नास्ति ब[6] । ६-६. °त्ममुपस्रुचोभिसं° ब[1,2,6] मै पू; °त्ममपः स्रुचोऽपिसं° ब[3,4] । ७. तु. आश्रौ २, ४, १४ । ८. °कर्मणे ब[2] मै पू । ९. लिङ्गप्रद° ब[1] । १०. °त्रैव ब[1,2,6] मै पू; पूर्वमेवम् ब[1,4] । ११. °षु च ब[1,6] मै पू । १२. इहोक्तत्वात् ब[3,4] । १३-१३. नास्ति मै । १४. काष्ठे ब[3,4,6] । १५. तथा ब[6] । १६. अभावेन ब[1,2,6] मै पू । १७-१७. यद्यन्यस्वाध्यायाल्लभेत ब[1]; यद्यन्यस्याध्यायाल्लभेत ब[2]; यद्यन्यस्याद्यल्लभेत ब[6] मै; यद्यन्यस्याद्ययाल्लभेत पू । १८. °नं ब[3,4,6] पू । १९. नास्ति ब[3,4] । २०. तु. आश्रौ ३, १२, २१-२६ । २१. °र्थे ब[3,4,6] मै पू । २२. °गम्यस्य ब[1,2,6] मै पू । २३. °मन्यायं ब[1,6] पू; °मनाप्यं ब[1,4] ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

प्रायश्चित्तानि

Digitized by Madhuban Trust

तस्माद् हुत्वैव मन्थयेत् । पूर्वमन्थनं तु पूर्वं येन प्रारब्धं [1]तेनैव कर्म कर्तव्यम् । यदि क्षामेभ्यः† प्रारब्धं तेभ्य एव मन्थयेयुः‡ । यद्यरणीभ्यांϕ प्रारब्धं[1] ताभ्यामेव । अपि-शब्दः समुच्चयार्थः । मन्थनं कृत्वाऽनुगतेष्टिं कुर्याद् इत्यर्थः । तत इष्टिरग्निस्तपस्वानिति (आश्रौ ३, १२, २६) [2]तदानीमेवेष्टिं, पूर्णाहुतिं[2] वा जुहुयात्[3] ॥ १७ ॥

[पूर्वनियमेन पाणौ हवने कृते ब्राह्मणानामभ्यागतानां वासेऽनवरोधः कर्तव्यः]

पाणौ चेद् वासेऽनवरोधः ॥ १८ ॥

पाणौ चेद् यदि पूर्वं हुतमग्निहोत्रं वासेऽनवरोधः अभ्यागतस्य ब्राह्मणस्य अवरोधो न कर्तव्यः, प्रत्याख्यानं न कर्तव्यम् । आसन-शयन-भोजनादिभिर्यथाशक्ति पूजयेत्, एतद् हुतं[4] भवति, [5]ब्राह्मणमेव, नान्यं वर्णं[5], तस्य हि पाणौ कृतत्वात् ॥ १८ ॥

[पूर्वोक्तानुसारेणाजकर्णे हुतेऽजमांसभक्षणवर्जनम्]

कर्णे चेन्मांसवर्जनम् ॥ १९ ॥

[6]अजकर्णे चेद् हुतं भवति, मांसवर्जनं† ‡मांसरसवर्जनं‡ व्रतं भवति । अजमांसस्यैव वर्जनं[6], नान्यस्य, तस्य [7]कर्णे हुतत्वात्[7] । एवमाध्वर्यवेऽप्युक्तम्[8] ॥ १९ ॥

[दर्भस्तम्बे हुते न दर्भस्तम्बेऽधिशयनम्]

स्तम्बे चेन्नाधिशयीत ॥ २० ॥

स्तम्बे चेद् हुतं भवति दर्भस्तम्ब एव प्रस्तरे न शयीत । एवमाध्वर्यवेऽप्युक्तम्[9] ॥ २० ॥

१-१. नास्ति मै । †. क्षामे ब[1,4] । ‡. मन्थेयुः ब[1,3,4] पू । ϕ. अयार° ब[3,4] । २-२. तदानीं वेष्टिपूर्वाहुतिं ब[2] मै । ३. तु. आश्रौ ३, १३, १४ । ४. एतद्व्रतं मै । ५-५. ब्राह्मणवर्णं मै । ६-६. नास्ति ब[1,2,6] मै पू । †. मांसस्य वर्जनं ब[1] । ‡-‡. मांसवर्जनं ब[3,4] । ७-७. त्वजकर्णहुतत्वात् ब[3,4] । ८. तु. काश्रौ २५, ४, ४ ; आपश्रौ ९, ३, ५ ; ६ । ९. तु. काश्रौ २५, ४, ५ ; आपश्रौ ९, ३, ९-१० ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[अप्सु हुतेऽप: शोभनाशोभनत्वविवेकपरिहरणम्]

अप्सु चेदविवेक: ॥ २१ ॥

अप्सु चेद्धुतं भवति, अविवेक:[1] इमा आप: शोभना [2]इमा आप: अशोभना[2] इति पृथक्त्वेन[3] विशेषाविवेककरणम्[4] । [5]विशेषप्रतिषिद्धाप्सु तु कर्तव्य[5] एव । न [6]वर्णगन्धरसदुष्टाभिर्याश्च स्युरशुभागमा:[6] (वाध ३, ३६) इति ॥ २१ ॥

[पूर्वोक्तानां व्रतानां संवत्सरं यावज्जीवं वा कर्तव्यत्वम्]

एतत् सांवत्सरं व्रतं यावज्जीविकं वा ॥ २२ ॥

[7]एतद् यदुक्तं[7] व्रतम् एतत् सांवत्सरं[8] भवति । संवत्सरे भवं सांवत्सरम् । संवत्सरम्[9] एतद् व्रतं भवति । व्रतकालस्यानियमे प्राप्ते कालनियम: क्रियते सांवत्सरमिति[10] । यावज्जीविकं वा । यावज्जीवति तावत्काले भवं यावज्जीविकं वा[11] भवतीति विकल्प: ॥ २२ ॥

[द्वयोराहुत्योर्मध्येऽग्नेरुपशमने हिरण्य उत्तराहुतिहवनम्]

अग्नावनुगतेऽन्तराहुती हिरण्य उत्तरां जुहुयाद्धिरण्य उत्तरां जुहुयात् ॥ २३ ॥

अग्नावनुगते उपशान्ते अन्तरा आहुती[12] आहुतिश्चाहुतिश्च आहुती अन्तरा मध्ये । द्वयोराहुत्योर्मध्ये चेदग्निरनुगच्छेद् उत्तरस्या आहुत्या [13]अर्थे पुन: प्रणयने प्राप्ते इदमुच्यते—हिरण्य उत्तरां जुहुयात्[13] । तत्स्थाने[14] हिरण्यमाधाय[15] [13]तस्मिन् हिरण्ये[13] उत्तरामाहुतिं जुहुयाद् [16]होमसमाप्तौ हिरण्यमेव भवति[16], न पुनरग्नि:[17] । अग्ने: प्रजातं[18] परि यद्धिरण्यम् (खि ४, ६, ५-१०) इति मन्त्रै:[19]

---

१. नास्ति मूको । २-२. नास्ति ब[1,3,4] पू । ३. अन्यथा क्षाम ब[3,4] ।
४. विशेषकरणं ब[1,2,3] मै पू । ५-५. °षिद्धास्तु न कर्तव्या: मूको । ६-६. वर्णस (°सं ब[1]) दुष्टाद्भिर्जुष्टा स्युरशुभागमा: ब[1,2,3] मै पू ; वर्णसदुष्टा सुरसभागमा: ब[1]; वर्णसदुष्टा-सुरसशुभागमा: ब[4] । ७-७. यद्यदुक्तं ब[1] ; एतदुक्तं मै । ८. संव° ब[6] ।
९. नास्ति मै ; सांव° ब[6] । १०. °रान्तमेव ब[1,4] । ११. नास्ति ब[2]; च ब[3,4] ।
१२. नास्ति मूको । १३-१३. नास्ति ब[1,4] । १४. स्थाने ब[1,4] । १५. °ण्यं निधाय ब[1,4] । १६-१६. नास्ति मै । १७. °रग्निम् ब[1,2,3] मै पू ।
१८. प्रयातं मूको । १९. द्वाभ्यां स ब[3,4] ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

[1]हिरण्य उत्तरां जुहुयात् । अध्यायान्तलक्षणः† अभ्यासो[1] यथा ब्राह्मणे । [2]परिसमाप्ता हविर्यज्ञाः सप्रायश्चित्तिकाः[2] ॥ २३ ॥

[॥ इति तृतीयाध्यायस्य चतुर्दशं खण्डम् ॥]

[3]इति† वाराहदेवव्रातस्य कृतौ[3] सूत्रव्याख्यायां तृतीयोऽध्यायः समाप्तः[4] ॥ ३ ॥

१-१. नास्ति ब[3,4] । †. ॐ इत्यध्यायान्त° ब[1,2,1] पू । २-२. समाप्ता हविर्यज्ञा न प्रायश्चित्तिका । ३-३. वा (व ब[2]) राहदेवकृतौ ब[1,3,1] मं पू । †. नास्ति ब[4] । ‡. वा (व ब[4]) राहेदेव° ब[3,4] । ४. एप शके १६६० कालयुक्त-नामसंवत्सरे पौषमासे कृष्णपक्षे नवम्यामिन्दुवासरे कर्नाटकदेशे नर्गुन्दग्रामे नामज्योतिनामक गोविन्दभट्टात्मजरामेश्वरेणायं श्रौतसूत्रभाष्यग्रन्थो लिखितः । स्वार्थं परार्थं च । शुभमस्तु । ७ । ७ । ७ । यादृशं पुस्तकं दृष्टं तादृशं लिखितं मया । यदि शुद्धमशुद्धं वा [मम] दोषो न विद्यते । गंगार्पणमस्तु ॥ ७ । ब[1]; पुस्तके-यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया । यदि शुद्धमशुद्धं वा मम दोषो न विद्यते ॥ ऋत्विगात्मा धनं जाया शुद्धं यस्य चतुष्टयम् तस्याग्निहोत्रं स्वर्गाय इतरे नरकाय च ॥ महापातकसम्प्राप्ते प्रायश्चित्तं यदिच्छसि । याचयेच्छ्रोत्रियस्यान्नं तदभावे जलं पिबेत् अङ्कोलकर इत्युपनामकवाग्भट्टात्मजगणेशभट्टेन लिखितं स्वार्थं परोपकारार्थं च रामप्रसन् ब[4]; शके १७३५ श्रीसुखनामसंवत्सरे फाल्गुनवद्य १ तद्दिने इदं पुस्तकं समाप्तम् क ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अनुक्रमणिका:

(क) सूत्र-सूची

[अत्र सूच्यां सूत्राणि वर्णानुक्रमेणोपन्यस्तानि । तानि क्रमेणाध्यायखण्डसूत्राङ्कपृष्ठाङ्कैः सङ्केतितानि]

अ

अक्रातामक्रतेति यथार्थम् (१, ९, ३) ८०
अग्न आयूंषि पवस° (२, ३, २९) १४५
अग्न आयूंषि पवस° (२, ८, १२) १८७
अग्न आयूंषि पवसे° (२, १, २०) १३१
अग्न आवहेति तु प्रथम° (१, ३, ७) ३५
अग्नावनुगतेऽन्त° (३, १४, २३) ४०४
अग्नाविष्णू सजोषसेमा° (२, ८, ३) १८४
अग्नाविष्णू सरस्वती° (२, ८, २) १८४
अग्निं प्रत्येयादग्ने° (२, ७, १०) १८०
अग्निं सोममित्याज्यभागौ (१, ३, ८) ३६
अग्निं होत्रायावह° (२, १९, ८) २६६
अग्निः पथिकृत् (३, १०, ११) ३५५
अग्निः पवमानः सर° (२, १२, ६) २०९
अग्निः प्रथमो वसु° (२, ११, १२) २०६
अग्निः सोमः सविता° (२, १६, १०) २४०
अग्निः सोमो वरुणो° (२, ११, २-३) २०३
अग्निः स्वस्तिमान्° (२, १०, ७) १९७
अग्निः स्विष्टकृत्° (२, १९, २५) २७२
अग्निमग्नीषोमाविति° (१, ३, ९) ३६
अग्निमन्यनादि° (२, १७, १३) २५२
अग्निरिन्द्रो विश्वे देवा° (२, १४, ५) २१५
अग्निर्ज्योतिष्मान्° (३, १२, २८) ३८३
अग्निर्घामच्छन्मरुतः° (२, १३, ५) २१२
अग्निर्वसुमान् सोमो° (२, ११, ११) २०६
अग्निर्वृत्राणि जङ्घन° (१, ५ २९) ६१
अग्निर्व्रतभृत् (३, १२, १३) ३७६
अग्निषु समिघ° (२, ५. १०) १५९
अग्निहोत्रं शरशरा° (३, ११, १९) ३७०
अग्निहोत्रमधिश्रितं° (३, १०, ३१) ३६३
अग्निहोत्राय काले° (३, १४, १४) ४००
अग्निहोत्राऽहोमे च (२, ५, १५) १६१
अग्नीन्द्राविन्द्राग्नी° (२, ९, १३) १९४
अग्नी रक्षांसि सेधति (२, १२, ४) २०९
अग्नीषोमयोः स्थान° (१, ३, १०) ३६
अग्नीषोमाविमं सु मे° (३, ८, १) ३३९
अग्नीषोमीयं पौर्ण° (१, ३, १३) ३७
अग्ने वा दाशुषे° (३, १३, १४) ३८९
अग्ने नय सुपथा राये° (३, ७, ५) ३३४
अग्ने बाधस्व वि° (२, १३, ८) २१३
अग्नेः समिदसि तेजो° (३, ६, २७) ३३०
अग्ने रक्षा णो अंहसः° (२, १०, ६) १९७
अग्ने वीहीत्यनुवषट्° (२, १६, १५) २४२
अग्ने वीहीत्यनुवषट्° (३, ९, ४) ३४७
अग्न्याधेयप्रभृतीन्या° (१, १, २) ९
अग्न्याधेयम् (२, १, ९) ११७
अग्रेणाऽऽहवनीयं° (२, ४, १७) १५१
अघ्न्यमघ्न्यं पूर्णतमं° (२, ३, १३) १३९
अङ्कधारणा च (१, १, ९) १३

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अङ्गुष्ठोपकनिष्ठि° (१, ३, ३१) ४५
अजायमाने त्वेतस्मि° (२, १६, ४) २३७
अञ्जनाभ्यञ्जन° (२, ६, ११) १६९
अत ऊर्ध्वं वाग्यत° (१, १२, १६) ९९
अत ऊर्ध्वं जपेद् भूपतये° (१, ४, ९) ४९
अत ऊर्ध्वमाहिताग्निः° (२, २, ७) १३०
अत ऊर्ध्वमिष्ट्ययनानि° (२, १४, १) २१५
अत एवैके प्रणयन्ति° (३, १२, २४) ३८१
अतिप्रणीते वा (२, ७, १५) १८१
अतिसृष्टो गूरिळा° (२, ३, १२) १३९
अत्यन्तं तु गतश्रियः (२, १, ३६) १२७
अथ काम्याः (२, १०, १) १९५
अथ प्रजाकामो राकां° (१, १०, ६) ८५
अथ ब्राह्मणः (१, १२, १) ९४
अथ व्रीहियवानां धा° (२, ९, १२) १९३
अथ समापयेद् घृतव° (१, ४, ११) ५०
अथ सामिधेन्यः प्र वो° (१, २, ७) २५
अथ स्विष्टकृतः पिप्रीहि° (१, ६, २) ७०
अथाग्नेय्य इष्टयः (३, १३, १) ३८५
अथास्या उत्तानमञ्ज° (१, ११, ८) ८९
अथास्या ऊधसि च° (३, ११, ३) ३६४
अथास्या योक्त्रं° (१, ११, ३) ८७
अथैतदाज्यं जुहुयात्° (३, १२, १८) ३७९
अथैतस्य समाम्नायस्य° (१, १, १) १
अथैनमनुप्रहरेदाहं° (१, १२, ३६) १०७
अथैनमभिसमा° (२, १९, ३६) २७४
अथैनां कुशैः प्रक्षाल्य° (२, ४, १३) १४९
अथैनानुपतिष्ठेत नमो° (२, ७, ७) १७९
अथैनान् प्रवाहयेत्° (२, ७, ९) १७९
अथैनामुत्थापयेदुद° (३, ११, २) ३६४
अथैनां पूर्णपात्रात्° (१, ११, ७) ८८
अथोत्तरां तूष्णीं° (२, ३, १८) १४१
अदितिः (२, १, २८) १२४
अदृष्टादेशे नित्ये (२, १, ८) ११७
अधिके तृचं सर्वत्र (१, १, १९) १८
अधिश्रितमवज्वलयेत् (२, ३, ३) १३५
अधिश्रितेऽन्यस्मिन्° (३, १२, ११) ३७६
अध्यर्धामुक्त्वाऽवस्येद्° (१, २, २०) २९
अध्रिगवे प्रेष्योपप्रेष्य° (३, २, १०) २९९
अध्रिगुं होतोहन्न ह्वा° (३, २, ११) २९९
अध्रिग्वादिविरुक्त्वा° (३, ३, ४) ३०८
अध्वर्य उपह्वयस्व° (२, १६, १८) २४४
अध्वर्युप्रेषितो° (३, २, ४) २९३
अध्वर्युर्वा यथा° (२, १४, १५) २१९
अध्वे प्रमीतस्याग्नि° (३, १०, १७) ३५८
अनधिगच्छन्° (२, १४, २६) २२४
अनधिगम आग्नेयी° (२, १४, २७) २२४
अनधिश्रयं दध्यग्निष्टे° (२, ३, ४) १३५
अनभ्यासमेके (३, १, ११) २८५
अनवानं प्रेष्यति° (३, ६, १५) ३२६
अनशनमाऽन्यस्मात्° (३, ११, १७) ३६९
अनादेशे (१, १, १३) १५
अनावृत्यानतिप्रणीत° (२, १९, ३१) २७४
अनुगमयित्वा° (३, १०, १६) ३५७
अनुगमयित्वा चाऽऽह° (३, १२, ७) ३७४
अनुदितहोमी° (२, २, ८) १३१
अनुपस्थिताग्निश्चेत्° (२, ५, ७) १५७
अनुयाजानां सूक्त° (२, १६, १३) २४१
अनुवाक्यां च संप्रैषे° (३, १, २२) २९१
अनुवाक्यालिङ्गविशेषा° (१, ५, ३३) ६४

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अन्तरा च याज्यानु° (१, ५, ३६) ६६
अन्तरेण हविषी° (१, ३, १२) ३६
अन्तरेणाङ्गुष्ठमङ्गुलीश्च° (१,७, ४) ७४
अन्तस्थानु तां तामनु° (१, २, १७) २९
अन्तेवासी वा (२, ४, ४) १४७
अन्यतरावोषे व्या° (३, १०, २५) ३६१
अन्यतरा पुरस्तात् (३, १, ६) २८१
अन्यत्र द्विदेवतात् (३, ६, ५) ३२२
अन्यत्र विसृष्टवाग° (१, १२, ३०) १०३
अन्यत्राऽपि यत्रा° (२, १७, ११) २५१
अन्यत्राऽप्यनावाहने° (२, १८, ६) २५८
